CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संस्कृतगीतिकाव्यानुचिन्तनम्

5334

लेखक
डॉ० नेमिचन्द्र शास्त्री
एम० ए० (संस्कृत, हिन्दी तथा प्राकृत एवं जैनोलौजी),
पी-एच० डी०, डी० लिट्०

सुशीला प्रकाशन, धौलपुर

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संस्कृतगीतिकाव्यानुचिन्तनम्

5334

लेखक
डॉ० नेमिचन्द्र शास्त्री
एम० ए० (संस्कृत, हिन्दी तथा प्राकृत एवं जैनोलौजी),
पी-एच० डी०, डी० लिट्०
अध्यक्ष, संस्कृत-प्राकृत-विभाग, एच० डी० जैन कालेज, आरा
मगध विश्वविद्यालय

मुख्य वितरक
चौखम्बा संस्कृत सीरिज
पो० बा० नं० ८, वाराणसी
चौखम्बा विद्या-भवन
चौक, वाराणसी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रकाशक
सुशीला प्रकाशन
खरंजा रोड
धौलपुर (राजस्थान)

प्रथम संस्करण
दिसम्बर १९७०

मूल्य : अजिल्द दस रुपये
सजिल्द ग्यारह रुपये

मुद्रक
बाबूलाल जैन फागुल्ल
महावीर प्रेस
भेलूपुर, वाराणसी–१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समर्पणम्

गुरुर्हीरालालो बुधसदसि जैनो जयति यः,
गुरुर्यः कैलासो विलसति सचन्द्रश्च विदुषाम् ।
तयोश्श्रद्धासिक्तं कर-कमलयोरर्पितमिदम्,
कृतित्वं यत्किञ्चिद् भवतु चिर प्रीत्यै सुमनसाम् ।।

नेमिचन्द्रशास्त्री

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्राक्कथनम्

'मागध' नाम्न्यां पत्रिकायां तत्संपादकस्य श्रीनेमिचन्द्रशास्त्रिणो वहवो विचारात्मकनिबन्धा अस्माभिः पठिताः; अनुभूता च तत्र स्पष्टा तदीया वैदुषी, विषयानुशीलशक्तिः, प्रतिपादनप्रौढिश्च। विशिष्य वस्तुविश्लेषण-विपयोल्लेखादिभिरर्थ्या पुष्टा अनुपहतप्रसरा च तस्य गद्यशैली परमात्रर्जयति स्म नो मानसम्। अतश्च यदायं नः प्रार्थयत स्वलिखितस्य नूतनस्य कस्यापि प्रवन्धस्य अस्मदामुखोक्तिप्रदानाय, तदा न व्यलम्वत नो मनः सम्मतिप्रदाने।

नेमिचन्द्रशास्त्रिणो नूतनोऽयं ग्रन्थो नूतनमेव विषयं विशदीकर्तुमुत्सहते। पाश्चात्यकाव्यसंप्रदाये 'लिरिक्' इति यत्प्रथते, स एवात्र विचारविषयः। आङ्ग्लसाहित्यवासनावासितान्तःकरणैः भारतीयैः कविभिः स्वस्वप्रान्तीयभाषासु पाश्चात्य-लिरिक्-छायानुसारिणः काव्यवन्धाः प्रणीताः, येषां तत्तत्प्रान्ते तत्तन्नूतननामकल्पनेन व्यवहारः प्रवर्तितः, यथा तेलुगुसाहित्ये 'भावकवित्वम्' इति, हिन्दीप्रपञ्चे च 'गीतिकाव्यम्' इति। यद्यपि प्राचीनैरालङ्कारिकैः वहुशाखं काव्यजातिविभजनं कृते, तथापि नैतादृशः कोऽपि भेदस्तैश्चिन्तितः। तत्र मुख्यो हेतुः 'लिरिक्'-नाम्ना प्रसिद्धेषु पद्यगुम्फेषु किमप्यनुगतं लक्षणं वक्तुं न शक्यते। भावो वा रसो वा सर्वस्यैव काव्यस्य मूलभूतः। गीतियोग्यत्वं गेयस्यैवासाधारणं लक्षणं भवति, अथवा सर्वस्यैव पद्यवन्धस्य साधारणं लक्षणं भवति। न च शृङ्गारस्यैव तत्र मुख्यत्वं, यतः करुणपरिस्पन्दानामपि तादृशव्यवहारो भवति। तथापि वैयक्तिकरीत्या भावावेशनिर्गलितानां स्फुटरसप्रतीतिसुभगानामाञ्जस्येन हृदयस्पृशां केषांचिद् वाग्विलासानां तेन 'लिरिक्'-नाम्ना निर्देशः संभवतीति स्पष्टमेवैतद् आधुनिकानां सहृदयानाम्।

तथा च संस्कृतसाहित्येतिहासवर्णनप्रवृत्तैः कीथ्प्रभृतिभिः पाश्चात्यविद्वद्भिः 'लिरिक्'-नाम्ना व्यवहृतानि कानिचन संस्कृतकाव्यानि। विषयमेनमादाय श्रीनेमिचन्द्रशास्त्री पुस्तकेऽस्मिन् पञ्चभिरध्यायैः स्वीयं परिशीलनं प्रवर्तयति। प्रथमतः प्रतीच्यैः पण्डितैः प्रत्तं 'लिरिक्'-लक्षणमुपन्यस्य तत्पृष्ठपातिभिराधुनिकैर्हिन्दी-वङ्गीयादिभाषासाहित्यकारैर्वि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वृतं तत्स्वरूपमुपवर्णितम् । ऋग्वेदे दृश्यमाना एतच्छायावत्यः ऋचः, ततः परं रामायणे दृष्टास्तादृशाः सन्दर्भाः, कालिदासस्य ऋतुसंहारो मेघदूतश्च, अन्यकवीनां दूतकाव्यानि, अमरुभर्तृहरिभल्लटादीनां शतकानि, आर्यासप्तशती, गीतगोविन्दम्, तदनुसारीणि गीतकाव्यान्तराणि तत्तन्नाटक-नाटिका-प्रकरणगताः तादृशाः श्लोकाः, स्तोत्राणि इत्येताः काव्यभेदाः क्रमशः परीक्षिताः । भावप्रधानस्यास्य काव्यमार्गस्य प्राकृतगाथासु बौद्ध-थेर-थेरीगाथासु सप्तशत्यादिसंग्रहान्तर्गतगाथासु च मूलं सोदाहरणं विचारितम् । प्रसङ्गाद् गेयशास्त्रस्य मनाक् परामर्शः कृतः । अन्ते च एतादृशकाव्येषु प्रतिफलिता सामाजिकी परिस्थितिः कलाविनोदानां परिस्फूर्तिश्च प्रदर्शिते ।

सर्वमिदं पूर्वोक्तप्रकारेण सौष्ठवोपपन्नया गद्यशैल्या समुपन्यस्तमिति निबन्धा श्रीमान् नेमिचन्द्रशास्त्री अस्मत्साधुवादभाजनं भ्राजते । येयं योग्यतास्य प्रकाशितासु कृतिषु स्पष्टा, सा तमितोऽपि महत्तराय साहित्यकार्याय प्रेरयत्वित्याशासानः

मकरसङ्क्रान्तिः }
मद्रास् }

वे० राघवः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आमुखम्

विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम् ।
प्रवर्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती ।।

—किरातार्जुनीयम् ।१४।३

अयि गीर्वाणवाणीपरिचरणपरायणाः सत्साहित्यपरिशीलनयापितलक्षणा विलक्षणभावाऽवगाहनपूतधिषणा सहृदयाः विद्वज्जनाः ! तत्र भवतां-भवतां श्रीमतामतिरोहित एषोऽर्थो यद्वाङ्मये समीक्षासाहित्यस्य कीदृशं स्थानमिति । राजशेखरेण कथितम्—

काव्येन किं कवेस्तस्य तन्मनोमात्रवृत्तिना ।
नीयन्ते भावकैर्यस्य न निबन्धा दिशो दश ।।

—काव्यमीमांसा, चतुर्थ, अध्याय, पृ० ३४, पटना-संस्करणम्

भावकस्योपकुर्वाणा भावयित्री । सा हि कवेः श्रममभिप्रायञ्च भावयति । तया खलु फलितः कवेर्व्यापारतरुरन्यथा सोऽवकेशी स्यात् ।

सर्वेषां समीक्षकाणामिदमभिमतं यत् करोत्युपकारमालोचकस्य भावयित्री प्रतिभा, अनया विना कविताकामिनी निष्फला अपरूपा च भवति । अलौकिकसारस्वतप्रभारते सकलभूखण्डलबुधसम्मते पुरातनभारते स्मरणातीतकालादेव काव्यवितानमालोचकैरेव कृतम् । अनेनैव हेतुना राजशेखरः कविकलाकारापेक्षया तत्त्वाभिनिवेशिनं समीक्षकं महत्त्वपूर्णं श्रेष्ठतरञ्च मन्यते । समीक्षयैव साहित्ये समाहितानन्तसौन्दर्यस्य यथार्थाभिव्यक्तिः जायते ।

अन्यदपि विचारणीयं विद्यते यत् सत्स्वप्यनादिनिधनकाव्येषु विज्ञानराशिनाशितान्धकारेष्वपि संस्कृतवाङ्मयेषु समीक्षायाः सूत्रपातो राजशेखरादेव भवति । आभरतादापण्डितराजं काव्यस्वरूपं विस्तृतं जातम्, परं समीक्षाशास्त्रस्य बीजवपनं राजशेखरेणैव कृतमितत्यत्र न मनागपि संशीतिलेशः पदमाधास्यति सहृदय-हृदयप्राङ्गणेषु । औचित्यवादिनश्चास्य व्यावहारिकरूपं दत्तवन्त इति समीक्षाशास्त्रकोविदैः स्वीकृतम् ।

आलोचनाशब्दः—आङ् + √लुच् + ल्युट् संयोगेन निर्मितो जातः । आसमन्तात् लोचनमवलोकनमित्यालोचनम्—स्त्रियामालोचनेति सिद्ध्यति । जगतीतले कर्मप्रकाशेन सह भावप्रकाशनमपि चलति । तेन वाह्यजगत् हृदयरससिक्तं भूत्वा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आभ्यन्तरजगतःवस्तुत्वमाप्नोति। काव्ये अस्यैवान्तर्जगतोऽभिव्यञ्जनाऽङ्किता भवति। आलोचनया भाषा-रस-अलंकार-गुणदोषाणां विवेचनमात्रं नापेक्षितमपि तु मानव-हृदयस्य जीवनमूल्यस्य चोद्घाटनमप्यावश्यकमस्ति। सर्वाङ्गीणकाव्यसौन्दर्यस्य विश्लेषणंविवेचनञ्चालोचनाशास्त्रे समाहितं मन्यन्ते जनाः।

चिन्तकानामभिमतमस्ति यत्सृष्टिप्रतिक्रियाभ्यन्तरे समाहिता नैतिकता, सौन्दर्यविज्ञानं, कलात्मकमूल्यं, जीवनदर्शनं, वैयक्तिक-सामाजिकतथ्यानां विश्लेषण-मालोचनान्तर्गतमेवायाति। अस्य मन्तव्यस्य पृथक्करणेन प्रतिफलति यदाधुनिक-प्रकाशे व्याख्यातस्य समालोचनस्याधुना संस्कृतकाव्ये प्रवेशोऽपि नाभवत्। अतएवा-धुनिकजीवनमूल्यानां काव्यभावनानां काव्यात्मकप्रक्रियाणाञ्चोहापोहनं संस्कृतवाङ्-मयस्य समीक्षापद्धत्तौ सम्मिलितमस्ति। तेनालोचकस्यगुरुतरदायित्वनिर्वाहणार्थ-मालोचनायाश्शैली अतीव सरला, स्पष्टा, भावाभिव्यञ्जका च भवितव्या। विकट-समस्यन्तपदावल्यां निबद्धालोचना रसालङ्कारसीमापर्यन्तमेव सकुञ्चिता वर्तते। परं वर्त्तमानयुगेऽत्वालोचनाऽतीव विस्तृता बहुविषयसमाविष्टा सौन्दर्यरागबोधस्योद्घाटिका चास्ति, तेन नव्यशैल्यां लिखिता समालोचनाऽतीव सरला युगानुरूपा च भवितव्येति।

गीतिकाव्यमवलम्ब्य लिखितेयं समालोचनासमस्यन्तपदावल्यां ग्रथितास्ति। गीतिकाव्ये क्षणिकभावावेशत्वात् कस्यापीतिवृत्तस्याथवा वस्तुनः आश्रयग्रहणं विना केवलाया एकस्या एव भावनाया अभिव्यक्तिः स्वाभाविकी वर्त्तते। संस्कृतवाङ्मय एकभावनाभिव्यक्तिक्षमाणां रचनानां प्रणयनमभूत्, परन्तु तासां नामकरणं पृथक् नाभूत्। एतादृशीनां रचनानां प्रमुखविशेषता गेयतत्त्वस्यास्ति। संस्कृतकाव्यस्य प्रत्येकपद्यं गेयमस्ति, तेन गेयतत्त्वस्य सद्भावः सर्वत्र संजायते। परं सर्वाणि काव्यानि गीतिकाव्यसंज्ञया नालङ्कृतानि। गीतिकाव्यकृते त्वावश्यकसिद्धान्त आत्मनिष्ठ-तास्ति। यासु रचनासु गेयतया रसपेशलतया च सहात्मनिष्ठता तिष्ठति, ता एव गीतिकाव्यश्रेणीषु गण्यन्ते।

आधुनिका आङ्गलहिन्दीसाहित्यसमालोचकाः गीतस्य गीतेर्वाऽर्थं हृदयस्य रागात्मिकाया भावनायाः छन्दोबद्धस्वरूपेण प्रकटीकरणमिति मन्यन्ते। तन्मते गीति-काव्ये वह्नौ धूमस्येवाथवा दध्नि घृतस्येव रागात्मकतायाः ध्वन्यात्मकतायाः वा सत्ताऽऽवश्यका वर्त्तते। एतेनायाति यत् कापि रचना या कवेरात्मानुभूतिजन्याभावा-त्मकविचारस्य भावस्य वा युक्ताऽस्ति सा गेयाऽथवात्मनिष्ठतायुक्ताऽपि चेत्तर्हि गीति-काव्येषु परिगण्यते। शास्त्रदृष्टौ केवलं गेयत्वमेव गीतिकाव्यस्य मूलतत्त्वन्नास्ति परं सघनजीवनानुभूतिरभिव्यञ्जनाऽस्य प्राणतत्त्वमस्ति। गीतिकाव्यस्य महत्त्वे न हि तस्य सङ्गीतात्मकत्वं कारणमपि तु रागात्मकत्वमेव तदुत्कर्षाधायकत्वम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अत्रानेकान्तमाश्रित्येदं वक्तव्यं यन्नादसौन्दर्यभावसङ्गीतयोः संसृष्टिरेव गीतिरिति। गीतिकाव्ये सान्द्रभावानुभूतिरभिव्यज्यमाना दरीदृश्यते। कोमलानुभूतिर्यदा परां काष्ठामधिगच्छति तदा स्वत एव गीतं प्रकटीभवति। भावस्य मार्मिकत्वं हि काव्यस्य मूलभूतम्; परं गीतिविषये तु समधिको भावाभिनिवेशोऽपेक्षितः। गीतिकाव्यस्य किल भावकृतत्त्वमेव परिगणनीयमिति न विस्मर्त्तव्यं भवेत्। भावातिरेको गीतेरात्मा। गीतिकाव्यकारा हि रागात्मिकानुभूत्या कल्पताशक्त्या च विषयवस्तूनि भावात्मकानि कुर्वन्ति। एतेन स्पष्टं भवति यद्गीतिकाव्ये विषयो वस्तु वा अनुभूतिसाधनमात्रमिति ज्ञेयम्। नैतावता गीतिकाव्ये बुद्धितत्त्वं सर्वथोपेक्ष्यत इति मन्तव्यम्। बुद्धेः समुचितनियन्त्रणप्राप्त्यनन्तरमेव काव्ये भावाभिनिवेशो भवति। संस्कृते भावानुभूतेः प्रचुरताकारणात् गीते स्वतः पूर्णतायाः स्वयंसंवेद्यतायाश्च गुणौ प्रविष्टौ जायेते। वस्तुनआधारभूमौ अङ्कुरिता स्वयंसंवेद्यता भावस्योन्मुक्तवातावरणे विकसिता भूत्वा स्वमधुरसौरभं विकिरति। अतएव स्पष्टमस्ति यत् भावान्वितिः गीतिकाव्यस्यैका प्रमुखा विशेषतास्ति। संस्कृतस्यालङ्कारशास्त्रिभिः भावान्वितये विशेषबलं दत्तम्। गीतिविषये संस्कृतगीतरसिकानामाचार्याणामभिमतमिदं दृश्यते—

स्वरतालग्रामभेदरागरागाङ्गभूषितम्।
संस्कृतं वा प्राकृतं वा गीतं गीतविदो विदुः॥

गीतिकाव्यविषये लिखितमिदमपि विचारणीयम्—"गीतिकविता मूलतः स्वर और वाणी का एक सन्तुलित समन्वय है। यों तो संगीत सदा काव्यात्मक वाणी और काव्य सदा नाद-सौन्दर्य का आग्रही रहा है; परन्तु गीत संगीततत्त्व-प्रधान और काव्य वाणी-प्रधान ही होता है। चूँकि गीतिकविता संगीत के बजाय काव्यकुल की है, इसलिए उसमें वाणी की मुख्यता ही अपेक्षित है[1]।"

एतेन स्पष्टं भवति यत् काव्यक्षेत्रे शास्त्रीयसङ्गीतपद्धतेः प्रश्रयविरहित्वेऽपि संगीतरहितं काव्यं न हि कदापि संस्कृतकवेः कल्पनापथमवतरति। परञ्च काव्यानुषक्तं संगीतशास्त्रात्किञ्चिद्भिन्नपद्धत्या छन्दः शास्त्रतया विकासं प्रपेदे। अतोनैतद्वक्तुमुचितं यदाधुनिकेऽर्थे स्वात्मनिष्ठत्वगेयत्वस्वतःस्फुरितसहजानुभूतित्वादिगुणसंवलितानां 'गीतकाव्यसंज्ञितानां रचनानां संस्कृतवाङ्मये सर्वथाऽभावोऽस्ति। वेदोपनिषदादिरचनानां गीतिकाव्यस्य भावसमत्वं सिद्ध्यत्येव। आदिकाव्यं रामायणन्तु महर्षेर्वाल्मीकेः क्रौञ्चद्वन्द्वविरहोद्दीप्तस्योद्दामशोकस्यैव श्लोकत्वभूतं गीतिरूपम्। अस्मिन् काव्ये प्रगाढानुभूतितरलानां रसपेशलानाञ्चोक्तीनां प्रकृष्टं प्राचुर्यम्।

---

१. आलोचना, राजकमल प्रकाशन, जनवरी १९५३ ई०, अंक ६, पृष्ठ १०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लवकुशाभ्यां गीतमिदं काव्यं गीतिसंज्ञामावहति। महाभारते चैतिहासिकविषयसत्त्वेऽपि नास्ति गेयसन्दर्भशून्यता।

थेरगाथा-गाथासप्तशती-वज्जालग्गं-मेघदूत-पवनदूत-पार्श्वाभ्युदय-नेमिदूत-शतकत्रय-मयूरशतक-भल्लाटशतक-चौरपञ्चाशिका-आर्यासप्तशती-शृङ्गारतिलक-अमरुकशतक-गीतगोविन्द-रामगीतगोविन्द-गीतवीतराग-गीतगौरी-गीतगिरीशादिगीतिकाव्यान्युत्कृष्टानि सन्त्येव। संस्कृतसाहित्ये गीतिकाव्यस्य प्रादुर्भावः लोकगीतादेवाभवत्। अनेनैव कारणेन संस्कृतकाव्यशास्त्रे गीतिकाव्यस्य विवेचनपरम्परा पृथक्काव्यांगत्वेन नैवोपलभ्यते। आबाल्यादन्तपर्यन्तं भारतीयजीवने गीतानामस्तित्वं सिद्धचति। नैकोऽपि जीवनस्यैतादृशः पक्षोऽस्ति, यः गीतशून्यो विद्यते। विविधोत्सवपर्व-युद्ध-विवाह-उपनयनाद्यवसरेषु गीतगायनप्रथा प्रचलिता दृश्यते। ग्रामीणाः जना अपि श्रम-क्लान्ति-क्लेशापनोदार्थं गीतानि गायन्ति चित्तमनुरञ्जयन्ति च। लोकगीतानां प्रभावमादाय गीतगोविन्दादिकाव्यानां रचना जाता। अतएव स्पष्टमस्ति यच्छिष्टगीतिकाव्यस्य संरचना लोकगीतिकाव्याश्रयेणैव पल्लविता विकसिता च बभूव। महापण्डितराहुलसांकृत्यायनेन लिखितमस्ति—

"सच्ची प्रतिभा-सम्पन्न जनकविता के समक्ष शिष्टों की कविता सूर्य के सामने दीपक-सी होती है। इसकी गवाही वे सहृदय पाठक दे सकते हैं, जिन्होंने भोजपुरी के कवि बिसराम के बिरहों को सुना है अथवा राजस्थान के पँवाड़े, पाबूजी का अवलोकन किया है। पाबूजी की पत्नी सोढीजी और उनकी भाभी जिस वक्त अपने पतियों के साथ सती होने की तैयारी करती हैं, उस स्थल को पढ़ते समय एक-एक पंक्ति पर पाठकों को आँसू रोकना मुश्किल हो जाता है। यह सहज सुन्दर कविता है। सहज सौन्दर्य रखनेवालों के लिए अलंकारों की कोई आवश्यकता नहीं होती—इसे यह कविता बताती है। इससे यह भी मालूम हो जाता है कि काव्य का जन्म लोककण्ठ में होता है और वहीं से शिष्टों के बीच इसका विकास होता है। कविता का प्राण रस है और इस रस का सहज रूप में समावेश लोककाव्य में पाया जाता है।"[१]

अतएव स्पष्टमस्ति यत हृदयतारल्यं काव्याधीनम्। तच्च लोककण्ठेऽपि मिलति तेन गीतिकाव्यस्य प्रमुखस्रोतसो लोकगीतिकाव्येषु स्वीकरणे न कोऽपि विवादः। लोकभाषायां सुन्दरतमाः गीतयः उपलभ्यन्ते। विक्रमोर्वशीयनाटके लोकगीतीनां रसपूर्णः समावेशः दृश्यते। यथा—

---

१. अवन्तिका सन् १९५४ ई०, अंक १ पृ० ७६।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चिंतादुम्मिअमाणसिआ, सहअरिदंसणलालसिआ।
विअसिअकमलमणोहरए, विहरइ हंसी सरवरए ॥—विक्र० ४।४

सहचरीदर्शनलालसाचिन्ताव्याकुलितमनसा हंसी विकसितमनोहरकमल-संयुक्तसरोवरे विहरति।

अग्रे कविः वर्णयति यत् सरोवरे हंसीयुगलं प्रियसहचरीदुःखालीढमविरल-वाष्पजलार्द्रं भूत्वा ताम्यति। यथा—

सहअरिदुक्खलिद्धअं, सरवरअंभि सिणिद्धअं।
अविरलवाहजलोल्लअं, तम्मइ हंसोजुअलअं ॥—विक्री० ४।३

एकस्मिन्गीते पुरूरवा मेघं प्रति उपालम्भति। स गायति—

जलहर संहर एहु कोपइं आढत्तओ, अविरलधारासार दिसामुहकंतओ।
ए मइं पुहवि भमंते जइ पिअ पेक्खिमि, तव्वे जं जु करीहिसि तं तु सहीहिमि ॥
वि० ४।१९

भो जलधर! अधुना त्वं स्वक्रोधं संहर, यतः मम प्रिया मम निकटे नास्ति, अनेन कारणेनैव मम महती वेदना सम्भवति यदाऽहं पृथिव्यां भ्रमित्वा स्वप्रियां लप्स्ये, तदा त्वं यत्करिष्यसि तत् सर्वमहं सहिष्ये।

अस्मिन् गीते नृपस्यान्तरिर्कभावनायाः चरमोत्कर्षः दृश्यते। अतएव लोक-गीतेषु गीतितत्त्वस्य पूर्णतया विद्यमानत्वाच्छिष्टगीतिकाव्यस्य विकासस्रोतः लोक-गीतिकाव्यमिति समीक्षकाणान्न तिरोहितम्।

पञ्चाध्यायेषु विभक्तमिदमनुचिन्तनं गीतिकाव्यविवेचनात्मकमस्ति। प्रथमाध्याये गीतिकाव्यस्य स्वरूपविश्लेषणं, गीतितत्त्वानि, तेषामन्वयनं गीतिकाव्यप्रक्रिया, गीति-काव्यभेदाः, गीतिकाव्यस्य विकासात्मकमितिवृत्तं निबद्धम्। द्वितीयाध्याये संस्कृत-गीतिकाव्यस्य प्रादुर्भावनिरूपणानन्तरमृग्वेदे समाहितगीतीनां विवेचनं कृतम्। अस्मिन्नेवाध्याये महाकाव्य-गीतिकाव्ययोरन्तरं प्रतिपादितम्। गीतिकाव्यस्य तुलना गिरिनिर्झरेण भवति, नाटकस्य प्रवहमाणया समतलसरिता तथा महाकाव्यस्य गुरुगम्भीरसागरेण तुलना क्रियते। यथा गम्भीरसागरेऽपि यदाकदोत्तुंगतरंगाणामु-न्मुक्तनृत्यं गिरिनिर्झरस्यादम्यप्रवहणशीलतां तिरस्करोति, तथैव क्वचित् महाकाव्य-कलेवरेऽपि तादृशानां स्थलानां समावेशो जायते, यानि शक्तिमत्याः अन्तःप्रेरणायाः प्रतीकानि सन्ति तथा प्रबन्धकाव्यापेक्षया गीतिकाव्यस्याधिकनिकटे सन्ति।

तृतीयाध्यायेऽन्यविधासु समाहितानां गीतीनां विवेचनानन्तरं प्रमुखगीति-काव्यानामध्ययनं सम्पादितम्। संस्कृतनाटकेषु भाषादृष्टौ द्विप्रकाराः गीतयः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्राप्यन्ते—(१) 'संस्कृतगीतयस्तथा (२) प्राकृतगीतयः। नाटकेषु गीतीनां योजना कथाप्रसंगानुकूला क्रियते, परमनेकगीतयः स्वतन्त्ररूपेणापि प्रयुज्यन्ते। रसाभिव्यक्तिकृते एतादृश्यो गीतयः प्रसंगनिरपेक्षाः भवन्ति। कुशलनाटककारः स्वनाटकेषु गीतीनामवतरणमवश्यं करोति, अन्यथा तस्य स्थापत्यं त्रुटिपूर्णं जायते।

कलात्मकगीतिकाव्येषु मेघदूत-गीतगोविन्द-रामगीतगोविन्द - गीतवीतरागादीनामनुचिन्तनं लिखितम्। अत्र काव्यमूल्यं संगीतमूल्यञ्चोद्‌घाटितम्!

चतुर्थाध्याये संस्कृतगीतिकाव्यस्यादानविचारानन्तरं प्रदानस्यानुचिन्तनं विहितम्। हिन्दीभाषायाः प्रबन्धात्मकगीतयः संस्कृतगीतिभ्यः प्रभाविताः सन्ति। हिन्दीभाषायाः रीतिकालीनकविभिः कालिदासअमरुक-भवभूति-जयदेव-गोवर्धन-जिनसेनप्रभृतिभ्यः श्रृङ्गारप्रेम्णोः भावसामग्री गृहीता। छायावादयुगीनहिन्दीगीतिकाव्येषु संस्कृतगीतिकाव्यस्य पर्याप्तः प्रभावः दृश्यते। काव्ये ऽस्मिन् भावदृष्टयाध्यात्मिकमिलनविरहयोः, संसारस्य नित्यतानित्यतयोः, जीवनदर्शनस्य, लौकिकप्रणयस्य चाभिव्यञ्जना जाता। निराला-पन्त-महादेवीषु सङ्गीतचेतनायाः वैशिष्ट्यं तालोपरि निर्भरमस्ति, परमिदं वैशिष्ट्यं संस्कृतगीतिकाव्यादेवागतमस्ति। सङ्गीतपारिजात-रागतरङ्गिणी-सङ्गीतरत्नाकर-सङ्गीतसमरसारादिसङ्गीतग्रन्थानां प्रभावः हिन्दीकविषु वर्त्तते।

पञ्चमाध्याये सांस्कृतिकमूल्याङ्कनं निबद्धमस्ति। यतो संस्कृतगीतिकाव्यस्य पूर्णतो मूल्याङ्कनं तदैव सम्भवमस्ति, यदा काव्येन गीतिमूल्यैश्च सह सांस्कृतिकमूल्याङ्कनमपि क्रियेत। काव्येषु भारतीयसंस्कृतेरविरलधारा प्रवाहिता भवति। तस्याः धाराया अध्ययनाभावे संस्कृतकाव्यानामनुशीलनमपूर्णमेवास्ति। जीवनमूल्यानां तन्मूल्यदृष्टीनाञ्च विवेचनं परमावश्यकम्। संस्कृतिरेवासत्यात् सत्यं तिमिरात् प्रकाशं मृत्योरमरत्वमनैतिकतायाः नैतिकतां भौतिकताया अध्यात्मवादं शारीरिकसौन्दर्यादात्मिकसौन्दर्यं मानवं गमयति। अतएवास्मिन्नध्याये संस्कृतगीतिकाव्यानां प्रवृत्तिमूलकंवर्गीकरणं विधाय, तत्क्रमेण विश्लेषणं विवेचनञ्च कृतम्। संस्कृतकाव्याध्ययनार्थमस्याध्यायस्यातीवावश्यकता उपयोगिता च वर्त्तते।

अनुष्ठानेऽस्मिन्ननेकैः विद्वद्भिः सहयोगः प्रदत्तः। अतएव तान् प्रति कृतज्ञताप्रदर्शनं परमावश्यकमतीवोचितञ्च। सर्वप्रथममेतद्ग्रन्थप्रस्तावनालेखकविद्वत्तल्लज-'प्रो० डॉ० वी० राघवन' महोदयान् प्रति प्रणतिं निवेदयामि। लब्धप्रतिष्ठाः विश्रुतकीर्त्तय इमे महानुभावाः संस्कृत-समाजे समालोचकरूपेणातीव समादृताः सन्ति। मम मनसि विश्वासो वर्त्तते यदेतेषां विदुषां प्रास्ताविकेनावश्यमेवास्यानुचिन्तस्य मूल्यवृद्धिर्भविष्यति। अत एवैभ्यो भक्तिभावनापुरस्सरं साधुवादाः निवे-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्यन्ते। वाराणसेयसंस्कृतविश्वविद्यालयस्य दर्शन-प्राकृत-विभागीयाध्यक्षमहोदयं श्रीमदमृतलालशास्त्रिणं प्रति धन्यं वदामि, येनास्य ग्रन्थस्य पाण्डुलिपिरवलोकिता स्वाभिमतञ्च दत्तम्। काशीहिन्दूविश्वविद्यालयान्तर्गतसंस्कृतमहाविद्यालयस्य जैन-दर्शनबौद्धदर्शनप्रवाचकं (रीडर) डॉ० प्रो० श्रीदरबारीलाल कोठिया महोदयं प्रति कृतज्ञतां निवेदयामि। अनेन महानुभावेनास्य ग्रन्थस्य प्रकाशनाय यथेष्टं योग-दानं कृतम्। महावीरप्रेससंचालकं श्रीमन्तं बाबूलाल 'फागुल्लं' प्रति कृतज्ञभावं समर्पयामि। अस्य महानुभावस्य कृपयैवायं ग्रन्थः समये प्रकाशितः, अन्यथाऽस्य प्रकाशनं न जाने कदाभविष्यत्।

आरास्थ-हरप्रसाददास-जैनमहाविद्यालयस्याङ्गलविभागस्याद्वितीयश्रीमन्तं विद्वान्सं प्रो० श्रीजगदीशपाण्डेयं प्रति श्रद्धा-भक्ति समर्पयामि।। अयं महानुभावः सरस्वत्याः प्रियतमः पुत्रोऽस्ति, अस्य क्षीणकलेवरे ज्ञानपरमाणूनां सान्द्रता विद्यते। अनेन विदुषाऽस्मै ग्रन्थग्रथनाय बहुमूल्यः परामर्शो दत्तः। अतएवास्मै साधुवादं ददामि।

अन्ते 'प्रो० डॉ० रामनाथ पाठकः 'प्रणयी'–प्रो० डॉ० राजाराम जैनः'-इति द्वाभ्यां महानुभावाभ्यां मङ्गलकामनां करोमि। इमौ महानुभावौ ममानुजतुल्यौ स्तः, अतइमौ प्रति अभ्युदयकामनातिरिक्तन्नास्त्यन्यावलम्बनम्।

भोलाभवन,
१, महाजन टोली,
आरा

नेमिचन्द्रशास्त्री

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयसूची

प्रथमोऽध्यायः १–२९

गीतिकाव्यस्वरूपम् १

राइसमतानुसारेण गीतिकाव्यतत्त्वानि २

हुडसनाभिमतगीतिकाव्यतत्त्वानि ३

महादेवीमतानुसारेण गीतिकाव्यम् ४

गीतिकाव्यस्य प्रमुखतत्त्वानि ५

संस्कृतगीतिकाव्ये गीतितत्त्वानामन्वयनम् ५

रसात्मकता १०

भावान्वितिः ११

सङ्गीतात्मकता १३

संक्षिप्तता १६

अन्तःप्रेरणा १७

संस्कृतगीतिकाव्यस्य विशेषता १९

स्वच्छन्दवादिन्याः प्रवृत्याः गीतिकाव्यतत्त्वानि २२

उदात्ततत्त्वानि २३

संस्कृतगीतिकाव्यस्य भेदाः २४

प्रबन्धात्मकगीतिकाव्यस्वरूपम् २४

मुक्तके गीतिकाव्यतत्त्वानां समाहारः २५

मुक्तककाव्यस्य भेदाः २६

गीतिमुक्तकस्य भेदाः विश्लेषणञ्च २७

द्वितीयोऽध्यायः ३०–६९

संस्कृत-गीतिकाव्यस्योत्पत्तिः विकासश्च ३०

ऋग्वेदगीतीनां भेदाः स्वरूपाणि च ३१

रामायणे गीतितत्त्वम् ३५

महाभारते समाहितं गीतिकाव्यम् ३७

गीतिकाव्यप्रबन्धकाव्ययोरन्तरम् ३८

कालिदासस्य गीतिकाव्यम् ४१

ऋतुसंहारस्य गीतिकाव्यत्वम् ४५

घटकर्परस्य गीतिकाव्यत्वम् ४६

पवनदूतस्य गीतिकाव्यत्वम् ४८

नेमिदूतस्य गीतिकाव्यत्वम् ४९

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नेमिदूते गीतिकाव्यगुणाः	५०
भर्तृहरेः गीतिकाव्यानि	५१
शतकत्रये गीतिकाव्यगुणाः	५१
विजयाङ्कायाः गीतिकाव्यम्	५४
शृङ्गारतिलकस्य गीतिकाव्यत्वम्	५५
अमरुकशतकस्य गीतिकाव्यत्वम्	५६
पञ्चाशिकायाः गीतिकाव्यत्वम्	५९
आर्यासप्तशत्याः गीतिकाव्यत्वम्	६१
गीतगोविन्दस्य गीतिकाव्यत्वम्	
तृतीयोऽध्यायः	**६६–१४०**
नाटकेषु संस्कृतगीतयः	६६
नाटककारभासस्य गीतयः	६७
कालिदासनाटकेषु गीतयः	६८
मुद्राराक्षसस्य गीतयः	७३
मृच्छकटिकस्य गीतयः	७४
हर्षवर्द्धननाटकेषु गीतयः	७६
भवभूतिनाटकेषु गीतयः	७९
अन्यनाटकेषु गीतिकाव्यम्	८०
स्तोत्रगीतिकाव्यम्	८१
मेघदूतानुचिन्तनम्	८४
मेघदूतस्य काव्यमूल्यम्	८७
मेघदूतस्य गीतिकाव्यत्वम्	९२
पार्श्वाभ्युदयानुचिन्तनम्	९६
पार्श्वाभ्युदयस्य काव्यमूल्याङ्कनम्	९८
पार्श्वाभ्युदयस्य गीतितत्त्वम्	१०२
अमरुकशतकानुचिन्तनम्	१०४
अमरुकस्य काव्यमूल्यम्	१०७
अमरुकस्य गीतितत्त्वम्	११०
गीतगोविन्दस्य विश्लेषणम्	११३
काव्यमूल्यं गीतितत्त्वञ्च	११६
रामगीतगोविन्दानुचिन्तनम्	११८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

काव्यमूल्यं गीतितत्त्वञ्च १२३
गीतिगिरीशम् १२६
गीतवीतरागस्य विश्लेषणम् १२६
गीतवीतरागस्य काव्यमूल्यम् १२९
गीतवीतरागस्य गीतितत्त्वम् १३५

चतुर्थोऽध्यायः **१४१–१७४**

वागुत्पत्तिः १४१
संस्कृतगीतिकाव्यस्यादानविश्लेषणम् १४२
संस्कृतगीतिकाव्योपरि थेर-थेरीगाथानां प्रभावः १४४
वज्जालग्गस्य प्रभावः १४८
मेघदूतोपरि प्राकृतगाथानां प्रभावः १५०
अमरुकशतकोपरि गाथासप्तशत्याः प्रभावः १५४
भर्तृहरेः शतकत्रये प्राकृतगाथानां प्रभावः १६०
आर्यासप्तशत्यां प्राकृतगीतीनां प्रभावः १६२
संस्कृतगीतिकाव्यस्य प्रदानम् १६९

पञ्चमोऽध्यायः **१७५-२३६**

संस्कृतेः परिभाषा १७५
सांस्कृतिकाध्ययनार्थं संस्कृतगीतिकाव्यस्य वर्गीकरणम् १७६
प्रारम्भिकसंस्कृतगीतिकाव्यस्य सांस्कृतिकविश्लेषणम् १७६
[भौगोलिकनिर्देशः, उत्तराधिकारः, समाजव्यवस्था, परिवारव्यवस्था, सम्पत्तिः, आजीविकासाधनम्, शिल्पः, व्यापारः, मुद्रा, भोजनम्, पानम्, आभूषणम्, मनोविनोदः, रोगाश्चिकित्सा, राज्यव्यवस्था, शासनञ्च ।] १७६-१९०
प्रबन्धात्मकगीतिकाव्यस्य सांस्कृतिकविश्लेषणम् १९१
[ग्राम्यजीवनम्, सामाजिकजीवनं, नारीणां स्थितिः, नारीशिक्षा, आहारः, पानम्, वेशभूषा, आभूषणम्, क्रीडाविनोदौ, भौगोलिकनिर्देशाश्च ।] १९१–२०७
स्वतन्त्रगीतिकाव्यस्य सांस्कृतिकविवेचनम् २०७
अमरुकशतकादीनां सांस्कृतिकविश्लेषणम् २०८–२१८
तालबद्धगीतिकाव्यानां सांस्कृतिकमूल्यम् २१९
गीतगोविन्द-रामगीतगोविन्द-वीतरागादीनां सांस्कृतिकविश्लेषणम् २२०–२२८

परिशिष्टाः **२२९-२५४**

अनुचिन्तने समागताः ग्रन्थाः ग्रन्थकाराश्च २२९
अनुचिन्तने समाहिताः काव्यकलात्मकाः पारिभाषिकशब्दाः २३६
अनुचिन्तने समाहिताः व्यक्तयः देवताश्च २४२
अनुचिन्तने समागतानां देशनगरग्रामवनपर्वत नदीनां नामानि २४५
अनुचिन्तने समाहिताः सांस्कृतिक शब्दाः २४७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संस्कृतगीतिकाव्यानुचिन्तनम्

प्रथमोऽध्यायः

उत्थानिका

संस्कृतालङ्कार-शास्त्रिभिः 'गीति'-नाम्ना कापि पृथक् काव्य-विधा न स्वीकृता। संस्कृते रस-महत्तया काव्यस्य सर्वस्वरूपेण 'रस' एवाङ्गीकृतः। रसविहीनायाः वैचित्र्य-प्रधानरचनायाः गणना मध्यमकाव्ये विहितास्ति। ध्वनि-प्रधानं काव्य-मुत्तमं गण्यते। तत्राप्यसंलक्ष्यक्रमव्यंग्यस्य प्राधान्यमस्ति। वस्तुतो यस्मिन् भाव-विशेषस्य सघना, निर्बाधा तथैकतानानुभूतिर्भवेत्, तदेव काव्यं विद्यते। प्रबन्ध-काव्येष्वनेकप्रकाराणां भावानामभिव्यक्तिर्भवति, परन्तु मुक्तकेषु लघुकलेवर-रचनासु च केवलैकस्यैव भावस्याभिव्यक्तिः सम्भवास्ति। क्षणिकभावावेशे कस्या-पीतिवृत्तस्याथवा वस्तुन आश्रय-ग्रहणं विना केवलाया एकस्या एव भावनाया अभिव्यक्तिः स्वाभाविकी वर्त्तते। संस्कृत-वाङ्मय एकभावनाभिव्यक्तिक्षमाणां रचनानां प्रणयनमभूत्, परन्तु तासां नामकरणं पृथक् नाभूत्। एतादृशीनां रचनानां प्रमुखविशेषता गेयतत्त्वस्यास्ति। एवं तु संस्कृतस्य प्रत्येकपद्यं गेयमस्ति, किन्तु पृथ्व्यनुष्टुबादिच्छन्दांस्येतादृशान्यपि सन्ति, येषु गेयतापेक्षाकृताल्पास्ति। महा-काव्येषु प्रबन्धकाव्येषु वा वर्णनवैविध्यकारणात् वस्तुनिष्ठतायाः स्वर उच्चैरभवत्। अतएव प्रबन्धात्मककाव्यानि गीतिकाव्यसंज्ञया नालङ्कृतानि। गीतिकाव्यकृते त्वावश्यकसिद्धान्त आत्मनिष्ठतास्ति। यासु रचनासु गेयतया रसपेशलतया च सहात्मनिष्ठता तिष्ठति, ता एव गीतिकाव्य-श्रेणीषु गण्यन्ते।

गीतिकाव्यस्वरूपम्

एतत्पूर्वमेव लिखितं यत्संस्कृत-काव्य-शास्त्रिभिः गीतिकाव्यस्वरूपनिर्धारणं नाकारि। अरस्तुनापि केवलं गीतिकाव्यस्य नामोल्लेखं कृत्वा त्यक्तम्। हिन्दी-साहित्यकोशे गीतिकाव्यस्य स्वरूपनिर्धारणप्रसङ्गेऽभिहितम्—"गीतिकाव्यं हृदयस्य तद्गम्भीरभावावेशस्य परिणमन मस्ति, यत् सहजोद्रेकेण प्राकृतिकवेगेन च सह निःसरति। तीव्रभावापन्नतायाः कारणात् गीतिकाव्येऽसौ गुणः सर्वाधिको विद्यमानो भवति, यस्मात् तत् रसात्मकं सरलमैन्द्रियं भावावेशपूर्णं तथा सबल-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भावानां स्वतः प्रवर्तितः प्रवाहोऽथवा कल्पनाद्वारेण रुचिरमनोवेगानां सर्जकं कथ्यते ।[1]"

'इन्साइक्लोपीडिया ऑॅव ब्रिटेनिका' नाम्नि ग्रन्थे गीतिकाव्यस्य स्वरूप-निर्धारणं कुर्वता कथितम्—"सापेक्षदृष्टिः संकीर्णदृष्टि र्वा कविः स्वव्यक्तित्वेनाभिभूतो भवति । अतः स्वतन्त्रचरित्राणामवतारणायामसमर्थो जायते । तस्य पात्राणि तस्यैव व्यक्तित्वस्य भारं वहन्ति । अन्यशब्देषु वक्तुं शक्यते यत् स प्रकारान्तरेण स्वस्यैव चित्रणं करोति, निरपेक्षदृष्टिः पूर्णदृष्टिर्वा कविः स्वाभिन्नपात्राणां सृष्टिं करोति, यस्य व्यक्तित्वं स्वतन्त्रं भवति । गीतिप्रवृत्तेर्मूलाधार आत्मवादोऽस्ति ।[2]"

उल्लिखितकथनेन स्पष्टमस्ति यत्, गीतिकाव्ये आत्मनिष्ठतायाः समावेश आवश्यकोऽस्ति । अस्माकं दृष्ट्या गीतिकाव्य आत्मनिष्ठतया सह स्वपरतायाः वैयक्तिकतायाः सद्भावोऽप्यावश्यको विद्यते । वस्तुतः कविः वैयक्तिकभावधारायै तथानुभूत्यै तदनुरूपां लयात्मिकामभिव्यक्तिं ददाति । गीतं तत्पूर्णसमग्रक्षणानां वाण्यस्ति, येषां स्थितौ ते क्षणाः पूर्णाः समग्राश्च प्रतीयन्ते । वैयक्तिकतया सहाबाधकल्पनायाः, असीमभावुकतायाः, विशुद्धभावात्मकतायाः तथा निष्कर्षोपलब्धेः मुक्तायाः भावधारायाः गीतिकाव्ये समावेश आवश्यकोऽस्ति ।

पाश्चात्यविदुषा अर्नेस्ट राइसेन गीतिकाव्य-परिभाषां निर्दिशता कथितम्—'गीतं तदेवास्ति, यस्मिन् भावस्य भावात्मकविचारस्य वा भाषायां स्वाभाविको विस्फोटो भवेत् । यत् शब्दलययोः सामञ्जस्येन सूक्ष्मभावमभिव्यक्तं कुर्यात् तथा यस्य पदलालित्येन शब्दमाधुर्येण च एतादृशः संगीतमयो ध्वनिः निःसरेत्, यः स्वाभाविको भावात्मकोऽभिव्यक्तिरूपोऽभिधीयते । गीतिकाव्यस्य शब्दाः सरलाः कोमलाः नादपूर्णाश्च स्युः, गीतस्य तेषु प्रवाहः स्यात्, अनुभूतेः सुन्दरावारोहावरोहौ स्याताम्, माधुर्ययुक्ताः स्युः, प्रसादपूर्णाः भवेयुरेवं स्पष्टाः स्युः ।[3]"
राइसमहोदयस्य परिभाषायाः विश्लेषणेन निम्नलिखितानि तत्त्वानि निष्पद्यन्ते—

१. भावात्मकता ।
२. शब्दलययोः सामञ्जस्यम् ।
३. संगीतात्मकता ।

---

१. हिन्दी-साहित्य-कोश, ज्ञानमण्डल लिमिटेड, वाराणसी, वि० सं० २०१५, पृ० २६२
२. इनसाइक्लोपीडिया ऑॅव बिटेनिका, भाग १८, पृ० १०७
३. इन्साइक्लोपीडिया ऑॅव बिटेनिका, भाग १४, लीरिक १७४६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

४. माधुर्यम् ।
५. प्रवाहः ।
६. स्पष्टता ।
७. वैयक्तिकताथवात्मनिष्ठता ।

हडसन महोदयानुसारं गीतिकाव्येऽनुभूतेः साफल्यमौचित्यञ्चापेक्ष्येते । भाषा-भावयोः सामञ्जस्यं तद्विशेषता विद्यते । कस्या अपि एकस्या एव चित्तवृत्तेरभि-व्यक्तिकारणात् संक्षिप्तता तदीयः स्वभावोऽस्ति । तदीयकलेवरलाघवं घनीभूत-भावस्य सान्द्रतामेव व्यनक्ति । कलाचमत्कारश्च तदधीनतायाः द्योतको भवति । कविः स्वान्तः-प्रदेशे प्रविश्य वाह्यजगत् स्वान्तःकरणे गृहीत्वा तत्स्व-भावैः रञ्जयति । गीतिकाव्य आत्माभिव्यञ्जनं गेयमधुरपदानां सन्निवेशेन भवति । सुकोमलभावनैकैकस्मिन् पदे पूर्णा भूत्वा विरमति ।[1] हडसन महोदयस्य विचाराणां विश्लेषणेन गीतिकाव्ये निम्नलिखितत्त्वानां सदभावः दृश्यते—

१. आत्माभिव्यञ्जनम् ।
२. भावमयता ।
३. गेयता ।
४. माधुर्यम् ।
५. शव्दचयनमथवा शव्द-साधना ।
६. संगीतात्मकता ।
७. सुकोमलभावना ।

पाश्चात्यविदुषामाधारे नव्यभारतीयचिन्तकैरपि गीतिकाव्यस्य स्वरूपनिर्धारणं कृतम् । आचार्य श्यामसुन्दरदासः लिखितवान्—"गीतिकाव्ये कविः स्वान्तःकरणे प्रविशति तथा वाह्यजगत् स्वान्तःकरणे नीत्वा तत्स्व-भावैः रञ्जयति । आत्माभि-व्यञ्जनसम्वन्धिनी कविता गीतिकाव्ये लघु-लघुगेयपदानां मधुरभावापन्नात्म-निवेदनेन युक्ता स्वाभाविकी प्रतीयते । कविस्तस्यां स्वान्तः स्पष्टतया द्रष्टव्यं विदधाति । स स्वानुभवैः स्वभावनाभिश्च प्रेरितः तेषां तासां वा भावात्मका-भिव्यक्तिं करोति" ।[2]

डा० भगीरथमिश्रः गीतकाव्यस्य स्वरूपोपरि विचारं कुर्वन्नुक्तवान्—कवितायाः

---

२. इन्ट्रोडक्शन टू दी स्टडी ऑव लिटरेचर पृ० १२६–१२७

१. आचार्य श्यामसुन्दर दास (हिन्दी गीतिकाव्य में श्री ओमप्रकाश अग्रवाल द्वारा उदधृत) ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुख्यप्रेरणा आत्मानुभूतिरस्ति तथा सैव यदा स्वाभाविकगतिमयासु तथा गेयस्वर-लहरिषु स्फुटा भवति तदा गीतिर्जायते। गीतिकाव्यस्य रूपद्वयं दृश्यते—शुद्ध-गीतिः प्रगीतमुक्तकञ्च। शुद्धगीतौ स्वानुभूतिनिरूपकाणि गीतानि सन्ति, येषु प्रथमा द्वितीया वा पंक्तिः 'ध्रुव'रूपेण पदे पूर्णे पुनरावृत्तिं याति। प्रगीतमुक्तकेषु तानिच्छन्दांसि सन्ति, येषु स्वानुभूतेः तीव्रं प्रकाशनं संगीतात्मकशब्देषु भवति। ते ललितस्वरेण पठ्यन्ते। शास्त्रीयपद्धतौ बद्ध्वा तेषां गानं भवेन्नवा।"[1]

महादेवीवर्मा सुखदुःखयोः भावावेशमय्याः अवस्थायाः विशेषरूपेण गणित-समाहृत शब्देषु चित्रणमेव गीतिकाव्यं कथयति। गीतं यदि परस्येतिहासमनुक्त्वा वैयक्तिकसुखदुःखयोरभिव्यञ्जनां कुर्यात्, तदा तस्य मार्मिकता सुखदुःखयोर्वस्तु संपद्यते, नात्र संदेहः।[2] एतत्कथनस्य स्पष्टीकरणेन ज्ञायते यद्गीतिकाव्ये तत्त्वद्वयमेव प्रामुख्यं वहति—

१. भावातिरेकता।

२. गणितसमाहृतशब्देषु स्वरसाधना।

गुरुदेवो रवीन्द्रनाथठक्कुरोऽपि गीतिकाव्यस्वरूपोपरि विचारितवान्। तन्मतमस्ति यत् एतद् वाह्यजगत् यदास्माकं चेतनजगति प्रविशति, तदा तदन्यदेव जायते। यद्यपि तस्य रूपं वर्णो, ध्वनिः सर्वेऽपरिवर्त्तितास्तिष्ठन्ति तथापि तेऽस्माकं संवेदनेन, भयेन, विस्मयेन हर्षविषादाभ्यामथान्यैश्च भावैः रञ्जिता जायन्ते। एवं प्रकारेणैतज्जगदस्माकं भावानामनेकगुणैरनुप्राणितं भूत्वास्माकमात्मीयं भवति।[3]

वस्तुतः गीतात्मा भावातिरेक एवास्ति। कविः स्वरागात्मिकयानुभूत्या कल्पनया च विषयमथवा वस्तु भावात्मकं रचयति। यथा सांसारिकवस्तूनि जीवनस्य साध्यानि न सन्ति, साधनमात्राणि वर्त्तन्ते, तथैव गीतिकाव्ये वस्त्वनु-भूतिर्वा साधनमात्रमस्ति। अनुभूतिकारणादेव विभिन्नाः मानसिकप्रतिक्रियाः जायन्ते, यतः गीतिकाव्ये कवेरन्तर्वृत्तिर्वस्तुना विषयेण वा सह स्वानुरूपतां स्थापयति। प्रो० चन्द्रशेखर पाण्डेयः गीतिसम्बन्धे लिखितवान् सुखस्य दुःखस्य वानुभूतिः यदा तीव्रात्तीव्रतमा भवति, तदा तदावेश एवोदात्तानुदात्तध्वन्योः

---

१. डा० भागीरथ मिश्र, साहित्यपरीक्षण में संगृहीत एक लेख, पृ० ५८-५९।
२. डा० गोविन्द त्रिगुणायत द्वारा शास्त्रीयसमीक्षा के सिद्धान्त, द्वितीय भाग में उद्धृत पृ० ३०।
३. विश्वभारती, क्वार्टरली, मई सन् १९३५ ई०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सामञ्जस्येन कविकण्ठात् ये शब्दाः निःसरन्ति, त एव गीतिसंज्ञां लभन्ते। तत्र कवेरेकैव भावानुभूतिः मधुरकोमलशब्दयोः सम्वलेन गीतिप्रधानसरण्यां व्यक्ता भवति।[1]

स्पष्टमस्ति यत् भावानुभूत्या सुसंपृक्ततया गीतौ स्वतः पूर्णतायाः स्वयं संवेद्यतायाश्च गुणाः स्वयमेव समाविष्टाः भवन्ति। भावान्वितिः गीतिकाव्यस्य प्रमुखविशेषता विद्यते। अस्मिन् कोऽप्येक एव रसः समाविष्टो भवति, सर्वे रसाः गीतिकाव्ये एकदा न स्थास्यन्ति।

पूर्वोक्तकथनैः गीतिकाव्यस्य निम्नांकितानि प्रमुखतत्त्वानि निर्णीयन्ते—

१. आत्मनिष्ठताऽन्तर्वृत्तेः प्रधानता वा।
२. संगीतात्मकता।
३. निरपेक्षता पूर्वापरसम्बन्ध-विहीनता वा।
४. रसात्मकताथवा रंजकता।
५. भावातिरेकता रागात्मिकानामनुभूतीनां सान्द्रता वा।
६. भावसान्द्रता।
७. चित्रात्मकता।
८. समाहितप्रभावः।
९. मार्मिकता।
१०. संक्षिप्तता।
११. सरलता स्वाभाविक्यभिव्यक्तिश्च।
१२. सहजान्तःप्रेरणा।

संस्कृतगीतिकाव्ये गीतितत्त्वानामन्वयनम्

संस्कृतगीतिकाव्येषु नान्तर्वृत्तेस्तादृशी प्रधानता प्राप्यते यादृशी पाश्चात्यगीतिकाव्येषु। एतत्सत्यमस्ति यत् गीतिकाव्ये सुखदुःखयोः रागद्वेषादिकयो र्वा सरसाभिव्यक्तिर्भवति तथा प्रबन्धापेक्षया वैयक्तिकताया अपि विशेषता लभ्यते। संस्कृतगीतिकाव्येषु वैयक्तिकता कस्यापि नैकस्य व्यक्तिविशेषस्यास्ति, प्रत्युत मानवमात्रस्य विद्यते। रस-प्रामुख्य-कारणात् भावनासु साधारणीकरणं जातमस्ति। यतो वैयक्तिकभावनाः सार्वजनीना अभूवन्। 'गीतगोविन्द'-सदृशे काव्ये भक्तिनिष्ठयोः भावनाः सर्वसाधारणस्य सन्ति। यथा—

---

१. संस्कृत-साहित्य की रूपरेखा पृ० ३२६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

करतल-ताल-तरल-वलयावलिकलित कलस्वनवंशे,
रासरसे सह नृत्यपरा हरिणा युवतिः प्रशशंसे । गीतगोविन्दम् १-४-७

रासस्यैषा भावना कस्या अपि नैकस्याः गोपिकाया अस्ति । एषा तु साधारण्याः वर्त्तते । लीलागानाधारे जयदेवेन काव्यभावनाभ्यस्सान्द्रतां प्रदत्तवान् । एवमेवान्यत्रापि—

सखि हे, केशीमथनमुदारम्,
रमय मया सह मदनमनोरथभावितया सविकारम् । गीतगोविन्दम् ।५।

गीतांशे कस्या अपि नैकस्या उत्कण्ठितायाः भावना वर्त्तते, परन्तु सर्वा उत्कण्ठिताः विह्वलावस्थासु एवं विधानां भावनानामभिव्यक्तिं कुर्वन्ति । एतत्सत्यमस्ति यत् गीतिकाव्ये कवेरन्तर्वृत्तयोऽधिकाः मुखराः भवन्ति, वर्णन-सम्बन्धः यद्यपि केनाप्येकेन जनेन सह वा सर्वसाधारणोभवेत् । गीतगोविन्दस्य प्रारम्भ एव वसन्तर्तोः जातः । एष ऋतुः संयोगिभ्यो वरदानं वियोगिभ्यश्चाभिशापश्रित्रितो वर्त्तते । एकत्र वासन्ती सुकुमारावयवा राधा कन्दर्प-ज्वर-जनितचिन्ताकुला वर्त्तते, तदान्यत्र ललितलवंग-लता-परिशीलन-कोमलमलयसमीरे तथा मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे कृष्णस्य व्रजयुवतिभिःसह विहारश्चरन्नस्ति । एतन्मधुमयवातावरणं जन-जन-मनस्स्वनुरागोत्पादकमस्ति । अतो गीत प्रभावो गीतान्तर्वृत्तिश्च वैयक्तिक्यौ न स्तः प्रत्युत सार्वजनीने स्तः । पाश्चात्यालोचकैः गीतिकाव्यस्य प्रथमतत्त्वं वैयक्तिकत्वं स्वीकृतम् । परन्तत् संस्कृत-गीतिकाव्ये पूर्णतया घटितं न भवति । कविरमरुकः यासां भावनानां निरूपणमन्तर्वृत्याधारे कृतवान्, ता अपि सार्वजनीनाः सन्ति । अत्र वयमुदाहरणार्थमेकस्य नायकस्य स्वप्रियतमां प्रति क्रियमाणस्य (मनुहारस्य) मानहारस्य—प्रसादनस्योदाहरणं प्रस्तुमः-एकत्र शयने विद्यमानस्य प्रियतमस्य मुखात् अन्यस्याः रमण्याः नाम श्रुत्वा खिन्ना प्रियतमा प्रियतमस्योपेक्षां कृतवती तथा स्वग्रीवामन्यदिक्षुविहितवती । नायिकाया अनया स्थित्या व्याकुलः प्रियतमो नानाप्रकारं प्रसादनं प्रारब्धवान् । पद्येऽस्मिन् मानौत्सुक्ययोः समन्वयपूर्णं मनोवैज्ञानिकं चित्रणं कृतं विद्यते । परमेतच्चित्रणं वयमात्मनिष्ठं न मन्यामहे । आत्मनिष्ठमप्येतत् सार्वजनिकमस्ति—

एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया—
सद्यः कोप—पराङ्मुखग्लपितया चाटूनि कुर्वन्नपि ।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणान्—
मा भून्म्लानइवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः ।

—अमरुकशतकम्, २२ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुग्धायाः रोदनादारम्य प्रौढाया अधीरायाश्च पादप्रहारं यावत् अभिव्यक्तासु भावनासु व्यक्ति-वैचित्र्येण सह साधारणीकरणमपि प्राप्यते। अतः संक्षेपेणैतदेव वक्तुं शक्यते यत् संस्कृतगीतिकाव्ये वैयक्तिकता वात्मनिष्ठा नैकाङ्गिन्यस्ति। भावनासु साधारणीकरणस्य वृत्तिर्निहिता विद्यते।

संगीतात्मकता

संगीतात्मकता संस्कृतस्य सर्वेषु गीतिकाव्येषु लभ्यते। ध्वनेः संगीतस्य च साहित्येन जीवनेन च सह घनिष्ठः सम्बन्धोऽस्ति। एतयोः जीवनदायिनी शक्ति र्भवति। अस्य प्रभावश्चिरन्तनः परमव्यापकश्च जायते। संगीतलयानुरूपैव फलप्राप्ति र्भवति। संगीतं मनो मोहयति तथात्मानन्दविभोरो भवति। संस्कृतच्छन्दःसु संगीतं स्वयं समाहितं तिष्ठति। अतः संस्कृतस्य प्रत्येकपद्यं संगीतमयं भवति। संगीतप्रभावः पशुपक्षिभ्यः प्रारभ्य शिवपर्यन्तं जायते। संगीत-रत्नाकरे गीतानाममृततत्त्वस्य वर्णनमायाति। कथितमस्ति यत् पार्वतीशः गीतात् प्रसीदति। गोपीपतिः कृष्णोऽपि वंशीध्वनिवशोऽस्ति, ब्रह्मा सामगीतिरतो वर्त्तते। सरस्वती वीणायामासक्ता विद्यते। यक्ष-गन्धर्व-देव-दानव-मानवाः सर्वे संगीताधीनाः सन्ति। विषयास्वादापरिचितः पर्यंकशायी शिशुरपि गीतामृतं पीत्वा रुदन्नपि प्रसीदति।

आश्चर्यमस्ति यत् गीतमुग्धः सन् वनविहारी तृणभक्षी मृगशिशुः प्राणानपि ददाति। धर्मार्थकाममोक्षाणामद्वितीयं साधनमिदमेकमस्ति। एतदेव कारणमस्ति यत् संस्कृते नादसौन्दर्याय विशेषमहत्त्वं प्रदत्तमस्ति। संगीतरत्नाकरे गीतस्य सर्वव्यापिप्रभावस्य महत्त्वं प्रदर्शयता लिखितमस्ति—

गीतेन प्रीयते देवः सर्वज्ञः पार्वतीपतिः,
गोपीपतिरनन्तोऽपि वंशध्वनिवशं गतः।
सामगीतिरतो ब्रह्मा वीणासक्ता सरस्वती,
किमन्ये यक्ष-गन्धर्व-देव-दानव-मानवाः।
अज्ञातविषयास्वादो बालः पर्यंकिकागतः,
रुदन् गीतामृतं पीत्वा हर्षोत्कर्षं प्रपद्यते।
वनेचरस्तृणाहारश्चित्रं मृगशिशुः पशुः,
लुब्धो लुब्धक-संगीते गीते त्यजति जीवितम्।
तस्य गीतस्य माहात्म्यं के प्रशंसितुमीशते,
धर्मार्थकाममोक्षाणामिदमेवैक - साधनम्।

—संगीतरत्नाकरम्, (आनन्दाश्रमः) पृ० ६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्पष्टमस्ति यत् संस्कृतगीतिकाव्येषु गेयता प्रमुखगुणोऽस्ति। एवं त्वेकं गीतिनामकं छन्दोऽपि संस्कृते विद्यते। यत्रार्याया उत्तरार्धोऽपि पूर्वार्द्धसदृशो भवति, तत्र गीतिच्छन्दो जायते। पूर्वार्द्धोत्तरार्द्धयो र्व्यत्ययेनोद्गीतिच्छन्दो भवति। आर्याया अन्ते एकस्य गुरोः लघोश्च वृद्ध्या—आर्यागीतिच्छन्द एव-मार्योत्तरार्धे पूर्वार्द्ध-सदृशे सम्पन्ने हृचुपगीतिच्छन्दो जायते। एवं प्रकारेण संस्कृत-वाङ्मये लयात्मक-स्वरात्मक-सौन्दर्याधारे गीतिच्छन्दसां कल्पना विहिता विद्यते।

आत्मनिवेदनपरोक्तीनां संस्कृते प्राचुर्य्यमस्ति। ऋग्वेदेऽप्येवंविधा अनेकोक्तयः सन्ति। वस्तुतः संस्कृत-गीतिकाव्यस्य क्षेत्रं पाश्चात्यसमीक्षाधारे निरूपित-गीतिकाव्य-क्षेत्रादधिकं विस्तृतमस्ति। रसतत्त्वेन सह गेयता सर्वेषु गीतिकाव्येषूप लभ्यते। अत्र स्मरणीयमस्ति यत् संस्कृतच्छन्दःसु गेयतायां सत्यामपि तेषां नितान्त-संगीतात्मकता भ्रमपूर्णास्ति। यतः संस्कृत-गीतिकाव्ये काव्य-तत्त्वानां प्रधानता विद्यते। संगीत-सीमायां संस्कृत-काव्यानां वन्धनेन तेषां मूलात्मैव विनश्यति, काव्यतत्त्वस्य च ह्रासो जायते। अत एव संस्कृत-गीतिकाव्ये भाव-प्राधान्यमस्ति। एतत्सत्यमस्ति यत् यदा काचन कविता गायक-हस्ते पतति, तदा तस्याः काव्यत्वं नश्यति। यतः काव्यसंगीतयोः शब्दानां प्रयोगः एकेनैव रूपेण न भवति। संस्कृते गायकः आलापेन वातावरणं सृजति तथा शब्दोच्चारणं संगीता-नुसारं परिवर्तितं विधाय स्वरद्वारेण भावाभिव्यक्तौ तीव्रतामानयति। एतदेव कारणमस्ति यत् भावानभिज्ञोऽपिश्नोता केवलं स्वराणामारोहावरोहाभ्यामानन्दंलब्धुं शक्नोति। किन्तु, कवितायां प्रयुक्तशब्दानां भावबोधः भाषा-ज्ञानस्य पूर्णता-यामेव जायते। यः भाषायाः विभिन्नसरणिमवगच्छति, स एव काव्यानन्दं प्राप्तुं शक्नोति। अतः स्पष्टमस्ति यत् संस्कृतगीतकाव्ये शास्त्रीयसंगीतस्य समावेशः आवश्यको नास्ति।

यदा काव्ये भावसधनता भवति, तदा कविता स्वयमेव संगीतोन्मुखी जायते। संगीत-विकासः प्रणयनिवेदनात्संपद्यते। काव्याभिव्यक्तेः वैशिष्टयं नाद-सौदर्य-मस्ति, एतदेव च भावसंगीतं कथ्यते। एतदेव च गीतिकाव्यस्यावश्यकमंग-मस्ति। संस्कृतस्य सर्वे कवय एतदर्थं सर्तका अतिष्ठन्।

ऋग्वेदादेवच्छन्दः संगीतं प्राप्यते। गेयच्छन्दसां परिधाने गीतिकाव्यस्य सौन्दर्यं विकसति। छन्दोभिः लयविस्तारो जायते। अयं स्वध्वनिना गत्या चार्थं प्रकाशयति। यद्यन्तर्वेगोऽतितीव्रो भवेत् तदा स तत्तीव्रतायां संतुलनमानयति तथान्तर्वेगेऽतिमन्दे सति तमुत्कृष्टं विदधाति। वस्तुतश्छन्दः कवितायाः वाता-वरणं समुपस्थापयति, काव्यात्मिकाया अनुभूतेरभिव्यक्तिं स्थिरां परिभाषिताञ्च

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

करोति, कल्पनामुद्दीप्तां विधाय एवंविधाः दृश्यमानाः श्रोतव्याश्च प्रतिभाः (Images) ददाति, याभिः तासामनुभवाभिव्यक्तिः स्पष्टा प्रेरिका च जायते ।

संस्कृतकवयः छन्दोहीनकवितायाः कल्पनामेव कर्त्तुं न शक्नुवन्ति । छन्दोहीना पदावली गद्यसंज्ञया व्यवह्रियते । संगीतरत्नाकरे कथितमस्ति—"गद्यं निगद्यते छन्दोहीनं पदकदम्बकम् ।[1] स्पष्टमस्ति यत् पद्य-वाचकं छन्दोऽस्ति, अतः छन्दोहीनरचना गद्यं निगद्यते । डा० एस्० एन० दास गुप्त महोदयः संस्कृत-कवितायाः गेयतायाः निरूपणं कुर्वन् लिखितवान्—"संस्कृतकवितायाः गेयता परिचितकर्णयोः एतादृशं सम्मोहनं किरति यत् केवलं समुचितसरण्या कविता-पाठ एव प्रभावोत्पादनाय पर्याप्तोऽस्ति । पाश्चात्यदेशे (यूरोपे) यदा मया केषाञ्चन पद्यानां पाठः कृतः, तदा तेऽपि जनाः, ये संस्कृतेन न मनागपि परिचिता आसन्, संस्कृतपद्यानां मोहकलयेनात्यन्तप्रभाविताः अभूवन् तथाधिकतर-श्रोतृसमुदायः संगीतेन्द्रजालेन सम्मोहितोऽभवत् ।

अत एवैषा स्वीकृतिः तर्कसंगता वर्त्तते यत् संगीतं संस्कृतच्छन्दसां स्वाभाविको धर्मोऽस्ति । संस्कृतकाव्यालोके किमपि काव्यं तदैव गीतिकाव्यं भवितुं शक्नोति, यदा तस्मिन् रसेन सह काव्यबिम्बानां पूर्णतया समावेशो भवेत् । शास्त्रीयसंगीतस्यावश्यकता गीतिकाव्याय नास्ति । हिन्दीभाषायाः सफलगीतिकारः श्रीसुमित्रानन्दन पन्तः छन्दःसंगीतं निर्दिशन्नुक्तवान्—"यथा संगीते सप्तस्वरेषु तथा तच्छ्रुतिषु मूर्च्छनाः केवलं रागाभिव्यक्तये भवन्ति, तथैव कवितायामपि विशेषालंकाराणां लक्षणायाः व्यञ्जनादिविशेषशब्दशक्तीनां तथा विशेषच्छन्दसां सम्मिश्रणेन सामञ्जस्येन च विशेषभावाभिव्यक्तौ साहाय्यं प्राप्यते ।[2]

संस्कृतस्य सर्वे कवयः भावानुसारं छन्दसां प्रयोगविधौ परमसतर्काः अभवन् । भोजस्य कवि-कण्ठाभरणे, क्षेमेन्द्रस्य सुवृत्ततिलके, विश्वनाथस्य साहित्य-दर्पणादिग्रन्थेषु च भाववर्णनानुसारं छन्दसां प्रयोगस्य चर्चा विहिता विद्यते ।

एतदाशय एषोऽस्ति यत् संस्कृतगीतिकाव्ये गेयता भवति, परं शास्त्रीय-संगीतता न भवति ।

'ऋग्वेदादारभ्य' कवि प्रणयनः 'राष्ट्रवाणी'—पर्यन्तं गीतेषु गेयता पूर्णतयोपलब्धा वर्त्तते ।

---

१. संगीतरत्नाकर, पृ० ३०६

२. हिन्दी गीतगोविन्द (विनयमोहन शर्मा) भूमिका, पृ० ६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रसात्मकता

संस्कृत-गीतिकाव्येषु रस-समावेशः प्राप्यते। रसमयकाव्यस्याध्ययनेन चित्त-स्यैकाग्रता भवति तथा तत् निश्चयतां प्राप्नोति। चित्तस्थैर्यमेवानन्दकारण-मस्ति। एष आनन्द एव रसरूपोविद्यते। भरतमुनिः स्वनाट्यशास्त्रेऽभिहित-वान्—"नहि रसादृते कश्चिदर्थः प्रवर्त्तते।"[1] अग्निपुराणे काव्यजीवित-रूपेण रस एव स्वीकृतोऽस्ति—"वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्।"[2] रस-प्रतिष्ठालंकारवादे, वक्रोक्तिवादे, रीतिवादादौ च प्राप्यते। महाकवीनां वाणी रसकारणादेव जीवति। कुन्तकेन व्यलेखि—

> निरन्तररसोद्गारगर्भसन्दर्भनिर्भराः,
> गिरः कवीनां जीवन्ति न कथामात्रमाश्रिताः।[3]

निरन्तररसप्रवाहकसन्दर्भैः परिपूर्णा कविवाणी कथामात्राश्रयेण न जीवितुं शक्नोति। वाणी रसद्वारेणैव स्थायित्वं प्राप्नोति। अत एव गीतिकाव्यकृते रसास्तित्वं परमावश्यकमस्ति। यतो रसानुभूतेरवस्थायां रजोगुण-तमोगुणयोः परि-हारो भवति। रजस्तमोभ्यां प्रेरिताः ममत्व-परत्वभावनाः विलीनाः सद्गुणस्या-नुभवनं कारयन्ति, येनानन्दोद्रेको भवति। एतत् स्मरणीयमस्ति यत् रसानुभूतिः स्थूला भौतिकी च न भूत्वा सूक्ष्माध्यात्मिकी च भवति। रसस्य या समता निर्विकल्प-समाधिना सह क्रियते तत्र याथार्थ्यमस्ति। यतो रसानुभूतावहंकार भावनायाः लोपो भवति तथा निर्वचनीय आनन्द उपलभ्यते।

गीतिकाव्ये विभावादिद्वारेण या रसानुभूतिर्जायते, तस्यां कस्यापि पूर्वापर-सम्बन्धस्य नानुभवो भवति। गीतिकाव्ये कथावस्तुनोऽभावो भवति। अतः सदैव रसानुभूतिः व्यञ्जनाव्यापारेण जायते। तथ्यमेतदस्ति यद्व्यञ्जनावृत्त्या यस्य व्यंगार्थस्य बोधो भवति, स एव रसास्वादन-कारणमस्ति।

गीतिकाव्यस्य रसः प्राणतत्त्वमस्ति, एतस्य स्पष्टीकरणं "क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः" पद्यार्द्धेनापि भवति। संस्कृतस्यालंकारशास्त्रिभिः करुणभाव एव गीतप्रादुर्भावस्य मूलकारणरूपेण स्वीकृतः। मनोविज्ञानदृष्ट्या शोको मनोऽभिभव-कारिकासु वृत्तिषु सर्वाधिकः प्रबलो विद्यते, अतएव भवभूतिः—'एकोरसः करुण एवेति सिद्धान्तस्योद्घोषं कृतवान्। शोको वस्तुतोऽत्रोपलक्षण-

---

१. नाट्यशास्त्रम्, अ० ६

२. अग्निपुराणम्, ३३६। ३३

३. वक्रोक्तिजीवितम् सं० नागेन्द्र, ४। ११ पृ० ४९५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मस्ति। यथार्थंतेयमस्ति यत् यदा कस्यापि कोमलभावस्यानुभूतिः पराकाष्ठामधिगच्छति, तदा गीतं स्वतः स्फुटित्वा निःसरति। साधारणतः काव्यमूले भावस्य मार्मिकतानिवार्यं रूपेणाभीष्टास्ति। गीतिकारस्य क्षेत्र-संकोचत्वात् भावाभिनिवेशस्यावश्यकताधिका प्रतीयते। एषः कस्यापि मूलभूतभावस्याश्रयं गृह्णाति। एतस्मादेव भावविशेषकारणात् स स्वपाठकानुभूतिं तीव्रां करोति। अतएव भावातिरेकः रसविशेषो वा गीतिकाव्यस्यात्मास्ति। कविः स्वरागात्मिकयानुभूत्या कल्पनया च विषयमथवा वस्तु भावात्मकं करोति। यथा सांसारिकवस्तूनि स्वयं जीवनस्य साध्यानि न सन्ति, साधनानि सन्ति; तथैव गीतिकाव्येऽपि वस्तु विषयो वानुभूतेः साधनमात्रमस्ति।

गीतिकाव्ये सत्यामपि रस-तत्त्वप्रमुखतायां एतन्निर्णेतुं कठिनमस्ति यत् कविः अनुभूतेः वस्त्वभिमुखं गच्छति, वस्तुनोऽनुभूत्यभिमुखं वा, यतो यत्रानुभूतिरागे वस्तुरञ्जनं दृश्यते, तत्र वस्तुनानुभूतेः तीव्रतापि दृष्टिगोचरीभवति। परन्त्वेतावत् स्पष्टमस्ति यत् अनुभूतेः चरमावस्थायां वस्तुनः स्वकीयं महत्त्वं किमपि नावशिष्टं तिष्ठति। तद्गौणं भूत्वानुभूत्यनुरूपमेव कार्यं करोति। एतदेव कारणमस्ति यत् अनुभूत्यनुसारमेकस्मादेव वस्तुनो विभिन्नाः मानसिकप्रक्रियाः उत्पद्यन्ते। संयोगावस्थायां शीतलतादायकश्चन्द्रः चन्दनञ्च वियोगावस्थायां पावकतुल्ये दाहके प्रतीयेते। एष आशयोऽस्ति यत् कवेरन्तर्वृत्तिः वस्तुना विषयेण वा सह स्वानुरूपतां स्थापयति तथा विषय-विषयिणोर्भेदः तिरोहितो जायते। तादात्म्यस्थितिकारणात् गीतिकाव्ये रसतत्त्वस्य प्रमुखता मन्यते।

प्रवन्धकाव्ये वर्णन-चमत्कारः पाठकमनुरञ्जयति। तथा कथायाः प्रबन्धस्य वावलम्बनमपि भावमग्नं भवितुं शक्नोति। परं गीतिकाव्ये रागात्मकवृत्तेः सद्भावं विना भाव-विभोरता नोत्पत्स्यते। वस्तु-वर्णनस्य कथायाश्चाभावकारणात् रागात्मकवृत्तीनां सञ्चारस्य क्षेत्रमेव नहि तिष्ठति। अत एव भावमयतोत्पादनकारणात् रसः गीतिकाव्यस्य प्राणतत्त्वरूपेणाङ्गीकृतः[1]।

भावान्वितिः

गीतिकाव्येऽनुभूतिक्षेत्रमेकेनैव मूलभावेनानुप्राणितमस्ति। गीतेः केन्द्रविन्दुः स एव मूलभावो भवति, यस्याः विश्लेषणविस्तारौ कविः गीति-कलेवरे कलयति। पदात्मकेषु रागरागिणीषु वा लिखितेषु गीतेषु केन्द्रस्यास्य स्थितिः 'टेके' 'ध्रुव'—पदे वा भवति। एष सिद्धान्तोऽस्ति यत् संगीते गायकः प्रारम्भिकस्वरालापेनानुकूलं वातावरणं सृष्ट्वा गीतस्य मूलभावस्य पृष्ठभूमिं प्रस्तौति। पश्चात्

१. यतो रसबन्ध एव मुख्यः कविव्यापार-विषयः''''ध्वन्यालोक ३।१९ लोचनम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'टेकरूपे' ध्रुवपदरूपे वा मूलभावं समुपस्थापयति, तदनन्तरं रागविस्तारेण स्वर-तानालाप-साधनैः तं व्यापकोत्कर्षं यावन्नयति। एवमेव कलात्मकगीतेष्वपि 'टेक' स्य भावः गीतस्य विभिन्नचरणेषु विकासमधिगत्य पूर्णतां प्राप्नोति। गीतगोविन्दस्य गीतवीतरागस्य वा गीतानि एवं विधान्येव सन्ति। संस्कृतस्याधिकांश-गीतिकाव्यानि पद्यबद्धानि न भूत्वा छन्दोबद्धानि भवन्ति। 'टेक'स्य प्रश्नो नोत्थितो भवति। एतेषु कस्मिन्नपि पदे वाक्ये वा समस्तभावः समाविष्टो भवति, यथा गानेषु विभिन्नस्वरेषु अनेकं वचो रचयन् गायको विविधभावभङ्गीभिः 'टेकस्य' भावं विकसितं करोति, तथैव संस्कृत-प्रगीत-मुक्तकानां लेखकः कल्पनायाः, शब्द-योजनायाः, ध्वनेरलङ्कारादेश्चाधारेषु तद्भावस्य विस्तारं करोति।

संस्कृते भावानुभूतेः प्रचुरताकारणात् गीते स्वतः पूर्णतायाः स्वयं संवेद्यता-याश्च गुणौ प्रविष्टौ जायेते। वस्तुन आधारभूमौ अङ्कुरिता स्वयं संवेद्यता भाव-स्योन्मुक्तवातावरणे विकसिता भूत्वा स्वमधुरसौरभं विकिरति। अतएव स्पष्टमस्ति यत् भावान्वितिः गीतिकाव्यस्यैका प्रमुखा विशेषतास्ति। संस्कृतस्यालङ्कार-शास्त्रिभिः भावान्वितये विशेषबलं दत्तम्। मुक्तकपद्येषु प्रमुखतैकाधिकरसानां तेभ्यो न रोचते। प्रमुखरसेन सहान्यरसानां समावेशोऽङ्गरूपेण भवितुं शक्नोति।

संस्कृत-गीतिकाव्ये बुद्धितत्त्वपदार्थ-नियन्त्रणशक्तेरभावो भावान्वितेरर्थो नास्ति। यावत् बुद्धेः समुचितनियन्त्रणं न प्राप्यते; तावत् भावावेशः काव्यरूपेण स्थापितो न भवति। कथितमस्ति यत् "यदा बुद्धिः भावापेक्षया गौणा भवति, तदाभिव्यक्तेरुचितसाधनं काव्यं भवति तथा यदा भावो बुद्ध्यपेक्षया गौणो भवति, तदा गद्यं भवति।[1]" निस्सन्देहं गीतिकाव्यस्य सम्बन्धः कवेः रागात्मिकयानुभूत्या भवति। अनुभूतेः चरमोत्कर्षावस्थायामभिव्यक्तिर्न सम्भाव्यते। यथा सरोवरे यावत् लहर्यः उत्पद्यमानाः भवन्ति, तावत्तस्मिन् समतलता नायाति। शान्तासु लहरिषु सरश्शान्तं भवति। एवमेव स्थिरास्वनुभूतिषु काव्यसर्जनारम्भो भवति। यावदनुभूतौ चिन्तनस्य मिश्रणं न भवति, तावत्काव्यप्रादुर्भावो न भवति। एत-देवालङ्कार-शास्त्रिभिः चर्वण-संज्ञयाभिहितम्। तथ्यमेतदस्ति यदनुभूतेरिच्छाशक्तेः

---

1. It has been Said by a living writer that when reason is subsidiary to emotion verse is the right means of expresson, and when emotion to reason, Prose this is roughly true, Though the poetry of mere emotion is poor stuff. John Baill'ys essay on miltion,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बोधवृत्त्यादेश्च मानसशक्तीनां रूपाणि जलवीचिसदृशानि मिश्रितानि तथाऽभिन्नानि सन्ति। व्यावहारिकदृष्ट्या स्युर्नामैतेषु भेदाः, परं तात्त्विकदृष्ट्यैतेषु विच्छिन्नतां विधाय द्रष्टुं न शक्यते। गीतिकाव्येऽनुभूतिः प्रधाना भवति तथेच्छाशक्तिः बोधवृत्तिश्च तदङ्गरूपेणायातः। रागात्मकवृत्तौ बोधवृत्तेः शासनं भवति, परं साधनरूपेणासाववश्यं सहैव तिष्ठति।

एतन्मनोवैज्ञानिकतथ्यमस्ति यद्यदा भावनाया उच्छ्रायो भवति, तदा बोधवृत्तिर्गौणा जायते तथा तस्या अभिव्यक्तौ सहायिका भवति। गीतिकाव्ये रागात्मकवृत्याः प्राधान्यं भवति तथा बोधवृत्तेर्गौणता। भावनाकर्त्तव्ययोः द्वन्द्ववृत्तिरपि जीवनसदृशी काव्ये प्राप्यते। एष संघर्षः रागात्मकवृत्ति-बोधवृत्योः स्तरे सतिसमाने भवति। यदा बोधवृत्तिः रागात्मकवृत्तिसमाने स्तरे क्षणं स्थित्वा पुनः तस्यां लीना भवति, तदा तर्कसञ्चारिणः स्थितिरायाति। बोधवृत्तेः चरमावस्था शास्त्रीयज्ञानरूपेण पर्यवसिता भवति। अचारे नीति-शास्त्रे च बोधवृत्तेः प्रमुखता भवति तथा रागात्मिकानुभूतिः कुण्ठाग्रस्ता जायते। अतो गीति-काव्ये नैतिक्यनुभूतिः स्वस्वतन्त्रव्यक्तित्वेन सह पदार्पणं न करोति, यदि क्वचन नीतिपुटो भवति, तदासौ अनुभूत्याभिभूतो भवति। निष्क्रियबुद्धिवादितायाः भारवहनमनुभूतिवशस्य वार्ता नास्ति।

अनुभूतेः तिस्रः अवस्थाः सन्ति। प्रथमावस्थायां सा स्वविशुद्धरूपे तिष्ठति। अस्यां स्थितौ बोधवृत्तिः प्रसुप्ततया नाभिव्यक्ता भवति। द्वितीयावस्थायां संवेदनस्य प्रथमाघातात् उत्पन्नायां कुण्ठायां शैथिल्यमागच्छति, प्रसुप्तायां बोधवृत्तौ च स्पन्दनं भवति, यतोऽभिव्यक्तेः मानसिकाः शारीरिकाश्च चेष्टाः प्रकटाः भवन्ति। तृतीयावस्थायां सामाजिकप्रतिक्रिया विचारस्य—सामाजिकजनानां सहानुभूतेरथवा विरोधस्योदयो भवति तथा कविः स्ववृत्तेर्नैतिकतायाः, तीव्रतादेश्च ज्ञाता भवति। अतएव स्पष्टमस्ति यत् रागात्मिकावृत्तिः स्वकारणभूतविषयस्य वस्तुनो वा प्रकृतेरपेक्षया तद्द्वारेण मानसजगति समुद्भूतसंक्षोभमेव व्यनक्ति। एतत्सार्वजनीनं सत्यमस्ति यत् यावत् कवेरन्तःक्षोभोऽभिव्यक्तो न भवति, तावत् कविः वस्तुचित्रणे संलग्नो भवति। अस्यां स्थितौ तद्धृदये चित्रात्मकता-प्रसूतस्य प्रसादस्यानुभूतिः स्यान्नाम, अन्तःक्षोभस्य सञ्चारो न भवति। क्षीणान्तः क्षोभस्य शब्दरूपेण मुखरतायाः प्रयत्न एव गीतिकाव्यमस्ति। अतः संस्कृत-गीतिकाव्ये भावान्वितेः समावेशः प्राप्यते।

संगीतात्मकता

गीतिकाव्ये गेयतायाः स्थानमावश्यकमस्ति। एतस्याधाराः—शब्दः, अर्थः,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चेतना, रसात्मकता च सन्ति। शब्दाः यत्र पाठकमर्थस्य भावभूमिं नयन्ति, तत्र नादेन श्रव्यमूर्त्तिविधानमपि कुर्वन्ति। शब्दानां महत्त्वं तद्द्वारेण प्रस्तुतमानसिक-चित्रस्य तथाज्ञापितवस्तुनः सामञ्जस्येऽस्ति। यद्वस्तु चर्मचक्षुभिः द्रष्टुं न शक्यते, तस्यापि कल्पनया मानसचक्षुषां समक्षमेतादृशं चित्रं प्रस्तुतं भवति, यत् स्वसौन्दर्य-स्रोतसि मानवान्तर्निमज्जयति। संस्कृतगीतिकाव्ये छन्दोविधानकारणात् स्वाभा-विकगीतिधाराया अक्षुण्णः प्रवाहः प्राप्यते। एवं तु गीतिकाव्यस्य यथार्थं सौन्दर्यं संगीते नास्ति, भावात्मकतायामस्ति। अङ्कुशरूपे निवासि सङ्गीतं सौन्दर्यविकृतौ साधनं जायते। सति सङ्गीतानुबन्धेऽपि संस्कृतगीतिकाव्येषु या मार्मिकता तथा स्नेहपिच्छिला रसधारा स्तः, तयोः समाहितः प्रभावः मानवीयवृत्तौ निर्बाधः पतति।

छन्दोवद्धताकारणात् संस्कृतगीतिकाव्ये गेयतायाः प्राचुर्यं प्राप्यते। छन्दो-द्विप्रकारकं कथ्यते मात्रिकं वार्णिकञ्च। प्रथमप्रकारकाणि छन्दांसि केवलं स्वरैः सम्वद्धानि सन्ति तथा द्वितीयप्रकारकाणि सार्थकाक्षरैःसम्वद्धानि भवन्ति। द्वितीयप्रकारकाणि छन्दांसि रसानामनेकभावानाञ्चोत्पत्तौ सहायकानि जायन्ते। मानवीयशरीरवीणायां सप्तस्वराःसन्ति, ये सङ्गीतसम्वन्धिवाद्येभ्योऽपि स्वरप्र-दानं कुर्वन्ति। लघुगुरुवर्णानां निहितत्वात् छन्दोभिः गेयतानन्दः प्राप्यते। मधुर-तीव्र-कोमल-स्थानेषु विधिवच्छोभाशीलः कण्ठः सुन्दरः मन्यते। यः स्वरः दूरादेव श्रूयते, स श्रावकोऽस्ति। श्रावकध्वनिः यो मधुरोऽस्ति, परन्तु विस्तृतोनास्ति, स एव 'फल'-संज्ञयाभिधीयते। स ध्वनिः यः श्रावकः सन्नपि कर्कशो न भवेत्, स्निग्धःकथ्यते। तारस्थानेऽपि कण्ठस्वरोऽस्थिरः न भवेत्, तदा मधुरध्वनिर्वक्ष्यते। कण्ठस्यावधानवान्ध्वनिः निरन्तरतया सम्पन्नो भवति। तस्मिन् निरन्तरतापेक्ष्यते। कण्ठात्, मूर्ध्नः तथा नाभेः निःसरन्तः स्वराः त्रिस्थानशोभिताः भवन्ति। अतः छन्दोवद्धतायां सतर्कतायाः समावेशेन मधुर-कोमल-तीव्रध्वनीनां समावेशः स्वतो जायते। भरतमुनिना नाट्यशास्त्रे प्रत्येकच्छन्दसः गेयतायांतस्य माधुर्यभावोपरि च-प्रकाशो दत्तः। अत्र कतिपयमाधुर्य-सौन्दर्य-बोधकच्छन्दःसु प्रकाशः दीयते। यथा—

क्रिया च वर्णेन विशेषणेन,
स्मितेन कान्त्या सुकुमारभावात्।
अमी गुणा रूप-गुणानुरूपा
भवन्ति ते किं त्वमुपेन्द्रवज्रा—नाट्यशास्त्रम् १६।३१

× × ×

चित्रैः वसन्तकुसुमैः कृतकेशहस्ता
स्रग्दाम-माल्यरचना-सुविभूषिताङ्गी।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नागावतंस-विनिभूषित-गण्डपाली
साक्षाद्वसन्त-तिलकेव विभाति नारी। नाट्य ० १६।६५

× × × ×

शीलभ्रष्टे निर्गुणे या प्रकोपा,
लोके धैर्यादप्रियं न ब्रवीपि।
आर्यंशीलं साध्वि हे तेऽनुवृत्तं—
माधुर्यात् स्यात् सर्वथा शालिनी त्वम्। तदेव १६।३७

भरतमुनिः गीतिकाव्याय गेयतायाःतत्त्वं स्वीकुर्वन् 'जाति'—विवेचनं कृतवान्। नाट्यशास्त्रीयोक्तप्रकरणस्याध्ययनेनावगम्यते यत् देशविशेषे प्रचलितःस्वरसमूहःशास्त्रीयरूपेणैकत्र नियमबद्धःकृतोऽस्ति। मातंगः जातेर्व्युत्पत्तिमूलिकांव्याख्यां कुर्वन्नुक्तवान्—

"श्रुति-गृहस्वरादिसमूहाज्जायन्त इति जातयः।"[1]

अर्थात् श्रुतिग्रहस्वरादिसमूहादुत्पन्ना 'जाति' रुच्यते।

अथवा—

"यस्माज्जायते रसप्रतीतिरारभ्यते इति जातयः"

यस्मात् रसाभिव्यक्तिः, अनुरतिर्भवति, सा जातिरस्ति।

जातेः सामान्योऽर्थःसमष्टिरस्ति। जातौ वर्गमहत्त्वं भवति, यो जातिं व्यनक्ति। आशयः एषोऽस्ति यत् कोऽपि विशिष्टः स्वरसमूहः जातिद्योतकः भवितुं शक्नोति। सप्तकस्य यस्मिन् स्वरसमूहे दसलक्षणानि भविष्यन्ति, त एव जात्यभिद्यां प्राप्स्यन्ति। केवलमूर्च्छंनासदृशाः सप्तस्वराः जातिरूपेण न स्वीकृताः भविष्यन्ति। किन्तु स्वरेषु सत्यां नियमबद्धतायामेव स्वरसमूहः जातिः मन्यते। एकस्मिन् स्वरसमूहे एकतातत्त्वे स्थित एव स स्वरसमूहः जातिः कथ्यते।

भरतेन[3] ग्रहांश-तार-मन्द्रन्यासोपन्यासाल्पत्वबहुत्वषाडवत्वौडुवत्वादिदशजातिलक्षणानि स्वीकृतानि। इमानि जातिनिर्माणे प्रमुखतत्त्वानि सन्ति। अर्थात् उक्तलक्षणैर्युक्तः स्वरसमूहः जातिः कथ्यतेऽत एव रसप्रतीतौ सामर्थ्यमुत्पद्यते। नाट्यशास्त्रे उक्तदशतत्त्वानां व्याख्यापि प्राप्यते। एतस्याः व्याख्याया अध्ययनात् निष्कर्षः प्रसूयते यत् स्वरे रसरागयोरारोहावरोहयोः प्रतीतिः 'जाति' द्वारेण

---

१. स्वरसाधारगतास्तिस्रो ज्ञेयास्तु जातयः।
२. मध्यमा पञ्चमी चैव षड्जमध्या तथैव च ॥ नाट्यशास्त्र, २८।३६।
३. ग्रहांशौ तारमन्द्रौ च न्यासोपन्यास एव च, अल्पत्वञ्च बहुत्वंच षाडवौडविते तथा। नाट्य २८।७०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवति । अतएव संस्कृत-गीतकाव्ये गेयतासमावेशः प्राचीनकालादेवप्रचलितोऽस्ति । भावसघनताया अभिव्यज्जना संगीतादेव संभाव्यते । अतएव गीतिकाव्ये संगीत-धर्मः अपेक्षितोऽस्ति नत्वनिवार्यः ।

साधारणतः छन्दोमाधुर्येण सह शास्त्रीय रागरागिण्योऽपि संस्कृतगीतिकाव्ये समाविष्टाः सन्ति । हिन्दीसाहित्यकोशे कथितमस्ति—कविभावावेशः यदा तस्याः कोटेर्भवति, यदा तदभिव्यक्तिर्गीतिरूपेण भवति, तदा तद्भाषायां लयतालयोः नैसर्गिकसंयोगो भवति । प्रथमं गीतिकाव्यस्यैकमात्रं लक्षणं गेयतासीत् । इदानीं गेयता तस्य सर्वप्रमुखं लक्षणं नास्ति, निःसन्देहमेतत् मूललक्षणमवश्यमस्ति तथा स्वपरिवर्त्तितार्थे तस्यानिवार्यलक्षणमप्यस्ति ।[1]

उपर्युक्तोद्धरणेन स्पष्टमस्ति यत् संस्कृतगीति-काव्ये गेयता-सद्भाव एक आवश्यकधर्मोऽस्ति । रस-सञ्चारेऽपि गेयता कारणमस्ति । तन्मयता-स्थितिः गेयताया अभावेऽसम्भवा विद्यते, परं गेयतायाः कारणंकेवलं सङ्गीततत्त्वन्नास्ति, नादमाधुर्यं संगीतेन विनाऽपि सम्भाव्यते ।

संक्षिप्तता

संस्कृतगीतिकाव्ये भावनायाः क्षणिकतायाः, एकतायाः, अन्वितेश्च कारणात् तस्य संक्षिप्ततापि सिद्ध्यति । परन्त्वेतत्संक्षिप्तता-सम्बन्धे निश्चितरूपेण कोऽपि मानदण्डः निर्धारितो भवितुं न शक्नोति । एतस्याकारस्वरूपं भावनायाः पूर्णताया अपूर्णताया उपरि निर्भरं भवति । यदा कदा भावनाया आवेशः एतादृशः क्षणिको भवति, यत् कविः एकस्मिन्नेव पदे पद्ये वा तस्य पूर्णाभिव्यक्तिं करोति । यदा कदा त्वनेकपद्येषु गीतिश्चलन्ती तिष्ठति । याः गीतयः कथानकोपरि आधृताः भवन्ति, तासां गुम्फनमनेकपद्येषु भवति । अत्रैतत्स्मरणीयमस्ति यत् भावनायाः विभिन्न-स्तराः पोषिका अवान्तरभावना अपि पृथक्-पृथक् पद्येषु समाविष्टाः क्रियन्ते । इमानि पद्यानि व्यष्टिरूपेण स्वेषु पूर्णानि तथा स्वतः संवेद्यान्यपि भवन्ति तथा प्रधानानुभूतेः पोषकत्वात् समष्टिरूपेण परस्परं सम्बद्धानि जायन्ते ।

संक्षिप्तता-कारणादेव संस्कृतगीतिकाव्ये सुकोमलभावनानामनुभूतेः प्रचण्डवेगः-तिष्ठति । एष प्रवेगः श्रोतुः मन आप्लावयति, येन सः भावविभोरताया अवस्थां प्राप्नोति । भावविभोरताया अवस्थैव साधारणीकरणस्यावस्थास्ति । साधारणी-करणस्य समस्या गीतिकाव्ये नायाति । गीतिकाव्ये रसनिष्पत्तेः एकं द्वे वाङ्गे विद्य-माने भवतः । अतो रसनिष्पत्तेः सम्पूर्णा प्रक्रियायोजिता न भवति । एतस्याः

१. हिन्दी साहित्य कोशः, पृ० २६८ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न्यूनतायाः परिपूरणाय कविः गीतिरचनायां सुकोमलभावनानां संक्षेपेण नियोजनं करोति। फलतः पाठकमनः भावमग्नं भवति। अल्पकालाय स आनन्दस्या पारसागरे मग्नो जायते तथा रसपानं विधाय अनन्ततृप्तिमनुभवति। अतः संस्कृतकविभिः स्वगीति-काव्येषु मानवभावनानां संक्षेपेणाभिव्यक्तिं विधाय स्वगीतिकाव्यानि प्रभावकानि प्रणीतानि। ध्वन्यालोके आनन्दवर्द्धनः कथितवान् यत् प्रवन्धकाव्यसदृशस्य मुक्तककाव्ये रसनिवन्धनस्याभिनिवेशः प्राप्यते। अतः सत्यामपि संक्षिप्ततायां गीतिकाव्ये रसन्यूनता न जायते। यथा—"मुक्तकेषु प्रवन्धेष्विव रसवन्धाभिनिवेशिनः कवयो दृश्यन्ते। यथा—ह्यमरुकस्य कवे र्मुक्तकाः शृंगाररसस्यन्दिनः प्रवन्धायमानाः प्रसिद्धा एव।"[1]

संक्षिप्तता-कारणादेव समाहितप्रभाव उत्पद्यते। संक्षिप्ततायाः द्वितीयोऽर्थः-भाषायाः समासशक्तिरप्यस्ति। श्रेष्ठगीतिकाव्ये निश्चयतः समाहारशक्त्या सह भाषायाः समासशक्तिरपि प्राप्यते। तात्पर्यमेतदस्ति यत् गीतिकाव्ये कस्यापि रमणीयदृश्यस्य, परिस्थितेः, घटनायाः, वस्तुनो वा चित्रात्मकमेवं भावपूर्णवर्णनं तिष्ठति येन संक्षिप्तरूपेणैवानन्दप्राप्तिर्भवति। उत्तरोत्तरदृश्यैः संघटितपूर्णजीवनस्य तस्य कस्यापि पूर्णांगस्य दर्शनं न भवति, प्रत्युत रमणीयं खण्डदृश्यमेवंप्रकारेण सहसा समक्षमानीयते येन पाठकः श्रोता वा किञ्चित्क्षणं यावत् मन्त्रमुग्धो भवति। मनोरमवस्तुनां व्यापाराणाञ्चैकं लघुस्तवकं प्रकल्प्यात्यन्तसंक्षिप्तायां शक्तिमत्याञ्च भाषायां प्रदर्शनं क्रियते।

वस्तुतो गीतिकाव्यस्य संक्षिप्ततैको गुणधर्मो विद्यते। कविरल्पैः शब्दैः सघनभावनानामभिव्यक्तिं करोति। तथाल्पशब्दावल्यां कस्यापि भावस्य भावात्मकविचारस्य स्वाभाविकं स्फोटं प्रतिपादयति। यदासौ संदिग्धता-सीमायाः पृथक् भवति, तदा गीतिकाव्यसीमा विस्तृता भवति। गेयपदेषु मधुरभावनापूर्णमात्माभिवेदनं संक्षेपेणैव संभाव्यते।

अन्तः प्रेरणा

गीतिकाव्यं कवेरन्तःप्रेरणायाः सहजं समुच्छ्वसितरूपमस्ति। अस्मिन् वस्तुनो विषयस्य वाधारो नाममात्रकृते भवति। एवं तु कवितामात्रमेवान्तः प्रेरणाया उत्पन्नं भवति, परं गीतिकाव्ये विशेषतेयं परमधिका प्रतीयते। अतएव व्यक्तित्वस्य प्रतिफलनस्य सम्भावनाऽस्मिन्नधिका भवति।

संस्कृत-गीति-काव्येऽन्तः प्रेरणा सर्वत्र प्राप्यते। काव्यप्रक्रियया ज्ञायते यत्

---

१. ध्वन्यालोकः ३।४, पृ० ३५५.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मानवः परिस्थितिविशेषे स्वान्तर्जगतः गांभीर्येषु गत्वा कमपि मनोभावं रागरञ्जितं विदधाति तथा यदा 'स्व'-स्मान् निःसृत्य 'पर'-स्मिन् सहानुभूतेः सृष्टिं करोति, तदा स्वेन सम्बद्धो भवति। अस्यां मनःस्थितौ वहिर्जगदप्यन्तर्जगतः भागो जायते तथा रागादनुराग उत्पद्यते। उभयोरपि रूपयोः मनोभावस्य विशेषा प्रक्रियोत्पद्यते तथा येन केनापि रूपेण जीवनेऽन्तर्निहितं सत्यं हृदयस्य संवेदनया सम्बद्धं भूत्वा आकर्षणस्य केन्द्रं जायते।

गीतिकाव्यस्य सृजन-तात्पर्यं कस्यापि महत्त्वपूर्णायाः स्थितेरेतादृशेन प्रस्तुतीकरणेनास्ति, यस्मिन् तस्मै रागात्मकं रूपमेकं प्राप्तं भवेत्। रागः मनुष्यस्य प्रभाववृत्तिरस्ति, या मानवतायाः रक्तेन संचरिता भवति तथा यावन्मानवः मानवोऽस्ति तावत् रागोऽयमस्य संवेदनायाः प्रमुखमङ्गमस्ति। एवं प्रकारेण रागात्मकतयानुरंजितायाः परिस्थितेः स्थायित्वस्यामरतायाश्च सम्भावनां रक्षति। यतो मानवतया सह तदवच्छिन्नः सम्बन्धोऽस्ति। काव्यनिर्माणे दृष्टिद्वयं कार्यशीलं भवति, प्रथमा दृष्टिः सा विद्यते, या सौन्दर्य-मनोभावं गृह्णाति तथा तत्रैव समाप्तिं याति तथा द्वितीया दृष्टिः सा विद्यते या सौन्दर्यस्थाने तदनिवार्यतां तदुपयोगितां वा ध्यायति तथा ज्ञान-विज्ञान-सीमां स्पृशति। उभयोः दृष्ट्योः पार्थक्यमस्ति। सौन्दर्यं स्वविशिष्टाकर्षणेनात्मतृप्तेरात्मसंतोषस्य वाकाङ्क्षां गृहीत्वा स्वस्मिन् पूर्णं जायते। फलतोऽन्तर्जगत् तथा वहिर्जगत् अन्योऽन्यस्मिन् प्रविशतस्तथा तद्भिन्नताऽभिन्नतायाःरूपेण परिलक्षिता भवति। रत्या, शोकेन, हासेनोत्साहेन, क्रोधेन, भयेन, घृणया, आश्चर्येण निर्वेदेन वा केनाप्येकेनानेकैर्वा सम्बन्धं रक्षती नवां दृष्टिमस्मभ्यं प्रदत्तः। एतेषामनुभावानां संस्कारेण सह योगो भवति। अतोगीतिकाव्यस्य प्रणयनं वाह्यप्रेरणया न भवति, एतदर्थमन्तः प्रेरणाया आवश्यकता भवति।

सौन्दर्यस्य पक्षद्वयमस्ति। १ इन्द्रियजनितं सौन्दर्यम्, २ आध्यात्मिकं वा। प्रथमस्य प्रतिफलनं सुखे भवति, द्वितीयस्यानन्दे। सुखस्यानन्दस्य वा स्थूलं प्रतीकं सौन्दर्यमस्ति। अतः सौन्दर्यं स्थूलोत्पन्नस्य सूक्ष्मस्य सहजस्थितिः मन्यते। सुखमिन्द्रियाणां विषयोऽस्ति तथानन्दोऽन्तःकरणस्य। अतो गीतिकाव्यनिर्माता कविराध्यात्मिकसौन्दर्यंगृहीत्वा स्वकाव्यप्रणयनमन्तः प्रेरणया करोति।

क्षणिकानुभूतयः विलीनाः भवन्ति तथा काव्यसर्जनायोपादानप्रदानं कुर्वन्ति। जीवनगतः संघर्ष एव गीतिकाव्यस्य प्रेरणास्रोतोऽस्ति। यदा परिस्थितीनां प्रतिक्रिया जीवनोपरि भवति, तदा काव्यसर्जनं प्रारभ्यते। वनानि, पर्वताः, पाषाणशिलाः, सरितः कूलं तथा कूल-हरीतिमा, लताकुञ्जं प्रसूनादीन्यस्माकमन्तर्जगति भिन्न-भिन्न कार्यव्यापारान् बोधयन्ति। फलतः काव्यनिर्माणायान्तः प्रेरणा प्राप्यते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भावनानां विकसितावस्थायां व्यक्तित्वस्य संकुचिता परिधिः वृद्धिंगता भवति तथा चेतनायां विकसितानन्दानुभूतिर्जायते। अत एव स्पष्टमस्ति यत् मनोभावानां हिल्लोलैर्यदान्तर्जगतः सत्यं बहिर्जगतः सत्यसम्पर्के समागत्यैकां संवेदनां सहानुभूतिं वोत्पादयति, तदान्तः प्रेरणा प्राप्यते तथा गीतिकाव्यस्य प्रणयनं प्रारभ्यते।

संस्कृत-गीतिकाव्यस्य विशेषता:

संस्कृताचार्यैः गीतिकाव्यं काव्यस्य सामान्याख्यायामेव स्वीकृतम्। एतत् संस्कृत-भारत्याः परमरमणीयमंगमस्ति। संस्कृत-गीतिकाव्ये 'मुक्तकम्'—प्रबन्धश्चोभौ प्राप्येते मुक्तकेन तात्पर्यं तथा काव्यविधयास्ति, या सन्दर्भादिबाह्यकारणैर्मुक्ता स्वयं रसपेशला भवति। एतज्ज्ञानाय बाह्यसामग्र्या अपेक्षा न भवति। संस्कृतगीतिकाव्येषु मधुरपदावल्या सह संगीतात्मकच्छन्दसामपि प्रयोगः प्राप्यते। अतएव गेयता कुतोऽपि बाह्यप्रदेशान्नानीयते। एतेषु काव्यतत्त्वेन सहात्मकल्याणस्य परमानन्दस्य च लक्ष्यसत्त्वात् सर्वोत्कृष्टरूपेण गेयता समाविष्टा भवति।

संस्कृत-गीतकाव्ये वर्णनं श्रृंगारस्य, नीतेः, वैराग्यस्य तथा प्राकृतिकदृश्यानामुपलब्धं विद्यते। कोमलभावानां माधुर्यं प्रत्येकरसिकहृदयं स्वाभिमुखमाकर्षयति। एतदेव कारणमस्ति यत् संस्कृतगीतिकाव्यानां बाह्यरूपं यथाभिरामं तथा सुन्दरमस्ति, तथैवाभ्यन्तररूपमपि रसपेशलम्। संस्कृतकविभिः गेयच्छन्दसां परिधाने गीतिकाव्यसौन्दर्यस्य चरमविकासः कृतः। छन्दः-प्रावेक्षण (Anticipation) प्रवृत्तिमुत्तेजितां विधाय शब्दानामन्योन्यं घनिष्ठः सम्बन्धो विहितः। छन्दोविस्मयेन चेतनां मन्दां विधाय मोहनिद्रामानयति तथा व्यञ्जकतायाः तथा संवेदनशीलतायाः वृद्धिं करोति। एतत् स्वध्वनिना गत्याच अर्थप्रकाशनं करोति। यद्यन्तर्वेगस्तीव्रो भवेत्, तदा तत्तत्तीव्रतायां सन्तुलनमानयति तथा यद्यन्तर्वेगोऽतिमन्दो भवेत्, तदा तमुत्कृष्टं करोति। कवितायाः वातावरणोपस्थापनं काव्यात्मकानुभूतेरभिव्यक्तेः स्थिरीकरणं छन्दःप्रधानकार्यमस्ति। एतत् कल्पनामुद्दीप्य दृश्यमानाः श्रोतव्याश्च प्रतिभाः प्रदत्ते।

छन्दोमाधुर्य्येण सह सौन्दर्यस्याप्यनुपमं चित्रणं संस्कृतगीतिकाव्ये प्राप्यते। रमणीसौन्दर्यं संस्कृतगीतिकाव्येषु यावत्या सुन्दरतया स्वाभाविकतया च सह परिस्फुटितं वर्त्तते, अन्यत्र तद्दौर्लभ्यमस्ति। नार्याः हृदयस्य तथा लावण्यस्य रंजितचित्रं सहृदयपाठकानां हृदये प्रमोदसरितः प्रवाहयति। श्रृंगारस्य विभिन्नावस्थानां मार्मिकचित्रणमेतेषु काव्येषु प्राप्यते।

गीतिकाव्येषु नारीप्रेम्ण उदात्ततायास्तथा विशुद्धताया अपि परिचयःप्राप्यते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रेम-संदेशोऽपूर्वः हृदयावर्जकसरण्याञ्च प्राप्यते। अचेतनवस्तुनि चेतनता प्रतीयते। प्रेमप्रसङ्गानां गूढाभिव्यञ्जना सर्वत्र प्राप्यते। अत एव संस्कृतकविभिः नारीहृदयस्यात्यन्तं विशदचित्रणं कृतम्। तैः विम्वविधानेन रमणीयभावसर्जनं विधायैका नवा सृष्टिः प्रदर्शिता। कल्पनाशक्तेः समावेश एतावानधिकोऽस्ति, येन तर्क-वितर्कौ, संकल्पविकल्पौ तथान्ये भावाः लुप्ताः भवन्त्येवं रसस्य सहजसञ्चारो भवति। कलागतस्य प्रकृतिगतस्य च सौन्दर्यस्यानुभूतये कल्पनातत्त्वस्य नैसर्गिकसमावेशः जातोऽस्ति। वस्तुतः कल्पना मनसः सा शक्तिरस्ति, या परिचितवस्तुनि अभिनवतां पश्यति, नवीनलोकं सृजति, अतीते रमते, भविष्यस्वप्नं पश्यति, चित्रमय्यां भाषायामात्माभिव्यक्तिं करोति तथा सुन्दरताया भावनं विधायानन्दिता भवति, स्वर्गः, नरकः, देवता, दैत्यादयश्च कल्पनालतायाः मधुरफलानि सन्ति। कल्पनैव गीतिकाव्यं चिरसुन्दरं चिरसुखकरञ्च विदधाति।

संस्कृत-गीतिकाव्ये पूर्णसामञ्जस्यस्यानुभूतिः प्राप्यते। अभिव्यञ्जना तदैव सार्थिका भवति, यदा सा पाठकानामन्तः स्पृशति। मार्मिकानुभूतिसमावेशकारणात् संस्कृतगीतिषु सौन्दर्यपराकाष्ठा प्राप्यते। ग्रीष्मोष्मणि, वसन्त-सुषमायां, शरन्निर्मलतायाञ्च समानरूपेण सौन्दर्यानुभूतिशीलैः संस्कृतगीतिकारैः शिवशक्त्योः, आनन्दसौन्दर्ययोस्तथा लोकमङ्गलस्य समानरूपेण दर्शनं विहितम्। सांसारिकविषममृतरूपेण परिवर्त्तितं विधाय जीवनजगतो विभिन्नव्यापाराणां स्वस्थचित्रणं कृतम्।

संस्कृत-गीतिकाव्येषु सुन्दरतया, रूपयौवनस्याकर्षणेन सह शिवतत्त्वस्य वर्णनं विद्यते। अत्रेदं स्मरणीयमस्ति यत् सौन्दर्यसम्बन्धः द्रष्टुः कल्पनाजगता सहास्ति। कल्पनायाः उत्तिष्ठत्सु तरंगेषु रूपस्य नव-नवविलासो दृष्टिगोचरो भवति। जनः स्वमनसः विविधवर्णेषु रञ्जितं विधाय प्रियवस्तुनो भावनं करोति। नवीनोद्भावनानां कारणवशात् प्रियस्य प्रियता वर्धते। रूपसुधायाः पानेन प्रेमिणो मनसः कदापि तृप्तिर्न भवति। यतः तृप्त्या मनसि स्थिरतायाः जडतायाः वा समावेशो भवति। महाकविः कालिदासः लिखितवान्—

नच परिचितो न चाप्यरम्य—
श्चकितमुपैमि तथापि पार्श्वमस्य।
सलिलनिधिरिव प्रतिक्षणं मे
भवति स एव नवो नवोऽयमक्ष्णोः।

—मालविकाग्निमित्रम्, १।११

गणदासस्यानयोक्त्या स्पष्टमस्ति यत् समुद्रवत् स्थिरमपि वस्तु प्रतिपलं नेत्रयोः नवं नवं दृश्यते। तात्पर्यमेतदस्ति यत् संस्कृतगीतिकाव्येषु निहितं सौन्दर्यमेकरसं सदपि द्रष्टुः कृते प्रतिक्षणं नवं प्रतीयते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

काव्यप्रक्रियाया आलोके स्थूलसंवेदनमनभिव्यक्ततया चित्रे भारस्वरूपं न प्रतीयते, प्रत्युत मनसि धूम्रतामुत्पादयति। परं यदा तत् आत्मनः प्रक्रियायां पतित्वा चेतन-व्यापारे समागत्य रूपायितं भवति, तदा वास्तविकीमभिव्यञ्जनां प्राप्नोति। गीतेष्वेषैवाभिव्यञ्जना सौन्दर्याय मूर्त्तिमत्तां प्रदत्ते। संस्कृतगीतिकाव्येषु पुष्पनिहितगन्धवदुक्तसौन्दर्यानुभूतेरभिव्यञ्जना समाहितास्ति।

संस्कृतगीतिषु भावसौन्दर्यस्य समावेश उपलब्धोऽस्ति। अस्य सौन्दर्यस्य व्यापकपरिधौ कल्पना, अनुभूति; संवेगः, भावना, स्थायिभावाः, सञ्चारिभावाः, रसानुभूतयश्च समाविष्टाः विद्यन्ते। गीतिकारैः भावसौन्दर्येषु हृदयरञ्जिकानां द्राविकानां वा सर्वासामनुभूतीनां समावेशो विहितो, येन रागतत्त्वं परिपुष्टं जातं विद्यते।

संस्कृत-गीतिकाव्यस्यैका विशेषता प्राकृतिकमाधुर्यमस्ति। प्रकृतिः मानवसौन्दर्यञ्चान्योन्यहृदये प्रणयसञ्चारं कुरुतः। सौन्दर्यमाकर्षणस्य किरणोऽस्ति, येन जडप्रकृतौ चेतन-पुरुषे च क्षोभ उत्पद्यते तथा तयोः परस्परमेलायैकाकारतायै च विह्वलता जायते। गीतिकाराः मानवहृदयस्य भावानामभिज्ञतायै विश्लेषणाय च यथा कृतकार्याः सन्ति, तथा ते वाह्यप्रकृतेः रहस्यानां ज्ञाने तथोद्घाटने समर्थाः सन्ति। तैः वाह्यप्रकृतीनां सूक्ष्मनिरीक्षणं विधाय रमणीयदृश्यानां सूक्ष्मांकनं कृतम्। एतेषु काव्येषु प्रकृतिरुभयरूपेण चित्रितास्ति—(१) आलम्बनरूपेण (२) उद्दीपनरूपेण च। आलम्बनरूपेषु वर्णनेषु प्रकृतिः स्वयं वर्ण्या भवति तथोद्दीपनरूपेषु तस्याः मानवप्रकृतावुत्पन्नःप्रभाव एव वर्ण्यविषयो विद्यते। प्रकृतिचित्रणस्यैकोऽन्योऽपि प्रकारः लभ्यते, यस्मिन् मनुष्यहृदयस्य भावानुगामिनी प्रकृतिः तदनुरूपा चित्रपटसदृशी प्रतीयते। वसन्तः, चन्द्रिका, कोकिलास्वरः, मेघालोकः, एवमन्येऽपि शृङ्गारस्य सामान्योद्दीपनरूपेण प्रसिद्धाः सन्ति। एतदतिरिक्ताः मधुमासरजन्यः, विकसितमालतीपुष्पैः सुरभितः कदम्बवनवायुः, सरित्तटः, प्रभातम्, मलयानिल एवमन्येऽपि विशेषोद्दीपनविभावाः जायन्ते। ऋतुवर्णनेषु प्रकृतेः कोमल-मधुररूपाणां समवर्णा शोभा दृष्टिगोचरा भवति।

संस्कृत-गीतिकाव्येषु प्रकृतिवर्णनस्येयमेका वृहती विशेषता प्राप्यते यत् प्रकृतौ तथा प्रकृतिपरिचितपात्राणां मध्ये रागात्मकमेकं सामञ्जस्यमनायासं घटितं भवति। सौन्दर्यबोधेन सहानन्दोल्लासयोः सहजसम्बन्धः सर्वत्र विद्यमानोऽस्ति। पात्राणां मनःस्थितेरनुकूलतायां विपरीतस्थितौ वा प्रकृति-सौन्दर्यस्य रञ्जनकारी प्रभावः परिलक्ष्यते। प्रकृतेः नानारूपात्मिका रमणीयता स्वमूलरूपे आनन्दस्रोतोऽस्ति। नैतावदेव; प्रत्युत प्रकृतेः वाह्यसौन्दर्यनिरूपणेन सह कविना प्रकृतेः संवेदनशीलस्यात्मीयतापूर्णस्वरूपस्य परिचयो दत्तः। भावानुकूलवातावरणसृष्टि-प्रवृतिः प्रायः समस्त-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संस्कृतगीतिकारेषु प्राप्यते। अत्रैकेनोदाहरणेनोक्तकथनस्य सार्थकता प्रमाणीक्रियते—

हरिरभिसरति वहति मधुपवने।
किमपरमधिकसुखं सखि भुवने॥
माधवे मा कुरु मानिनि मानमये। गीतगोविन्दम् ९।१

× × ×

सजलनलिनदलशीतल-शयने
हरिमवलोकय सफलय नयने। तदेव ९।५

प्रकृतिचित्रणसम्बन्धिवैशिष्ट्येन सह संस्कृतगीतिकाव्ये स्वच्छन्दतावाद— (Romanticism) सम्बन्धिनी विशेषतापि प्राप्यते। सौन्दर्येण सह वैचित्र्ययोग एव कलायां स्वच्छन्दतावादस्य स्वरूपनिर्माणं करोति तथा प्रत्येकगीतिकाव्यसर्जने सौन्दर्यलालसैकनिश्चिततत्त्वकारणात् प्राप्यते। अस्यां वैयक्तिकानुभूतिप्राणजीवनस्य तथा सर्जनस्य—प्रेरणायाः सक्रियपुनर्जागरणस्य प्रधानता भवति। स्वच्छन्दतावादे त्वान्तरिकानुभवः सर्वोपरि स्थाप्यते। स्वच्छन्दतावादिन्याः प्रवृत्त्याः निम्नलिखितानि तत्त्वानि संस्कृतकाव्ये प्राप्यन्ते—

१. सौन्दर्यम्।
२. प्रेम।
३. विराट्तत्त्वम्।
४. विस्मयो रहस्यानुभूतिर्वा।
५. विषादोऽसन्तोषश्च।
६. आत्माभिव्यक्तिः, स्वातन्त्र्यलालसा च।
७. कल्पनाचमत्कारः।

सौन्दर्यसम्बन्धे पूर्वमपि लिखितमस्ति। यदा सहृदयो जनः मनोऽनुकूलं सुन्दरं वस्तु, व्यक्तिं दृश्यं वा पश्यति, तदा तैः सहानायासमेव तस्य रागात्मकसम्बन्धो जायते। एवं प्रकारेण सुन्दरवस्तु, व्यक्तिं दृश्यादिकं प्रति वा द्रष्टुः रागात्मकः सम्बन्ध एव प्रेम कथ्यते, यदेकत्र स्वसघनतायै तीव्रतायै च द्रष्टुः सहृदयतोपरि निर्भरं भवति, अन्यत्र द्रष्टव्ये वस्तुनि, व्यक्तिप्रकृतौ च स्थितसौन्दर्यतत्त्वानाम्—ओजसः संघटनस्य, भास्वरतायाः, कोमलताद्याकृतिमूलकविशेषतानां तथोदारतायाः, त्यागस्य, करुणादिप्रकृतिमूलकगुणानां सामञ्जस्योपरि निर्भरं भवति। एष आशयोऽस्ति यत् प्रेमैका संयोगात्मिकावृत्तिरस्ति, यैतादृशं पदार्थं स्वाभिमुखमाकर्षति, यः सुन्दरोऽथवान्येन केनापि रूपेण मूल्यवान् कथ्यते। सौन्दर्यमवलम्बनं भवति तथा प्रेमाश्रयो जायते। प्रेम द्रष्टुः रागात्मिका प्रवृत्तिरस्ति। प्रेम्णो रूपद्वयमस्ति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(१) वासनात्मकं (२) सात्त्विकञ्च । वासनामूलकस्य प्रेम्ण आधारः शारीरिकं स्थूलं वा सौन्दर्यं भवति । अस्मिन् प्रेमिण ऐन्द्रियतृप्तिर्भवति । आलम्बनस्य चुम्बनं, स्पर्शनम्, घ्राणम्, आलिङ्गनम् तथा करुणादिक्रियाः वासनात्मक प्रेम्ण एवाभिव्यक्तयः सन्ति । अस्मिन् प्रेमी स्वाहंभाव-तुष्ट्यै सुन्दरवस्तुनो भोगं करोति । सुन्दरता तस्मै भोगवस्तुमात्रं जायते । अस्यां परिस्थितौ प्रेमपात्रमपि स्वप्रेमिणोऽधिकाधिकतुष्ट्यै स्वशारीरिकसौन्दर्यस्याधिकाधिकप्रसाधनं विकसनमलंकरणं च करोति । सात्त्विकप्रेम्ण उदयस्तु तदा भवति, यदा प्रेमी—इन्द्रियतृप्तेराधारभूतसौन्दर्यतत्त्वेभ्यः—रूप-रस-गन्ध-ध्वनि-स्पर्शेभ्य उपरि उत्थाय प्रेमपात्रस्यातीन्द्रियान्तरिकसौन्दर्यात्मकपावनत्वस्यानुभूतौ रन्तुं प्रवृत्तो भवति । अस्यां स्थितौ सौन्दर्यमेकंसूक्ष्मभावात्मकं सत्तामात्रं सत्तिष्ठति । प्रेमिणोऽन्तःकरणं तस्य सूक्ष्मस्यातीन्द्रियासीमसौन्दर्यस्य ध्यानेन पवित्रमसीमं दिव्यञ्च जायते । संस्कृतगीतिकाव्ये उक्तोभयोरपि प्रेम्णश्चित्रणं प्राप्यते ।

संस्कृतगीतिकाव्ये विराट् तत्त्वम् (Sublime) अपि विद्यमानमस्ति । गीतिकारोऽन्तर्मुखत्वात् आन्तरिकशक्तीनामनन्तविस्तारक्षमतां रक्षति तथासौ तदलौकिकसौन्दर्येण, अपरिसीमविस्तारेण तथान्तर्वेगेन विस्मय-विमुग्धो जायते । लौंगिनुसमताधारे डॉ० नगेन्द्रेण[1] सब्लाइमाख्यस्य विराडवलम्बनस्य वा चत्वारि तत्त्वानि स्वीकृतानि—

१. अनन्तविस्तारः ।
२. असाधारणशक्तिर्वेगश्च ।
३. अलौकिकैश्वर्यम् ।
४. उत्कटैवं स्थायिनी प्रभावक्षमता ।

गीतिकाव्ये उक्तानां चतुर्णां तत्त्वानां समवायः प्राप्यते ।

संस्कृतगीतिकारैरनन्ततानुभूतिः सर्वत्र कृता । ऋग्वेदगीतिषु—इन्द्रमरुदग्निवरुणरुद्रपर्जन्यादिदिव्यशक्तीनां भीषणतायाः, उग्रतायाः तीव्रतायास्तथादम्यतायाः चित्राणि सर्वत्रोपलब्धानि सन्ति । आर्यजीवनस्य प्रत्यक्षानुभूतिषु तथा वास्तविकानुभूतिषु संसक्तानि चित्राणि काव्यदृष्ट्या परमसुन्दराणि सन्ति । भीषणरूपेण प्रचण्डरूपेण च वने विस्तृतानि दीप्तिमच्छिखाशीलस्याग्नेः दृश्यानि ऋग्वेदेऽनेकस्थलेषूपलब्धानि । वने व्याप्तं भीषणानलं वीक्ष्य कविः कथयति—"स्वेच्छानुसारं वायुप्रेरितः सन् स्वजिह्वाकर्त्तनीभिः सह गर्जन् शुष्कवने प्रसरति । अपरिवर्त्तनशील ! तथा प्रकाशलहरीयुतानल ! यदा त्वं वृषभवत् वृक्षान् प्रति लुब्धः धावसि, तदा त्वन्मार्गः श्यामो जायते ।[2] एवं प्रकारेण ऋग्वेदगीतिषु व्यक्तेषु प्रकृतेः विराट्रूपेषु अलौकि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कमैश्वर्यं विलक्षणसौन्दर्यतत्त्वं प्रचुरपरिमाणे परिलक्षितं भवति। कालिदास-जयदेव-प्रभृतिकविषु विराट्तत्त्वस्य चित्रणं प्राप्यते। जयदेवमयूराभ्यामेतत्तत्त्वस्य विशद-चित्रणं कृतम्।

संक्षेपेण संस्कृतगीतिकाव्यस्य निम्नांकितविशेषताः दृश्यन्ते—

१. विषय-वैविध्यम्—शृङ्गार-नीति-वैराग्य-प्राकृतिकदृश्यादिविविधविषयाणां चित्रणम्।

२. विधागत वैशिष्ट्यम्—प्रबन्धमुक्तकरचनानां समावेशः।

३. छन्दोजन्यनादमाधुर्यम्—गेयता।

४. कलासौन्दर्यं भावसौन्दर्यस्य सामञ्जस्यञ्च।

५. प्रकृतिचित्रणम्।

६. प्रेम्णः शृङ्गारस्य च वाहुल्यम्।

७. सामञ्जस्यपूर्णानुभूतिः।

८. सूक्ष्मसंवेदनम्।

९. चर्वणाप्रक्रिया-समावेशः।

१०. रसात्मकता—गेयता, अन्तर्वृत्यादेरपेक्षा रसस्य प्रमुखता।

११. भावानुकूलं वातावरणम्।

१२. स्वच्छन्दतावादस्य स्पर्शः।

१३. सुकोमलभावना।

१४. विचारेष्वेकरूपता।

१५. भाषागतमाधुर्यं चित्रात्मकता च।

संस्कृतगीतिकाव्यस्य भेदाः—

संस्कृते शैलीदृष्ट्या गीतिकाव्ये वर्गद्वयं संभाव्यते—

(१) प्रबन्धात्मकं गीतिकाव्यम्।

(२) मुक्तकं गीतिकाव्यम्।

प्रबन्धे विद्यमाना कथैतादृशी व्यापिका भवितुं शक्नोति, यस्यां जीवनस्य विशदं चित्रं प्रस्तुतं भवेत् तथा संक्षिप्ताप्येवंभवेत् यत् तस्याः कस्याप्येकोज्ज्वलपक्षस्य निरूपणं संभाव्येत, अथवा कस्या अपि प्रभावशालिन्याः घटनायाः प्रत्यक्षरूपं समुपस्थापितं स्यात्। प्रबन्धात्मक-सरण्यां लिखितेषु गीतिकाव्येषु कालिदासस्य गीतिकाव्यं तदनुसरणं विधाय लिखितानि संदेशकाव्यानि च परिगणितानि सन्ति।

---

१. डा० नगेन्द्र : काव्य में उदात्त तत्त्व, भूमिका भाग पृ० १२-१३।

२. ऋग्वेद १।५८।४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एतत्सत्यमस्ति यत् गीतिकाव्ये विषयवर्णनापेक्षया भावसान्द्रतायै प्रमुखता प्रदीयते। अतः विषय-वैविध्यस्य प्रश्न एव नोत्थितो भवति। विस्तारापेक्षया गाम्भीर्यमधिकं विद्यते। एतदेव कारणमस्ति यत् महाकाव्यं गीत्यात्मकं भवितुं शक्नोति। किन्तु गीतिकाव्यं महाकाव्यं नहि भवितुं शक्नोति।

वर्णनभारमुक्तत्वात् गीतिकाव्यकारो भावोच्छ्वासाय कामपि स्थितिविशेषां गृहीत्वा गीतिरचनां करोति। अस्यां घटनासङ्कोचो भवति तथाख्यानं रसगाम्भीर्ये पर्यवसितं भवति। मेघदूतप्रभृतिकाव्यं मूलतः गीतिकाव्यं मन्यते। परन्त्वस्मिन् कथाया सूक्ष्मतन्तुः समाहितोऽस्ति। भावनानां मार्मिकता सघनता च पूर्णतया विद्यमानास्ते।

एकं तथ्यमिदमप्यस्ति यदेकार्थप्रवणपद्येषु राक्षसकाव्यम्, ऋतुसंहार-भिक्षाटन काव्य-सदृशाः गीत्यात्मकरचनाः मिलन्ति। आसु रचनासु कविभिः स्ववर्ण्यविषयस्येषित् सुसम्बद्ध पद्येषु चित्रणं कृतम्। महाकवयः सन्ध्यायाः, ऋतोः, वनपर्वतयोः, नद्याः, रजन्यादेश्च चित्रणमुक्तसरण्यां कुर्वन्ति। तेषामेतच्चित्रणमपि गीत्यात्मकमस्ति। स्वतन्त्ररूपेण लिखिताः रचनाः घटकर्परादिकाव्यानि घटनावैविध्याभावे एकार्थप्रवणत्वात् गीतिकोटयां जायन्ते। अत एव संस्कृते प्रवन्धात्मकसरण्यामपि गीतिकाव्यानामस्तित्वं प्राप्यते।

संस्कृतगीतिकाव्यस्य वहुभागाः मुक्तसरण्यां लिखिताः सन्ति। यतः क्षणिकभावावेशे प्रसूतां गीतिम् वद्धुं गुणदृष्ट्या मुक्तकान्येव समर्थानि सन्ति। अल्पसमये नगण्यसामग्र्या रससृष्टेरद्भुतकार्यमेतेषां विशेषतास्ति। शब्दकल्पद्रुमे मुक्तकस्य लक्षणं कथयता केशवेन लिखितम्—

विनाकृतं विरहितं व्यवच्छिन्नं विशेषितम्,
भिन्नं स्यादथ निर्व्यूहे मुक्तं यो वातिशोभनः॥

अर्थात् यत्पद्यमर्थपर्यवसाने तथा रसचर्वणायां परापेक्षि न भूत्वा स्वतः पूर्णं भवेत् तन्मुक्तकमुच्यते। मुक्तकशोभा नारीलावण्यसदृशी ध्वन्यतिरिक्ता न काप्यस्ति। रसास्वादनं चमत्कृतिश्च प्रबन्धस्य प्रत्येकपद्ये न सम्भाव्यते। परन्तु मुक्तके रसस्य चमत्कारस्य च समग्रविशेषतानां समाहारः आवश्यकोऽस्ति। मुक्तके निम्नलिखिततत्त्वानां समाहारोवर्त्तमानोऽस्ति—

१. चमत्कृतिः।
२. गुम्फनवैशिष्ट्यम्।
३. ध्वनिगतविशेषता।
४. परस्परनिरपेक्षता।

४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

५. रमणीयता ।

६. रस-चर्वणा ।

७. रसानुभूतिद्वारेण हृदयमुक्तता ।

वस्तुतो मुक्तके हृदयं रसगवेषणार्थमेकस्मिन्पद्ये व्यासक्तं भवति । अग्निपुराणे वाग्वैदग्ध्यस्य रसचमत्कारस्य च सद्भावः मुक्तकार्थमावश्यकः कथितोऽस्ति ।

मुक्तकं श्लोक एवैकश्चमत्कारक्षमः सताम्[1] ।

मुक्तकं चमत्कारयुक्तं भवति। मुक्तकरसवत्तायाः सिद्धिमानन्दवर्द्धमुनः कृतवान्

प्रवन्धे मुक्तके वापि रसादीन्वद्धुमिच्छता,
यत्नः कार्यः सुमतिना परिहारे विरोधिनाम् ३।१७

रसमयमुक्तकस्य रचनाकालेऽभीष्टरसानुकूलौचित्यस्य निर्वाहोऽपेक्षितोऽस्ति । अस्मिन् ललितपदैः सह वैदग्ध्यभंगी-भणितेः प्राधान्यमस्ति । सामान्यतः मुक्तक-काव्यस्य भेदद्वयमस्ति—

१. रसमुक्तकम् ।

२. रसेतरमुक्तकञ्च ।

भावप्राधान्येन सह गेयताया अपरिहार्यतां स्वीकृतायां मुक्तकस्य भेदद्वय-मस्ति—

१. वाच्यमुक्तकम् ।

२. गीतिमुक्तकम् ।

ऋग्वेदे, रामायणे महाभारते च समाहितगीतयः वाच्यमुक्तके गण्यन्ते । ऋग्वेदगीतिषु गीतिमुक्तकस्य लक्षणानि घटितानि भवन्ति । परं तेषां यथार्थतः वाच्यमुक्तककथनमेवोचितमस्ति । कविताकामिनी-विलासस्य कालिदासस्य मेघदूत-मेवैतादृशं प्रथमं काव्यमस्ति, यस्मै 'गीतिसंज्ञां' दातुं शक्यते । अस्मिन् कथां शोऽत्यल्पोऽस्ति तथा वेदनाविह्वलहृदयस्याश्रुसिक्तभावानामुद्घाटनमेव कवेर्मुख्यं लक्ष्यमस्ति । सहैव मन्दाक्रान्तायाः गीतात्मकतया तत् गीतिकाव्ये प्रतिष्ठापितम् । 'मेघदूतम्' एकः कल्पितयक्षस्य हृदयोद्गारोऽस्ति, परन्तु तन्माध्यमेन कविः स्वयं स्वानुभूतीः शब्दचित्रेष्वङ्किताः कुर्वन् दृश्यते। एतत्सत्यमस्ति यत् प्रत्यक्ष-स्याथवा परिचितजनस्य भावोद्गाराः तावन्तश्शक्तिमन्तो न भवन्ति, यावन्तः परोक्षस्य । यतः परोक्षानुभूतेः जनमानसोपरि अलौकिकः प्रभावो भवति । काव्य-स्यैतस्यैवालौकिकत्वस्य रक्षायै प्राचीनैः स्वव्यक्तित्वस्य कल्पितेऽथवैतिहासिकेऽवगुण्ठने

१. अग्निपुराणम् ३३७।३६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गोपनमेवोचितं ज्ञातम् । रसविदग्धः कविः परोक्षानुभूतिमपि प्रत्यक्षानुभूतिरूपेणैव सफलतापूर्वकमङ्कितां करोति ।

गीतिमुक्तकस्य गीतिकाव्यदृष्ट्या संस्कृते निम्नांकिताः भेदाः प्राप्यन्ते—

१. परोक्षानुभूतिपरकं गीतिकाव्यम् ।

२. स्वानुभूतिपरकमात्मानुभूतिपरकं वा गीतिकाव्यम् ।

३. एकभावान्वितदीर्घबन्धं गीतिकाव्यम् ।

४. तालबद्धं गीतिकाव्यम् ।

५. स्तुतिपरकं गीतिकाव्यम् ।

६. स्वच्छन्दगीतिकाव्यम् ।

परोक्षानुभूतिगीतिकाव्येनास्माकं तात्पर्यम्—आत्मानं परोक्षे स्थापयित्वा स्वमनोनीतपात्रेण स्वभावप्रकाशकगीतैरस्ति । यः कविः परहृदयं प्राप्य तस्य सुखदुःखात्मकभावनाभिः सहात्मीयतां स्थापयितुं शक्नोति, स एव वास्तविकगीतिकारोऽस्ति । स्वसुखदुःखयोः सर्वे हसन्ति, रुदन्ति । आततायिनः परपीडका अपि स्वपुत्रादिकष्टैः दुःखिनो दृश्यन्ते । अतः सत्कवेः परिचयः परोक्षानुभूत्या सकलमेवं प्रभविष्ण्वंकनं मन्यते । रसमञ्जर्यां भानुभट्टेन विरहिण्याः सुन्दरचित्रं समुपस्थापितम् । चित्रेऽस्मिन् कवेः परोक्षानुभूतिः स्पष्टास्ति ।

प्रादुर्भूते नवजलधरे त्वत्पथं द्रष्टुकामाः,
प्राणाः पङ्केरुहदलदृशः कण्ठदेशं प्रयान्ति ।
अन्यत्किं वा तव मुखविधुं द्रष्टुमुड्डीय गन्तुम्,
वक्षः पक्षं सृजति विसिनी पल्लवस्यच्छलेन ।। रस-मञ्जरी ।

परानुभूतिपरकगीतिकाव्येषु रसधारायाः मनागपि न्यूनता न दृश्यते । श्रीमती महादेवी वर्मा लिखितवती—वस्तुतो गीतिकविनातिक्रन्दने प्रच्छन्नदुःखातिरेकस्य दीर्घनिःश्वासे प्रच्छन्नसंयमेन बन्धनं कार्यं भवेत्, तदैव तद्गीतमन्यहृदये तद्भावोद्रेके सफलं भविष्यति । गीतं यदि परस्येतिहासमकथयित्वा वैयक्तिकसुखदुःखे प्रकटयति, तदा तस्य मार्मिकता विस्मय-वस्तु संपद्यते, नात्रसन्देहः। मीराहृदये नार्याः विरहिण्याश्च कृते भावातिरेकः सहजप्राप्य आसीत् । तस्या वाह्यराजराज्ञीत्वे तथान्तरिकसाधनायां संयमाय पर्याप्तोऽवकाश आसीत् । एतदतिरिक्तवेदनाप्यात्मानुभूतिरासीत् । अतः तस्याः—'हो गई मैं तो प्रेम दीवानी मेरा दरद न जाने कोय' वाणीं श्रुत्वा यद्यस्माकं हृदयस्य प्रत्येकतारं तद्ध्वनेरावृत्तिं करोति, प्रतिलोम तद्वेदनास्पर्शं करोति, तदैतदाश्चर्यवस्तु नास्ति" ।[1]

---

१. यामा, अपनी बात-पृष्ठ-७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आत्मानुभूतेः सम्बन्धः कविहृदयेन सह पूर्णोऽस्ति। अस्मिन् सत्यताधिका भवति। परं परोक्षानुभूतिपरकगीतिकाव्ये कस्याप्यन्यस्य वार्त्ताः मधुरकण्ठेन प्रस्तूयन्ते। एतच्छ्रेण्याः गीतानां प्रभावः जनमानसे प्रत्यक्षं पतति। एतत्कारणं काव्यनायकस्य विशिष्टता वर्त्तते। वस्तुतः भारतीयसमाजे आदर्शमर्यादादृष्ट्या विशिष्टजनानां विशिष्टभावानां कार्याणां भावपूर्णवर्णनं परोक्षानुभूतिरूपेणांकितं भवति। अतः परानुभूतेः स्वानुभूतिरूपेण परिणतिक्षमतावानेव वाणीपुत्रः 'कवि' संज्ञाधिकारी भवति।

संस्कृते परोक्षानुभूतिपरकगीतिकाव्य-रचयितृषु वाल्मीकि-व्यास-कालिदासादयः प्रमुखाः सन्ति। वाल्मीकिः रामजन्मावसरे यमुद्गारं व्यक्तं कृतवान् तत्परोक्षानुभूतिपरकगीतिकाव्ये सम्मिलितमस्ति। एवमेव व्यासः कृष्णजन्मावसरे गीतिनिबन्धनं कृतवान्। रघुवंशे रघुजन्मावसरे सीतानिर्वासनकाले तथान्यावसरेषु गीतयः प्रस्फुटिताः जाताः सन्ति।

आत्मानुभूतिपरकगीतिकाव्येषु ऋग्वेद-सामवेद-मेघदूत-पवनदूतादीनां गणनाभवति। सामवेदे आयातमस्ति—

आ ते वत्सो मनो यमत् परमाच्चित् सधस्तात्।
अग्ने त्वां कामये गिरा।
पुरुत्रा हि सदृङ्ङसि दिशो दिश्वा अनुप्रभुः
समत्सु त्वा हवामहे।
समत्स्वग्निमवसे वाजयन्तो हवामहे।
वाजेषु चित्रराद्यसम्।

—सामवेदः, उत्तरार्चिकः, खण्डः ६, अध्यायः ८, प्रपा. ४ मन्त्रः-१२

अर्थात्—हे अग्निदेव! भवतः तत्सस्वरूपं मम मनः भवतोऽत्यन्तं दूरं सदपि भवता सह बद्धमस्ति। भवत्प्राप्तिनिमित्तमहं प्रार्थये। भवतः प्रभुत्वं सर्वत्र व्याप्तमस्ति। यद्यपि भवतः मिलनमार्गे मम सम्मुखमनेकविघ्नान्यायान्ति, तथाप्यहं भवत आराधनान्तु करोम्येव। अहमद्भुतशक्तिप्रदस्य भवतः स्मरणं करोमि, यः संघर्षेण सह योद्धुं मह्यं ज्ञानं सामर्थ्यं ददाति।

वेदमन्त्रेषु भक्तहृदयस्य पूर्णोल्लासः श्रद्धामय्यां वाण्यां निःसृतोऽस्ति। क्रान्तदर्शिभिः ऋषिभिः वैदिक मन्त्राणां दर्शनं स्वान्तर्जगति कृतम्। एते मन्त्राः आत्मानुभूतिपरकाः सन्तोऽपि आनन्दप्रदाः सन्ति। संस्कृतस्य सर्वाणि संदेश-काव्यानि आत्मानुभूतिपरकानि गीतिकाव्यानि सन्ति।

एकभावान्वितदीर्घबन्धगीतिकाव्ये महाकविबिल्हणरचिताः चौरपञ्चाशिका-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सदृश्यः रचनाः मन्यन्ते । एवंविधाः गीतिप्रवन्धाः आद्यन्तं विप्रलम्भश्रृंगारस्य करुणरसस्य शान्तरसस्य वा मूर्त्तरूपाः भवन्ति । चौरपञ्चाशिकायाः प्रणेतृ-विषये मतभेदोऽस्ति ।

चौरपञ्चाशिकायाः सर्वाः कविताः मुक्तरूपेण पृथक्-पृथक् रसोद्दीप्तौ समर्थाः सन्ति । तथापि सम्पूर्णः काव्यवन्धो हृदये गम्भीरप्रभावप्रदाने समर्थो भवति । एकभावान्वितं दीर्घवन्धं गीतिकाव्यमस्ति । स्वानुभूतेरभावे काव्ये भावस्यासीम-गाम्भीर्यं महता प्रयत्नेनाप्यायातुं न शक्नोति । उदाहरणार्थं पद्यमेकमुद्ध्रियते—

अद्यापि तां निधुवनक्लमनिःसहाङ्गी-
मापाण्डुगण्डपतितालककुन्तलालिम् ।
प्रच्छन्नपापकृतमन्थरमावहन्तीं
कण्ठावसक्त-मृदु-वाहुलतां स्मरामि । चौ० प० पद्यम् ४

सम्भोगश्रमसहनेऽसमर्थां पीताभकपोलयोः विकीर्णयालकावल्या शोभितां प्रच्छन्नपापकर्मणा कम्पितां ममकण्ठे स्वकोमलवाहुलताप्रदात्रीं तां प्रियां न विस्मरामि ।

तालवद्धगीतिकाव्ये गीतगोविन्द-गीतवीतरागसदृशानि प्राचीनगीतिकाव्या-न्यायान्ति । स्तुतिपरकगीतिकाव्येषु स्तोत्रकाव्यस्य गणना क्रियते । एतासु गीति-ष्वपि गीतिकाव्यस्य समस्तलक्षणानि प्राप्यन्ते । वैदिकगीतीनां पश्चात् लौकिक-संस्कृतेऽपि गीतिरचना प्रचुरपरिमाणे स्वच्छन्दरूपेणाभवत् । कविहृदयस्य सद्यो-जातभावोद्वेग एतासु गीतिषु सुरक्षितः प्राप्यते । एतदेव कारणमस्ति यद्भावती-व्रतैतासु गीतिषु पूर्णतया सुरक्षितास्ति । स्वच्छन्दगीतिकारेषु पाणिनेः, कालि-दासस्य, घटकर्परस्य, भर्तृहरेः अमरुकादेश्च प्रामुख्यमस्ति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्वितीयोऽध्यायः

संस्कृतगीतिकाव्यस्य प्रादुर्भाव एवं विकासात्मकमितिवृत्तम्

पूर्वसन्दर्भे संस्कृतगीतिकाव्यस्य स्वरूपस्य, तत्त्वस्य, वैशिष्टचस्यैवं भेद-प्रभेदानां संक्षिप्तविवेचनं विहितम्। सम्प्रति प्रसंगवशात् तस्य प्रादुर्भावेतिहासोपरि प्रकाशः दीयते।

आर्यस्याद्योपलब्धा वाणी वेदो विद्यते, परं वेदे भावप्रकाशनं गौणं तथा विचार-प्रकाशनं मुख्यमस्ति। इयं तत्कालस्य वाणी विद्यते, यदा मानवः आचार्यस्य, ऋषेः गुरोर्वा पदे प्रतिष्ठितोऽभवत्। स क्वचित् परमात्मशक्तिभ्यो निवेदयति क्वचित् शिष्यमण्डलीभ्य उपदेशं ददाति। एतयोरादेश-प्रत्यादेशयोः वाण्याः प्रभविष्णु-निष्पादनायच्छन्दस आश्रयो गृहीतः। अतएव पाणिनिसदृशोवैयाकरणो-वेदभाषायै 'छान्दस'नाम दत्तम्। एतत्सत्यमस्ति यत् ऋग्वेदसंकलनमु-उपासनायै, स्तुतये, यज्ञेभ्यश्चाभूत्। विण्टरनिट्ज उक्तवान्—बहूनि सूक्तानि न केवलं सूर्य-देवायैवार्पितानि, नाग्निदेवाय, न वायवे न वरुणदेवाय तथा नोषादेव्यै, किन्तु तेषु स्वयं प्रकाशमानसूर्यस्य रात्रौ नभसि दीव्यच्चन्द्रमसः वेद्या उत्थितानामग्निशिखानां मेघेभ्यः स्फुटितायाः विद्युद्दीप्तेः गर्जतो मेघस्य प्रकाशमानायाः उषादेव्याः, शस्य-श्यामलायाः विस्ततपृथिव्याः तथैवमेवान्यप्राकृतिकदृश्यानां वर्णनं प्राप्यते।"[1]

निस्सन्देहमृग्वेदे काव्यगुणानां प्राचुर्यमस्ति। एतत् प्रकृतिकाव्यमस्ति। वैदिकर्षीणां जीवनेन प्रकृतेः मोददायकोत्संगे नयनान्युद्घाटितानि। प्रकृतेरसीम-सौन्दर्य एव तेषां वृद्धिर्जाता तथा ते तस्मिन्नेव लीना अभवन्। प्रकृतिरेव तेषा-मुपास्यासीत्। तस्या एव विविधतत्त्वानि तेषां देवभूतान्यासन्। इमे ऋषयः सम्मोहनमय्याः प्रकृत्याः सुन्दरतां दृष्टवन्तः, अनुभूतवन्तः तथा तन्मोहकवर्णनं कृतवन्तः। ऋग्वेदस्य संकलनकाले नरकाव्यस्योदयः सञ्जात आसीत्, परं प्राधान्यं प्रकृतिकाव्यस्यासीत्। यतः कृत्रिमतायाः लौहप्राचीरं तावत् कालं यावत् शिरः उन्नमय्योत्थितं नाभवत्। अतः प्रकृत्या सह मानवस्य प्रत्यक्षसम्बन्ध आसीत्। अतएवर्गवेदगीतिषु प्रकृतेः नैसर्गिकं रूपमाधुर्यं दृश्यते। उषोवर्णनेऽत्यन्त-

१. हिस्ट्री ऑव इंडियन लिटरेचर, प्रथम जिल्द, अध्याय १

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मनोज्ञाः सुकोमलाश्च कल्पनाः प्राप्यन्ते। अस्मिन् श्रृंगारभावनायाः मृदुलमधुर-स्वरूपं प्राप्यते। अतएव गीतिकाव्य-प्रारम्भः ऋग्वेदमन्त्रेभ्यस्तर्कसंगतः प्रतीयते। श्री प० वलदेव उपाध्यायः लिखितवान्—"वैदिककविः" मनोऽभिलषितभावानां चयिताल्पसुबोधशब्दैः कथनक्षमतां धारयति। परन्तु यदा-कदा सः स्व-भावती-व्रताभिव्यवितहेतवेऽलङ्कारविधानेऽपि पराङ्मुखो न भवति। अलङ्काररज्ञ्याः उपमायाः काव्यसंसारे प्रथमावतारः तावानेव प्राचीनोऽस्ति, यावान् स्वयं कवितायाः आविर्भावः। आनन्दसिक्ता कविहृदयवाणी उपमाद्वारेणात्मनो विभूषणाय कोमलोल्लासस्य तथा मधुमयानन्दस्य वोधं करोति। स्वानुभूतौ तीव्रतानयनाय पाठक-हृदये सरलतापूर्वकं तत्प्राप्त्यै कविवाणी येषां मधुमयकोमल—साधनानामुपयोगं करोति, अलंकारः तेषामेवान्यतमं रूपमस्ति। वयमेतादृशस्य काव्ययुगस्य कल्पनां कर्तुं न शक्नुमः, यस्मिन्, भावभङ्ग्यां कोमलविलाससञ्चारहेतवे, कविः कस्यापि साम्यविधानस्याश्रयं न गृह्णाति।[1]

स्पष्टमस्ति यत् ऋग्वेदे गीतिकाव्यस्य सुन्दराण्युदाहरणानि प्राप्यन्ते। भाव-तरलता सुकुमारतागुणाः ऋग्वेदीयमन्त्रेषु पूर्णतया विद्यमानाः सन्ति। वैदिक-मन्त्रेषु चित्तरमणस्य पूर्णक्षमतास्ति। ऋग्वेदे गीतिकाव्यस्यानेकविशेषताभिः सह मूलतत्त्वान्यपि प्राप्यन्ते। ऋग्वेदे, यत्रानेकज्ञानानांस्रोतोऽस्ति, तत्र गीतिकाव्यस्यापि। मैकडालन उक्तवान्—

"अतः त्रिसहस्रवर्षेभ्योऽप्यधिकं पूर्वं भारतीयेतिहासस्य मुखद्वार एव वयमेतादृशं गीत्यात्मकं काव्यं पश्यामः, यत् भारोपीय परिवारसाहित्येषु सर्वाधिकं प्राचीनं सदपि भावसौन्दर्यस्य, भावपरिष्कारस्य तथा भाषायाः छन्दोविषयककौशल-पूर्णयोजनादृष्टया स्वविशिष्टस्थानं रक्षति[2]। अतएवैतत्स्पष्टमस्ति यत् संस्कृतगीतेः प्रारम्भः ऋग्वेदर्ग्भ्यो भवति। एतासां गीतीनां त्रिषु वर्गेषु विभागं कर्त्तुं शक्यते—

१. प्रत्यक्षकृता।
२. परोक्षकृता।
३. आध्यात्मिकी।

---

१. पं० वलदेव उपाध्याय—वेद में गीतिकाव्य का उद्गम, आलोचना, ११, वर्ष ३, अंक ३, अप्रिल १९५४ ई०

२. On the very threshold of Indian literature mare than three thousand years ago, we are confronted with a body of lyrical poetry....Metre.

—Macdonell, History of Sans, lit Page. 29

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रत्यक्षकृताः ताः गीतयः सन्ति, यासु देवतां प्रत्यक्षवत् सम्बोध्य स्तुतिःकृता विद्यते। प्रत्यक्षकृतासु गीतिषु ऐतिहासिक्यामथवा वर्णनात्मिकायां पद्धत्यां देव-महत्त्वानि वर्णितानि सन्ति। एतासु स्तुत्यदेवाः अन्यपुरुषसर्वनामरूपेण व्यवहृताः सन्ति। आध्यात्मिकगीतिषु आत्मानुभूतेः स्पर्शो भवति। अत्रेदं स्मरणीयमस्ति यत् आध्यात्मिकशब्दप्रयोगः आधुनिके प्रचलितार्थे न भूतोऽस्ति। एतास्वभि-शापस्य, शपथस्याथवा कस्यापि सत्यविशेषस्य प्रतिपादकमन्त्राणां गणना कृता-विद्यते। निन्दा, प्रशंसा, परिवेदनाश्चास्यामेवश्रेण्यां परिगणिताः सन्ति। एतच्छ्रेणी-गीतिषु वैयक्तिकप्रभावः प्राप्यते। वशिष्ठस्य सुदासविजये मघवन्तं प्रति कृतज्ञता-प्रकाशनं विश्वामित्रस्य नदीविषयकं सूत्रं वशिष्ठस्य रोगमुक्तये प्रार्थनापरकञ्च सूत्र मेतत्कोटावेव गण्यन्ते। एतादृशमन्त्रेषु आत्मसमर्पणभावनायाः सुन्दरमभिव्यञ्जनं जातम्। एवंविधभक्तिगीतीनां भक्तिः सख्यभावस्य मन्यते। दैन्यपूर्णाः विनयसम्ब-न्धिन्य उत्कृष्टोक्तयः यत्र तत्र प्राप्यन्ते। यासु भक्तहृदयस्य व्यथा दृश्यते। सान्द्रानु-भूत्या सह वैयक्तिकतायाः तत्त्वान्यपि प्रचुरपरिमाणे लभ्यन्ते।

गीतिकाव्यस्याधुनिकनिकषायां कर्षणेनैषा उक्तयः स्वर्णमय्योऽवतरन्ति। अत्रो-दाहरणार्थं वशिष्ठकृता वरुणस्तुतिः समुपस्थाप्यते। स्वाराध्यदेववरुणस्य दर्शनाभिला-षायां व्यथितसाधकस्य दशा दर्शनीयास्ति—

उत स्वया तन्वा संवदे तत्कदा न्वन्तर्वरुणे भुवनानि।
किं मे हव्यमहृणानो जुषेत कदा मृलीकं सुमना अभिख्यम्।

ऋग्वेदः ७।८६।२

वशिष्ठः स्वमनसि पृच्छति यत् कोऽसौ समयो भविष्यति, यदाहं वरुणदेवे तल्लीनो भविष्यामि। किं ते क्रोधरहिता भूत्वा प्रसन्नचेतसः मम हविः ग्रहीष्यन्ति। कदाहं मुक्तहृदयेन तद्दर्शनं करिष्यामि।

ऋषिः भावविस्मृतोभूत्वा वरुणं प्रति मानसिकसाक्षात्कारं कुर्वन् कथयति

पृच्छेतदेनो वरुण दिदृक्षुयो एभि चिकितुषो विपृच्छम्।
समानमिन्मे कवयश्चिदाहुरयं ह तुभ्यं वरुणो हृणीते। ऋग्वेदः ७।८६।३

हे, वरुण, अहं भवद्दर्शनं कामये। अहं भवन्तं तत् पापविषये पृच्छामि, यतोऽहं भवत्पाशैः बद्धोऽस्मि। सर्वे विपश्चितः एकामेव वार्त्तां कुर्वन्ति यत् त्वत्वरुणदेवोऽ-प्रसन्नोऽस्ति। मन्त्रोत्तरार्द्धे स्तोतुः मानसिकव्यग्रता व्यक्ता कृतोविद्यते। वरुणस्या-प्रसन्नतामवगत्यर्षिरुद्विग्नो जायते तथा स मनःप्रत्यक्षं वरुणं प्रति अपराधं पृच्छति। सः स्वप्राचीनसम्बन्धस्य स्मरणं प्रदाय वरुणहृदये सहानुभूतेः दयायाश्च सञ्चारं चिकीर्षति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

किमाण आस वरुण ज्येष्ठं यत्स्तोतारं जिघांसति सखायम् ।
प्र तन्मे वोचो दूळभ स्वधावोऽव त्वानेना नमसा तुर इयाम् ।

—ऋग्वेद ७।८६।४

हे वरुण ! कोऽसावपराधः, यस्मात् कारणात् भवान् स्वज्येष्ठस्तोतारमपि नाशयितुं वाञ्छति । कृपया ममापराधं कथयतु । अहं भवन्तं नमस्करोमि ।

अन्ते भावविह्वलोवशिष्ठः क्षमां प्रार्थयते—

अव दुग्धानि पित्र्या सृजानोऽव या वयं च कृमा तनूभिः ।
अव राजन् पशुतृपं न तायुं सृजा वत्सं न दाम्नो वसिष्ठम् । ऋ० ७।८६।५

हे वरुण ! मम पूर्वजैः कृतानपराधान् तथा मम शरीरेण कृतानपराधान् क्षमस्व । हे राजन् यथा स्तैन्ये प्रायश्चित्ते कृते तस्करो मुच्यते । यथा वत्सः रज्जुभिः मुच्यते तथैव मामपि पाशेभ्यो मोचय ।

उक्तगीतिषु ज्ञानस्य तीव्रः प्रकाशो न विद्यते । भावनायाः विशदा सरसतास्ति तथा दर्शनस्थानेऽनुभूतेरखण्डता प्राप्यते । आसु कर्मकाण्डस्य जटिलविधानस्थाने भक्तिभावजन्या विह्वलता विद्यते । तथा नीरसोपासनास्थले आत्मसमर्पणं वर्त्तते । अतएवेमे सूक्तमन्त्राः, न मन्त्राः, प्रत्युत गीतयः सन्ति । नम्रतया, दीनतया, अपराधस्वीकृत्या तथात्मसमर्पणस्य भव्यभावनाभिः मण्डिताः सन्ति । अतोऽत्र गीतिकाव्यस्य सर्वाणि लक्षणानि घटितानि भवन्ति ।

उषादेव्याः स्तुतिसम्बन्धिनो मन्त्राः गीतिकाव्यदृष्ट्याऽत्यन्तसरसाः, सहजाः तथा भव्यभावनामण्डिताः सन्ति । प्रातःकालीनारुणिम्ना मण्डिते सुवर्णघटाविच्छुरिते प्राचीननभोमण्डले दृष्टिपातसमये कस्य सहृदयस्य मनसि कोमलभावनायाः नोदयो भवति । वैदकर्षिः प्रेमपूर्णदृष्ट्या पश्यति तथा तद्दिव्यच्छटायां मुग्धो भवति । एतत्प्रसङ्गागतेषु मन्त्रेषु भावनाप्रसारः एतावान् विस्तृतोऽस्ति तथा व्यापकोऽस्ति यत् व्यक्तिः स्वपृथक्सत्तायाः सर्वथा निर्मूलनं विधाय प्रकृतिसत्तायां नरसत्तायाः सद्योऽनुभवं करोति तथा तदनन्यताभावना व्याप्ता जायते ।

कविः उषादेवीं कदाचित् कुमारीरूपे, कदाचित् गृहिणीरूपे कदाचित् मातृरूपे पश्यति तथा वाह्यसौन्दर्यस्य मध्ये आन्तरिक सौन्दर्यमनुभवति । उषादेव्याः रूपचित्रणे विविधप्रकाराणामलङ्काराणां रूपविधानं विहितमस्ति । उषा स्वशुभ्रोज्ज्वलरूपं दधती स्नानशीलसुन्दरीसदृशी नभसि प्रादुर्भवति । कदाचित् सा भ्रातृविहीनभगिनीसदृशी स्वदायभागं प्राप्तुं पितृस्थानसूर्यसमीपं व्रजति । कदाचित् सा सुन्दरं वसनं दधाना पतिं स्वप्रेमपाशे बद्धुं चञ्चलसुन्दरीसदृशी स्वपति-समक्षं स्वरूपलावण्यं प्रकटयति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम् ।
जायेव पत्य उशती सुवासा उषा हस्रेव निरिणीते अप्सः । —ऋ० १।१२४।७

हे प्रकाशवति उषादेवि, त्वं कमनीयकन्यासदृशी परमार्कर्षिका भूत्वाभिमतफलदातृसूर्यनिकटे गच्छसि तथा तन्निकटे स्मितवदना युवतीसदृशी स्ववक्ष आवरणरहितं करोषि ।

कन्येव तन्वा शाशदाना एषि देवि देवमियक्षमाणम् ।
संस्मयमाना युवतिः पुरस्तादाविर्वक्षांसि कृणुषे विभाती । ऋ० १।१२३।१०

कवेर्मानवीकरणभावनात्यन्तप्रबलास्ति । उषादेव्याः कुमारीरूपस्य कल्पना विहिता विद्यते । स्मितवदनायाः सुन्दररूपदर्शिकायाः युवत्याः कल्पना सूर्यसमीपे प्रणयमिलनभावनया गन्त्र्याः उषाया उपरि कियती सरसा सयुक्तिका चास्ति । उषोपरि कृतानामन्यासामपि कल्पनानां समौचित्यं दृष्टिगोचरं भवति । सा स्वप्रकाशेन संसारं तथैव संस्करोति, यथा योद्धारः स्वशस्त्राणि तीक्ष्णानि विधाय संस्कुर्वन्ति ।

अलङ्कृतवर्णनावसरे उषासम्बद्धरूपव्यापारोपरि मानवीयरूपव्यापाररूपेण चित्रणं कृतमस्ति । प्राची-क्षितिजे सुवर्णसमानारुणच्छटाविकिरणशीलाया उषायाः साक्षात्कारसमये कविहृदयमस्मिन्कोमलचित्रे रमते, सः कथयति ।

उषो देव्यमर्त्या वि आहि चन्द्ररथा सूनृता ईरयन्ती,
आत्वा वहन्तु सुयमासो अश्वा हिरण्यवर्णां पृथुपाजसो ये । ऋ०. ३।३१।२

एवं प्रकारेणर्गवेदमन्त्रेषु कल्पनातत्त्वस्य पूर्णसमावेशः प्राप्यते । ऋषीणामुद्देश्यं कल्पनया केवलं चमत्कारजननमेव नास्ति, अपितु वर्ण्यवस्तु, तद्भावं वा मूर्त्तं विधाय अधिकाधिकास्वाद्यनिर्माणमस्ति । ऋग्वेदीयप्रत्येकमन्त्रे कल्पनायाः रम्यं विशदं च रूपं प्राप्यते । एकस्मिन् मन्त्रे वायुगतिं लक्ष्यां विधाय तद्रथकल्पनां कृत्वा सुन्दरं वर्णनं विहितमस्ति । तद्धि बिम्बग्रहणेऽपि सहायकं भवति । इन्द्रवीरतावर्णनविषयेऽपि कल्पनाया अनुल्वणरूपं दृश्यते । ग्रन्थेऽस्मिन्नुत्तममस्तिष्करचिकौशलपूर्णस्तुतीनां संग्रहो विद्यते, यासां यज्ञावसरे गानमभूत् ।

भाषायाः सहजसरलतायाः कल्पनायाः स्वाभाविकतायाश्चर्ते छन्दसोमधुरलयस्य विशेषतापि महती महत्त्वपूर्णा विद्यते । आद्यन्तं सर्वा ऋचो गेयाः सन्ति । उदात्तानुदात्तस्वरितस्वराणां विधानेनोच्चारणस्य निश्चितरुपेण बन्धनप्रयासो श्लाघ्योऽस्ति । ऋग्वेदर्चां सामूहिकरूपेणापि सस्वरः पाठोऽभवत् । भावप्रवणतेयती वर्त्तते, यदासु गेयता नैसर्गिकी विद्यते । श्रृंगारस्य संयोग-विप्रलम्भभेदाभ्यां सह रसाभासोदाहरणान्यपि द्रष्टव्यानि सन्ति । एवं प्रकारेण शिष्टकाव्येऽपि दाम्प-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्यरतिं मूलाधारं मत्वा काव्यरचनाप्रवृत्तेः संकेतो मिलति। यस्याः विकासः श्रेण्यसंस्कृतसाहित्ये श्रृंगाररसस्य प्राधान्यरूपेण पर्यवसितोऽस्ति, यः संस्कृतगीतिकाव्यस्यात्मास्ति। श्रृंगाररसस्य क्षेत्रे मानवीयभावनानामारोपः प्राकृतिकदृश्येषु विहितोऽस्ति।

ऋग्वेदे ध्वनिकाव्यस्य विविधरूपाणि मिलन्ति। तथा चित्रकाव्यसम्बन्धिनीनामुक्तीनामपि न्यूनता नास्ति। छन्दोयोजनाकारणात् गेयतानिवार्यरूपेण प्राप्यते। एवं प्रकारेण गीतिकाव्यस्यानेकविशेषताः तथा तन्मूलतत्त्वान्यपि ऋग्वेदे सम्पृक्तानि सन्ति।

यजुर्वेदकाले संगीतस्य विशिष्टोन्नतिर्जाता। यजुःसंहितायां वेद-गायकानामप्युल्लेखः प्राप्यते[1]। एतान् गायकान् प्रति स्त्रीणामाकर्षणवार्त्तापि कथितास्ति। मैत्रायण्यां संहितायां कथितमस्ति यत् देवाः गाथाः अगायन्। गन्धर्वाः वेदानगायन्। कथितमस्ति —

गाथां देवा अगायन् ब्रह्म-गन्धर्वा अवदन्त्सा देवानुपावर्त्तत,
तत्माद् विवाहे गाथा गीयते तस्माद् गायन्तिस्त्र्याः प्रियः॥

मैत्रायणी संहिता ३।७।३

अतएव स्पष्टमस्ति यत् वैदिकयुगे गीतिकाव्यस्य प्रादुर्भावः सञ्जात आसीत्। सामवेदस्य गायनन्तु प्रसिद्धमेवास्ति।

रामायणे गीतितत्त्वम्

वाल्मीकिरामायणेऽनेकस्थानानि रसपेशलान्यनुभूतिपूर्णानि च सन्ति। तस्मिन् सत्यामपि प्रबन्धात्मकतायां गीतिकाव्यत्वं प्राप्यते। शरद्वर्णनप्रसङ्गे रतिव्यापारस्य स्वाभाविकं महत्त्वपूर्णं चित्रणमस्ति रसालङ्कारध्वनि-वक्रोक्तिरीत्यादिसर्वदृष्टिभिः काव्यगतचमत्कारः प्राप्यते। यथा —

चञ्चच्चन्द्रकरस्पर्श-हर्षोन्मीलिततारका,
अहो रागवती सन्ध्या जहातु स्वयमम्बरम्। वा. रा. किष्किन्धा० का० ३०।४५

चन्द्रमसः चञ्चलकरस्पर्शेणोत्पन्नहर्षकारणात् ताराणाम्— (नक्षत्राणांपुत्त-

---

१. उदकुम्भानधि निधाय दास्या मार्जालीयं परिनृत्यन्ति यथो निघ्नतीरिदं मधु गायन्त्यो मधु वै देवानां परममन्नाद्यं परमेवन्नाद्यमवरुंधे यथो निघ्नंति महीयामे वैषुदधति। —यजुः संहिता ७।५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लिकानाञ्च) उन्मीलनं कुर्वन्ती रागवती (प्रेमभावयुक्ता तथारुणिम्नासम्पन्ना) संध्या स्वयमम्बरं (वस्त्रमाकाशञ्च) परित्यक्तवती ।

बालिवधानन्तरं ताराविलापे सान्द्रतायाः गेयतायाश्च कारणात् गीतिकाव्यत्वं प्राप्यते । यथा—

रणे दारुणविक्रान्त प्रवीर प्लवतां वर ।
किमिदानीं पुरोभागामद्य त्वं नाभिभाषसे ॥

× × ×

किमाङ्गदं संगद वीरबाहो विहाय यातोऽसि चिरं प्रवासम्,
न युक्तमेवं गुणसन्निकृष्टं विहाय युक्तं प्रियचारुवेषम् ।
येनैव वाणेन हतः प्रियो मे तेनैव वाणेन हि मां जहीहि ।
हता गमिष्यामि समीपमस्य न मां विना वीर रमेत वाली ॥

वा० रा० कि० सर्ग २०

दारुण, पराक्रमिन्, वानर, श्रेष्ठ, मामभिभाषसे कथं न ? त्वया सह मया मकरन्दसुगन्धितवनेषु यत् विचरितम्, अद्य तदन्तो जातः मम हृदयं परं दृढमस्ति, यत् त्वां क्षितौ पतितं वीक्ष्य शोकाभिभूतं भूत्वा सहस्रधा विकीर्णं न जायते । हन्त, वीर ! त्वमंगदं विहाय चिरप्रवासाय कथं गतः ? हे राम येन वाणेन त्वया मत्प्रियवधः कृतः, तेनैव ममापि वधं कुरु । अहं तदन्तिके गमिष्यामि । मां विना स सुखी न स्थास्यति ।

उक्तपद्ययोः करुणगीतेः सर्वा सामग्री विद्यते । सीताहरणानन्तरं वियोगिरामस्य विलापः करुणाञ्चलं स्पृशन् विप्रलम्भश्रृंगारात्मकोऽस्ति । रागात्मकवृत्तीनामुद्बोधनं विधायानिर्वचनीयानन्दं ददाति । यथा—

पूर्वंमयानूनमभीप्सितानि पापानि कर्माण्यसकृत् कृतानि ।
तत्रायमद्यापतितो विपाको दुःखेन दुःखं यदहं विशामि ॥
सानूनमार्या मम राक्षसेन ह्यभ्याहृता खं समुपेत्य भीरुः ।
अप्यस्वरं सुस्वर-विप्रलापा भयेन विक्रंदितवत्यभीक्ष्णम् ।
अस्मिन् मया सार्धमुदारशीला शिलातले पूर्वमुपोपविष्टा ॥
कान्तस्मिता लक्ष्मण जातहासा त्वामाह सीता बहु वाक्यजातम् ।

वा. रा. अ. सर्ग ६२

अवश्यमेव मया पूर्वजन्मनि पापकर्मसु अनेककारं रुचिः दत्ता । एष तस्या एव परिणामोऽस्ति यदहं दुःखे निमग्नोऽस्मि । करणक्रन्दनं कुर्वन्तीं मम प्रियतमां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

राक्षस आकाशमार्गेण हृत्वा नीतवान् । मद्वियुक्तायाः एकान्तवने राक्षसैः हृत्वा घृष्यमाणायाः तस्या आयताक्ष्याः कुररी-सदृशो विलापोऽभवत् ।

लक्ष्मण मया सहास्मिन् शिलातले उपविश्य सुन्दरस्मितवती तथोदारशीलवती सीताऽनेकेवारं हसन्ती त्वया सह विनोदवार्त्ता कृतवती । इयं गोदावरी तस्यै सदा प्रियासीत् ।

एवमेव सीतान्वेषणकृते कृतविलम्बाय विलासरताय सुग्रीवाय कुपितंलक्ष्मणं शमयन्त्याः तारायाः कथनं गीतिकाव्यतुल्यमस्ति । भरतहृदयस्य शोक-नैराश्येऽपि गीतिकाव्यकोटौ परिणते स्तः । राजमहिष्याः कैकेय्याः मुखच्छाया कोपेन तमोमयी जाता । सन्दर्भेऽस्मिन्नपि गीतितत्त्वमस्ति ।

सत्यपि महाकाव्ये वाल्मीकिरामायणे कतिपये सन्दर्भाः काव्यानुभूतेः, गेयतायाः भावसान्द्रतायाश्च कारणात् गीतिकाव्यानि सन्ति । डा० सिद्धेश्वरवर्मा लिखितवान्—'ता एवरचनाः गीतिकाव्य-संज्ञां प्रासवत्यः यास्वसंदिग्धरूपेण काव्यरसेन काव्यप्रतिविम्वतया सम्पन्नतया सहैव सर्वसाधारणे गेयरूपेण प्रचलिताः स्युः ।"

वाल्मीकिरामायणस्य गेयता प्रारम्भ एव कथिता । मुनिभिः रामायणगानं प्रशंशितम् ।"

अहो गीतस्य माधुर्य्यं श्लोकानांच विशेषतः, वा० १८।१।४

रामायणस्य गीतस्य तथा लवकुशयोः सर्वगीतकोविदस्य विशेषणत्वमपि प्राप्यते । यथा—

अभिगीतमिदं गीतं सर्वगीतिषु कोविदौ १।४।५७

कथ्यते यत् लवकुशाभ्यां वीणोपरि लयसहितमस्य गानं कृतम् । यथा—

तन्त्रीलयवदत्यर्थविश्रुतार्थमगायताम् वा० १।४। ३४

लवकुशाभ्यां शास्त्रीयसंगीतनियमानुसारं गानमस्य रामसभायां कृतम् । अत एव कतिपयमार्मिकस्थानानि गीतिकाव्यतत्त्वैर्व्याप्तानि सन्ति । स्वयं तस्य शापश्लोकः गीतिकाव्यस्य श्रेष्ठमुदाहरणमस्ति ।

महाभारते समाहितं गीतिकाव्यत्वम्—

गीतिकाव्यस्य विकासपरम्परायां महाभारतस्याप्रत्यक्षयोगदानमवश्यमस्ति । वाल्मीकिः मानवीयमनोभावान् काव्यस्य प्रवृतिनिमित्तान् कर्त्तुं प्रारब्धवान् । महाभारते स्वयम्वरावसरे कृष्णेनार्जुनवरणम्, नलोपाख्यानम्, द्रुपदस्यमनोदशा, पाण्डवानां वनगमनसमये प्रजाक्रन्दनम् । राज्ञा लोमपादेन ऋष्यश्रृंगप्रलोभनाय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रेषितायाः रुपाजीवायाः विलासः, ऋषिश्रृङ्गमुखेन ब्रह्मचारिवर्णनम्—एवंविधाः प्रसङ्गाःसन्ति, येषु गीतिलक्षणानि घटितानि भवन्ति ।

उदाहरणार्थमत्र प्रजाजनक्रन्दनस्य कानिचित् पद्यानि प्रस्तूयन्ते—

वरः कुरूणामधिपः प्रजानां पितेव पुत्रानपहाय चास्मान्,
पौरानिमान् जानपदांश्च सर्वान् हित्वा प्रयातः क्व नु राजपुत्रः ।
धिक् धार्तराष्ट्रं सुनृशंसबुद्धिं धिक् सौबलं पापमतिञ्च कर्णम्,
अनर्थमिच्छन्ति नरेन्द्र पापा मे धर्मनित्यस्य सततस्तवैवम् ।
स्वयं निवेश्याप्रतिमं महात्मा पुरं महादेवपुरप्रकाशम्,
शतक्रतुं प्रस्थममेयकर्मा हित्वा प्रयातःक्व नु धर्मराजः । महा० सभापर्व, २३।८-११ ।

प्रजास्वामिन्, कुरुश्रेष्ठ ! वयं पुरं ग्राम-निवासिनश्च त्यक्त्वा क्व याताः । क्रूरमतिंदुर्योधनं ! पापमतिं कर्णञ्च धिक् ! ये नित्यं धर्मात्मनोयुधिष्ठिरस्यानर्थमिच्छन्ति । महादेवस्य कैलाशपुरीसदृशस्यास्येन्द्रप्रस्थस्य स्थापनां समृद्धिंच विधाय पुनस्त्यक्त्वा धर्मराजः क्व नु गतः ।

एवंप्रकारेण महाभारतस्य कतिपये सरसाः मर्मस्पर्शिनः सन्दर्भाः गीतिकाव्यमयाः प्रतीयन्ते । एषोऽभिप्रायोऽस्ति यत् रामायण-महाभारत-सदृशेषु महाकाव्येषु यत्र कथावस्तुनोऽवहेलनां विधाय भावप्रधानस्थलानां सृष्टिर्विहितास्ति, तत्र कवेः समुच्छ्वसितभावनानां स्थितिकारणात् गीतिकाव्यत्वमुपलभ्यते । मनसि यदा वेगवतोऽनुभवस्योदयो भवति, तदा कविस्तं गीतिकाव्ये निवद्धं करोति ।[1] गीतिकाव्ये माधुर्यस्य, मदुतायाः आन्तरिकवेगस्य च गुणोभवति । एतद्विपरीतं महाकाव्ये गाम्भीर्यम्, प्रशस्तता, तथोदात्ततागुणाः भवन्ति । गीतिकाव्यस्य तुलना गिरिनिर्झरेण भवति, नाटकस्य प्रवहमानया समतलसरिता तथा महाकाव्यस्य गुरुगम्भीरसागरेण तुलना क्रियते ।[2] यथा गम्भीरसागरेऽपि यदाकदोत्तुङ्गतरङ्गाणामुन्मुक्तनृत्यं गिरिनिर्झरस्यादम्यप्रवहणशीलतां तिरस्करोति, तथैव क्वचित् महाकाव्यकलेवरेऽपि तादृशानां स्थलानां समावेशोजायते, यानि शक्तिमत्याः अन्तः प्रेरणायाः प्रतीकानि सन्ति तथा प्रबन्धकाव्यापेक्षया गीतिकाव्यस्याधिकनिकटें-सन्ति । अतइदं नाश्चर्यवस्त्वस्ति यत् महाकाव्येषु गीतिकाव्यांशानामन्वेषणं भवेत् ।

पाणिनिः तथा गीतिकाव्यम्

पाणिनि-विषये विद्वत्समाजे पर्याप्तमतभेदो विद्यते । कियन्तोविद्वांसः कवि

---

१. रवीन्द्रनाथटैगोर, मेघनाद-वधकी भूमिका, पृ० १५३.
२. डा० शम्भुनाथ सिंह, हिन्दीमहाकाव्यका स्वरूपविकाश । पृ० ११५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पाणिनिं वैयाकरणपाणिनेर्भिन्नं मन्वते, परं वैयाकरणपाणिनिविषयेऽकवित्वस्य ये- तर्काः दत्ताः सन्ति, तेषु बलं नास्ति। वैयाकरणपाणिनेः समयं यावत् काव्य- रचनायाः प्रौढता प्राप्यानास्ति, एतत्कथनं तर्कसंगतं न प्रतीयते। वैदिकसाहित्ये काव्यात्मकसूक्तीनां प्राचुर्यमस्ति तथा वाल्मीकीयरामायणं महाभारतञ्चोच्चकोटेः काव्यकलायाः निदर्शने स्तः। निःसन्देहं महाकविकालिदासात्पूर्वं स्वस्थकाव्यपरम्परा विद्यमानासीत्। नान्यथा सोऽकस्मात् एवंविधमुत्तमकाव्यं लिखितुं, समर्थोऽभवत्। वैयाकरणस्य कविसद्भावे नाश्चर्यवस्त्वस्ति। डा० औफ्रेक्टः डा० पिशलश्च कविपाणिनिं वैयाकरणपाणिनेरभिन्नं स्वीकृतवन्तौ। महर्षिपाणिनिः 'दाक्षीपुत्रः कथितोऽस्ति। पतञ्जलिः स्वमहाभाष्येऽनेकस्थलेष्विमं दाक्षीपुत्रं कथितवान्।[1] सदुक्तिकर्णामृतनामके संग्रहग्रन्थे कविषु दाक्षीपुत्रस्यापि नामायातमस्ति।[2]

नमिसाधुः काव्यालङ्कारटीकायां पाणिनिनाम्ना 'पातालविजय[3]'महा- काव्यस्य निर्देशंकृतवान्। महाकविराजशेखरः एकस्मिन् श्लोके कविवैयाकरण- पाणिनिमेकमेवोक्त्वा नमस्कृतवान्। यथा।—

नमः पाणिनये तस्मै यस्मादाविरभूदिह,
आदौ व्याकरणं काव्यमनुजाम्ववतीजयम्।—सूक्तिमुक्तावली

क्षेमेन्द्रः पाणिनिमुपजातिच्छन्दसः सिद्धलेखकमुक्तवान्। यथा—

स्पृहणीयत्वचरितं पाणिनेरुपजातिभिः,
चमत्कारैकसाराभिरुद्यानस्येवजातिभिः।—सुवृत्ततिलकम्, विलास १।३०

पाणिनिनाम्ना यानि पद्यान्युपलभ्यन्ते, तेषु पर्याप्तमात्रायां गीतितत्त्वानि विद्यमा नानि सन्ति। अत्र एकं पद्यद्वयं वोद्धृत्योक्तकथनस्य सिद्धिः विधास्यते—

निरीक्ष्यविद्युन्नयनैः पयोदो मुखं निशायामभिसारिकायाः,
धारानिपातैः सह किन्नुवान्तश्चन्द्रोऽयमित्यार्ततरं ररास।

अलङ्कारसर्वस्वे समुद्धृतम्।

मेघैः स्वविद्युन्नयनैः रात्रौ यदभिसारिकाया मुखं दृष्टम्,ः तदार्त्तं विललपुः यत्चन्द्रमा एवास्मद्वेगवतीनां वर्षाणां धारायां नीचैः पतितोऽस्ति।

गतेऽर्धरात्रौ परिमन्दमन्दं गर्जन्ति यत्प्रावृषि कालमेघाः
अपश्यती वत्सर्मिवेन्दुविम्वं तच्छर्वरी गौरिव हुंकरोति।—नमिसाधुः पृ० १२

---

१. सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः—महाभाष्य १।१।२०

२. सुवन्धौ भक्तिर्नः क इह रघुकारे न रमते।
धृतिर्दाक्षीपुत्रे हरति हरिचन्द्रोऽपि हृदयम्।—सदुक्ति०

३. काव्यालङ्कार, अध्याय २, पृ० १२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वर्षर्षौ अर्धरात्रौ कालमेघाः यन्मंन्दं मन्दं गर्जन्ति, तच्छ्रुत्वैवं प्रतीयते, यथा रात्रिरूपा गौः चन्द्रविम्बरूपं स्ववत्समनवेक्ष्य हुङ्करोति ।

ऐन्द्रं धनुः पाण्डुपयोधरेण शरद्दधानार्द्रनखक्षताभम्,
प्रसादयन्ती सकलङ्कमिन्दुं तापं रवेरप्यधिकं चकार ।

—अ० स० पृ० ११७ पर उद्धृत

शरद्रूपा नायिका स्वश्वेतमेघस्तनयोरिन्द्रधनूरूपं नखक्षतं धृत्वा कलंकिनं चन्द्रमसं लोभयति । रविरूपस्य स्वपतेस्तापमीर्ष्यालुतया वर्द्धयते ।

एवं प्रकारेण पाणिनिनाम्नोद्धृतेषु पद्येषु गीतिकाव्यगुणाः प्राप्यन्ते ।

पतञ्जलेः महाभाष्यं गीतिकाव्यञ्च

गीतिकाव्यपरम्परायां पतञ्जलेः महाभाष्येनापि प्रकाश आपतति । अनेन "बुभुक्षितं न प्रतिभाति किञ्चित्", "क्षेमे सुभिक्षे कृतसञ्चयानि पुराणि राज्ञा विनयन्ति कोपम्", 'प्रियं मयूरः प्रतिनर्नृतीति", "सा हितस्य धनक्रीता प्राणेभ्योऽपि गरीयसी" सदृश्यः रससूक्तयः समुद्धृताः । पतञ्जलेः शैली श्रमसिद्धा नास्ति । तेन दैनिकजीवनादुदाहरणानि गृहीतानि, यानि तत्कालीनसमाजस्याध्ययनायोपयोगीनि सन्ति । एतेषूदाहरणेष्वनायाससमाविष्टेषु 'मालती', 'प्रहर्षिणी', प्रमिताक्षरा तथा वसन्ततिलका—छन्दांसि-प्राप्यन्ते ।

महाभाष्येणैतत् स्पष्टमस्ति यत् तदानीं विविधकाव्यसरण्यः प्रचलिता आसन् । गेयपद्यानां परम्परा परंप्राचीनकालतः आयान्त्यासीत् । यत्पुष्टिः पिंगलच्छन्दःसूत्रेणापि जायते । भारतीयपरम्परा पिङ्गलं पाणिनिभ्रातरं मनुते । कान्तोत्पीडा, कुटिलगतिः, चञ्चलाक्षिका, चारुहासिनी—पदानि कवेः श्रृंङ्गारिक-प्रवृत्ति-सूचकानि सन्ति । एतैः प्रमाणैः जैकोविः एतन्निष्कर्षं निष्कासितवान्, यस्मात् पतञ्जलिलिखतगेयपद्यानां मूलोद्गमः खीष्टाब्दात् पूर्वयुगीनसाहित्येनैव सम्बद्धोऽस्ति । येन महाराष्ट्रीगीतिरपि प्रेरणां गृहीतवती ।[1] कीथः स्पष्टं लिखितवान् यत् गेयकाव्यस्य सुसम्बद्धा प्रबला च परम्परा खीष्टाब्दसमीपे तथा कदाचित् ततोऽपिपूर्वं वर्त्तमानासीत् ।[2]

अतएव महाभाष्याधारेऽपि स्वीकरणमेतत् नितान्तंतर्कसंगतमस्ति यत् पतञ्जलिकाले गीतिकाव्यपरम्परा विद्यमानासीत् । वैदिकच्छन्दोऽतिरिक्तानि प्रमुखलौकिकच्छन्दांस्यपि प्रयुक्तान्यभवन् । गीतिमाधुर्यं छन्दोवद्धगेयतायाः मार्मिकानुभूतेः तथा भावप्रवणताया आधारे निर्णीतं क्रियमाणमासीत् । महाभाष्ये पद्यस्य पद्यांशानाञ्च वाहुल्यं प्राप्यते । भाष्यकारः वररुचिनामकेन कविना रचितस्य कस्यापि काव्यस्य

---

१. कीथ—संस्कृत साहित्यका इतिहास, पृ० ४८ पर उल्लिखित ।
२. वही, पृ० ४८ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सूचनां ददाति ।[1] अतएव वैदिकसाहित्यात् प्रारम्भ्य गीतिकाव्यस्य सुनिश्चिता धारा, महाकाव्यस्य पाणिनेः पतञ्जलेः समये समृद्धासीत् ।

कालिदासः गीतिकाव्यञ्च

आदिकविः वाल्मीकिः लौकिकसंस्कृते काव्यस्यावतारणां विधाय येषामादर्शानां प्रतिष्ठां कृतवान्, कालिदासरचनासु तेषां विकसितरूपं दृश्यते । यस्याः सरसशैल्याः जन्मदाता वाल्मीकिरस्ति, तस्योदात्तमुत्कृष्टं च रूपं कालिदासेऽस्ति । उभयोः कव्योः मध्यवर्त्तिन्यः रचनाः नाद्योपलब्धाः सन्ति, परन्तु यत्र-तत्र विकीर्णसूत्राण्युपलब्धानि सन्ति । कालिदासः बाह्याभ्यन्तरप्रकृत्योरीदृशं सुन्दरं समन्वयं कृतवान्, येनासौ कविकुलगुरोरुपाधिनालङ्कृतः । यथा वाल्मीकिः आदिकविः मन्यते तथैव कालिदास आदिगीतकारः स्वीक्रियते ।

कालिदासनाम्नानेकरचना उपलब्धाः सन्ति । परन्तु गीतिकाव्ये समीचीने द्वे एव रचने आयातः—(१) मेघदूतम्, (२) ऋतुसंहारम् । मेघदूते वियोगिनो यक्षस्याख्यानमङ्कितमस्ति । अस्य भागद्वयमस्ति (१) पूर्वमेघः (२) उत्तरमेघः । पूर्वमेघे प्रकृतेरनेकानि सुन्दरचित्राणि सन्ति । नायको यक्षः स्वप्रेयस्याः तथा संदेशनयनाय दूत-चयनं प्रकृतेः करोति, यः" धूमज्योतिः सलिलमरुतां सन्निपातः "नास्ति, किन्तु" जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः"—रूपेण चैतन्यधर्मास्ति ।

कालिदासस्य प्रकृतेः चेतनतायां विश्वासो विद्यते । मेघदूते प्रकृतिं प्रति सत्यं प्रेम दर्शितमस्ति । यक्षः मेघस्य संवेदनशीलतया प्रभावितोऽस्ति । यतः स जानाति यन्मेघः तत्कामवेदनां वास्तविकरूपेण निवेदयिष्यति । अतएव सः सन्तप्तानां शरणरूपं पयोदं यक्षेश्वराणां विख्यातां नगरीमलकां प्रेषयति, यत्रत्यं मनोरमं भवनं भगवतः शिवस्य मस्तकात् विच्छुरितया चन्द्रिकया धवलितं भवति ।

कालिदासेन मेघप्रयाणाय यः पन्थाः निर्दिष्टः, सः स्नेहस्य शीतलच्छाययौतप्रोतोऽस्ति । विरहावधिगणनायां संलग्नां पतिव्रतां 'भ्रातृजायाम्' मेघः शीघ्रातिशीघ्रं यक्षसंवादं श्रावयेत्, एतदेवोद्दिष्टकार्यं विद्यते ।

अङ्गनानां कुसुमकोमलं प्रणयकातरं हृदयमाशाबन्धनेन बद्धं भवति—

आशाबन्धः कुसुमसदृशं प्रायशोह्यङ्गनानाम्,
सद्यः पाति प्रणयिहृदयं विप्रयोगे रुणद्धि । पूर्वमेघे १० पद्यम् ।

पवनः, पक्षिणः, लताः वीरुधः । नद्यः, गिरयः, यावन्तश्चराचरपदार्थाः मार्गे

---

1. वाररुचं काव्यम्, महाभाष्यम्, ९।१ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मिलेयुः, तेषां सर्वेषां तपनं शमयित्वा वियोगिनां हृदयेषु नवीनाह्लादोमंगयोः सृष्टिं करिष्यति। यक्षः मेघं केवलं स्वस्यैव संदेशवाहकं कल्पयितुं नेच्छति, परन्तु यत्र-यत्र प्रणयच्छाया सञ्चरति, तत्र-तत्र सोऽवश्यं विश्रमेत् तथा क्वचित् स स्वनयनसुभगं रूपं प्रदर्श्य क्वचित् श्रवणसुभगं गर्जनं श्रावयित्वा समस्तं जगत् उल्लिसितमुद्वेल्लितं च कुर्यात् ।

प्रेममहिमस्थापनं मेघदूतस्य मुख्यमुद्देश्यमस्ति । प्रकृतेः सम्पूर्णे साम्राज्ये प्रणयदूताय मेघाय सर्वथानुकूलता, सहानुभूतिः तथा सेवासाहाय्यस्य तरलता व्याप्तास्ति। अनुकूलः पवनः मन्दमन्दगत्या सौम्यं पयोदमग्रे नुदति। गर्वाभिभूतश्चातकः वामः सन् मधुरं नदति । गर्भाधानोत्सवाः बलाकाः पंक्तिबद्धाः भूत्वा तत्सेवायै सन्नद्धाः सन्ति- तथा प्रियसखः तुङ्गशैलः स्वकण्ठालिङ्गनप्रदानायातुरो भूत्वाश्रुपातं कुर्वन् स्नेहं व्यनक्ति। मार्गक्लान्तेरपनयनाय विभिन्नसरितां जलपानं कुर्वन् व्रजिष्यति । स्वस्थे-सति यदा सः व्योममार्गेऽग्रे चलिष्यति, तदा स्फुरद्रत्नं मिलितज्योतिःसदृशं दृश्यमानमिन्द्रधनुः तदीयश्यामंवपुः नवीनं कान्तञ्च विधास्यति । विश्रामाय यक्षोऽनेकविश्रामस्थलानां निर्देशं कृतवान् । यत्र स नवीनां शक्तिमर्जिष्यति तथा स्वसम्पर्के समागतेभ्यः वस्तुभ्यः सौन्दर्यदानं कुर्वन् व्रजिष्यति । पक्वफलैः भ्राजितैः वन्यरसालावृतस्य शैलशिखरस्य शोभा मेघेन नितरां वर्द्धते । दृश्यताम्—

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैः,
त्वय्यारूढे शिखरमचलः स्निग्धवेणी-सवर्णे ।
नूनं यास्यत्यमरमिथुन-प्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः । पूर्व १८१

पक्वफलैः दीप्तैः वनाम्रवृक्षैः परिवृतस्य पर्वतस्य शिखरे यदा त्वं स्निग्धवेणी सदृशेन श्यामवर्णेन परिवृतो भविष्यसि, तदा तदीयाशोभा देवदम्पतीभ्यां दर्शनीया तादृशी भविष्यति, यथा मध्यभागे श्यामं तथान्यतः सर्वतः पीतमुत्थितं पृथिव्याः स्तनं भवेत् ।

कालिदासेन एवं प्रकारेण पूर्वमेघे बाह्यप्रकृतेः साङ्गोपाङ्गचित्रणं कृतम् । कस्तूरीमृगाणां नाभिभिः निःसृतेन गन्धेन सुरभिताभिः शिलाभिः युक्तस्य हिमधवलपर्वतस्य शिखरे यदा सः श्रममपनेतुं स्थास्यति, तदा तच्छोभेदृशी भविष्यति, यादृशी शिववाहनस्य नन्दिनः शृङ्गयोरार्द्रायांमृत्तिकायां सत्यां भवेत् । स्निग्धांजनसदृशः श्यामः स मेघोऽचिरभिन्नगजदन्तखण्डसदृशे धवलकैलाशशिखरे यदापतिष्यति, तदेदृशः शोभासम्पन्नो भविष्यति, यादृशः गौरवर्णबलरामस्कन्धयोः दीव्यन्नील सवनस्य भवेत् । कैलासाङ्के उपविष्टालका कामिनीसदृशी शोभिता भविष्यति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां—
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।
या वः काले वहति सलिलोद्गारमुच्चैर्विमाना,
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् । पूर्व ६२

प्रियमित्र मेघ ! तस्यैव कैलाशपर्वतस्याङ्के गङ्गातटे मम निवासभूमिरलका नाम्नी नगरी विद्यते । तां त्वं पश्यन्नेव ज्ञास्यसे । कैलासस्य प्रान्तभूमौ जाह्नवीतटे स्थितालका नगरी तस्याः कामिन्याः सदृशी ज्ञायते, या स्वकान्तोत्सङ्गे उपविष्टा वर्त्तते तथा यस्याः श्वेतपरिधानाञ्चलं वायुनोड्डीयते । वर्षासु यदा त्वं तस्या उन्नतेषु हर्म्येषूड्डीनः सलिलधारां पातयिष्यसि, तदा सेदृशी शोभिता भविष्यति, यथा कस्या अपि कामिन्याः शिरसि मुक्ताजालग्रथितो मन्द्रकेशवन्धः स्यात् ।

उल्लिखितपद्ये चित्रोपमता दर्शनीयास्ति । कविः मेघस्य श्यामलकान्त्याधिकः चमत्कृतोऽस्ति तथा ललितोपमानैः तद्भावनार्थं सः व्यग्रोविद्यते । यमुना-नन्दि-बलराम-सदृशानामप्रस्तुतानां योजना अद्यतनं पाठकं नावर्जयेन्नाम, परन्तु पौराणिकसन्दर्भेषु संश्लिष्टभावकेभ्यः एतेषां व्यञ्जनावश्यकप्रभावकारिणी वर्तते । चर्मण्वत्याः पृथुलप्रवाहे प्रतिबिम्बितोमेघः पृथिव्याः वक्षसि दोलन्मुक्ताहारमध्येऽनुस्यूतेन्द्रनीलमणिगुटिकयोपमितोऽस्ति ।

कालिदासस्याप्रस्तुतेष्वञ्जनस्य वेण्याः मुक्ताजालस्य च प्राचुर्यमस्ति। चित्रयोजनायाः एकमन्यदुदाहरणं दीयते । कथितं यत् यक्षः स्वविरह-विधुरायाः प्रियतमायाः वर्णनं करोति । वर्णनेऽस्मिन् भावुकतया सह चित्रोपमतापि प्राप्यते—

रुद्धापाङ्ग-प्रसरमलकैरञ्जनस्नेहशून्यं—
प्रत्यादेशादपिच मधुनो विस्मृतभ्रूविलासम् ।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्याः,
मीनक्षोभाञ्चलकुवलयश्रीतुलामेष्यतीति । उत्तरमेघ० ३२

तस्याः कज्जलरहितेऽक्षिणी नेदानीं सुन्दरे लगिष्यतः । तयोः रुक्षालकानां पतनेन तस्याः वक्रेक्षणमपगतं भविष्यति । मद्यपानत्यागेन तन्नयनयोः भ्रूविलासलीलापि विलीना स्यात् । तद्भङ्गभाव-चमत्कारोऽपि व्यपगतो भवेत् । अहं शोचामि यत् यदा त्वं मम प्रियतमा समीपे गमिष्यसि तदा शकुन-सूचनार्थं तस्याः मृगाक्ष्याः वामाक्षि स्पन्दितं भविष्यति । तदानीं तन्नयनशोभा मत्स्यकम्पितकमलिनी-शोभासदृशीभविष्यति ।

एवं प्रकारेण मेघदूते यानि शब्दचित्राणि सन्त्यंकितानि, तद्रेखाः नितान्तं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गम्भीराः, रससिक्ताः, तथा भावपूर्णाः सन्ति। तासु भावनानां प्राञ्जलरूपेणाभिव्यक्तेः शक्तिः विद्यमानास्ति।

मेघदूते मार्मिकव्यञ्जनापि प्राप्यते। कविः विरहव्यञ्जनां परमकरुणमार्मिकरूपेण कृतवान्। अनुभूतेस्त्रीव्रताधिकास्ति। यक्षस्य विवशतायाः, दीनतायाः, स्मृतेः विषादस्य जडतायाः पञ्चामृतरूपं कृतान्तं प्रति असूयायाः पञ्चामृतमस्ति। यथा—

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्,
आत्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम्।
अस्रैस्तावन्मुहुरुपचितैः दृष्टिरालुप्यते मे,
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः। उ. मे० ४७

यक्षस्य विरहः करुणापूर्णोऽस्ति। तस्याक्ष्णोरविरलाश्रुधारा प्रवहन्त्यस्ति। अतः तस्य स्वप्रियतमां प्रति चित्रद्वारेण मिलनं सम्भवं नास्ति। यक्षः कथयति—'प्रिये, यदा कदा गैरिकेण शिलापट्टे तव मानिनीं छविमंकितां करोमि तथा तव चरणयोः तव मानापनोदाय पतितं स्वचित्रं निर्मातुं प्रयासं करोमि। परमेतत् न सम्भाव्यते। अश्रु निरन्तरं पतत् नयनयोः दृष्टिशक्तिं लुम्पति। चित्रच्छविमपि द्रष्टुं न शक्नोमि। निर्दयो विधाता चित्रेऽपि मिलनमावयोर्न सहते।

विप्रलम्भस्य गतिशीलं जीवत्, अश्रुसिक्तं तपःपूतमेकमपरमपि चित्रं प्रस्तूयते, चित्रेऽस्मिन् कियती मार्मिकतास्ति। प्रेमिणः विरहकातरतायाः दुर्भगतायाश्च मनोरमं चित्रं जातमस्ति—

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतोः
लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेषु।
पश्यन्तीनां न खलु बहुशो न स्थली देवतानाम्
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति। उ० मे० ४३

हे प्रिये स्वप्नदर्शनमध्ये यदा त्वं मह्यं कथमपि मिलसि तदा त्वां निष्ठुरतायाः भुजपाशे ग्रहीतुं शून्याकाशेऽहं भुजौ विस्तारयामि। मम तस्याः करुणदशायाः दर्शिकानां वनदेवीनां स्थूलाश्रूणि मुक्तासदृशानि तरुपल्लवेषु विकिरन्ति।

यक्षः प्रत्यक्षजीवने स्वाभिलाषमपूर्णं सञ्जातं वीक्ष्य स्वप्नलोकस्याश्रयं गृह्णाति। स वारं वारं निद्रार्थं यतते। स कामयते स्वप्नेऽपि प्रियां प्राप्तुम्। स्पष्टमस्ति यत् मानसिकं प्रेम शारीरिकाभिव्यक्तिकृते समुत्कण्ठितं भवति। सोऽमूर्त्तभावनाया मूर्तोपभोगं वाञ्छति।

अतः संक्षेपेणैतत्कथयितुं शक्यते यत् शब्दानां कौशलपूर्णचयनात् कलात्मक-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रयोगकारणाच्च मेघदूतेऽधिकाधिकमाधुर्य्यात्, लालित्यात् भावप्रेषणीयतायाः कारणाच्च गेयताया अपि पुटोऽस्ति । प्रकृतिचित्रणेन भावसान्द्रतया, शैलीगतचारुतया माधुर्येण च गेयतायाः समवायसत्त्वात् मेघदूतमुच्चकोटिकं गीतिकाव्यं मन्यते।

संस्कृतालङ्कारशास्त्रिभि एतत् खण्डकाव्यमङ्गीकृतम् । परं खण्डकाव्यकृते यस्येतिवृत्तस्यावश्यकता भवति, तस्यास्मिन्नभावोऽस्ति । अस्मिन् वर्णितं यक्षेति वृत्तमेतावन्नगण्यमस्ति, यत् तस्य काव्ये किमपि महत्त्वं नास्ति । यद्यत्र यक्षस्थाने कोऽप्यन्योऽभविष्यत्, तदा कोऽपि पार्थक्यं नाभविष्यत् । इतिवृत्तस्य खण्डकाव्ये यादृशी गत्यात्मकतापेक्षिता भवति, तस्या मेघदूतेऽभावो विद्यते। खण्डकाव्यं विषयप्रधानं भवति, परं मेघदूतं विषयिप्रधानमस्ति । डा० भोलाशङ्करव्यासो लिखितवान् यत् "मेघदूतं न खण्डकाव्यमस्ति, न वा करुणगीतिरेव, तत् विषयिप्रधानं भावात्मकं गीतिकाव्यमस्ति । अनया दृष्ट्या 'मेघदूत'स्य तुलना हिन्दीभाषायाः छायावादिकवेः पन्तस्य 'ग्रन्थि' नामकेन काव्येन तथा प्रसादस्य 'आँसू' काव्येन भविष्यति । ययोः भ्रान्त्या केचन खण्डकाव्ये 'एलिजी'-मध्ये वा गणनां करिष्यन्ति । यद्यपि स्पष्टत इमे खण्डकाव्ये स्तः । कस्मिंश्चिदपिकाव्ये सूक्ष्मकथा-सूत्र संकेतदानेन तदितिवृत्तात्मकं विषयप्रधानं वा न भवितुं शक्नोति । मेघदूते गीतिकाव्यस्य सर्वाणि लक्षणानि विद्यमानानि सन्ति । गीतिकाव्येनास्माकं तात्पर्यं संगीताधारे निर्मितेन गेयकाव्येन नास्ति । गीतिकाव्यं वयं तत्काव्यं कथयामः, यस्मिन् कवेः स्वभावानां तथा कल्पनानामकृत्रिमः प्रवाहो भवति, यस्मिन् कवेः वैयक्तिकता, तस्य स्वकीयसुखदुःखे, अश्रुहासौ, उल्लासविषादयोः तरलता च भवन्ति । यत्र कविः आत्मानं भावुकहृदयानां समक्षं कविता-माध्यमेन समुपस्थापयेत्।[1]" अतएव 'मेघदूतस्य' गीतिकाव्यरूपेण स्वीकृतौ नास्ति काचन विप्रतिपत्तिः।

ऋतुसंहारस्य गीति-काव्यंत्वम्

कालिदासस्य द्वितीयरचनाया—ऋतुसंहारस्यापि गीतिकाव्ये गणना भवितुं शक्नोति । एतत् षट्सर्गात्मकं लघुकाव्यमस्ति । एतस्य वर्ण्यविषयः प्रकृतिचित्रणमस्ति । एतस्य काव्यस्य प्रकृतिः नालम्बनप्रधाना, प्रत्युतोद्दीपनप्रधानास्ति । ऋतुसंहारे कविः स्वप्रियां सम्बोध्य षड्तूनां वर्णनमकरोत् । अस्योद्दीपनपक्षस्य स्वरः मुखरोऽस्ति । अस्य काव्यस्य प्रारम्भः ग्रीष्मस्य प्रचण्डतायाः भवति, समाप्तिश्चास्य वसन्तस्य सरसतायां जायते । ग्रीष्मं वर्णयन् कविः कथयति—

> विशुष्ककण्ठाहृतसीकराम्भसो गभस्तिभिर्भानुमतोऽनुपातिता,
> प्रवृद्धतृष्णोपहता जलार्थिनो न दन्तिनः केसरिणोऽपि विभ्यति । ऋ० १।१५

---

१. भोलाशंकर व्यास—संस्कृतकविदर्शन, पृ० ८७ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शुष्ककण्ठेन सीकरजलं गृह्णन्तः, सूर्यकिरणैस्तप्ताः तृषाधिक्येन पीडिताः, जलेच्छुकाः गजाः सिंहादपि न विभ्यति ।

ऋतुसंहारे प्रकृतेः मानवीकरणं प्राप्यते । वर्षाकालः नृपसदृशः सज्जितः आगच्छन् दृश्यते । स जलपूर्णमेघगजासीनः आगच्छति । आकाशे तस्य विद्युद्ध्वजः उड्डीयते । वज्रनिर्घोषस्य मर्दलाः शब्दायन्ते । स उद्धतकान्त्या कामिजनानां प्रियो भूत्वा प्रकृतिप्राङ्गणेऽवतरति[1] । शरद्वर्णने कथितमस्ति—

काशांशुकाविकचपद्ममनोज्ञवक्त्रा, सोन्मादहंसनवनूपुरनादरम्या,
आपक्वशालिरुचिरानतगात्रयष्टिः प्राप्ता शरन्नववधूरिवरूपरम्या । ऋतु० ३।१

शरद् नववध्वाः रूपं धृत्वागता । सा पुष्पितकाशांशुकं दधाना, मत्तहंसकलरवनूपुरं धारयन्ती, पक्वशालिचारुदेहा, विकसितकमलमनोज्ञमुखी, जनचेतांसि अपहरति ।

एवं प्रकारेण कविः कालिदासः प्रकृतिराज्यस्य सर्वान् पदार्थान् स्थलानि च चित्रितवान् । रमणीयसन्ध्यायाः, प्रस्फुटितचन्द्रिकायाः, कोकिलकाकल्याः, सुरभितपवनस्य, मत्तभ्रमरगुञ्जनस्य, प्रमदाविलासरचनायाः, रतिविलासस्य, शारदीयायाः विभावर्याः, चन्द्रतारकावकीर्णव्योम्नः, चन्द्रिकार्चितरजन्याश्च सजीवं चित्रणं कृतवान् ।

यद्यप्येतत् काव्यं मेघदूतसदृशं रमणीयं न स्यात्, परं प्रकृतिविषयकरागात्मकदृष्ट्या एतस्य गीतिकाव्यरूपेण स्वीकृतौ विरोधो नास्ति । कल्पनालालित्यं भावप्रवणता शृंगारिकव्यापारस्तथामधुरोद्वेगाः एतत्काव्यं गीतिश्रेण्यां प्रतिष्ठापयन्ति ।

घटकर्परस्य गीतिकाव्यम्

घटकर्परस्य जीवनसम्बन्धे प्रमाणोपलब्धिर्नास्ति । प्रो० जैकोबीमहाशयः इमं कालिदासात् प्राचीनं मनुते । परं डा० कीथः नैतत् स्वीकरोति । तस्याभिमतमस्ति यत् घटकर्परसमये यमककाव्यानां महती प्रतिष्ठासीत् । अतएव घटकर्पर एवंविधं काव्यं प्रणेतुं प्रोत्साहितः तथा तेन स्वकाव्येनैकस्यादर्शस्य प्रतिष्ठा कृता ।[2]

घटकर्परस्य नाम विक्रमादित्यस्य नवरत्नेष्वायाति[3] । निश्चितरूपेण घटकर्परसम्बन्धे किमपि वक्तुं न शक्यते । घटकर्परकाव्ये द्वाविंशतिगीतयः सन्ति । एतत् कालिदासस्य मेघदूतानुकारि काव्यमस्ति । एतस्य गणना संदेशकाव्येषु क्रियते ।

---

१. ऋतुसंहार २।१

२. संस्कृत साहित्य का इतिहास, द्वितीय भाग, (हिन्दी संस्करण) ।

३. संस्कृत गीतिकाव्य का विकास, प्रकाशक प्रतिष्ठान, मेरठ पृ० २१२ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वर्षाकालस्य प्रारम्भे एकया वियोगिन्या प्रियतमसमीपे प्रेषितस्य संदेशस्य वर्णनमस्ति । संदेशवाहकः मेघ एवास्ति । अस्मिन् काव्यसूत्रस्याभावोऽस्ति । कविहृदयपक्षः चमत्कारप्रियतया दमितोऽस्ति । अतो गीतिकाव्यस्यात्मा च नागतोऽभवत् । प्रियतमायाः कोमलकरुणभावस्थाने कविः स्वयमकै चित्रणंकृतवान् । अतएव घटकर्परः श्रेष्ठगीतिकाव्यकारेषु न गण्यते । कलाप्रियतादृष्टिसमर्थने निम्नांकितं पद्यमुदिध्रयते—

क्षिप्रं प्रसादयति सम्प्रति कोपितानि,
कान्तामुखानि रतिविग्रहकोपितानि ।
उत्कण्ठयन्ति पथिकाञ्जलदाः स्वनन्तः,
शोकः समुद्भवति तद्वनितास्वनन्तः । घ० क० ५

कामकेलिषु याभिः कामिनीभिः मानं धृतं, ताः मेघाः प्रियैःसह योजयन्ति । इमे मेघाः गर्जन्तः पथिकान् गृहं गन्तुं प्रेरयन्ति । विरहिणीनां हृदयेऽपारशोकमुत्पादयन्ति ।

हंस-पंक्तिरपि नाथ सम्प्रति,
प्रस्थिता वियति मानसं प्रति ।
चातकोऽपि तृषितोऽम्बु याचते,
दुःखिता पथिक, सा प्रिया च ते । घट० क० ९

हे नाथ हंसानां पंक्तिरपि सम्प्रति नभोमार्गेण मानसरोवरं प्रस्थिता । तृषितश्चातकोऽपि जलं याचते । हे प्रवासिन्, इदानीं सा तव कान्ता नितान्तं दुःखिताऽभवत् । तव दर्शनाय विह्वलास्ते ।

तासामृतुः सफल एव हि या दिनेषु,
सेन्द्रायुधाम्बुधर-गर्जितदुर्दिनेषु ।
रत्युत्सवं प्रियतमैः सह मानयन्ति,
मेघागमे प्रियसखीश्च समानयन्ति । घ० क० २०

ताभ्य एवायमृतुर्मोददायकोऽस्ति याः विद्युता सह गर्जतां मेघानां वेलायां स्वप्रियतमैः सह काममहोत्सवं सफलयन्ति । आगतेषु मेघेषु सख्योऽपि एकस्मिन् दिने एकवर्षस्यानन्दमनुभवन्ति ।

काव्यान्ते मेघः गर्जित्वा प्रियतमामाश्वासयति यत् तव पतिः शीघ्रमेवागमिष्यति । गीतिकाव्येऽस्मिन् रसानुभूतेः भावात्मकतायाश्चाभावेऽपि गीतिकाव्यस्य तत्त्वानि विद्यमानानि सन्ति ।[1]

१. लीलाधर त्रिपाठी, गीतिकाव्य का विकास, हिन्दी प्रचारक पुस्तकालय, वाराणसी, पृ० २२१-२२२ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कालिदासानन्तरं संस्कृते संदेशकाव्यस्य परम्परा पूर्णतया विकसिताऽभवत् । अष्टमख्रीष्टाव्दे जैनकविः जिनसेनः मेघदूतस्यैकैकपङ्क्तेः समस्यापूर्ति विधाय पार्श्वाभ्युदयस्य प्रणयनं कृतवान् । अस्मिन् मेघदूतस्य सदृशमेव माधुर्यं शान्तरसधारां च प्रवाहिते स्तः । अस्यां रचनायां गीतिकाव्यस्य सर्वे गुणाः विद्यमानाः सन्ति । चरित्रसुन्दरस्य शीलदूतमपि मनोरममेकं संदेशात्मकं गीतिकाव्यमस्ति । अस्मिन् शृंगारस्य स्थाने शीलस्य महत्त्वं प्रतिपादितमस्ति । 'धोयी'—कवेः पवनदूतानन्तरं संस्कृतवाङ्मये संदेशकाव्यानां परम्परा तीव्रतया प्रारब्धा । तथास्याः त्रिशत्-पञ्चत्रिशत् काव्यानि सम्प्रत्युपलब्धानि सन्ति । गीतिकाव्यदृष्ट्या 'पवनदूत' 'नेमिदूत' काव्येऽध्ययनीये स्तः ।

पवनदूत-गीतिकाव्यत्वम्

अस्य गीतिकाव्यस्य प्रणेता 'धोयी' कविरस्ति । अयं राज्ञो लक्ष्मणसेनस्य राजसभायाः विद्वानस्ति तथास्योपाधिः कविराज आसीत् । कवेः समयो द्वादशः ख्रीष्टाब्दो मन्यते । अस्य काव्यस्य कथैतिहासिकी वर्तते । राजा लक्ष्मणसेनोऽस्य नायकोऽस्ति तथा तस्य दक्षिण-विजय-यात्रायाः चित्रणं कृतमस्ति । गौडेश्वरो महाराजो लक्ष्मणसेनः यदा दक्षिणनृपान् विजित्य निवृत्तः तथा मलयपर्वतनिवासिनी गन्धर्वकन्या 'कुवलयवती' तं वीक्ष्यैवासक्ताभवत् । गते महाराजे मदनव्यथयापीडिता सा दक्षिणपवनं स्वदूतं निर्माय प्रियतम-समीपं प्रेषितवती । कविना लिखितम्—

तस्मिन्नेकां कुवलयवती नाम गन्धर्वकन्या,
मन्ये जैत्रं मृदुकुसुमतोऽप्यायुधं वा स्मरस्य ।
दृष्ट्वा देवं भुवनविजये लक्ष्मणं क्षोणिपालं,
बाला सद्यः कुसुमधनुषः संविधेयी बभूव । प. दू. २ श्लोक

कुवलयवती पवनस्य जगत्प्राणदक्षिणादिविशेषणैः प्रशंसां विधाय विश्वसिति यत्-मम प्रार्थनैतादृशेन महानुभावेन तिरस्कृता न भविष्यति । यतः पुण्यश्लोकानां जनानां जन्म परार्थायैव भवति । यथा—

त्वत्तः प्राणाः सकलजगतां दक्षिणस्त्वं प्रकृत्यां,
जङ्घालं त्वां पवन मनसोऽन्तरं व्याहरन्ति ।
तस्मादेव त्वयि खलु मया सम्प्रणीतोऽर्थिभावः,
प्रायो भिक्षा भवति विफला नैव युष्मद्विधेषु ॥ प. दू. ४ श्लोक

गन्धर्वकन्या नूतनाऽपरिचिता प्रेयसी पवनंप्रति निवेदयति यत् त्वं मम प्रणयसन्देशमेकान्ते प्रियाय कथयेः—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सद्यः कृत्वा पवन विनयाञ्जलिं मूर्ध्नि किञ्चिद्,
वक्तव्योऽसौ रहसि भवता मद्गिरा गौडराजः।
त्वत्तः श्रोष्यत्यवहितमनाः सोऽनुरक्ताङ्गनानाम्,
जायन्ते हि प्रणयिनि सुधावीचयो वाचकानि। प. दू. ६६ श्लोकः

हे पवन ! विनयपूर्वकं शिरसाञ्जलिं बद्ध्वा गौडराजायैकान्ते मम वार्त्तां कथयेः। तव वार्त्ताः स परमध्यानेन श्रोष्यति, यतो नवीनायाः प्रणयनिवेदनं प्रेमिहृदयेऽमृतलहरीमुत्पादयति।

एवं प्रकारेणास्मिन् काव्येऽनेक सरसाः काव्यपूर्णाश्चोक्तयः प्राप्यन्ते। इदं परोक्षानुभूतिपरकं गीतिकाव्यमस्ति। दूतकाव्यस्य गीतिमत्तया प्रबन्धत्वं दमितमस्ति प्रबन्धात्मकभावधारायुक्ताभिः गीतिभिः पाठकानामुपरि समन्वितः प्रभाव आपतति।

नेमिदूतस्य गीतिकाव्यत्वम्

काव्यकलादृष्ट्या नेमिदूतस्य विशिष्टं महत्त्वमस्ति। एतत् समस्यापूर्तिरूपेण लिखितमस्ति। तीर्थंकरनेमिनाथः श्रीकृष्णस्य ज्येष्ठः भ्रातासीत्। स वैराग्ये जाते गृहं परित्यज्य गिरनरपर्वते तपः कर्त्तुं गतवान्। अस्य संकल्पिता पत्नी राजमती विरहविदग्धा तत्र गता तथा तं निवर्तयितुं प्रयत्नमकरोत्। सा स्वविरहव्यथायाः वर्णनं करोति तथा मेघदूतस्य सदृशमेव गृहमार्गं निर्दिशति। कविः कालिदासकलायां स्वकलाया एवं मेलनं कृतवान् यत् सहसा पार्थक्यबोधो न जायते।

काव्येऽस्मिन् विप्रलम्भशृंगारस्य शान्तरसस्य च गङ्गा-यमुना-सङ्गमोऽस्ति। काव्यारम्भः विरहाद्भवति। परं तत्समाप्तिः शान्तरसे भवति। नायिकायाः राजमत्याः विप्रलम्भस्य जन्म विवाहोपरान्तसम्भोगस्याशायाः, अभिलाषस्य सम्भावनायाश्च विनाशाद्भवति। वियोगपरिणतिः सुखान्ता भवन्त्यपि शृङ्गारे न भूत्वा शान्तरसे जाता। नायकनायिकामिलनं शारीरिकयोगाय न भूत्वा मोक्षसुखप्राप्तये भवति। कविः कथयति—

चक्रे योगान्निजसहचरीं मोक्षसौख्याप्तिहेतोः,
केषां न स्यादभिमतफला प्रार्थना ह्युत्तमेषु। नेमिदूत १२४ श्लोक

राजीमत्याः मातापि तां वक्ति यत् त्वमस्य संसारविरक्तनायकस्याशाः त्यज, परं तस्या उपरि मातुरुपदेशस्य कोऽपि प्रभावो नाभवत्।

मातुः शिक्षाशतमलमवज्ञाय दुःखं सखीना—
मन्तश्चित्तेष्वजनयदियं पाणिपङ्केरुहाणि।

७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हस्ताभ्यां प्राक् सपदि रुदती रुन्धती कोमलाभ्याम्,
मन्द्रस्निग्धैर्ध्वनिभिरखला-वेणिमोक्षोत्सुकानि । नेमिदूत—
१०६ श्लोक

नायिकायाः स्वप्ने यदा-कदा नायकस्य मिलनं भवति । सा वार्तालापकरणाय मुखं विवृणोति । एतत् क्रूरकृतान्ताय सह्यं न भवति—

रात्रौ निद्रां कथमपि चिरात् प्राप्य यावद्भवन्तम्,
लब्ध्वा स्वप्ने प्रणयवचनैः किञ्चिदिच्छामि वक्तुम् ।
तावत्तस्या भवति दुरितैः प्राक्कृतैर्मे विरामः ।
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः । —नेमि,
११३ श्लोक

एवं प्रकारेण कविः विप्रलम्भश्रृंगारस्यातिसरसं चित्रणं कृतवान् । शान्तरसे पर्यवसितेऽपि काव्ये श्रृंगारपूर्णान्यनेकभावचित्राणि प्राप्यन्ते ।

काव्येऽस्मिन् मेघदूतसदृशमेव गीतिकाव्यत्वं प्राप्यते । कथानकस्य स्वल्पतापि मेघदूतसदृश्येवास्ति तथा मार्मिकस्थलानां सद्भावः तादृश एवास्ति । मन्दाक्रान्तच्छन्दसा गेयतावृद्धिरपि कृता । अतएवास्मिन् काव्ये गीतिकाव्यस्य निम्नलिखितगुणाः विद्यमानाः सन्ति—

१. सत्यपि-विषय प्रधाने आत्मनिष्ठता ।
२. विशुद्धभावात्मकता ।
३. छन्दोजन्या गेयता ।
४. माधुर्यम् ।
५. स्पष्टता ।
६. सुकोमल-भावाभिव्यञ्जना ।
७. शब्दसाधना ।
८. कथाबन्धस्थाने भावबन्धता ।
९. वियोगजन्यानामगणितवेदनात्मकभावानां समवायः

प्रायः समस्त संदेशकाव्यानि नायिकायाः बाह्यव्यापारस्य, तत्सन्तप्तहृदयस्य विवशतायाः व्याकुलतायाः, किंकर्त्तव्यविमूढतायाः, अस्थिरतायाः एवं दुःखातिशयतायाः सद्भावेन गीतिकाव्यानि मन्यन्ते । गीतिकाव्यस्य समस्तलक्षणानि सन्देशकाव्येषु घटितानि भवन्ति ।

श्रृंगारिकगीतिकाव्यस्य विकासः ख्रीष्टाब्दस्य प्रारम्भिकशताब्द्यां विशेषरूपेण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जातोऽस्ति । सातवाहनकाले भारतवर्षस्य व्यापारिकोन्नतिः विशेषरूपेणाभवत् तथा समृद्धेः फलस्वरूपं संगीतस्य चित्रकलायाश्च पूर्णविकासोऽभवत् । नगरनिवासिनां सुखसमृद्धेः विलासप्रियतायाश्च ज्ञानं वात्स्यायनस्य कामसूत्रेण भवति । वात्स्यायनेन यस्याः दिनचर्याया उल्लेखोऽकारि तस्यां सायं गोष्ठयायोजनं पर्वोत्सवेषु विलासक्रीडा-योजनं गीतवाद्यायोजनञ्चावश्यकं कथितमस्ति । साहित्येऽपि आसां परिस्थितीनां प्रभावोऽपतत् तथा मानवीयभावनासु रतिभावोन्मुखं कविताग्रेसराऽभवत् । प्रेमभावस्य प्राकृतिकस्वरूपाय कलात्मकरूपदानस्य प्रारम्भोऽभवत् । यस्मादेकत्ररूपचित्रणस्य अनुभाववर्णनस्य सूक्ष्मतापूर्विका प्रक्रियाऽचलत् । फलतः भर्तृहरेः शृङ्गारशतक-सदृशानां गीतिकाव्यानां रचनाभवत्—

'भर्तृहरिः' तथा तद्गीतिकाव्यानि

भर्तृहरिः लोकजीवने कविरूपेण प्रसिद्धो न भूत्वा संन्यस्तयोगिरूपेण-ख्यातोऽस्ति । पत्न्याः अविश्वासेनैवायं विरक्तोऽभवत् तथा स्वराजसिंहासनं विहाय वनंगतः । इयमनुश्रुतिरद्यापि चलन्त्यायाति तथैत्कारणं नीतिशतकस्य निम्नांकितं पद्यमस्ति—

> याञ्चिन्तयामि सततं मयि सा विरक्ता,
> साप्यन्यमिच्छति जनं सजनोऽन्यसक्तः ।
> अस्मत्कृते च परिशुष्यति काचिदन्या,
> धिक्ताञ्च तञ्च मदनञ्च इमाञ्च माञ्च। नीतिशतकम्, २ पद्य

पद्येऽस्मिन् नरस्य नार्याश्चः परस्परविश्वासघातोपरि यः खेदः प्रकटितोऽस्ति, स एव भर्तृहरेः विरागस्य जनकः कथितोऽस्ति । भर्तृहरिः विरक्तो भूत्वा वनं जगाम । तद्भ्राता विक्रमादित्यो राज्यं चकार । भर्तृहरेः जीवनवृत्तस्य, समयस्य च सम्बन्धे किम्वदन्त्याः ऋते नान्यत् किमपि प्रमाणमुपलभ्यते । वाक्यपदीयप्रणेता शतकत्रयस्य रचयिता चैक एव भर्तृहरिः विद्यतेऽन्योवेति निश्चयात्मकरूपेण वक्तुं न शक्यते । यद्युभावभिन्नौ, तदास्य समयः ६०० शताब्द्याः मध्येऽस्ति । अस्य शतकत्रये गीति-काव्यस्यानेक गुणाः प्राप्यन्ते—

१. दुर्जनानामपरिवर्त्तनीयता ।
२. विदुषां ज्ञानिनाञ्चादरणीयता ।
३. नारीस्वभावस्य चाञ्चल्यं तद्धठवादिता ।
४. कुलटायाः वेश्यायाश्च त्यागः ।
५. सद्गृहिणीसम्बन्धिन्याः रतेरुत्तमता ।
६. वैराग्यस्य सर्वोत्कृष्टता ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

७. भाग्यवादस्यापरिहार्यता।

८. नार्याः रूपलावण्यस्यानुपमता।

९. सति रमणीयेऽपि विषयस्य निःसारता।

नीतिशतके शतश्लोकाः विभिन्नच्छन्दःसु लिखिताः सन्ति। एषु कतिपयपद्येषु कालिदासस्य, शूद्रकस्य, विशाखदत्तस्य प्रभावः लक्ष्यते। कविः वाग्भूषणमक्षयभूषणं कथयन् लिखति—

केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः,
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते,
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्। नीति—१९

केयूरादिहस्ताभरणानि- चन्द्रसदृशचमत्कारयुक्तमुक्तामालाः, स्नानम्, चन्दनादिलेपः, पुष्पाणि, सज्जितकेशाःपुरुषं न भूषयन्ति, धृता शुद्धा वाण्येव पुरुषं विभूषयति। समस्तान्याभूषणानि नश्यन्ति, परं वाग्भूषणमक्षयभूषणमस्ति दुर्जनानामपरिवर्त्तनीयतायाः चित्रणं कुर्वन् कविः कथयति—

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो,
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं—
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्। नीति—११

जलेनाग्निः शाम्यति, छत्रेण सूर्यातपो निवार्यते, मत्तगजराजः तीव्रेणांकुशेन वशीभूतो भवति, दण्डेन वृषभः खरश्च वार्येते। ओषधिभिः विविधाः रोगाः एवं नानाप्रकारैः मन्त्रैः विषशान्तिर्विधीयते। सर्वेभ्यः शास्त्रविहिता काचनौषधिरस्ति, परन्तु मूर्खस्य मूर्खतानिवारणाय नास्त्यौषधम्।

नारीस्वभावस्य चित्रणप्रसङ्गेऽभिहितम्—

एताश्चलद्वलयसंहतिमेखलोत्थ—
झङ्कारनूपुररवाहृतराजहंस्यः।
कुर्वन्ति कस्य न मनो विवशं तरुण्यो
वित्रस्तमुग्धहरिणीसदृशाक्षिपातैः। शृ० १।८

वलयझंकृतिं तथा मेखलामधुरध्वनिं कुर्वन्त्यः राजहंसरूपाः युवत्यः भीतहरिणीचञ्चलदृष्टिपातं स्वाक्ष्णोः रक्षन्त्यः कस्य मनो न वशीकुर्वन्ति?

लीलावतीनां सहजाः स्वभावास्त एव मूढस्य हृदि स्फुरन्ति,
रागोनलिन्या हि निसर्गसिद्धस्तत्रभ्रमत्येव मुधा षडंघ्रिः। शृ० १०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तरुणीनां सहजस्वभावः मूढानुन्मादयति । यथा कमलिन्यां रागः स्वाभाविको भवति । भ्रमरः तं स्वकृते बुद्ध्वा भ्रमति, तथैव मूढाः नारीभ्य उन्मत्ता भ्रमन्ति । ऋतुवर्णने हेमन्तर्तोः वर्णनमुद्दीपनरूपेण कृतम्—

हेमन्ते दधि-दुग्ध-सर्पिरशनामाञ्जिष्ठवासोभृतः,
काश्मीरद्रवसान्द्रदिग्धवपुषः खिन्ना विचित्रैःरतैः ।
पीनोरुस्तनकामिनीजन-कृताश्लेषा गृहाभ्यन्तरे,
ताम्बूलीदलपूगपूरितमुखा धन्याः सुखं शेरते । शृ० ४३

ते धन्याः सन्ति, ये हेमन्ततौं घृतदुग्धदध्नां सेवनं कुर्वन्ति । माञ्जिष्ठरंजितवस्त्रं-धारयन्ति तथा केसरलेपेन शरीरं सुशोभयित्वा वृत्तोरोजकामिनीनां गाढालिङ्गनेन विविधप्रकारया सुरतक्रीडया च श्रान्ताः ताम्बूलमुखाः आनन्देन गृहे शेरते ।

नार्याः अङ्गप्रत्यङ्गस्य सौन्दर्यचित्रणं शृंगारशतके कृतमस्ति । वैराग्यशतकस्य गीतयः सर्वत्र व्यङ्ग्ययुक्ताः मार्मिकाश्च सन्ति । वैराग्यविषये यस्या असाधारण-प्रतिभायाः प्रदर्शनं तेन कृतम्, तस्या अन्यत्र कविषु दर्शनं परमल्पं भवति । श्रेयः प्राप्तिमेव परमपुरुषार्थममन्यत । आलस्य-निवारणाय प्रतिबोधः कृतोऽस्ति । कविः वक्ति—

यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा,
यावच्चेन्द्रिय-शक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव वपुषा कार्यः प्रयत्नो महान् ,
प्रोद्दीप्ते भवने च कूपखननप्रत्युद्यमः कीदृशः । वै० पृ० ६२

यावदेतच्छरीरभवनं दृढमस्ति, यावद् बार्द्धक्यं दूरेऽस्ति, यावदिन्द्रिय-शक्ति-रप्रतिहता विद्यते तथावस्था व्यतीता नास्ति, तावदेव बुद्धिमता पुरुषेणात्मोन्नति-कृते महान् प्रयत्नो विधेयः, अन्यथा जरायामागतायां यत्नः गृहेऽनलोद्दीप्ते कूप-खननसदृशो व्यर्थो विद्यते ।

भर्तृहरेः पद्येषु कल्पनायाः, पदलालित्यस्य, रसानुरूपशब्दयोजनायाश्च सुन्दरो विन्यासो विद्यते। सरलतायाः मानवप्रकृतेश्च सूक्ष्मनिरीक्षणं प्राप्यते। कविना शृङ्गा-रशतके नारीणां सौन्दर्यचित्रैः सह प्रेम्णो विभिन्नावस्थानामृतुपरिवर्त्तनस्य च मार्मिकं चित्रमुपन्यस्तम् । डा० कीथमहोदयो भर्तहरेः कवितायाः समीक्षां कुर्वन् लिखितवान्—"भर्तृहरेः कविता संस्कृतिमुत्कृष्टतमरूपेण प्रदर्शयति । महाकाव्येषु जीवनगत्योरभावोऽस्ति । तेषां पात्राणि बद्धानि सन्ति, तेषां वर्णनानि च वित्र-रणदृष्ट्या प्रशंसनीयानि सन्त्यपि अतिजटिलतोन्मुखानि भवन्ति, येन तेषां प्रभावो नश्यति । भर्तृहरेः काव्ये प्रायः प्रत्येकपद्यमात्मनि पूर्णमस्ति । तथा स एकभावं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शृङ्गारविषयकं नीतिविषयकं वैराग्यविषयकं वा सुरुचिपूर्णपरिष्कारेण पूर्णतया च सह प्रकटीकरोति। संस्कृतभाषायां सङ्कोचस्य या विलक्षणशक्तिरस्ति, सात्र स्वोत्कृष्टतमरूपे दृश्यते। मस्तिष्कोपरि पतन्प्रभावः एकस्य पूर्णस्यावयविनो भवति, यस्मिन्नवयवाः आन्तरिकावश्यकताकारणात् परस्परं संयुक्ताः भवन्ति।

शतकत्रये गेयतया सह भावसान्द्रतापि विद्यते। कविः स्वाभाविकवर्णनशैल्यां नीतेः वैराग्यस्य शृङ्गारस्य चोद्गारान् प्रकटितवान्। रूपचित्राणां भावचित्राणाञ्चाङ्कने कविरपूर्वां सहायतां प्राप्तवान्। प्रेम्णः, शोकस्य, भक्तेः, वैराग्यादेश्च भावानां प्रकाशनं स्वाभाविकमभवत्। सामान्यकवितापेक्षया भर्तृहरेः पद्यान्यधिकप्रभावोत्पादकानि सन्ति। अकस्मात् स्फुरितसहजानुभूत्यात्मकरचनानां कारणात् शतकत्रयस्य गीतिकाव्यकोटौ परिगणना नासंगतास्ति। शतकत्रयस्य सहजाभिव्यक्तिः तद्भाषायै लालित्यं कोमलताञ्च प्रदत्ते। भाषायाः समाहारशक्तिरेवं प्रतीयमानार्थसौन्दर्यं शतकत्रये स्वतएव स्फुटितमस्ति। भावानामुच्छ्वासैः सह भाषायामपि प्रवाहः सहजः समाविष्टो वर्त्तते।

भर्तृहरिः भावनानाम्, रागात्मकवृत्तीनाम्—प्रेम्णः, विप्रलम्भस्य, व्यथायाः, ममतायाः त्यागस्य, करुणायाः, संयोगस्य, वियोगस्य, एवं विविधप्रकाराणां सांसारिकानुभवानामभिव्यञ्जनां कृतवान्। प्रकृति-चित्रणमपि विद्यमानमस्ति। प्रकृतेरिमानि सुन्दरानुपमचित्राणि उल्लसितहृदयं द्विगुणितं कुर्वन्ति तथा विषण्णहृदये विषादरेखां घनीभूतां विदधति। सफलगीतकारकृते यादृश्याः शक्तिमत्याः भावाभिव्यक्तेरावश्यकतास्ति, सा शतकत्रये विद्यमानास्ति।

विजयाङ्का तथा तदीयं गीतिकाव्यम्

कर्णाटकराजचन्द्रादित्यस्य राज्ञाः विजयाङ्कायाः गीतिकाव्यमत्यन्तं सरसं मनोज्ञञ्चास्ति। अस्याः कवयित्र्याः समयः ६६० खीष्टाब्दोवर्त्तते।

राजशेखरोऽस्याः वैदर्भ्याः रीत्याः प्रशंसां कुर्वन् लिखितवान्—

सरस्वती कार्णाटी विजयाङ्का जयत्यसौ,
या विदर्भगिरां वासः, कालिदासादनन्तरम्।—शार्ङ्ग० १८४

विजयाङ्कायाः पद्यानि मुकुलभट्टः (खीष्टाब्दः ९२५) धनिकस्तथा मम्मटः स्वालङ्कारग्रन्थेषूद्धृतवान्। मम्मटः शब्दव्यापार-विचार-प्रसङ्गेऽस्याः निम्नाङ्कितं पद्यमुद्धृतवान्—

धन्यासि या कथयसि प्रियसङ्गमेऽपि,
विस्रब्धचाटुकशतकानि रतान्तरेषु।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्यः शपामि यदि किञ्चिदपि स्मरामि ।—कवीन्द्रवचन० २९८

एका सखी सखीमन्यां प्रति कथयति यत् हे सखि त्वं धन्यासि, यतः सुरतकाले पत्या सह वार्तां करोषि । अहंतु शपथपूर्वकं वदामि यत् प्रियहस्ते नीव्या उपरि जाते किमपि न स्मरामि ।

दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मद्गृहे दास्यसि,
प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति ।
एकाकिन्यपि यामि सत्वरमितः स्रोतस्तमालाकुलं—
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः । कवीन्द्रवचन-समुच्चयः ५००

हे प्रतिवेशिनि, क्षणं मम गृहेऽपि दृष्टिर्देया । यतः प्रायोऽस्य पिता नीरसं कूपस्य जलं न पिवति । अतोऽहमेकाकिन्यतः तमालवृक्षावृतस्रोतसः जलमानेतुं गच्छामि, यद्यपि तत्रोत्पन्नानांनलग्रन्थीनां क्षताश्रया भवेयम् ।

पद्येऽस्मिन् प्रतिवेशिन्या गृहरक्षाच्छलेन प्रेमिणे संकेतस्थलस्य सूचना दत्ता । अत्र 'भाविकत्व' नामकोऽर्थगुणो विद्यते ।

विज्जकया सहृदयभावुकस्य परमसुन्दरं चित्रणं कृतम्—

कवेरभिप्रायमशब्दगोचरं स्फुरन्तमार्द्रेषुपदेषु केवलम्,
वदद्भिरङ्गैः कृतरोमविक्रियैर्जनस्य तूष्णींभवतोऽयमञ्जलिः ।

गूढव्यञ्जनावतो ध्वनिकाव्यस्याभिप्रायमवगत्य यः सहृदयः शब्दैः काव्यानन्द-प्राप्तेः सूचनामदत्वा तूष्णीं स्थितः हृदयानन्दलहरिं व्यनक्ति, एतादृशं सहृदय-शिरोमणिं कवयित्री प्रणमति ।

अन्यासु गीतकर्त्रीषु नारीषु शीला भट्टारिका, मोरिका, सुभद्रा, राजकन्या, फल्गुहस्तिनी, मारुला, तथा लक्ष्मीरुल्लेख्याः सन्ति । शीलाभट्टारिकायाः—"यः कौमारहरः स एव हि वरः ता एव चैत्रक्षपाः" गीतिः मम्मटेन स्वकाव्यप्रकाशे समुद्धृता । अन्यासां कवयित्रीणां गीतयः सूक्तिमुक्तावल्यां सुभाषितरत्नावल्यां सुभाषित रत्नभाण्डागारे चोपलभ्यन्ते ।

श्रृंगारतिलकस्य गीतिकाव्यत्वम्

श्रृंगारतिलके ५३ पद्यानि सन्ति । अस्मिन् सौन्दर्यस्य प्रेम्णश्च आकर्षणंवर्णित-मस्ति । कवेर्नामाज्ञातमस्ति । कविः प्रौढोक्तिसिद्धानामुपमानानां सुन्दरं प्रयोगं कृतवान् । नायिका-सौन्दर्यं वर्णयन् कविः कथयति—

---

१. काव्यप्रकाशः ४।६१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इन्दीवरेण नयनं मुखमम्बुजेन,
कुन्देन दन्तमधरं नवपल्लवेन।
अङ्गानि चम्पकदलैः स विधाय वेधाः,
कान्ते कथं घटितवानुपलेन चेतः।

अत्र नायिकायाः नयने नीलकमलेन, मुखमरुणकमलेन, दन्ताः कुन्दकलिकाभिः, अधरपल्लवाङ्गानिच चम्पकदलैः सदृशानि वर्णितानि। शृङ्गारतिलकस्य सर्वाणि-पद्यानि गीतयः सन्ति। एषु गीतिकाव्यस्य लक्षणानि विद्यमानानि सन्ति।

अमरुकशतकस्य गीतिकाव्यत्वम्

कवेरमरुकस्य नाद्य यावत् कालो निर्णीतः नवा तस्य प्रामाणिकं जीवनवृत्त-मेवोपलब्धमस्ति। केवलमनुमानेन अमरुकस्य समयः निर्णीयते। डा० कीथस्य मतमस्ति यत् वामनेन (ख्री० ८००) अमरुकस्य पद्यान्युद्घृतान्यतोऽस्य समयः (७५० ख्रीष्टाव्दात् पूर्ववर्त्ती) अस्ति। कीथेन लिखितम्—"शिल्पविधानस्य परिष्कृतेः तथा परिपक्वतायाः दृष्ट्या एतदधिकं सम्भाव्यते यत् कविरेतत्काव्यं न ६५० ख्रीष्टाव्दात्पूर्वं, प्रत्युत् पश्चात्[1] प्रणीतवान्। अस्माकमनुमानमस्ति यत् अमरुको भर्तृहरेः समसामयिकोऽस्ति। एतत्समकालीनः—हर्षः, बाणः, मयूरादयश्च मन्यन्ते। अयं संस्कृतसाहित्यस्य विकासकालीनमुक्तकानां प्रतिनिधिरस्ति।

अमरुकस्य प्रत्येकपद्यं गीतिरस्ति। स्वातन्त्र्येऽपि तस्मिन् पूर्णमेकं चित्रमस्ति। तस्मै प्रसङ्गादिकृते नापेक्षान्यस्य कस्यापि विद्यते। गीतिकाव्यकर्त्रे स्वतः पूर्णतायाः सञ्चाराय तस्मिन् भावपक्षस्य पूर्णतायाः, कलापक्षस्य सौष्ठवस्य, तथा भाषायाः समासशक्तेरत्यधिकावश्यकतास्ति। गीतिकाव्यकृते यस्याः वैयक्तिकताया आव-श्यकता वर्त्तते, तस्याः पूर्णमस्तित्वं न प्राप्यते।

शृङ्गारस्य विविधस्थितीनां वर्णनेऽमरुकः परं दक्षोऽस्ति। सम्भोग-विप्रलम्भयो-रुद्दीपनालम्बनविभावानुभावसात्त्विकभावसञ्चारिभावानां व्यज्जनायां स पूर्णसफलो विद्यते। अमरुकशतकस्य प्रत्येकपद्यं शृङ्गारस्य विविधव्यञ्जकानामुपस्थापनं विधाय रसचर्वणायां पूर्णसमर्थोऽस्ति। नवोढया मुग्धया सह हासपरिहासञ्चकुर्वतः प्रियस्य, खण्डितायाः प्रौढायाः व्यङ्गं सहमानस्य धृष्टनायकस्य, विदेशं गच्छन्तंप्रियमवरोद्धुं विलपन्त्याः प्रवत्स्यत्पतिकायाः, नूपुरकाञ्चीभिः सघनान्धकारे सूचयन्तीनां कामिनीनां चित्रणममरुकस्य स्वकीया विशेषता विद्यते। शतकेऽस्मिन्नेकत्र परस्परा-नुरक्तदम्पत्योः प्रेमालापस्य, मानापनयनस्य च पारिवारिकानि चित्राणि वर्त्तन्ते,

---

१. संस्कृतसाहित्य का इतिहास, हिन्दीसंस्करण, पृ० २२३।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अन्यत्र गुप्तप्रणयस्यापि चित्राणि सन्ति। अमरुकस्य लक्ष्यं सहृदयभावुकानां शृङ्गाररसचर्वणास्ति, न कलापक्षस्य घटाटोपे संश्लेषः। अमरुकोरसवादी कविरस्ति तथा परवर्तिनां शृङ्गारिकाणां मुक्तककवीनां सदृशं कलापक्षाय नाधिकं बलं यच्छति। मम्मटेन स्वकाव्यप्रकाशे ध्वनिकाव्यस्योदाहरणं यच्छता निम्नलिखितं पद्यं प्रस्तुतम्—

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो,
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि ! दूति बान्धवजनस्याज्ञातपीडागमे,
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्। अमरुक० १०५

तव वक्षःस्थलात् चन्दनं च्युतम्, अधरारुणिमापि निर्मृष्टोऽस्ति, नेत्रयोः कज्जलाभावो विद्यते; तव शरीरञ्च पुलकितमस्ति। हे दूति ! त्वं मिथ्या कथं वदसि। किं त्वं सखीपीडामपि न ध्यायसि। अतस्तु वाप्यां स्नानार्थंगता, तस्याधमस्य नायकस्य समीपे न गता। व्यङ्ग्यमस्ति यत् त्वं तेन सह समागमं कृत्वागतासि।

प्रियप्रतीक्षायां रतायाः वियोगिन्याः एतत् विषादपूर्णमौत्सुक्यं कियत् मर्मस्पर्श्यस्ति ?

आदृष्टिप्रसरात् प्रियस्य पदवीमुद्वीक्ष्य निर्विण्णया
पिच्छिन्नेषु पथिष्वहः परिणतौ ध्वान्ते समुत्सर्पति।
दत्त्वैकं स शुचा गृहं प्रतिपदं पान्थस्त्रियास्मिन् क्षणे,
मा भूदागत इत्यमन्दवलितग्रीवं पुनर्वीक्षितम्। अमरुक० ७६

यावत्दृष्टिर्गन्तुंशक्नोति, प्रियमार्गं दृष्टम्। सूर्यास्तः समुपस्थितः, अन्धकारो व्याप्तः, पथिकानां गमनागमनेऽवरुद्धे। अतएव दुःखिन्या वियोगिन्या गृहाभिमुखं चरणौकृतौ तथा तदानीमेव शीघ्रतापूर्वकं ग्रीवां परावर्त्य पुनर्मार्गोन्मुखं वीक्षितं यत् स्यान्नाम प्रवासी प्रियतमः आगतो भवेत्।

मानौत्सुक्ययोरेकत्र सञ्चारो दर्शनीयो विद्यते—

एकस्मिञ्छयने विपक्षरमणीनामग्रहे मुग्धया,
सद्यः कोपपराङ्मुखं ग्लपितया चाटूनि कुर्वन्नपि।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणा—
न्माभून्म्लान इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः। अ० २२

एकत्र शयने कृते प्रियततमुखात् अन्यस्याः नार्याः नाम श्रुत्वा खिन्नया प्रियतमया विनयं कुर्वतः प्रियस्योपेक्षा कृता। परं पुनः शीघ्रमेव ग्रीवां परावर्त्य दृष्टवती यत् सःसुप्तो न भवेत्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कविः प्रेम्णः यस्याः सूक्ष्मान्तर्वृत्तेश्चित्रणं कृतम्, तन्नितान्तं हृदयावर्जकमस्ति। एतेन कवेः मनोवैज्ञानिकदृष्टिरपि ज्ञायते। एषैव प्रेम्णः सहजा गतिरस्ति। अवक्रायां सरलोक्त्यां कविना भावानां समुद्र एव तरङ्गायितः कृतः। न कविना कस्याप्यलंकारस्य ग्रहणे प्रयासः कृतः नवा कस्यापि कलात्मकचमत्कारस्योत्पादने। स्वयमेव रसधारा प्रवहति—

एकस्मिञ्छयने पराङ्मुखतया वीतोत्तरं ताम्यतो—
रन्योन्यस्य हृदिस्थितेऽप्यनुनये संरक्षतो गौरवम्।
दम्पत्योः शनकैरपाङ्ग वलनान् मिश्रीभवच्चक्षुषोः,
भग्नोमानकलिः सहासरभसं व्यासक्तकण्ठग्रहः। अ० २३

एकस्मिन् शयने नायकनायिकयोः समानयोः परस्परं परावृत्य शयनमभूत्। अन्योन्यं वार्त्तालापमपि वाकुर्वन्। यद्यपि स्थित्यानयोभयोरपि व्यथासीत्, तथापि ताभ्यां स्वगौरवरक्षार्थं मौनं स्वीकृतम्। एतन्मध्यएव शनैः शनैः द्वयोरक्षिमेलनं जातम्। किं पुनः नयनयोर्मिलने जाते प्रणयकलहः पलायितः। सहसोभौ अहसताम् तथा परस्परं मिलितौ।

मैकडोलनोऽमरुकस्यालोचनां कुर्वन् लिखितवान्—"प्रेमिणां तेषां सर्वासां चित्तवृत्तीनां—नैराश्यस्य, उल्लासस्य, रोषस्य, तल्लीनतादेश्च चित्रणेऽमरुकः निपुणोऽस्ति। मान-प्रसादयोः विभिन्नावस्थानां चित्रणे स विशेषरूपेण चतुरोऽस्ति। उल्लेखनीयमस्ति यत् भावस्य पृष्ठभूमेश्च दृष्ट्यात्यन्तसीमितक्षेत्रेऽपिकविः स्वविष्मयकारिणीनामुद्भावनानां कामचातुर्यश्च कृते, पाठकानां ध्यानाकर्षणेऽत्यन्तसफलो जातः।[१]

शैलीदृष्ट्याऽमरुकशतकं प्रसादपूर्णकलायाःश्रेष्ठं निदर्शनमस्ति। अस्मिन् वैदर्भ्याः शैल्याः निर्वाहः कृतोविद्यते। वस्तुतोऽमरुकशैली-परिष्कारविषये वस्तुद्वयमवधेयमस्ति—(१) सङ्गीतसौन्दर्यं (२) भाषाप्रौढता च। सङ्गीतसौन्दर्यसृष्टिकृते तेनच्छन्दसः भव्यतायै वलं दत्तम्। तस्य रचनायां हतवृत्ततादोषोऽन्वेषणेनापि न लभ्यते। शब्दानां चयनं छन्दसा गणविधानञ्चान्तः सङ्गीत-सुरक्षायां समर्थैस्तस्तथा प्रवाहे तरङ्गमपि समुत्पादयतः। ध्वनेर्नादस्येदृशः समन्वयः केषु चनैव कविषु प्राप्यते। अमरुकस्य तुलनां वयं रीतिकालिन-हिन्दी-कविना विहारिणा सह कर्त्तुं शक्नुमः।

---

१. हिस्ट्री आफ संस्कृत लिटरेचर, पृ० ३४२।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मल्लटशतकं तथा तस्य गीतिकाव्यत्वम्

मल्लटशतकं मुक्तकगीतीनां संग्रहोऽस्ति। आचार्य आनन्दवर्द्धनेन मल्लटपद्यान्युद्धृतानि। अतोऽस्य समयः ८५० खीष्टाब्दात् पूर्ववर्ती सम्भाव्यते। अस्माकमनुमानमस्तियत् मल्लटस्य समयः अष्टमी शताब्दी विद्यते।

शतकेऽस्मिन् सुन्दरस्वभावोक्तिः, विमलोपमा, उपदेशयुक्तार्थान्तरन्यासः तथान्येऽलङ्कारादयोलभ्यन्ते।

अन्योक्तिपरकमेकमुदाहरणं समुपस्थाप्यते—

कल्लोलवेल्लितदृपत् परुषप्रहारं रत्नान्यमूनि मकराकर मा वमंस्था,
किं कौस्तुभेन भवतो विहितो न नाम याञ्चाप्रसारितकरः पुरुषोत्तमोऽपि।

समुद्रमुपालम्भयन् कविः कथयति—हे मकराकर ! त्वमुन्तुङ्गतरङ्गावलो-सञ्चालितपाषाणानां भयङ्करप्रहारेणैतेषां रत्नानां तिरस्कारं मा कुरु, पश्य कौस्तुभरत्नेन तव यशः कीदृशं प्रसिद्धं कृतम्, यदर्थं स्वयं पुरुषोत्तमः भगवान् कृष्णः प्रसारिताञ्जलिः याञ्चां कृतवान्।

एतस्य शतकस्य पद्यान्यपि भावपूर्णानि सन्ति। अस्मिन् शब्दचयनं सुन्दररूपेण सम्पन्नमस्ति। अतोऽस्य मुक्तकस्य पद्येष्वपि सङ्गीतात्मकता विद्यमानास्ति।

विल्हणकृता पञ्चाशिका, तस्याः गीतिकाव्यत्वञ्च

विक्रमाङ्कदेव चरितस्य रचयिता महाकविविल्हणः पञ्चासत्पद्यानामेकं गीतिकाव्यं रचितवान्। कविः विल्हणः विक्रमाङ्कदेवचरितस्यान्तिमसर्गे स्वपूर्णपरिचयं प्रयच्छन्लिखितवान् तदस्य पितुः नाम ज्येष्ठकलशः पितामहस्य नाम राजकलशः तथा प्रपितामहस्य नाम मुक्तिकलशः आसन्। अयं काश्मीरी ब्राह्मण आसीत्। जीविकान्वेषणेऽयं मथुरायां कान्यकुब्जे, प्रयागे, काश्यां भ्रमन् दक्षिणभारतस्य कल्याण-नगरस्य महाराजविक्रमादित्यस्य (षष्ठस्य) निकटे गतः। अस्य चालुक्यवंशीयस्य राज्ञः राजत्वकालः (१०७६ खीष्टाब्दात् ११२७ खीष्टाब्दं) यावत् अस्ति। अतः कवेःसमयः द्वादशी शताब्दी विद्यते। कीथेनास्य काव्यस्य प्रणेता विल्हण एवाङ्गीकृतः[१]। परं केचन विद्वांसः 'चौर' नामकमन्यंकमपि कविं मन्यन्ते। परं ममापि दृष्ट्यास्य निर्माता महाकविः विल्हण एवासीत्।

डा० कीथः चौरपञ्चाशिकायाः गीतिकाव्यत्वं विवेचयन् लिखितवान्—"वसन्ततिलकच्छन्दसः पद्येषु सुखमयप्रेम्णोऽपूर्वदृश्यानां सूक्ष्मं तथाकर्षकविस्तारेण सह चित्रणं

---

१ क्लासिकल संस्कृत लिटरेचर, पृ० १८०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विहितमस्ति । एषु पद्येष्वेकमेतादृशं सौन्दर्यमस्ति, यद्विक्रमाङ्कदेवचरिते नास्ति । यद्यपि शैल्याः सरलतया पञ्चाशिका तेन सह मिलति । तस्याः शैल्याः महान् लाभोऽयमस्ति यत् सा काव्यस्यान्तरिकस्वरेण तत्पाठस्य कल्पितावसरेण सह सम्बद्धास्ति ।"[1]

निःसन्देहमस्याः रचनायाः प्रसङ्गविधानं परं स्वाभाविकं मार्मिकञ्चास्ति, येन कवेरनुभूत्याः सत्यता प्रमाणीक्रियते। मानिनी नायिका मानस्य तथा प्रणय-प्रसादस्य निर्वाहमेकत्रैतावत्या कुशलतया स्वाभाविकतया च करोति, यन्नायकहृदये तया सहैव तद्व्यापारोऽपि निवसति—

अद्यापि तन्मनसि सम्परिवर्त्तते मे,
रात्रौ मयि क्षुतवति क्षितिपाल पुत्र्या ।
जीवेति मङ्गलवचः परिहृत्य कोपात्,
कर्णे कृतं कनकपत्रमनालपत्या । चौ० प० ११

एकान्ते दर्पणं पश्यन्ती विस्रब्धा नायिका यदि अकस्मात् स्वप्रतिविम्बेन सह नायक-प्रतिविम्बमपि पश्यति, तदा तस्याः या विचित्रा स्थितिः भवति, तस्याः वर्णनं कविना कृतम्—

अद्यापि तां रहसि दर्पणमीक्षमाणां संक्रान्तमत्प्रतिनिभं मयि पृष्ठलीने,
पश्यामि वेपथुमतीं च ससंभ्रमाञ्च लज्जाकुलां समदनांच सविभ्रमाञ्च ।

चौरपञ्चाशिकायाः सर्वाः गीतयः पृथक्-पृथक् रसोद्दीप्तौ समर्थाः सन्ति । सम्पूर्णकाव्यवन्धः हृदयं वशीकरोति । अतएवैतत् सम्वन्धगीतिकाव्यश्रेण्यां स्थानमाप्स्यति । शृङ्गाररसानेकोत्कृष्टरूपाण्यनेकगीतिषूपलभ्यन्ते । यथा—

अद्यापि तां यदि पुनः श्रवणायताक्षीं पश्यामि दीर्घविरहज्वरिताङ्गयष्टिम्,
अङ्गैरहं समुपगृह्य ततोऽतिगाढं नोन्मीलयामि नयने न च तां त्यजामि ।
चौ० प० ६

श्रवणायताक्षीं प्रियतमां यद्यहं प्राप्नुयाम्, तदा दीर्घविरहज्वरतप्तां तां कृशाङ्गीं वक्षसा धारयेयम् । तदङ्गानि स्वाङ्गेषु गोपायेयम् । तन्मनोहारिणीं छविं नयनयोर्विधाय नयने निमील्य तां पुनः कदापि न त्यजेयम् ।

एवं प्रकारेण चौरपञ्चाशिकायाः भावतीव्रतेदृशी शक्तिमती वर्त्तते, यत् सा प्राचीनमर्यादापथमतिक्राम्यति । कविमानसं मथ्नन्तोभावाः तत्सहजोद्गारेष्ववतीर्णाः सन्ति ।

---

१. संस्कृत साहित्य का इतिहास हिन्दी संस्करण पृ० २२८ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गीतिकाव्ये यस्याः भावसम्पत्तेरावश्यकता भवति, सा स्वकीयसमस्तमहिम्ना सह काव्येऽस्मिन् प्रतिष्ठितास्ति । अतएवोत्तरवर्त्तिकविभिरेतस्य पर्यासमनुकरणं कृतम् ।

आर्यासप्तशत्याः गीतिकाव्यत्वम्

काव्यविषये आचार्यगोवर्द्धनस्य मान्यतास्ति यत् काव्ये रसवत्ता तज्जीवनस्य प्राणभूतास्ति । यथा सम्भोगकालीनरसावेशे रमण्याः वस्त्रं शरीरच्युतं भवति, शरीरालङ्कारा अपि त्रुटित्वा पृथक् जायन्ते । तथापि साधिकहृदयहारिणी भवति, तथैव यदि कवितायां कविहृदयमवतरति, तदा वैदर्म्यादिरीतीनामलङ्काराणाञ्चा-भावेऽपि कविता मनोरमा प्रतीयते। भावलोके विस्मृतः कविः आत्मविस्मृति-दशायां तिष्ठति । गोवर्द्धनः लिखितवान्—

> मसृणपदरीतिगतयः सज्जनहृदयाभिसारिकाः सुरसाः,
> मदनाद्वयोपनिषदो विशदा गोवर्धनस्यार्याः । आर्या० स० ५१

यथा श्रेष्ठाः सहृदयरमण्यः स्वचरणौ मन्द-मन्द गत्या रक्षन्त्यः सुहृदयजनैः-सह मिलनायैकमात्रंकामदेववशवर्त्तिन्यो भूत्वोज्ज्वलवेशंधृत्वा यान्ति, तथैव कोमल-कान्तपदावल्या सज्जिताः वैदर्म्या रीत्या युक्ताः शृङ्गाररसमय्यः, कामोद्दीपिकाः, तथा प्रसादगुणशालिन्यः गोवर्धनकवेरार्याः सज्जनानांहृदये प्रविशन्ति ।

एषा रचना वस्तुतः संस्कृतसाहित्यस्यामूल्यं रत्नमस्ति । ज्योत्स्नापूर्णायां रजन्यां यमुनायाः चित्रणं कुर्वन् कविः कथयति—

> ज्योत्स्नागर्भितसैकतमध्यगतः स्फुरति यामुनः पूरः,
> दुग्धनिधौ नागाधिपतल्पतले सुप्त इव कृष्णः । आर्या० २४५ ।

ज्योत्स्नया दीव्यतः वालुकाराशेः मध्ये यमुनाप्रवाहस्तथा शोभमानो विद्यते,यथा क्षीरसागरे शेषशय्यायां शयानःकृष्णो भवेत्। अत्र ध्वनिद्वारेण प्रियया सह सांकेतिक-रूपेण वालुकातटं शय्यां निर्माय रमणकामनां प्रकटयति ।

आर्यासप्तशत्याः गीतयः शृंगारपरान्योक्तिभिः परिपूर्णाः सन्ति । देवदम्पतीनां शृंगारकेलयोऽस्मिन् काव्ये नग्नवर्णिताः सन्ति । ग्राम्यत्वाश्लीलत्वाचारविरुद्धतादि-दोषाणामुपेक्षां कुर्वन् परकीयाप्रेमवर्णने भ्रष्टरुचेः प्रदर्शनं कृतमस्ति एतस्याः प्रभावः संस्कृतकविभिःसह रीतिकालीनहिन्दीकविष्वपि लक्ष्यते । भावनानामनौचित्येन शैल्याः कृत्रिमतया चास्यां गीतिकाव्यस्य ह्रासः प्राप्यते । गाथासप्तशत्याः अनुकरणकारणात् गीतिकाव्यकृते यस्याः मार्मिकतायाः भावप्रवणतायाश्चावश्यकतासीत्, तयोः समा-वेशः अस्यां रचनायां संभवो नास्ति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गीतगोविन्दस्य गीतिकाव्यत्वम्

गीतिकाव्यक्षेत्रे युगप्रवर्तकजयदेवस्य मूर्धन्यं स्थानमस्ति। तालबद्धगीतानां-सर्जनेन तथा कोमलकान्तपदावल्याः आश्रयणेनायं विश्रुतो विहितः। जयदेवः बंगदेशीयस्य राज्ञोलक्ष्मणसेनस्य राजवल्लभः कविरासीत्। जयदेवस्य पितुःनाम भोजदेव आसीत्। अस्य समयः प्रायः ११०० ख्रीष्टाब्दोविद्यते।

पाश्चात्यविदुषा पिशलेन लेवी महोदयेन च गीतगोविन्दस्य स्थानं गीतिकाव्य-नाटकयोर्मध्ये स्वीकृतम्। पिशल इदं संगीतरूपकमपि मनुते। गीतगोविन्दस्य प्रत्येक-गीतिः प्रबन्धो मन्यते। रचनायामस्यां साहित्य-संगीतयोरपूर्वःसमन्वयो मन्यते। एतदेव कारणमस्ति यत् जयदेवस्येयं कृतिरेकत्र कवीनां साहित्यिकानाञ्च ग्रीवाहारोऽभवत्, अन्यत्र सङ्गीतज्ञानां वीणोपरि मुखरिता जाता। जयदेवेन स्वकवितायां यासां शृगारिकनायक-नायिकानां चयनकृतम्, ताःमानवीया सत्योऽपि भाविमाधुर्यसम्प्रदायस्य भक्तेभ्योऽलौकिकरसव्यञ्जिकाः जाताः।

गीतिगोविन्दस्य शैली मुक्तकशैल्यास्तथा गेयगीतेःमिश्रणमस्ति। एवं तु जयदेवः एतत्काव्यं महाकाव्यनिर्माणाय द्वादशसर्गेषु रचितवान्। जयदेवः एतादृशः प्रथमकविरस्ति, यस्संस्कृतकाव्यं सङ्गीत आबद्धुं चेष्टां कृतवान्।

गीतगोविन्दे एकत्र संस्कृतस्य वार्णिकवृत्तानामन्यत्र सङ्गीतस्य मात्रिकपदानां विचित्रः समन्वयो वर्त्तते।

गीतगोविन्दस्य पद्यानि गेयानि सन्ति तथा निश्चितासु राग-रागिणीषु बद्धानि वर्त्तन्ते। संगीतमयच्छन्दसा, अन्त्यतुकस्य ध्रुवकस्य च प्रयोगोऽस्यां कृतौ जातोऽस्ति। एवं प्रकारेण संगीतस्यापूर्वसमावेशकारणात् अस्याः कृतेः काव्यसौष्ठवं दीप्तमस्ति।

जयदेवस्यैका विशेषता गौडी-वैदर्भी-रीत्योः समन्वयमस्ति। आचार्यैः गौडीरीतिः शृङ्गारादिकोमलभावानामभिव्यक्तये नोपयुक्ता स्वीकृता तथा समास-प्रचुरता दृष्ट्येयं हेया मता। जयदेवः ओजःपूर्णां शब्दावलिं स्वीकृत्य समासानां स्वच्छन्दं प्रयोगं कृतवान्। क्वचिद् गीतस्यैकैकपंक्तौ एकस्यैव समस्तपदस्य प्रयोगः कृतो विद्यते—

ललितलवंगलतापरिशीलनकोमलमलयसमीरे।
मधुकरनिकरकरम्बितकोकिलकूजितकुंजकुटीरे॥ ३।१

क्वचित् सम्पूर्णगीते क्रियापदमेकमेव प्राप्यते। जयदेवस्य पदशय्येदृशी ललिता स्पष्टा च वर्त्तते यत् प्रसादगुणः भाषायाः प्रवाहस्य सङ्गतिं क्वापि न जहाति। 'ध्रुवपदे' समास-प्रयोगोनाभवत्। अनुप्रासस्य समस्वरतायाः ध्यानं सर्वत्र संरक्षित-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मस्ति । भावनानुरूपाणां कोमलशब्दावलीनामेतादृशः प्रयोगोऽभवत्, येनान्तः संगीतस्यापूर्वमाधुर्यं विद्यमानं विद्यते । यद्यपि गीतगोविन्दस्य कलात्मकरूपं मस्तिष्कस्य सूक्ष्मव्यापाराणां निदर्शनमस्ति, तथापि स्पष्टतायाः, सरसतायाः, सरलतायाश्च कारणात् तत्र कृत्रिमतायाः क्वापि नाभासो विद्यते ।

भावपक्षदृष्ट्या जयदेवः भक्तेः शृंगारस्य च कविरस्ति । जयदेवेन संयोगशृंगारस्यात्यन्तकुशलतापूर्वकं चित्रणं कृतमस्ति । एतत्काव्ये विरहस्यानेकदशानां शृंगारान्तर्भूतानामनेकसञ्चारिणां तथा कामशास्त्रीयरतिकेलीनां कचग्रह-चुम्बनयोः, नखच्छदस्य, रदच्छदस्य, वस्त्रपरिवर्त्तनादेश्च, चित्रणेन सह मानहारस्य दूतीसम्प्रयोगस्य च निरूपणमस्ति । अभिलाषस्य, चिन्तायाः, स्मरणस्य, मरणस्य, व्याधेः, आवेगस्य, असूयायाः, दैन्यस्य सजीवचित्रणमस्ति । एतावदेव नहि, अपितु सञ्चारिभिः सह पुलकस्य, वेपथोः, स्वेदादेः स्वात्त्विकभावानां मिश्रणं शृङ्गाररसस्याद्भुतं पानकं प्रस्तौति ।

वसन्तस्य व्यापक-प्रभावस्य चित्रणं कुर्वन्कविः कथयति—
मदन-महीपतिकनकदण्डरुचिकेसरकुसुमविकाशे,
मिलितशिलीमुखपाटलपटलकृतस्मरतूणविलासे ।

× × ×

वसन्ते वासन्तीकुसुमसुकुमारैरवयवै—
र्भ्रमन्तीं कान्तारे बहुविहित-कृष्णानुसरणाम् ।
अमन्दं कन्दर्पज्वर-जनित-चिन्ताकुलतया,
चलद्बाधां राधां सरसमिदमूचे सहचरी ॥ गीत ॥३।२

वसन्तेन जडचेतनयोः सर्वत्रानुराग उत्पादितः । जयदेवनायिका राधा प्रच्छन्ना भूत्वा स्वप्रियेण कृष्णेन सह लोकशास्त्रयोरक्ष्णोः दूरे 'रहःकेलिं' करोति । कदाचित् सा मुग्धा सती प्रियसम्मुखगमनाज्जिह्लेति तथा कदाचिन्मध्याभूता 'रतिकेलौ' सम्मिलिता दृश्यते । कदाचित् सा कृष्णाय भर्त्सनांश्रावयति । कदाचित्तस्या स्वाधीनभर्तृका-स्वरूपं दृश्यते,कदाचित् खण्डितायाः कलहान्तरितायाश्च यथा—

रचय कुचयोः पत्रं चित्रं कुरुष्व कपोलयोः,
घटय जघने काञ्चीं मुग्धस्रजा कवरीभरम् ।
कलय वलयश्रेणीं पाणौ पदे मणिनूपुरा—
विति निगदितः प्रीतः पीताम्बरोऽपि तथा करोत् । गीत–१२।९

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ तां मन्मथखिन्नां रतिरसभिन्नां विवाद-सम्पन्नाम्,
अनुचिन्तितहरिचरितां कलहान्तरितामुवाच रहः सखी। गी० ९।७

मानवत्याः राधायाः मानहार-प्रसङ्गे सख्या निवेदितं निम्नांकितं गीतं यथा सरसं मधुरमस्ति तथैव भावात्मकमपि। यथा—

हरिरभिसरति वहति मधुपवने,
किमपरमधिकसुखं सखि भवने।
माधवे मा कुरु मानिनि मानमये॥ ध्रुव०॥
तालफलादपि गुरुमतिसरसम्।
किं विफलीकुरुषे कुचकलशम्॥ माधवे॥
कति न कथितमिदमनुपदमचिरम्।
मा परिहर हरिमतिशयरुचिरम्॥ माधवे॥
किमिति विषीदसि रोदिषि विकला।
विहसति युवतिसभा तव सकला॥ माधवे॥
मृदुनलिनीदल-शीतलशयने।
हरिमवलोकय सफलय नयने॥ माधवे॥

एवं प्रकारेण गीतगोविन्दस्य पदेषु रागतालादीनां पूर्णः संकेतः प्राप्यते। भावनानां गहनता, पदानां गेयता, शैली-मसृणता च काव्यमेतत् रम्यातिरम्यमकुर्वन्।

प्रमुखगीतिरचनातिरिक्तानि नरहरेः शृङ्गार-शतकम्, धनञ्जयस्य शृङ्गार शतकम्, रुद्रकवेः भावविलासः, सूर्यकवेः रामकृष्णविलोमकाव्यम्। पण्डितराज-जगन्नाथस्य सुधालहरी, अमृतलहरी, लक्ष्मीलहरी, करुणालहरी, गङ्गालहरी च प्रसिद्धानि गीति-काव्यानि सन्ति। एतेषु प्रबन्धगीतिकाव्यस्य लक्षणानि विशेषतः घटितानि भवन्ति। सुधालहर्यां सूर्यस्तुतिः त्रिशंतपद्येषु वर्त्तते। अमृतलहर्यां यमुनागद्याः स्तुतिः, १० पद्येषु, लक्ष्मीलहर्यां देव्याः लक्ष्म्याः स्तुतिः, ४१ पद्येषु, करुणालहर्यां विष्णुस्तुतिः ६० पद्येषु कृताः विद्यन्ते। भक्तविह्वलता प्रतीक्षा च करुणालहर्यां प्राप्येते यथा—

सुरासुरस्वान्तचकोर - चुम्बिता,
समस्तसन्तापपथापनोदिनी
महानिशीथे मम मानसे कदा
स्फुरिष्यति त्वन्मुखचन्द्रचन्द्रिका। करुणा ६

सप्तदश-ख्रीष्टाब्दे रूपगोस्वामिना हंसदूत नामकं प्रबन्धकाव्यमेकं व्यरचि। अस्मिन् राधायाः विरहतापस्य मार्मिकी व्यञ्जनास्ति। रूपगोस्वामिन उद्धवसंदेशः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१३१ मन्दाक्रान्ता-छन्दःसु लिखितं संदेशकाव्यमस्ति । अस्मिन् द्वारिकामारभ्य व्रजपर्यन्तं मार्गस्य तथा व्रजस्य विशिष्टस्थानानां परं काव्यात्मकं वर्णनमस्ति । एका गोपवाला स्वमार्मिकविरहव्यथायाः व्यञ्जनां कुर्वन्ती कथयति यत् मां वृन्दावनस्य वृक्षलतानां रासविलासस्य च स्मृतयः व्यथयन्ति—

आशापाशैः सखि नवनवैः कुर्वती प्राणवन्धं—
जात्या भीरुः कति पुनरहं वासराणि क्षपिष्ये ।
एते वृन्दावन-विटपिनः स्मारयन्तो विलासान्
उत्फुल्लाय मम किल वलान् मर्म निर्मूलयन्ति । उ० सं० ८३

रूपगोस्वामिनः हरिभक्तिरसामृतसिन्धुः, वेंकाध्वरेः लक्ष्मीसहस्रम्, श्रीकृष्णदेवसार्वभौमस्य पदाङ्कदूतम्, शिवभक्तस्य भिक्षाटनकाव्यम्, तथा नन्दकिशोरचन्द्रगोस्वामिनः शुकदूतम् सुन्दराणि प्रवन्धगीतिकाव्यानि सन्ति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तृतीयोऽध्यायः

अन्यविधासु समाहिताः गीतयः प्रमुखगीतिकाव्यानामध्ययनञ्च

स्वतन्त्रगीतिकाव्यातिरिक्तेषु संस्कृतनाटकेष्वलङ्कारग्रन्थेष्वपि सुन्दरसंस्कृतगीतीनां समावेशोऽस्ति। अलङ्कारशास्त्रिभिरुदाहरणरूपेण रसभावसमन्विताः गीतय उद्धृतास्तथा सरसभावपूर्णया अस्याः विधायाः रक्षा विहिता। भरतमुनिः स्वनाट्यशास्त्रे गीतेरर्थं "स्वरविन्यासं स्वरप्रयोगं वा" न विधाय पद्यानां वर्णसंघटनामुक्तवान्। एतत्प्रतिपादितास्चतस्रो[1] गीतयो विभिन्नगेयच्छन्दःस्वक्षरविन्यासेन सम्बद्धाः सन्ति। कथितं यत् गीतपदेष्वक्षरसङ्घटनया 'सम्भाविता' गीतिरेवं लघ्वक्षरसङ्घटनया 'पृथुला' गीतिर्भवतः। मागध्या अर्धमागध्याः गीतीनां सम्बन्धः गीतशब्दानामावृत्तेःपुनरावृत्तेश्च प्रक्रियया सह विद्यते। एताः गीतयः 'ध्रुव'-सम्बन्धविरहिता अपि भवन्तिस्म। सङ्गीतकारैः गायकैर्वा केवलं गान्धर्वे व्यवह्रियन्ते स्म। ध्रुवे छन्दो निश्चितं भवति। गीतयश्छन्दःसम्बन्धिन्यामनियतावस्थायामपि लघुगुरुक्रमभेदमात्रेण कार्यं कुर्वन्ति।

भरतेन गतिवृत्तिनाम्ना तिस्रो वृत्तयः कथिताः—(१) चित्रा, (२) वृत्तिः, (३) दक्षिणा च। अतोग्रे वृत्तय इमास्तिस्रो वाद्यगीतयोः सापेक्षप्रधानतया गौणतया च सम्बद्धाः अभवन्।[2] भरतेनासु तिसृष्वपि वृत्तिषु ताल-लय[3]-गीतियति[4]-

---

१. प्रथमा मागधी ज्ञेया द्वितीया चार्धमागधी,
सम्भाविता तृतीया च चतुर्थी पृथुला स्मृता।
भिन्नवृत्तिप्रगीता या सा गीतिर्मागधी मता,
अर्थकालनिवृत्ता च विज्ञेया त्वर्धमागधी।
सम्भाविता च विज्ञेया गुर्वक्षरसमन्विता,
लघ्वक्षरकृता नित्या पृथुला सम्प्रकीर्तिता। —नाटचशास्त्र,२९।७७-७९

२. तिस्रो गतिवृत्तयः प्राधान्येन ग्राह्याः।
चित्रा वृत्तिर्दक्षिणा चेति। तासां''''प्राधान्यम्—

३. लय तीन प्रकारकी हैं—विलम्वित, मध्य, द्रुत।
—नाटचशास्त्र, २९ अध्या, पृ० ३३८, १०० पद्यके आगेका गद्यांश,

४. नाटचशास्त्र २९, पृ० ३३८.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मार्गतत्त्वानाञ्च समावेशः कृतः। चित्रायां संक्षिप्तवाद्यस्य, एककलतालस्य, द्रुतलयस्य समयतेः मध्यस्य तथाऽनागतग्रहस्य प्रधानता भवति। वृत्तौ द्विकलतालस्य, मध्यलयस्य, स्त्रातोगतायाः यतेस्तथा तालस्य निखिलमार्गाणां प्रधानता जायते। दक्षिणायाञ्च चतुष्कलतालस्य, विलम्बितलयस्य गोपुच्छायाः यतेस्तथाऽतीतग्रहस्य प्रधानता मन्यते निष्कर्ष एषोऽस्ति यच्चित्रायां वाद्यस्य प्रधानता, वृत्तौ गीतवाद्ययोः प्राधान्यं तथा दक्षिणायां गीतस्य प्रधानता, जायन्ते। एवम्प्रकारेण भरतमुनिना नाटकेषु गीतिनिवन्धनस्य नियमनं विहितम्। फलतः संस्कृतस्य सर्वैः नाटककारैः स्वनाटकेषु भावप्रवणगीतयो निवद्धाः।

नाटकेषु संस्कृतगीतयः

नाट्यशास्त्रस्यानिवार्यव्यवस्थाकारणात् संस्कृत-नाटकेषु भाषादृष्ट्या द्विप्रकाराः गीतयः प्राप्यन्ते—(१) संस्कृतगीतयस्तथा (२) प्राकृतगीतयः। लास्यस्य दशप्रकारेषु 'गेयपदस्य' प्रमुखं स्थानमस्ति। रञ्जनावैचित्र्याय लास्याङ्गानां योजनावश्यकी वर्त्तते। अभिनवगुप्तेन 'गेयपदस्य'—व्याख्यां कुर्वता लिखितम्—

ध्रुवागानपञ्चकमन्तरालापस्वररहितं यत्र प्रयोगयोग्यं भवति स काव्यप्रयोगो गेयपदमित्युक्तं भवति। —अभिनवभारती, नाट्य० १६।१२१

नाटकेषु गीतीनां योजना कथाप्रसङ्गानुकूला क्रियते, परमनेकगीतयः स्वतन्त्ररूपेणापि प्रयुज्यन्ते। रसाभिव्यक्तिकृते एतादृश्यो गीतयः प्रसङ्गनिरपेक्षाः भवन्ति। कुशलनाटककारः स्वनाटकेषु गीतीनामवतारणामवश्यं करोति, अन्यथा तस्य स्थापत्यं त्रुटिपूर्णं मन्यते। अतएव संस्कृतगीतिकाव्यस्यानुशीलनदृष्ट्या नाटकेषु समाविष्टगीतीनामध्ययनमत्यावश्यकमस्ति। अत्र परम्परानुसारं नाटकानां गीतीनां विश्लेषणं विधास्यते।

नाटककारभासस्य गीतयः

महाकविभासस्य त्रयोदशनाटकान्युपलब्धानि सन्ति। एतेषु संस्कृत-प्राकृतयोरुभयोरपि गीतीनां प्रचुरप्रचारः प्राप्यते। स्वप्नवासवदत्ते कथितमस्ति यत् महाराजउदयनः स्वप्राणप्रियायाः वासवदत्तायाः वियोगेन संतप्तो भूत्वा स्वमित्रं वसन्तकं प्रति कथयति—"मित्र! उज्जयिनीं प्रयाते यदैव मम दृष्टिरवन्तिराजपुत्र्या उपरि पतिता तदैव कामदेवेन स्वपञ्चानामपि वाणानां प्रयोग एकदैव ममोपरि कृतः। अद्यापि तत्प्रहारेण मम हृदयं पीडितमस्ति, कथ्यताम्, यदा कामदेवः पूर्णमेव मयि पञ्चापि बाणान् निक्षिप्य तूणीरं रिक्तं कृतवान्, तदा सः इमं षष्ठवाणं मयि कथं प्रक्षिप्तवान्—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते,
दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषवः पातिताः ।
तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयम्,
पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः ।"

—स्वप्नवासवदत्तम् ४।१

रामः वृक्षान् जलेन सिक्तवान्, येन वृक्षमूलेषु फेनिलं जलं चक्राकारमभवत् । सम्प्रति तस्य फेनिलसलिलस्याविलत्वात् पक्षिणः स्वतृषाशमनाय तत्रागत्यापि तृषिता एव तिष्ठन्ति । जलपूरिते बिले आर्द्राः कीटा स्थलमभिगच्छन्ति । सलिले शुष्के वृक्षमभितः रेखाः सञ्जाताः सन्ति । कविः प्रतिमानाटकेऽस्य भावस्य प्रदर्शनं निम्नलिखितगीत्या कृतवान्—

भ्रमति सलिलं वृक्षावर्त्ते सफेनमवस्थितं,
तृषितपतिता नैते क्लिष्टं पिबन्ति जलं खगाः ।
स्थलमभिपतन्त्यार्द्राः कीटा बिले जलपूरिते,
नववलयिनो वृक्षा मूले जलक्षयरेखया ॥ —प्रतिमा०५।२

प्रकृतिचित्रणप्रसङ्गेऽनेकसुन्दरगीतयो लिखिताः सन्ति । कविः प्रकृतेरुग्ररूपं वर्णयन् लिखितवान्—

अत्युष्णज्वरितेव भास्करकरैरापीतसारा मही,
यक्ष्मार्ता इव पादपाः प्रमुषितच्छाया दवाग्न्याश्रयात् ।
विक्रोशन्त्यवशादिवोच्छ्रितग्रहा व्यत्ताननाः पर्वताः
लोकोऽयं रविपाकनष्टहृदयः संयाति मूर्च्छामिव । —अविमारक०

ग्रीष्मकालीनसूर्यस्य प्रखररश्मयः पृथ्व्याः समग्रं रसं शोषितवन्तः । यथा सा ज्वरसन्तप्ताऽभवत् । दवाग्निर्वृक्षपत्राणि दग्धवान्, तेषां दशा यक्ष्मग्रस्तातुरसदृशी जाता । पर्वताः स्वकन्दरामुखानि विदीर्य तापेन क्रन्दन्ति । अखिलविश्वः सूर्यस्य प्रचण्डतापेन चेतनामपहाय मूर्च्छितो भवन्निव जायते ।

भासकवेरिमाः गीतयः प्रबन्धगीतिषु गण्यन्ते । एतासु वैयक्तिकहर्षशोकयोरभिव्यञ्जनायाः आधाररूपेण सत्यप्याख्याने गीतितत्त्वस्य प्राचुर्यमस्ति । सङ्गीतात्मकता, आत्माभिव्यञ्जना, रसानुभूतिस्तथा सौन्दर्यकल्पना गीतिकाव्यस्य प्रमुखतत्त्वानि तासु गीतिषूपलभ्यन्ते ।

महाकविकालिदासस्य नाटकेषु गीतयः

महाकविकालिदासस्याभिज्ञानशाकुन्तल-मालविकाग्निमित्र-विक्रमोर्वशीयानि च त्रीणि नाटकानि सन्ति । अभिज्ञानशाकुन्तले प्रकृत्या सह मानवस्यैकात्मकता चित्रि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तास्ति सहृदयपितुर्हृदयस्यागाधकरुणायाः सजीवचित्रणं निम्नलिखितगीतौ जातमस्ति—

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या,
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आदौ वः कुसुमप्रसूतिसमये यस्याः भवत्युत्सवः,
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥—अभि०शा० ४।९

या शकुन्तलाश्रमवृक्षाणां जलसेचनं विना जलं न पिबतिस्म तथा वृक्षान् प्रति प्रेमकारणात् स्वशृङ्गारार्थं पल्लवमपि न गृह्णातिस्म तथा प्रथमपुष्पफलसमये उत्सवं करोतिस्म, सैवाद्य पतिगृहं गच्छन्त्यस्ति, अतः सर्वैर्मिलित्वा सस्नेहं गन्तुमादिश्यताम् ।

रमणीयं वस्तु वीक्ष्य हृदये उत्पद्यमानायाः भावनाया चित्रणं कुर्वन् कविः कथयति—

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्,
पर्युत्सुको भवति यत्सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ॥ —शा० ५।२

रमणीयवस्तूनि निरीक्ष्य तथा मधुरशब्दान् श्रुत्वा सुखी पुरुषोऽपि यत्कस्यापि वस्तुनोऽज्ञातस्याभावमनुभवति तन्निश्चितमेव पूर्वजन्मनः प्रेम्णः स्थिरभावानज्ञातरूपेण स्मरति । तात्पर्यमेतदस्ति यत् प्रेम्णः सम्बन्धः जन्मजन्मान्तरेष्वपि न त्रुटचति तथा खण्डितरूपेण मानवमनसि स्थिरो भवति ।

आकाशमार्गेण धरित्र्याः वर्णनं प्रस्तुवन् कविः कथयति—

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
पर्णस्वान्तरलीनतां विजहति स्कन्धोदयात् पादपाः ।
सन्तानैस्तनुभावनष्टसलिला व्यक्तिं भजन्त्यापगाः,
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते ॥ —शा० ७।८

दुष्यन्तस्य रथः स्वर्गादागमनकाले हेमकूटपर्वते नभसो नीचैः महता वेगेनावतरति। राजा मातलिं अधस्तनदृश्यं दर्शयन् कथयति—एवं प्रतीयते यथोपरि उत्तिष्ठतः शैलशिखरात् मेदिनी नीचैरवतरति । नेदानीं वृक्षाणां केवलं पत्राण्येव, प्रत्युत शाखा अपि दृश्यन्ते, कृशधाराः दृश्यमानाः नद्यः सम्प्रत्यायताः स्पष्टाश्च दृश्यन्ते । एवं प्रतीयते यथा कश्चन पृथ्वीं कन्दुकवत् वेगेनोत्क्षिप्य ममान्तिकं प्रेषयति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनया चित्रात्मिकया गीत्या स्पष्टमस्ति यत् महाकविः विमानयात्राया अनुभवपूर्णं वर्णनं विहितवान् । वात्सल्यभावस्याङ्कने कविरपूर्वसफलतामधिगतवान्—

आलक्ष्यदन्तमुकुलाननिमित्तहासै-
रव्यक्तवर्णरमणीयवचःप्रवृत्तीन्,
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो
धन्यास्तदंगरजसा मलिनीभवन्ति ॥ —शा० ७।१७

अकारणं हसित्वा श्वेतरदर्शकान्, धूलधूसरितान् अस्पष्टवाचश्शिशून् अङ्के गृहीत्वा ये मलिनवसनाः जायन्ते ते सुखिनो धन्याः सन्ति ।

कवेश्चित्रविधायिनी शैली कीदृशी मनोरमास्ति ? वीक्ष्याक्षिणी तृप्यतः । यथा—

वामं सन्धिस्तिमितवलयं न्यस्य हस्तं नितम्बे,
कृत्वा श्यामाविटपसदृशं स्रस्तयुक्तं द्वितीयम् ।
पादाङ्गुष्ठालुलितकुसुमे कुट्टिमे पातिताक्षं
नृत्यादस्याः स्थितमतितरां कान्तमृज्वायतार्धम् ॥ —माल० २।६

हस्तिसन्धौ मौनकङ्कणवन्तं वामकरं नितम्बे न्यस्य, दक्षिणकरं श्यामलताशाखासदृशं नीचैः कुर्वन्ती, चरणाङ्गुष्ठेण पृथ्व्यां पतितं यत्पुष्पमियमितस्ततः कुरुते, तस्योपर्येव दृष्टिं ददानाया अस्याः ऋजुतनुशरीरमीदृशं कमनीयं जातमस्ति, यादृशं नृत्यकालेऽपि नासीत् ।

अनतिलम्बदुकूलनिवासिनी बहुभिराभरणैः प्रतिभाति मे ।
उडुगणैरुदयोन्मुखचन्द्रिका हृतहिमैरिव चैत्रविभावरी । —माल० ५।७

अनतिलम्बं वसनं मुखे ददाना बहुभिराभूषणैरलङ्कृता च सा सुन्दरी शीतरहिते निर्मले नभसि नक्षत्रराजितमधुमासरजनीसमाना मनोहारिणी प्रतीयते, यस्यां ज्योत्स्ना शीघ्रमेव विकसनशीला भवेत् ।

उक्तगीतिषु भावानां पूर्णावरोहावरोहौ प्राप्येते । भावपूर्णा मूर्तिः पाठकानां समक्षमुपस्थिता जायते । यथा मानवजीवनस्य वास्तविकमहत्ता शारीरिकविशालतायाः तथा रचनायाः अपेक्षया तस्य चेतनायां तज्जीवनशक्तौ चाधिकं निर्भरमस्ति तथैव गीतिकाव्यस्योत्कर्षोऽलङ्कारादिवाह्यसौन्दर्यप्रसाधनापेक्षया कल्पनाया उर्वरतायां भाववेगस्य संजीवनशक्तौ चाधिक आधृतो विद्यते । कल्पनाया उन्मुक्ततायाः भाववेगस्य च तीव्रतायाः गीतिकाव्यस्य प्रधानतत्त्वकारणत्वात् कालिदासीयनाटकानां गीतयः कण्ठहारायन्ते । स केवलं नवीनसौन्दर्यचेतनां बोधयित्वा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समाजरुचेः परिष्कारमेव न कृतवान्, प्रत्युत तस्यामेकस्याः नवीनसर्जनप्रेरणायाः सञ्चारं कृतवान्। हृदयस्य गम्भीरभावावेशस्याभिव्यक्तिकारणात् मालविकाग्निमित्रस्य गीतयः प्रभावोत्पादिकाः सन्ति।

विक्रमोर्वशीयस्याधिकांशपद्यानि गीतयः सन्ति। अत्रोदाहरणार्थमेका द्वे वा गीती समुद्ध्रियेते। यथा—

> उष्णालुः शिशिरे निषीदति तरोर्मूलालवाले शिखी,
> निर्भिद्योपरि कर्णिकारमुकुलान्यालीयते षट्पदः।
> तप्तं वारि विहाय तीरनलिनीं कारण्डवः सेवते,
> क्रीडावेश्मनि चैष पञ्जरशुकः क्लान्तो जलं याचते॥

—विक्रमो० २।२२

शिशिरर्तोः मध्याह्ने व्याकुलो मयूरः वृक्षमूले निषीदति। कर्णिकारकालिकां निर्भिद्य भ्रमराः निलीयन्ते। जलकुक्कुटः वाप्याः उष्णं जलं विहाय तटकमलिन्याश्छायायामुपविशति तथा केलिभवने पञ्जरशुकः तृषार्त्तः सन् सलिलं याचते।

उल्लिखितपद्ये राजभवनसंलग्नविलासो पवनस्य सीमितप्रकृतौ महाकवेः दृष्टिः कियत्या सूक्ष्मतया पतितास्ति, तथा केन कौशलेन स तां प्रकृतिं गीतिवद्धां चकार, एतत्स्पष्टमस्ति।

मनोवैज्ञानिकचित्रणेऽपि कविकुलगुरुः पटुरस्ति। मानव्याः प्रकृतेः सूक्ष्मतापूर्वकं विश्लेषणं स कृतवान्। यथा—

> नद्या इव प्रवाहो विषमशिलासङ्कटस्खलितवेगः
> विघ्नितसमागमसुखो मनसिशयः शतगुणी भवति। —विक्रमो० ३।८

यथा नद्याः वेगः विषम-शिलावरुद्धोऽधिको वेगवान् भवति, तथैव संभोगसुखे विघ्निते कामदेवः शतगुणो बलवान् भवति।

वैयक्तिकगम्भीरभावानां प्रकाशने कविरन्तर्मुखो जातः। स आन्तरिकशक्तीनां विस्तारस्य पूर्णप्रयासं विहितवान्। पुरूरवसः मानसिकस्थितेः निम्नलिखितरूपेण प्रकाशनमुपलभ्यते।

१. प्रेमपात्रस्योपस्थितावानन्दानुभूतिः (संयोगावस्था)
२. प्रेमपात्रस्यानुपस्थितौ दुःखानुभूतिः (वियोगावस्था)
३. प्रेमपात्रे सुखिनि सुखानुभूतिः।
४. प्रेमपात्रे दुःखिनि दुःखानुभूतिः।

गीतिकाव्ये संयोगजन्यानन्दानुभूतेरभिव्यक्त्या सह विरहजन्यायाः विवश-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तायाः, विषादस्य, आकुलतायाश्च मार्मिकोद्गारा अपि श्रूयन्ते । विरहाग्नौ तप्त्वा प्रेमनिष्कलुषं तथा ज्योतिर्मयरूपं गृह्णाति । विरहे ऐन्द्रियवासनायाः तिरोभावो भवति तथा विशुद्धस्य मानसिकस्याध्यात्मिकस्य वा प्रेम्णः उदयो भवति । कवेः रागात्मिका वृत्तिरूर्ध्वमुखी जाता—

पुरूरवाः उर्वशीमभितोऽन्विष्यन्नेकां लतां दृष्ट्वा तामुर्वशीं मत्वा कथयति—

तन्वीं मेघजलार्द्रपल्लवतया धौताधरे वाश्रुभिः,
शून्येवाभरणैः स्वकालविरहाद्विश्रान्तपुष्पोद्गमा ।
चिन्तामौनमिवास्थिता मधुलिहां शब्दैर्विना लक्ष्यते,
चण्डीमामवधूय पादपतितं जातानुतापेव सा ॥ —विक्रमो० ४।६८

एवं प्रतीयते यत् मम कोपाविष्टा प्रिया पादयोः पतितेऽपि मम यदपमानं कृतवती, तस्मादेव कारणात् सा पश्चात्तापाभिभूताऽभवत् । अयं वर्षाजलार्द्रः पल्लव एवाश्रुधौतः तदधरोऽस्ति, ऋतुकाले व्यतीतेऽस्मिन् यत्पुष्पाणि न दृश्यन्ते, तदेवाभूषणैः शून्यता वर्त्तते, भ्रमरगुञ्जनं नात्र श्रूयते, सैव मम प्रियायाः चिन्तामयी मूकता विद्यते ।

इयं वाणी कियतः प्रेमार्द्रकण्ठात् निःसृतास्ति । दम्पत्योः पारस्परिकं प्रेम कियतोऽचलस्य विश्वासस्योपरि आधृतमस्ति तथा कियद् गम्भीरमस्ति, एतदनुभूतिगम्य विद्यते । एतेषु नाटकेषु आगताः संस्कृतार्याः प्राकृतगाथानां भावोत्कर्षे मनागपि न्यूनाः न सन्ति । भावानामेतावान् रमणीयः कोमलश्च विलासोऽत्यन्तदुर्लभोऽस्ति ।

विक्रमोर्वशीयस्य प्राकृतगीतयोऽत्यन्तमनोहराः सन्तिः सहजन्यायाः नाम्न्याः अप्सरसो गीतयः भाव-कलादृष्ट्या मनोहराः सन्ति । यथा—

चिंता दुम्मिअ माणसिआ सह अरिदंसण लालसिआ,
विअसिऊकमलमणोहरए विहरइ हंसी सरवरए । —विक्रमो० ४।४

चिन्ता व्याकुलचित्ता हंसी स्वसख्या सह मिलनोत्कण्ठया सहिता विकसितकमलैः सुशोभिते सरसि विहरति ।

सहअरिदुक्खालिद्धअं सरवरअम्मि सिणिद्धअं ।
अविरलवाहजलोल्लअं तम्मइ हंसी जुअलअं । विक्रमो० ४।१

सरोवरे हंसिके स्वप्रियसखीदुःखाहतेऽक्ष्णोः प्रेमाश्रुधारामविरलं प्रवाहयतः । राज्ञः पुरूरवसः वियोगगीतयोऽपि परमर्मभेदिन्य सन्ति । रुष्टोर्वशी राज्ञा मान-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दानेऽपि न प्रसीदति तथा गन्धमादनपर्वतस्य तस्मिन् वने गच्छति, यस्मिन् वने गमनशीला नारी कार्तिकेयानुसारं लता जायते। अतः सापि लता जाता तथा राजा तामुन्मत्तः सन्नन्विष्यति। मृगं समक्षमागच्छन्तं पृच्छति—

सुरसुंदरि जहणभरालस पीणुत्तुंगघणत्थणी,
थिरजोव्वण तणुसरीरि हँस-गई।
गअणुज्झलकाण्णें मिअलोअणि भमंती,
दिट्ठी पइँ तह विरह समुद्दंतरें उत्तराहि मई। —विक्रमो० ४।५९

स्थूलोन्नतपरस्परासक्तस्तनीं कृशाङ्गीं स्थायियौवनवतीं गुरुनितम्बभारेण साल-सहंसगमनां मृगनयनीं तां देवाङ्गनां यदि त्वमाकाशसमानोज्वलेऽस्मिन् वने भ्रमन्तीं दृष्टवान्, तदास्माद्विरहसागरात् उत्तारय।

पुरूरवा मयूरं कोकिलं हंसं चक्रवाकं भ्रमरं गजं पर्वतं नदीप्रभृतिञ्च स्वप्रिया-स्थितिसंकेतं पृच्छन् भ्रमति। एवंप्रकारेण कविकालिदासगीतिषु तीव्रतानुभूते-र्विद्यमानास्ति, येन तासु गीतिकाव्यत्वस्य सन्निवेशोऽस्ति अन्तर्निहितायाः सङ्गीता-त्मकताया तथा तीव्रानुभूतिपूर्णस्वानुभूतिमूलकतायाश्च कारणात् गीतयः श्रेष्ठगीति-काव्यकोटौ स्थानं प्राप्तुं शक्नुवन्ति। नाटकानामिमाः गीतयःसन्दर्भनिरपेक्षा न सन्ति तथास्वाख्यानस्याग्रहोऽपि विद्यते, तथाप्यासु भावानुभूतिसघनताकारणात् गीति-मत्ता विद्यमानास्ति।

मुद्राराक्षस्य गीतयः

षष्ठ्याः शताब्द्या उत्तरार्धे कविविशाखदत्तेन मुद्राराक्षसनामकनाटकस्य रचना कृता। अस्य मुख्यविषयः राजनीतिरस्ति तथास्मिन् रक्तहीनबौद्धिकयुद्-धस्य प्रदर्शनं कृतं विद्यते। विना शस्त्रयुद्धमेकस्य महतो राजनैतिकविजयस्य प्रतिष्ठा कृता विद्यते। नाटकमिदं नाटककारस्य बुद्धिवैभवस्य चूडान्तनिदर्शनमस्ति। एतस्य नाटकस्य गीतयोऽलङ्कारैराविलाः न सन्ति। उदाहरणार्थं कतिपयगीतयः प्रस्तूयन्ते—

आस्वादितद्विरदशोणितशोणशोभां
सन्ध्यारुणामिव कलां शशलाञ्छनस्य।
जृम्भाविदारितमुखस्य मुखात् स्फुरन्तीं
को हर्तुमिच्छति हरेः परिभूय दंष्ट्राम्। —मुद्रा० १।८

चाणक्यः चन्द्रगुप्तस्याहितचिन्तकान् कालमुखगमनात् विरन्तुं सतर्कान् कुर्वन् कथयति—'चन्द्रमसः संध्याकालीनारुणकलासदृशीं जृम्भाकाले सिंहमुखस्य विवृतां दंष्ट्रां हर्तुं कः समीहते, या मत्तगजेन्द्रस्य रक्तवर्णां शोभां बिभर्त्ति।'

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कविरप्रस्तुतविधानद्वारेण प्रस्तुतस्यैतादृश्या सुन्दरतया निदर्शनं कृतवान्, यत्तस्मिन्नधिकं सौन्दर्यमागतम् ।

एकमन्यदुदाहरणम्—

विपर्यस्तं सौधं कुलमिव महारम्भरचनं
सरः शुष्कं साधोर्हृदयमिव नाशेन सुहृदम् ।
फलैर्हीना वृक्षा विगुणनृपयोगादिव नया
स्तृणैश्छन्ना भूमिर्मतिरिव कुनीतैरविदुषः ॥—मुद्रा० ६।११

राजभवनं तथैव विपर्यस्तमभूत्, यथा बहुकुटुम्बः परिवारश्छिन्न-भिन्नो जायते। सरः शुष्कं जातं यथा सज्जनानां हृदयं मित्राणां नाशेनानन्दशून्यं भूत्वा विदीर्णं जायते । वृक्षास्तद्वदेव फलहीनाः दृश्यन्ते यथा गुणहीनाः राजानः नीतिरहिताः जायन्ते । तथा मेदिनी तथैव तृणच्छन्नास्ति, यथा मूर्खाणां मतिः कूनीतिभिराच्छादिता जायते ।

मृच्छकटिकस्य गीतयः

मृच्छकटिकनाटके संस्कृतगीतीनामपेक्षया प्राकृतस्य गीतयोऽधिकसुन्दर्यः सन्ति । इहैकद्विसंस्कृतगीति-प्रस्तुतीकरणानन्तरं प्राकृतगीतीनां विश्लेषणं विधास्यते । यथा—

उदयति हि शशाङ्कः कामिनीगण्डपाण्डु—
ग्रहगणपरिवारो राजमार्गप्रदीपः ।
तिमिरनिकरमध्ये रश्मयो यस्य गौराः ।
स्रुतजल इव पङ्के क्षीरधाराः पतन्ति । —मृच्छ० ६।५६

कामिन्याः कपोलप्रान्तसदृशः पाण्डुवर्णश्चन्द्रमाः उदेति । तद्राजमार्गे तारकसमूहः प्रदीपवत् दीव्यति । चन्द्रमस उज्ज्वलरश्मयः अन्धकारराशौ पतन्तः ईदृशाः प्रतीयन्ते, यथा जलहीनपङ्के दुग्धधाराः पतन्तः भवेयुः ।

उपर्युक्तगीतौ प्रकृतेः कीदृशं रमणीयरूपमुपस्थितं विद्यते । उत्प्रेक्षासौन्दर्यं कविप्रतिभायाः महत्त्वं सूचयति । चन्द्रास्तचित्रणमपि परममनोज्ञमस्ति ।

असौ हि दत्वा तिमिरावकाशमस्तं व्रजत्युन्नतकोटिरिन्दुः ।
जलावगाढस्य वनद्विपस्य तीक्ष्णं विषाणाग्रमिवावशिष्टम् । —मृच्छ० ३।६

अयं चन्द्रमाः अन्धकारप्रसाराय पूर्णं स्थानं दत्वा निमज्जति । तस्याल्पोंशः दृश्यमानः जलेऽवगाहमानः वन्यगजस्य तस्य रदस्य सदृशो भाति, योऽल्पो जलोपरि निःसृतः दृश्यते ।

कविः सुन्दरेणाप्रस्तुतेनास्तंव्रजतश्चन्द्रमसः रूपं रमणीयतया सहोपस्थापितवान् । प्रस्तुतप्राकृतिकदृश्याय महाकविरप्रस्तुतमपि प्रकृतिक्षेत्रादेव गृहीतवान् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकारस्य हास्यरससम्वन्धिन्यो गीतयः परममार्मिकाः सन्ति । तमोनिधि स उज्जयिन्याः नगर्याः प्रख्यातवेश्यां वसन्तसेनामेकाकिनीं व्रजन्तीं वीक्ष्य तामनुसरन् कथयति—

मम मअणमणंगमम्मथं वड्ढअन्ती
णिशि अ शअणके मे णिद्दअं आक्खिवंती ।
पशलसि भअभीदा पक्खलंती खलंती,
मम वशमणुजादा लावणवश्शेव कुंती ।

मम मदनस्य अनङ्गस्य मन्मथस्य च वर्द्धिकायां रजन्यां शय्यायाः मम निद्राभङ्गकारिणी सा पतन्ती पलायते, परन्तु सेदानीं मम वशे तथैवागता यथा रावणवशे कुन्ती समागतासीत् ।

झणज्झणंतवहुभूशणशद्दमिश्शं
किं दोवदी विअ पलायशि लामभीदा ।
एशे हिलामि शहशक्ति जवा हणूमे
विश्शावशुश्शबहिणिं विअतं शुभद्दम् । —मृ० १।२५

रामाद् भीतायाः द्रौपद्याः सदृशी भूषणानां झंकारं कुर्वन्ती कथं पलायसे ? अहमिदानीं त्वां सहसा तथैव हरिष्यामि यथा हनूमान् विश्वावसुस्वसारं सुभद्रां हृतवान् ।

भाषावैचित्र्येण सह शकारस्य मूर्खतापूर्णाः वार्त्ताः हास्यं जनयन्ति । पाठकाः शकारोक्तिभिः परमानन्दं लभन्ते ।

प्रकृतिपरकगीतिषु वर्षाहेमन्तवसन्तानां चित्रणं रमणीयमस्ति । यथा—

एसो असोगवुच्छो णवणिग्गमकुसुमपल्लवो भादि,
सुभडो व्व समरमज्झे यणलोहितपंकचच्चिओ ।

अयमशोकतरुः नवपुष्पपल्लवैरीदृशः शोभितो जायते, यथा युद्धक्षेत्रे रक्तकर्दमालिङ्गितो वीरो भवेत् ।

जधा जधा वश्यदि अब्भखंडे तधा तधा तिम्मदि पुट्ठिचम्मे,
जधा जधा लग्गदि शीदवादे तधा तधा वेवदि मे हलक्के । —मृ० ५।१०

यथा यथा मेघाः वर्षन्तः सन्ति, तथा तथा पृष्ठचर्मार्द्रं जायते, अथ च यथा यथा शीतलो वायुः स्पृशति, तथा तथा मम हृदयं वेपते ।

चारुदत्तः प्राणदण्डं प्राप्नोति । द्वौ चाण्डालौ तं वध्यस्थलं नयतः । तौ आर्यगुणैः पूर्णपरिचितौ स्तः । तौ समुपस्थितजनान् प्रति कथयतः—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

किं पेक्खध छिज्जंतं शप्पुलिशं कालपलशु धालाहिं।
शुअण शउणाधिवाशं शज्जणपुलिशद्दुमं एदम् ॥ –मृ० १०।४

सुजनविहगाश्रयं सज्जनपुरुषतरुं कालपरशुधारेण भिद्यमानं कथं पश्यथ?

मृच्छकटिकस्य गीतिष्वनुभूतेस्तीव्रता सूक्ष्मता तथा वैयक्तिकता विद्यन्ते। सत्यप्याख्याने अनुरागजन्याः वेदनाः लभ्यन्ते। गीतिकाव्यस्य प्राणतत्त्वं भावमार्मिकता भवति। अस्य तत्त्वस्य चास्तित्वं सर्वासु गीतिषु विद्यते। भावातिरेकस्य सद्भावेन रागात्मिकामनुभूतिं तथा कल्पनया कविः विषयं वस्तु वा भावात्मकं विहितवन्तौ। उक्ताः सर्वाः गीतयः प्रबन्धगीतयः सन्ति। प्रबन्धात्मकरूपेऽपि वैयक्तिकभावनानां समावेशः विहितोऽस्ति।

गीतिकाव्यस्य सम्बन्धः रागात्मिकयानुभूत्या सह विद्यते। अस्याः अनुभूत्या अभिव्यञ्जनायां श्रेष्ठगीतिकाव्यस्य जन्म जायते। अत्र बुद्धिः गौणा जायते तथा भावनाः प्रधानाः भवन्ति तथा कवेरन्तर्वृत्तिः वस्तुना विषयेण वा सह स्वानुरूपतां स्थापयति।

हर्षवर्द्धनस्य नाटकानां गीतयः

हर्षस्य त्रीणि रूपकाणि सन्ति—१. प्रियदर्शिका, २. रत्नावली, ३. नागानन्दञ्च। रत्नावल्याः प्रियदर्शिकायाश्च सम्बन्धः प्रणयेन सहास्ति। परं नागानन्दे प्रणय एव सर्वस्वं नास्ति। तस्मिन् त्यागमयजीवनस्य प्रतिष्ठा विहिता विद्यते। रत्नावल्याः भावपूर्णाः गीतयोऽध्ययनीयाः सन्ति यथा—

उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणा—
दायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः।
अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवम्,
पश्यन् कोपविपाटलद्युतिमुखं देव्याः करिष्याम्यहम् ॥ –रत्नावली २।३

राजा स्वमित्रं विदूषकं प्रति परिहसन् कथयति—"अद्याहं स्वच्छन्दतापूर्वकं कलिकाभिः पूर्णां (परस्त्रीपक्षे, उद्दामकामनापूर्णाम्) पीतां (प्रेम्णा पाण्डुवर्णाम्) विकासवतीं (प्रेमोन्मादेन जृम्भां कुर्वन्तीम्) तथा मदनवृक्षालिङ्गितां (कामावेगपूर्णाम्) अस्य विलासोपवनस्य लतां परनारीसदृशीं वीक्ष्य देव्याः वासवदत्तायाः मुखमवश्यमेव क्रोधारुणं करिष्यामि!

अत्रोपमया सह श्लेषस्य ग्रहणं कुशलतापूर्वकं कृतमस्ति। भाविन्याः घटनायाः पूर्वमेव सूचनाप्रदानेनैतत् गीतिनाटके समासोक्तिमूलकस्य पताकास्थानकस्य रूपे प्रयुक्तमस्ति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

राजा सागरिकामालिङ्गनप्रार्थनां करोति। राज्ञ उदयनस्यैतत्कथनं परमभावपूर्णं मार्मिकञ्चास्ति।

> शीतांशुर्मुखमुत्पले तव दृशौ पद्मानुकारौ करौ,
> रम्भागर्भनिभं तवोरुयुगलं बाहू मृणालोपमौ।
> इत्याह्लादकराखिलाङ्गि रभसान्निःशङ्कमालिङ्ग्य मा-
> मङ्गानि त्वमनङ्गतापविधुराण्येह्येहि निर्वापय ॥—रत्नावली-३।११

हे प्रिये ! ममाङ्गानि ज्वलन्त्यनङ्गतापैः। त्वमागच्छ तथा दृढतापूर्वकं मामालिङ्ग्य मम तापं निवारय। यतस्तव मुखं चन्द्रोऽस्ति (यस्मिन् अमृतमधरामृतमस्ति) तवाक्षिणी कमलतुल्ये तथा करौ पद्मसदृशौ (शीतलावानन्ददायकौ च) स्तः। तव जङ्घे कदलीस्तम्भमध्यवर्त्ति-भागसदृशे कोमले स्तः तथा बाहू कमलनालसदृशौ स्तः। एवंप्रकारेण हे सुन्दरि ! तव सर्वाण्यङ्गानि आह्लादकराणि सन्ति।

शृङ्गारेण सह भयानकरसस्याभिव्यञ्जनायामपि कविर्निपुणो विद्यते। ओजस्विपदेषु भयस्य मूर्त्तिमद्रूपमङ्कितमस्ति। महाराज्ञी वासवदत्ता यस्मिन् भवने सागरिकां वन्दिनीं विधाय रक्षितवती, तस्मिन् भवनेऽकस्मात् वह्निदाहो जायते। तद्दृश्यं निभाल्य महाराज्ञ्याः हृदयं करुणया पूर्णं जायते—

> हर्म्याणांहेमशृंगश्रियमिवशिखरैरर्चिषामादधानः,
> सान्द्रोद्यानद्रुमाग्रग्लपनपिशुनितात्यन्ततीव्राभितापः।
> कुर्वन् क्रीडामहीध्रं सजलजलधरश्यामलं दृष्टिपातै-
> रेषप्लोषार्तयोषिज्जन इह सहसैवोत्थितोन्तःपुरेऽग्निः ॥—रत्ना० ४।१४

अन्तःपुरे सहसाग्निः प्रज्वलितः। यस्योर्ध्वगामिन्यः शिखाः राजभवनस्य स्वर्णशिखरशोभां बिभ्रति। रमणीयविलासोपवनस्य वृक्षाणां ज्वलन्तः शृंगाः अस्य तीक्ष्णाभितापं प्रकटयन्ति। क्रीडाशैलोपरि पतन् धूमराशिरेवं प्रतीयते यथा जलपूर्णाः श्याममेघा आगताः भवेयुः। तीव्रदाहेनान्तःपुरस्य नार्यः उच्चैरार्त्तक्रन्दनं सन्ति कुर्वन्त्यः।

कविरग्निदाहस्य भयानकं हृदयद्रावकञ्च वर्णनं कृतवान्। इयं चित्रविधायिनी गीतिः कवेरुच्चप्रखरप्रतिभायाः परिचायिकास्ति। रमणीयप्रकृतिचित्रणैः कतिपयासु गीतिषु कविः सहृदयतायाः परिचयं दत्तवान्। यथा—

> उदयतटान्तरितप्राची सूचयति दिङ्निशानाथम्,
> परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी। —रत्ना० १।२४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इयं प्राची दिशा स्वपीतेन मुखेनोदयाचलतटप्रान्तप्रच्छन्नं चन्द्रमसं तथैव सूचयति, यथा रमण्याः पीतं मुखं तद्धृदयस्थितं प्रियं सूचयति ।

नागानन्दनाटके कविना तपोवन-मलयपर्वततुंग्प्रभृतिचित्रणे सुन्दरगीतीनां योजना विहिता । नाटकेऽस्मिन् मानवस्य कोमलोग्रचित्तवृत्त्योः सफलचित्रणं कृतमस्ति । जीमूतवाहनेन शंखचूडस्य जीवनरक्षायै स्वशरीरं गरुडाय समर्पितम् । गरुडः प्रतिदिनं नागमेकं भक्ष्यति स्म । किन्तु यस्मिन् दिनेऽसौ जीमूतवाहनं प्राप्तवान्, तद्दिने परमहिंसकगरुडस्यापि चित्ते परमोद्वेगोऽजनि । गरुडश्चिन्तितोऽभवत् तथा तेन जीमूतवाहनस्य लोकोत्तरगुणानां वर्णनं कृतम् । संदर्भेऽस्मिन्नागताः समस्ताः गीतयोऽत्यन्तसरसाः सन्ति ।

भयानकमुग्रप्रकृतिञ्चावलम्ब्य नागानन्दे याः गीतय उपलभ्यन्ते, ताः भवभूतिगीतीनां समकक्षतामर्हन्ति । ध्वन्यात्मिकायां समस्तपदावल्यां समुद्रस्योच्चं सङ्कुलनिर्घोषं वर्णितवान् । भावानुगामिनी पदयोजना कवेरुच्चप्रतिभायाः प्रमाणमस्ति । गरुडप्रतीक्षायामुपविष्टः राजाजीमूतवाहनः प्रकृतेः भयोत्पादकपरिवर्त्तनेनैव गरुडस्यागमनमनुभवति । तदानीन्तनं वातावरणं भयोत्पादकदृश्यैः पूर्णं सम्पद्यते ।

नागानन्दस्य गीतियोजना भावपूर्णास्ति । अस्मिन् हृदयस्य गम्भीरभावावेशः प्राप्यते । आत्मनिष्ठायाः समावेशः प्रबन्ध-सन्दर्भेषु जातो विद्यते । वैयक्तिकतया सहाबाधकल्पना, असीमभावुकता विशुद्धभावात्मकता च विद्यमानाः सन्ति । सत्यप्यख्यानाधारे नागानन्दनाटकस्य संस्कृतप्राकृतयोरुभयोरपि भाषयोः गीतयः वैयक्तिकाः विद्यन्ते । सत्यपि विषयनिष्ठत्वे कविः गीतीनामात्मनिष्ठतानिर्माणे प्रयतितवान् । गेयतायाः रसपेशलतायाः समवायोऽपि प्राप्यते ।

वेणीसंहारस्य गीतयः

वेणीसंहारनाटकं वीररसप्रधानमस्ति । अस्य संस्कृतगीतिष्वोजोऽत्यन्तं परिपूर्णमस्ति । भीमस्य दर्पपूर्णसूक्तिषु प्राप्याः गीतयः सार्वजनीनाः सत्योऽपि वैयक्तिकाः सन्ति । द्रौपद्याः केशकर्षणवस्त्रापहरणयोरपमानज्वालया दग्धो भीमः सन्धिवार्त्तां श्रुत्वा ओजस्विषु शब्देषु प्रतिज्ञां करोति । भीमसेनस्य क्षुब्धोग्रमूर्त्तेः गीतिषु प्रस्तुतीकरणं कवेः महत्याः क्षमतायाः यथार्थं प्रत्यक्षञ्च प्रमाणमस्ति । अश्वत्थामोग्रभयङ्कररूपमपि गीतिषु चित्रितमस्ति । भीमसेनाय जलाञ्जलिदानकाले युधिष्ठिरस्य करुणविलापे गीतेः सर्वाणि तत्त्वानि निहितानि सन्ति । यथा——

मया पीतं पीतं तदनु भवताम्वास्तनयुगं
मदुच्छिष्टैर्वृत्तिं जनयसि रसैर्वत्सलतया ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वितानेष्वप्येवं तव मम च सोमे विधिरभू-
न्निवापाम्भः पूर्वं पिवसि कथमेवं त्वमधुना ॥—वेणीसंहार ६।२१

हे वत्स भीमसेन। मया पीतयोः मातुःस्तनयोः पश्चात् त्वया पानं कृतम्। मदुच्छिष्टं दुग्धं त्वं प्रेमपूर्वकमपिवः, यज्ञसमये सोमलतायाः रसपानकालेऽपि त्वमेव-मेवाकरोः। तत्कथय कथमिदानीं पितृदेवतर्पणजलमद्य मत्पूर्वमेव पिवसि ?

उक्तगीतौ करुणभावस्यानुपमाभिव्यक्तिः विद्यते। शब्देष्वपारवेदनायाः सागरः तरङ्गयते। तं वीक्ष्य सहृदयजन एव तस्मिन्नवगाहनं कर्त्तुं शक्नुवन्ति। गीतिदृष्ट्या भट्टनारायण एकः सफलो रससिद्धश्च कविरस्ति।

भवभूतिनाटकेषु गीतिकाव्यतत्त्वम्—

भवभूतेस्त्रीणि रूपकाणि सन्ति—(१) महावीरचरितम् (२) उत्तररामचरितम् (३) मालतीमाधवञ्च। मालतीमाधवे माधवद्वारेण मालत्याः शरीरवर्णनसन्दर्भे तथा मालत्याः प्राप्त्यर्थं स्वाभिलाषव्यक्तीकरणप्रसङ्गे सुन्दरगीतयोऽङ्किताः सन्ति। माधवप्रेम मालतीं प्रति पुरातनसंस्कारवशमेतादृशं प्रगाढं जातं यत् स प्रत्येकं वस्तु मालतीरूपमेवापश्यत्। पेम्णोऽस्मिन् चरमोत्कर्षे हृदयस्य यथार्थाभिव्यञ्जना जाता। वियोगी माधवो वक्ति——

लीनेव प्रतिविम्बितेव लिखितेवोत्कीर्णरूपेव च
प्रत्युप्तेव च वज्रलेपघटितेवान्तर्निखातेव च।
सा नश्चेतसि कीलितेव विशिखैश्चेतोभुवः पञ्चभिः,
चिन्तासन्ततितन्तुजालनिविडस्यूतेव लग्ना प्रिया॥—मालती० ५।१०

मम प्रिया मम मनसि लीनेवाऽभवत्, चित्रितेवाऽभवत्, तन्मूर्त्तिर्मनस्युत्कीर्णेव वर्त्तते। चित्रमन्तःपटलेऽङ्कितमस्ति। वज्रलेपेन घटितेव, अन्तर्निखातेव प्रतीयते। मम चेतनायां कामदेवस्य पञ्चभिर्बाणैः कीलितेवास्ति। सा गणितचिन्तासूत्रजाले दृढीकृता इव वर्त्तते।

प्रेमिणश्चिन्ताकुलहृदस्य संश्लिष्टचित्रं प्रस्तुतमस्ति। एतद्धि गीतिकाव्यस्योत्कृष्टं निदर्शनमस्ति। एतत् प्रेमाम्बुधौ लयनस्य पूर्णसामर्थ्यमस्ति।

कवेरुत्तररामचरितं करूणरसस्य सर्वोत्कृष्टं निदर्शनमस्ति। अस्मिन् दाम्पत्यप्रेम्णः आदर्शः चित्रितो विद्यते। कविरुक्तवान् यत् आदर्शदाम्पत्ये सुखदुःखयोरुभयोः दशयोः न कीदृशमपि परिवर्त्तनं भवति। एतत् सर्वास्ववस्थासु हृदयाय विश्रान्तिं ददाति वृद्धावस्थायामपि नास्यानन्दः क्षीणो भवति। विवाहकालादारभ्यान्तं यावत् यन्निरन्तरं परिपक्वं भवत् स्नेहतत्त्वोपरि स्थितं भवति। ईदृशमुदात्तं मङ्गलमयं प्रेम कश्चन भाग्यशाल्येव प्राप्नोति।[१] एवं विमृष्टभावं गीतिबद्धं विधाय दाम्पत्यजीवनस्य

१. उत्तररामचरितम् १।२७।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रूपं समुपस्थापितमस्ति । उत्तरामचरितस्य मालिनी-शिखरिणी-बद्धाः गीतयः परम-मनोज्ञाः सन्ति । तासु अर्थसौन्दर्यादधिकं नादसौन्दर्यं प्राप्यते । उदाहरणार्थं गीतिद्वयं समुपस्थाप्यते—

इयं गेहे लक्ष्मीरियममृतवर्त्तिर्नयनयोः,
असावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः ।
अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः,
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥ —उत्तर० १।३८

इयं सीता गृहे साक्षाल्लक्ष्मीरस्ति, अक्ष्णोः कृतेऽमृतशलाकास्ति । अस्याः स्पर्शः शरीरकृते चन्दरसवत् आनन्दप्रदोऽस्ति । कण्ठेऽस्या इमौ बाहू शिशिरसदृशौ शीतलौ तथा मुक्तामालासमानौ सुन्दरौ स्तः । किमधिकम् ? किमस्याः नाह्लादकम् ? केवल-मस्याः विरह एवासह्योऽस्ति

व्यतिषजति पदा.... .. कोऽपि हेतुः
न खलु वहिरुपाधीन् प्रीतयः संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥ —उत्तर० ६।१२

प्रेम बाह्यकारणानामाश्रितं न भवति, किमप्यलक्षितकारणमेव पदार्थान् परस्परं मेलयति । कमलं सूर्योदय एव विकसति तथा चन्द्रकान्तमणिः चन्द्रदर्शनेनैव द्रवति । क्व चन्द्रः ? क्व च चन्द्रकान्तमणिः ? एतयोः किमपि बाह्यकारणं सम्बद्धतायाः न दृश्यते । अत एतत् मान्यं भवति यत् प्रेम कस्यचिददृश्यस्यैव कारणस्योपर्यवलम्बितं भवति, न बाह्यकारणोपरि ।

अन्यनाटकेषु गीतिकाव्यत्वम्

मुरारिकवेरनर्घराघवे पर्याप्तं गीतिकाव्यस्योदाहरणमस्ति । एवमेव राजशेख-रस्य कर्पूरमञ्जर्यामनेकरमणीयगीतयः प्राप्यन्ते । प्रकृति-नारी-चित्रणे कविना मनोहराः गीतयो लिखिताः । दोलादोलनावसरे गीतिरुपस्थितास्ति—

रणंतमणिणेउरं झणझणंतहारच्छडं,
कलक्कणिदं किंकिणोमुहरमेहलाडंवरं ।
विलोलवलआवलीजणितमंजुसिंजारवं,
ण कस्स मणमोहणं ससिमुहीअहिंदोलणं ॥ —कर्पूर० २।३२

अस्याः गीत्याः पदशय्येदृशी मधुरास्ति, यच्छब्दा एव कथितदृश्यानि साक्षात्कुर्वन्तः सन्ति । एतन्नादसौन्दर्यं गीतिकाव्योत्कर्षे विशेषसहायकमस्ति । कर्पूरमञ्जरी गीतिनाट्यसंज्ञामप्यर्हति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बालरामायणे, वालभारते, विद्धशालभञ्जिकायाञ्च समागताः गीतयः स्वसौन्दर्यं-विशेषताकारणात् वक्रोक्तिजीविते, अलङ्कारसर्वस्वे काव्यानुशासने तथा साहित्य-दर्पणादिलक्षणग्रन्थेषु उद्धृताः सन्ति । वसन्तवर्णने (विद्ध० १।१३) वियोगवर्णने (विद्ध० २।२१) प्रयुक्ताः गीतयः सर्वाङ्गसुन्दर्यः सन्ति । बालरामायणस्य (१।३६, १।६३, १,४२) गीतिष्वपि भावनोत्कर्षो लभ्यते ।

विल्हणस्य कर्णसुन्दर्यां नाटिकायां १४७ संस्कृतगीतयः सन्ति । एतस्य शृङ्गार-गीतयोऽत्यन्तरमणीयाः रसपेशलाश्च सन्ति ।

जयदेवस्य प्रसन्नराघवे कियत्यः सुन्दरगीतयः समाविष्टाः सन्ति । एतासु गीतिषु मनोवेदनायाः सरसाभिव्यञ्जना विद्यते । वामनभट्टस्य पार्वतीपरिणये, धीरनागस्य कुन्दमालायाम्, वत्सराजस्य रुक्मिणीपरिणये तथा त्रिपुरदाहेऽपि संस्कृतप्राकृतगीतय आगताः सन्ति । हस्तिमल्लस्याञ्जनापवनञ्जये, मैथिलीकल्याणे, विक्रान्तकौरवे, सुभद्रानाटिकायाञ्च सरसगीतयः समाहिताः सन्ति । रामचन्द्रस्य सत्यहरिश्चन्द्रे, नलविलापे, मल्लिकामकरन्दे, प्रबुद्धरौहिणेये चोपलब्धासु गीतिषु भावप्रवणतया सह मार्मिकतापि प्राप्यते । जयसिंहसूरेः हम्मीरमर्दनेऽपि गीतयः सन्ति ।

नाटकसाहित्यातिरिक्ते महाकाव्येषु लक्षणग्रन्थेषु चानेकसरससंस्कृतगीतय उप-लभ्यन्ते । काव्यालङ्कार-काव्यप्रकाश-ध्वन्यालोक-वक्रोक्तिजीवित-काव्यानुशासन-दश-रूपक-प्रभृतिग्रन्थेषूद्धृतगीतयः काव्यमूल्यदृष्ट्या यावन्महत्त्वपूर्णाः सन्ति, गीति तत्त्वदृष्ट्या ततोऽधिकमहत्त्वपूर्णा विद्यन्ते । अतएव सत्यपि स्वतन्त्ररूपेण गीतिकाव्य-विकासे काव्य-नाटक-कथाख्यायिकादिषु गीतयो निबद्धाः सन्ति ।

स्तोत्रगीतिकाव्यम्

रसेतरगीतिषु स्तोत्रसाहित्यस्य स्थानमायाति । स्तुतिकर्त्ता भावविह्वलो भूत्वो-पास्यस्य गुणविवेचने सङ्गीतात्मिकां तल्लीनतां प्रदर्शयति । अतः स्तोत्रेषु भावनानां धारणानां विचाराणाञ्च वर्णनं प्राप्यते । महाभारते, वाल्मीकिरामायणे, पुराणेषु च रसगीतयो रसेतरगीतयश्च प्रचुरपरिमाणे उपलब्धाः सन्ति ।

स्वतन्त्ररूपेण प्रत्येकसम्प्रदायस्य मतेन स्वहृदयोद्गारं कोमलललितपदावल्यां व्यक्तं कुर्वता स्वहृदयस्य दीनतायाः, कोमलतायाः शक्तिहीनतायास्तथाराध्यस्यो-दारतायास्तच्छीक्तसामर्थ्यस्य च परिचयो दत्तः । एतेषु स्तोत्रेषु निम्नलिखितानि गीतितथ्यानि विहितानि सन्ति—

१. आत्माभिव्यक्तिः ।

२. भावसान्द्रता ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

३. भावान्वितिः ।
४. सहजान्तःप्रेरणा ।
५. सरला स्वाभाविकी चाभिव्यक्तिः ।
६. समर्पणप्रवृत्तिः ।
७. गेयता ।

आत्मानुभूतिर्यदा स्वाभाविकगतिमयस्वरलहर्यां स्वहर्षविषादयोरभिव्यञ्जनायै प्रस्तुता भवति तथाराध्यात् साहाय्यमपेक्षते, तदा स्तुतिगीतीनां प्रादुर्भावो जायते। विषय-विषयिणोरुभयो. प्रेरणाया अस्तित्वमेतच्छ्रेण्या : रचनायां तिष्ठति । अतएव स्तोत्रकाव्ये भावानां सघनतमव्यापारो गेयतया लयात्मकतया च सहाभिव्यक्तो भवति ।

कविः स्तोता वा स्वरागात्मिकयानुभूत्या कल्पनया चाराध्यमपि भावात्मकं विदधाति । यथा सांसारिकवस्तूनि स्वयं साध्यानि न सन्ति, प्रत्युत साधनानि सन्ति, तथैव स्तुतिकाव्येऽपि वस्तुविषयो वानुभूतेः साधनमात्रं स्तः । यदा भावः विगलितो भूत्वाराध्यगुणान् स्पृशति, तदानुभूतिः सान्द्रा जायते । एतदेव कारणमस्ति यदनुभूत्यनुसारमेकमेवाराध्यं प्रति विभिन्नस्तोतॄणां मानसिकप्रतिक्रियाः विभिन्नप्रकाराः भवन्ति । आराध्यस्यानन्तगुणाः स्तोतॄन् भावविह्वलान् कुर्वन्ति ।

स्तुतेः स्तोत्रस्य वा विषयस्यात्यल्पत्वात् अत्राभिव्यक्तानुभूतिरेकेनैव मूलभावेनानुप्राणिता भवति तथा तत्केन्द्रविन्दुरपि एष एव मूलभावो भवति, यस्य विश्लेषणं विस्तारं वा स्तोता स्तुतिकलेवरे करोति । आरम्भेऽसौ कमपि स्वविशेषभावमुपस्थापयति, तदनन्तरं रागविस्तारेण, स्वरेण, तानेन, आलापेन तथान्यसाधनैः तं व्यापकोत्कर्षपर्यन्तं प्रापयति । आराध्यस्यानेकरूपेषु सत्स्वपि तन्मूलकेन्द्रं कोऽप्येको भावो भवति । यदा सुखदुःखानुभूतिः तीव्रतमा जायते तदा स्तोता स्वभावाभिव्यञ्जनाय वाध्यो भवति, तदा स्तुतिकाव्यं निःसरति । एवं प्रकारेण एकयैव भावानुभूत्या ओतप्रोतत्वात् स्वतः पूर्णता गेयता च समाविष्टे भवतः । अतएव भावान्वितिः काव्ये स्वकीयं प्रमुखवैशिष्ट्यं रक्षति ।

काव्यस्य प्रत्येकविधायाः जन्मान्तःप्रेरणायाः समुपजायते । तत्र वस्तुनो विषयस्य वाधारस्तु नाममात्रस्य कृते तिष्ठति । कवितामात्रेऽन्तःप्रेरणा निहिता भवति, परं स्तुतिकाव्येऽस्या अस्तित्वं सर्वाधिकं विद्यमानं भवति । मानवमनसः सांसारिकैश्वर्ये, भौतिकसुखेषु, ऐन्द्रियिकभोगेषु चाकर्षणं तेभ्यो विकर्षणं वा स्तोतॄणां लक्ष्यमस्ति । यः स्तोताराध्यात् किमपि प्राप्तुमिच्छति, स स्वसहजान्तःप्रेरणया प्रेरितो भूत्वाराध्यगुणेषु लीनो भवति । इयमेव लीनता तल्लीनता वा सहजान्तःप्रेरणायाः प्रतिफलनमस्ति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चित्तस्य चञ्चलता तथानुभूतेः प्रगाढ़ता यद्यपि क्षणपर्यवसायिन्यौ भवेताम्, परं सहजान्तःप्रेरणायाः उच्छ्वसितरूपं गीतिकाव्येऽवश्यं प्राप्यते ।

समर्पणप्रवृत्तिः स्तुतिकाव्येषु पूर्णरूपेण प्राप्यते । उपास्यस्य लीला महत्तापि च उपास्यसदृशे सुखदे जाते । लोककल्याणस्य वैयक्तिकसुखसमृद्धेश्च माध्यमेनादृश्य-शक्तिं प्रति समर्पणभावनोत्पादिता । परमात्मनः सत्तायाः यानि विविधरूपाणि प्रादुर्भूतानि, तेषामसीमसौन्दर्य-वैभवशक्त्योः कल्पना च स्तोतॄन् आत्मसमर्पण-कृते प्रभावयतः । उपास्यस्याङ्गप्रत्यङ्गानां सौन्दर्यस्य, व्यापारस्य, दृष्टयादेश्च मनोरमं वर्णनं विहितमस्ति । स्तोता स्वसमस्तचिन्ताभारं तददृश्यशक्तौ समर्प्य निश्चिन्तो जायते । स शान्तेः, सन्तोषस्य, आशायाश्चावलम्बेन जीवनस्यास्पृहणीय-क्षणान्नपि स्पृहणीयान् विदधाति ।

गेयता कस्यापि गीतिकाव्यस्य धर्मोऽस्ति । स्तोता भावविह्वलो भूत्वा यमुच्छ्वासं व्यनक्ति, तस्मिन् सङ्गीतात्मकतावश्यं तिष्ठति । नादसौन्दर्यं भावसङ्गीतञ्च स्तुति-प्रवाहे स्वयमेव समाहिते भवतः । यदा हृदयस्य भावावस्था सहजसंवेदनशील-तायाः रूपमवधार्योपास्योन्मुखमनुधावति, तदा स्तुतिकाव्ये गीतमाधुर्यं सहजमेवा-याति । अन्तर्वेगस्य तीव्रतां छन्दसः वातावरणं गेयतां प्रदत्ते । एतत् सार्वजनीनं तथ्यमस्ति यत् स्तुतिकाव्यं छन्दोहीनं न भवति । छन्दसः सरलता स्वयमेव गेयरूपे परिवर्तिता भवति । डा० एस्० एन्० गुप्त महोदयस्याभिमतमस्ति यत् संस्कृत-कवितायाः गेयता परिचितकर्णयोरेतादृशं सम्मोहनं किरति, यत् समुचितपदधत्या कृतः पाठ एव प्रभावानन्दयोः सर्जनं करोति ।[1]

स्तोत्रकाव्यस्य स्वतन्त्ररूपेण प्रारम्भः पुष्पदन्तस्य शिवमहिम्नस्तोत्राद् भवति । एतत् 'शिखरिणी'छन्दसि रचितमस्ति । कविमयूरभट्टः 'स्रग्धरावृत्तेषु सूर्यशतकं प्रणीतवान् । एतस्मिन् सूर्यस्य प्रकाशातपादीनां सुन्दरं चित्रणं कृतमस्ति । अनुप्रास-दृष्ट्या सूर्यरथस्य चित्रणं सुन्दरमभूत् । महाकविबाणभट्टनाम्नैकं चण्डीशतकमप्युप-लब्धमस्ति, यस्मिन् भगवत्याः दुर्गायाः स्तुतिः स्रग्धरावृत्तेषु विहिता विद्यते । शङ्क-राचार्यरचितानि प्रायः विंशतिस्तोत्राणि प्राप्यन्ते । आनन्दलहरी, मोहमुद्गरः, आत्म बोधः, अपराधभञ्जनम्, यतिपञ्चकम्, प्रसिद्धान्येव सन्ति । एषु सर्वेषु स्तोत्रेषु पद-माधुरी, रसात्मकता, अर्थगाम्भीर्यम्, सहजतागुणश्च विद्यन्ते । कुलशेखरस्य कुन्दमाला स्तोत्रम्, यमुनाचार्यस्यालवन्दारस्तोत्रम्, लीलाशुकस्य कृष्णकर्णामृतस्तोत्रमपि गेयानि सन्ति । एषु सर्वेषु स्तोत्रेषु गीतिकाव्यस्य लक्षणानि समन्वितानि सन्ति ।

---

१. एस्० एन्० दासगुप्त—संस्कृत साहित्य का इतिहास, भूमिका ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शाक्तस्तोत्र-वैष्णवस्तोत्रे अपि नाल्पमहत्त्वपूर्णे स्तः। एतेषु मृदुपदशय्यया सह मार्मिकता प्राप्यते।

जैनस्तोत्रेषु आचार्यसमन्तभद्रस्य बृहत्स्वयंभू-स्तोत्रमाप्तमीमांसा, जिनशतकम्, स्तुतिविद्या च प्रसिद्धानि सन्ति। पूज्यपाददेवनन्दिनः सिद्धप्रियस्तोत्रम्, मानतुङ्गस्य भक्तामरस्तोत्रम्, कुमुदचन्द्रस्य कल्याणमन्दिरम्, धनञ्जयकवेः विषापहारस्तोत्रम्, वादिराजस्यैकीभावस्तोत्रम्, वप्पभट्टेः सरस्वतीस्तोत्रम्, भूपालकवेः जिनचतुर्विंशतिकास्तोत्रम्, हेमचन्द्रस्य वीतरागस्तोत्रम् आशाधरस्य सिद्धगुणस्तोत्रम् तथा जयानन्दस्य जयस्तोत्रं गीतिकाव्यदृष्ट्या महत्त्वपूर्णानि सन्ति। एतेषु सर्वेषु स्तोत्रेषु गीतिकाव्यस्य गुणाः प्राप्यन्ते।

कलात्मकगीतिकाव्यानुचिन्तनम्

गीतिकाव्यस्य विकास-प्रसङ्गे प्रायः प्रमुखगीतिकाव्येषु प्रकाशो दत्तः। परमत्र-कला-भाव-दृष्ट्या येषां गीतिकाव्यानां विशेषमूल्यमस्ति, तेषामनुशीलनमावश्यकमस्ति। सन्दर्भेऽस्मिन् प्रथमं मेघदूतस्य गीतिकाव्यत्व-विश्लेषणं क्रियते। दूतकाव्येऽस्मिन् प्रकृतिमाधुर्याः, रमणीसौन्दर्यस्य, शृङ्गारविलासस्य तथा विभिन्नप्रकाराणां संवेदनानां हृदयावर्जकं चित्रणं कृतमस्ति। अभिशप्तस्य, निर्वासितस्य तथा वियोगिनो यक्षस्य वेदनायाः यथार्थवर्णनं काव्येऽस्मिन् विद्यमानमस्ति।

मेघदूत-विश्लेषणम्—आलोचनात्मक-विषय-परिचयः

एतत् संस्कृतगीतिकाव्यस्य परमोज्ज्वलं रत्नमस्ति। कविनैकस्य विरहिणो यक्षस्य मनोव्यथायाः मार्मिकं चित्रणं कृतम्। तस्य द्वौ भागौ स्तः (१) पूर्वमेघः (२) उत्तरमेघश्च। अलकापुर्या अधीश्वरेण कुबेरेण स्वसेवको यक्षः कर्तव्यपालने त्रुटिकारणादेकवर्षस्य कृते निर्वासितः। वेदनाविह्वलो यक्षः सर्वर्तून् क्रमशः व्यतीतवान्। यदा वर्षागमनं जातं तथा रामगिरिशृङ्गे आगत्यागत्य मेघा आश्लिष्टा अभवन्, तदा यक्षस्य धैर्यच्युतिः प्रारब्धा। स व्याकुलोऽभवत्। स स्वप्रियतमानिकटे सन्देशं प्रेषयितुं विकलोऽभवत्। कामार्त्ततया चेतनाचेतनयोः स्वभावतो मूढो यक्षः धूमज्योतिःसलिलमरुतां सन्निपातरूपेण मेघेनालकास्थितायाः प्रियायाः समीपे प्रेमसन्देशं प्रेषयितुं नवीनकुटजपुष्पैरर्घ्यं प्रदाय तस्य स्वागतं व्याजहार तथा सन्देशं नेतुं प्रार्थितवान्। तदनन्तरं रामगिरितोऽलकापुरीपर्यन्तं गन्तुं तन्मार्गं प्रदर्श्य स्वप्रियाभवनस्यापि सङ्केतमुक्तवान्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मेघस्य यात्रारम्भो रामगिरेः जायते। मार्गे विरहविधुराः पथिकवनिताः दृष्टिबाधकानुन्मुक्तालकान् निवार्य परमोत्कण्ठया नेत्रे प्रसार्य पश्यन्ति। मेघो मार्गे पर्वतेषु विश्रान्तो निर्झराणां जलं पिबन्नग्रे वर्धते। यक्ष-पथप्रदर्शनानुसारमुत्तरस्यां गत्वा वेतोवनान्युत्तीर्याकाशे व्रजति। सहसा दूरात् रविरश्मयः मेघोपरि पतन्ति। फलतः तत्कान्तिः ससरङ्गेन्द्रधनुःसदृशी जायते।

ततो मेघो 'माल' नामकोच्चभूक्षेत्रान्निःसरति। क्षेत्रेऽस्मिन् मुग्धाः, अनुरागवत्यः, उन्मत्तयौवनाः गोपबालाः लुब्धनयनाभ्यां तं पश्यन्ति। चतुरो मेघः मालक्षेत्रस्य सद्यःकृष्टां भुवं जलवर्षणव्याजेन जिघ्रन् पश्चिमां दिशं गत्वा पुनरुत्तरां दिशं गच्छति। ततो गत्वा दक्षिणाम्रकूटपर्वतस्य दावानलं स्वासारैः शान्तं कुर्वन् तच्छृङ्गे क्षणं विश्राम्यति। पक्वाम्रैरावृतपार्श्वदेशस्य पीतत्वात् तथाच्छन्नमेघेनोत्तुङ्गप्रदेशस्य कृष्णत्वात् आम्रकूटपर्वतः पृथ्व्याः (नायिकायाः) स्तनवत् प्रतीयते। आम्रकूटस्य वनबालापरिभुक्तलताकुञ्जे कञ्चित्कालमुषित्वाग्रे गच्छन् मेघः विन्ध्याद्रेः आसन्नवर्त्तिनः 'चरणाद्रेः' प्रस्तरोपलमय्यां नतोन्नतभूमौ वहन्तीं नायकचरणयोः पतन्तीं नायिकासदृशीं रेवानदीं पश्यति। वायुनोड्डयनभीत्या मेघः रेवायाः स्वच्छसलिलं स्वच्छन्दं पीत्वा गुरुः भवन्नग्रे वर्धते। मार्गे मृगयूथः हरितश्यामकेसरयुक्तानां कदम्बपुष्पाणां स्तवकं तथा सुगन्धितधरायाः मादकसौरभं प्राप्यात्यन्तंप्रसन्नो भवति।

किंचिद्दूरं गतो वेत्रवत्याः तीरवर्तिनो मालवादेशस्य पूर्वांशे स्थितं 'दशार्णं' प्राप्नोति। वेत्रवत्याः जलं पिबन् स तस्या एव विदिशायाः समीपे 'नीचैः' पर्वतोपरि विश्राम्यति। उत्तरदिशः एकान्तपथिको मेघः किञ्चित् वक्रो भूत्वा निर्विन्ध्यायाः पूर्वमनतिदूरे स्थितां, वत्सराजोदयनस्य विशालानगरीमुज्जयिनीं प्राप्नोति। अत्र स स्वविद्युतो दीप्त्या मदमत्ताः युवतीश्चकिताः विधाय तासां चञ्चलकटाक्षाणामानन्दमनुभवन् शिप्रानदीसम्मुखं व्रजति। शिप्रायाः शीतल-मन्द-सुगन्धितवायोः सेवनं कृत्वा श्रीसम्पन्नायाः उज्जयिन्या अलकेषु व्यापृतामगरुधूपसुगन्धिं गृह्णन् चण्डीश्वरमहादेवस्य महाकालनामकं पवित्रस्थानं प्राप्नोति। रात्रौ महाकालेश्वरमन्दिरे सम्पद्यमानस्य नृत्यस्यानन्दमनुभवन् 'गम्भीरा' तटे समुपस्थितो भवति। ततश्चलित्वा द्रुतगामी मेघदूतः दक्षिणपश्चिमकोणे स्थितं देवगिरिपर्वतं प्राप्नोति।

तदनन्तरं मेघः गोमेधयज्ञकर्तुः राज्ञो रन्तिदेवस्य कीर्तिरूपां विन्ध्याचलस्य वायुकोणात् निःसृतां चर्मण्वतीं नदीं प्राप्नोति। तत्र तां नदीमुत्तीर्य स राज्ञो रन्तिदेवस्य राजधानिकां दशपुरं प्राप्तो भवति। पश्चात् सरस्वत्याः शुद्धं सलिलं पिबन्, कुरुक्षेत्रात्, कनखलनिकटे गङ्गासमीपं गच्छति तथा निर्मलस्फटिकसदृशं स्वच्छं गङ्गाजलं पिबति। हिमालयपर्वते देवदारुवनेषु चमर्याः यूथेनाष्टापदमृग-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समूहेन च संघर्षं कुर्वन् स मेघदूतः शिलाङ्कितस्य महादेवचरणचिह्नस्य परिक्रमणं कुर्वन् हिमालयस्य दर्शनीयवस्तूनि पश्यन् ततोऽग्रे वर्धते ।

ततो मेघदूतो मानससरोवरस्य यात्रिभिः हंसैः सह क्रौञ्चरन्ध्रमुत्तरन्नुत्तराभिमुखो भवति । ततो निःसृत्य मेघः सुरसुन्दरीणां मुकुरसदृशसमुज्ज्वलस्य नभोव्यापिनः कुमुदश्वेत-शृङ्गैरुत्तुङ्गस्य शिवाट्टहाससदृशस्य स्थितस्य कैलासपर्वतस्यातिथिर्जायते । तदनन्तरं कामचारी मेघदूतः कैलासाङ्के समुपविष्टां स्रस्तश्वेताञ्चलनायिकासदृशीं गगनचुम्बिभवनवतीमलकापुरीं प्राप्नोति । एवं प्रकारेण सम्पूर्णमेघदूते दक्षिणोत्तरभारतस्य भूगोलस्य सुन्दरं चित्रणमस्ति ।

उत्तरमेघे कथितमस्ति यत् स मेघदूतोऽलकाभवनेषु संगीतं शृण्वन् प्रणयकेल्याः दृश्यानि निःशङ्कमवलोकयति । मणिदीपोज्ज्वले रङ्गभवने कामुकनायकः हृदयहारिण्याः नायिकायाः कटिसूत्रवन्धनं मोचयति । तदा सा तान् मणिदीपान् कुङ्कुमचूर्णपातैर्निर्वातुमिच्छति । प्रसन्नवदनो मेघोऽलकापुर्याः रमणीयदृश्यानि पश्यन्निन्द्रनीलमणिनिर्मितशिखरप्रयुक्तक्रीड़ापर्वतोपरि व्रजति । तत्रासौ यक्षगृहाभ्यन्तरे वियोगिनी यक्षिणी दृष्टिगोचरा भवति । यद्यपि मध्याया नायिकायाः युवत्याः यक्षिण्याः काञ्चनकायः क्षीणः कृशश्चासीत्, तथापि तस्याः अधरोष्ठः पक्वविम्वफलसदृशः सुलोहितः, सूक्ष्माग्रा परस्परं सम्मिलिता च दन्तपङ्क्तिः आसीत् । एवं सा नितम्बभारेण मन्थरगतिशालिन्यासीत् । सत्यामपि निराभरणायां तस्याः शरीरं परमसुन्दरमाकर्षकञ्चासीत् । मेघदूतः गम्भीरस्वरेण तां कथयितुमारभते—

"हे अविधवे ! अहं तव स्वामिनो मेघस्य प्रियमित्रमस्मि । दूतरूपेण संवादं गृहीत्वाहं तव समीपे उपस्थितोऽस्मि । स्वप्रियतमानां वेणीमोचननिमित्तमुत्कण्ठितान् कामार्तान् प्रवासिनोऽहमेव गम्भीर-मधुरशब्दैः शीघ्रातिशीघ्रं गृहाभिमुखं प्रेरयामि ।

मेघदूतः सन्देशश्रावगमारभते । संदेशेऽस्मिन् यक्षिण्याः रूपसौन्दर्येण सह यक्षदशाया अपि वर्णनमस्ति । उत्तरमेघः विप्रलम्भशृङ्गारस्य सजीवरूपमस्ति । कविः विराट्प्राकृतिकपदार्थान् मानवरूपान् कल्पयित्वा मानवीयभावानां पूर्णसमावेशं कृतवान् । एतत् रमणीयसुकुमारकल्पनायाः भव्यभाण्डारमस्ति । भाषाशैली परममनोहारिण्यस्ति । शब्दानां चयने कविः विशेषकौशलं प्रदर्शितवान् । माधुर्यव्यञ्जिका स्निग्धा मधुरा च पदावली द्रष्टव्यास्ति—

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं वलाकाः । पूर्वमेघः ९

काव्यमूल्यम्

मेघदूते महाकविः कालिदासः वाह्यप्रकृतेरन्तःप्रकृतेश्च परममार्मिकं चित्रणं चकार। वाह्यप्रकृतिचित्रणे कवेरन्तरात्मा प्रत्येकदृश्येन सहारमत । दृश्यानामीदृशं व्यवस्थितं संश्लिष्टञ्च चित्रणं कृतमस्ति, यत् अस्माकं नेत्रयोः समक्षं तेषां चित्रमुपस्थितं जायते । समस्तपूर्वमेघः वाह्यप्रकृतेः मनोहररूपयोजनात्मकं चित्रणमस्ति । वर्षर्तोः यादृशं स्निग्धं हृदयग्राहि च वर्णनं मेघदूते विहितमस्ति, तादृशमन्यत्र दुर्लभमस्ति । प्रथमवृष्टिकारणात् नवीनकृष्टक्षेत्रेभ्यः सुगन्ध आगच्छन्नस्ति, क्वचित् विकसितकेतकीपरागेनोपवनपरिसरः धवलो भवन्नस्ति । क्वचित् मत्तमयूराः नृत्यन्तः सन्ति । क्वचित् गजेन्द्राः करैः ध्वनन्तः मन्दसमीरं पिवन्ति । निश्चयतो मेघदूतस्य प्रकृतिवर्णने एतादृशानि दृश्यानि सन्ति, येषु चित्राण्यङ्कितानि संपत्स्यन्ते ।

कालिदासाय प्रकृतिः केवलं सचेतनैव नास्ति, प्रत्युत मानवीयसंवेदनशीलतया, क्रियाव्यापारैः शीलसौन्दर्येण च सम्पन्ना विद्यते । कविकृते ऋतवः सजीवाः प्राणिभ्यः प्रेम्णा, मित्रतया, सहानुभूत्या च समन्विताः सन्ति । मेघदूते प्रकृतेः प्रत्येकतृणे सर्वत्रान्तरिकस्य वाह्यस्य च सौन्दर्यस्य निरूपणं विद्यते ।

उत्तरमेघे विरहिण्याः शारीरिक-मानसिकक्षीणतायाः, व्यथायाश्च चित्रं प्रस्तुतमस्ति । अन्ते चातिसंक्षेपेण यक्षस्य मर्मस्पर्शिणः सन्देशस्य तीव्रा गम्भीरा चाभिव्यक्तिः कृता विद्यते । अत्रैव काव्यस्य चरमोत्कर्षो विद्यते । एवं प्रतीयते यत् एष सन्देश एव कवेः साध्योऽस्ति तथा क्रमशः भावसघनतोन्मुखमग्रसरं भवत् प्रारम्भिकं समस्तमायोजनं तस्य भावपूर्णपृष्ठभूमिनिर्माण-निमित्तं साधनमस्ति ।

मानवीयसौन्दर्यनिरूपणमपि मेघदूते जातमस्ति । कविः 'रमणीयताम्' सौन्दर्यस्य मूलभूतं धर्मं स्वीकृतवान् । कालिदासः नारीसौन्दर्येऽनुपातस्य सन्तुलनस्य च ध्यानं रक्षितवान् । तस्य सर्वेषां नारीपात्राणां शारीरिकं संघटनं सन्तुलितं सामञ्जस्यपूर्णञ्च विद्यते। सौन्दर्यनिरूपणे कविरद्भुतां सफलतां प्राप्तवान् । तस्य दृष्टिः प्रकृतौ, मानवे, दिव्यलोके च सर्वत्रैकामेव सौन्दर्यधारां व्याप्तां पश्यति । निरीक्षणसूक्ष्मतायाः, दृष्टेः व्यापकतायाः, प्रतिभाया अद्भुतग्राहकताया एवमुर्वरसर्जनशीलतायाः कारणात् मेघदूते कलाया अद्वितीयं सौन्दर्यं प्राप्यते ।

रसानुभूतिदृष्ट्यापि मेघदूते द्राक्षापाको विद्यमानोऽस्ति । यतः रसानुभूतेः मृदुलमञ्जुला मधुर-मादकभावाकुला शाब्दिकी लिपिमयी अभिव्यञ्जनैव कलामयं काव्यं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विद्यते। रसः एको योजनाजनित आनन्दोऽस्ति। सुकुमारभावानां चमत्कारपूर्ण-शब्दचित्राणां साम्यरूपता काव्यरसस्य साकारा प्रतिमास्ति। मेघदूते विप्रलम्भ-श्रृङ्गारस्य सजीवरूपं प्राप्यते। प्रवासिनो यक्षस्य वियोगजन्यस्य क्षीणपीतशरीर-स्यैकं करुणचित्रं द्रष्टव्यमस्ति—

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः।। पूर्वमेघः—२

विरहज्वरसंतप्तस्य विरहिणः शरीरस्य द्रावकच्छायायाः अङ्कनं निम्नाङ्कितमस्ति—

सन्तप्तानां त्वमसि शरणं तत्पयोद प्रियायाः। पूर्वमेघः—७

निःसन्देहं मेघदूते कियन्ति स्थलानीदृशानि सन्ति, येषां श्रवणेन स्मरणमात्रेण चास्माकं हृदयं विगलितं जायते। मानसे चञ्चलता जायते। व्यथितानुभूतेः, भ्रमन्त्याः भावनायाः, तथोच्छलन्त्याः प्राणधारायाः सौन्दर्योन्मुखं यथासाध्यं संकेतो विहितो विद्यते। रसभावदृष्ट्या मेघदूतस्य कतिपयानि पद्यान्युत्तमानि सन्ति। अत्रोदाहरणार्थं प्रस्तूयते—

अङ्गेनाङ्गं प्रतनुतनुना गाढतप्तेन तप्तं,
सास्रेणाश्रु द्रुतमविरतोत्कण्ठयोत्कण्ठितेन।
उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती,
संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः। उत्तरमेघः, ३९

दूरंगतः त्वदीयोऽयं सहचरः स्वशरीरं तव शरीरेण मेलयित्वैकं कर्त्तुमिच्छति, किन्तु वैरी विधाता तत्परावर्त्तनमार्गमवरुद्धवान्। अतएव सः तैः तैः सङ्कल्पैरेव तवान्तः प्रविशति। सः क्षीणोऽस्ति, त्वमपि क्षीणोऽसि। स विरहज्वालया तप्तोऽस्ति। त्वमपि विरहेण ज्वलन्त्यसि। सोऽश्रुपूर्णोऽस्ति, त्वमप्यश्रुभिः गलन्त्यसि। स वेदनया युक्तोऽस्ति। त्वमपि निरन्तरं वेदनां सहमानासि। स लम्बोच्छ्वासं गृह्णन्नस्ति। त्वमपि तीव्रोच्छ्वासं त्यजन्त्यसि।

पद्येऽस्मिन् पदमाधुर्या सह सानुनासिकाः स्वरविशेषाः कर्णप्रियाः प्रतीयन्ते। पदावृत्तिसौन्दर्यमपि मनो मोहयति। भावगूढता तथा नादमाधुर्य्यमस्माकं मनो मन्त्रमुग्धं कुरुतः। भावतीव्रता स्वविलक्षणसौन्दर्यं प्रकटयति। यक्षस्य दाम्पत्यसुखाय विधातेर्ष्यति। यक्षः स्वच्छन्दः कमप्यबाधयन् सुखेन सुधापानं कुर्वन्नासीत्। परं दैवायैतदसह्यं जातम्। तथा शापग्रस्तो भूत्वा स स्वप्रियतमायाः पृथक् बभूव। यक्षहृदयं सिक्थतुल्यमस्ति। स विरहाग्निना प्रतिपलं गलन्नस्ति। परवशता, नैराश्यम्, तथा विवशता प्रकटाः भवन्ति। दूरवर्ती प्रियतमः स्वप्रेमिकया सह

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मिलेत् तु कथम् ? शारीरिकमिलनन्तु कठिनमस्ति, अतः मानसिकमिलनं सम्भवं भवति। सम्मिलने एकरूपता, तद्रूपता चापेक्ष्येते। यथा वीणायाः झंकृतः एकः तारः समानधर्मत्वात् द्वितीयं तारं, तथैव झंकृतं करोति। तथैव प्रिय-प्रेयस्योः मिलनवेलायामेका रागिणी क्वणति। पृथक्तापगच्छति तथोभयोरैक्यं जायते। तौ शरीरेण द्वौ भवतः, परं तयोः विरहानल एको भवति। यक्षः यक्षिणी च विरहज्वालया सदृशौ क्षीणौ स्तः। द्वयोः नेत्रयोरश्रुप्रवाहो निःसृतोऽस्ति। उभावपि दीर्घोच्छ्वासं गृह्णीतः। आश्रययोः द्वयोरपि एकः स्थायिभावः समानमनुभवमुत्पादयति। देह-द्वैतं भावयोगेन प्रेम्णोऽद्वैते रूपान्तरितमभवत्। यथा—

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्मिन् क्वचिदपि न ते चण्डि सादृश्यमस्ति ॥ उत्तरमेघः ४१

हे प्रिये ! प्रियङ्गुलतायां तव शरीरं चकितमृगीणां नेत्रयोः कटाक्षं चन्द्रमसि मुखकान्तिं मयूरपङ्खेषु केशं तथा नद्याः उद्दामलहरीषु चञ्चलभ्रुवौ पश्यामि। परं हे मानवति ! क्वापि त्वादृशीं छविमेकत्र न प्राप्नोमि।

पद्येऽस्मिन् "क्वचिदपि न ते चण्डि सादृश्यमस्ति" पदे यक्षहृदयस्य हाहा-कारस्य कल्पनायां विह्वलवेदनायाः मनोरमं चित्रणमस्ति। भवभूतिः यत्र वेदना-विवृतौ मुखरतयातिशयतया वा कार्यं साधितवान्, तत्र तदावेगः विकीर्णो जातः। यतः करुणायाः तरलता स्वप्रगाढत्वे शोभामाप्नोति। काव्ये वेदनायाः वर्षाकालीना नदी न प्रवहेत्, अपितु मन्दमन्दवेगेन रसविगलिता भवेत्, तदा सुन्दरमस्ति। जीवने कश्चनैव क्षणएतादृशआयाति, यदा वेदना बन्धं त्रोटयित्वा प्रवहति। अन्य-समयेषु तु वेदनया भावाः विगलिता एव भवन्ति। हृदयमार्द्रं भवति। पद्ये प्रयुक्ते 'हन्त' शब्दे, यक्षस्य परवशता, विह्वलता, वैक्लव्यञ्च दृश्यते। सम्पूर्णप्रकृतेः सम-वेतं सौन्दर्यमपि तस्य प्रेयस्याः समकक्षं न स्थितम्। प्रेमी भावावेशे स्वप्रियवस्तु साधारणे जातेऽसाधारणं कृत्वा पश्यति। कल्पनया स तस्मा अतिरञ्जितं रूपं यच्छति। सौन्दर्यंतर्केण न, अपितु कल्पनयानुभूयते। तत् मानसरसेन रज्यते।

यथार्थजीवनस्य न्यूनताः व्यक्तिः कल्पनारङ्गैः पूरयति। कालिदासः मेघदूते विरहव्यञ्जनां कुशलतापूर्वकं कृतवान्। वियोगश्रृङ्गारेण सह संयोगचित्राणामङ्कन-मपि सफलतापूर्वकं कृतमस्ति। एषु चित्रेषु यौवनमदिरायाः सहजावेगः परिलक्ष्यते। यथा—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नीवीवन्धोच्छ्वसितशिथिलं यत्र विम्बाधराणां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिस्तुङ्गानभिमुखमपि प्राप्तरत्नप्रदीपान्,
ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः । उत्तरमेघः—५

तत्रालकायां कामी प्रियतमः स्वचञ्चलकरैः रक्ताधराणां स्त्रीणां शिथिलेषु नीवीवन्धनेषु स्रस्तानि दुकूलानि यदा कर्षति, तदा ह्रीमूढास्ताः किरणान् विकिरतो रत्नदीपान् सम्मुखस्थानपि कुङ्कुममुष्टिकया निर्वापयितुं सफला न भवन्ति ।

पद्येऽस्मिन् नीवीवन्धनस्य साधारणवर्णने रमणीयता नागमिष्यत्, परमत्र कवेरनुभूतिः व्यक्ता । अतो रमण्याः शृङ्गारचेष्टा मूर्त्तरूपेण चित्रिताऽभवत् । शिथिला केवलं नीवी विद्यते, न छविः, विम्बाधरायाः प्रेयस्याः नीवीबन्धनं स्रस्तं जायते । प्रियतमकरश्चञ्चलो भवति । दुकूलं कृष्यते, रत्नप्रदीपः दीव्यति । प्रेयस्यनावरणशङ्कया लज्जावशा पीड्यते । सा कुङ्कुमचूर्णैः रत्नदीपानां निर्वाणे प्रयासं विदधाति । परं सर्वं व्यर्थं भवति । एवं प्रकारेण शृङ्गाररसस्य सरसं चित्रणमायातमस्ति ।

मेघदूतेऽलङ्काराणां यथास्थानमुपयुक्तप्रयोगः नैसर्गिकीं चारुतां सञ्चारयति । उपमानामुत्प्रेक्षाणाञ्च परममनोहरः प्रयोगो भूतोऽस्ति । कालिदासीयोपमानां सम्बन्धे तु किमपि कथनीयमेव नास्ति । प्राकृतिकदृश्यानां मानवीयसौन्दर्येण सुरुचिपूर्णं सामञ्जस्यं स्थापितं विद्यते । अत्र कतिपयान्युदाहरणानि प्रस्तूयन्ते—

पुनरुक्तवदाभासस्य चित्रं दृश्यताम्—

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे,
सद्यः कृत्तद्विरददशनच्छेदगौरस्य तस्य ॥ पूर्वमेघ : ५३

रददशनस्य पर्यायतया आपातत एकस्यैव दन्तार्थस्य पुनरुक्तवदाभासतया पुनरुक्तवदाभासालङ्कारस्य चमत्कारो विद्यते ।

लाटानुप्रासः—

संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्वावस्थास्वहरति कथं मन्दमन्दातपं स्यात् । उत्तरमेघः ४५

'दीर्घयामा त्रियामा' वाक्यांशे 'याम'पदे सम्बन्धतात्पर्यभेदेन लाटानुप्रासोऽस्ति ।

यमकः—

पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ॥ उत्तरमेघः २२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'स्मरसि रसिके' वाक्यांशे 'रसि-रसि' द्वयोः भिन्नार्थकसमानपदयोः प्रयोगः 'यमकं' सुस्पष्टं समुद्भासितं करोति ।

शब्दालङ्कारैः मेघदूतच्छन्दसां शाब्दिकी शोभा सरसा भव्या च विहिता ।

आर्थ्युपमा—

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे । पू० मे० १८

'स्निग्धवेणी सवर्णे' वाक्यांशेऽर्थोपमार्थचमत्कारमुत्पाद्य भावाननुभवगम्यान् चकार ।

समासोक्तिः—

वेणीभूतप्रतनुसलिला सावतीतस्य सिन्धुः,
पाण्डुच्छायातटरुहतरुभ्रंशिभिर्जीर्णपर्णैः ।
सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती,
कार्श्यं मेने त्यजति विधिना स त्वयैवोपपाद्यः । पूर्वमेघः २९

रूपकम्—

यस्यां यक्षाः सितमविमयान्येत्य हर्म्यस्थलानि,
ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः । उत्तरमेघः, ३

'ज्योतिश्छायाकुसुम' वाक्यांशे रूपकयोजना वर्तते ।

तुल्ययोगितायाः पर्यायोक्तस्य च रमणीयता—

हस्ते लीलाकमलमलके बालकुन्दानुविद्धम्,
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।
चूडापाशे नवकुरवकं चारु कर्णे शिरीषम्,
सीमान्ते च त्वदुपगमजं यत्र नीपं वधूनाम् । उत्तरमेघः २

प्रस्तुतपद्ये 'अस्ति' क्रियापदस्याध्याहारो विद्यते अनयैकया क्रियया सह लीलाकमलादेः कर्त्तृतायाः सम्बन्धोऽस्ति । अतस्तुल्ययोगितास्ति । सहैव कार्यभूतषट्पुष्पाणां वर्णनेन कारणीभूतानुक्तषड्ऋतूनां स्थितिः प्रतीयते । अतएव पर्यायोक्तालङ्कारोऽस्ति ।

स्मरणोदात्तालङ्कारयोः संयुक्तरूपम्—

तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः,
क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः ।
मद्गोहिन्याः प्रिय इति सखे चेतसः कातरेण,
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि । उ० मे० १४

क्रीडाशैलस्मरणेन स्मरणालङ्कारस्तथा लोकातिशयसम्पत्तेः वर्णनेनोदात्तालङ्कारोऽप्यस्ति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अतिशयोक्तिः—

तां जानीथाः परिमितिकथां जीवितं मे द्वितीयम्,
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्। पूर्वमेघः—२०

जायाजीवनयोः सत्यपि भेदे उभयोरभेदव्यवस्थारोपितास्ति। अतएवास्यामतिशयोक्त्यां विरहपीडितयक्षस्य भावना मार्मिकी जाता।

काव्यलिङ्गार्थान्तरन्यासस्य संयोगः—

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्,
आत्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम्।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे,
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः। उत्तरमेघः ४२

अत्र दृष्टिलोपरूपकार्यस्यासहनीयतारूपकारणेन समर्थनत्वात् 'अर्थान्तरन्यासः' तथाऽसहनीयतां प्रति क्रूरपदार्थस्य हेतुता 'काव्यलिङ्गालङ्कारः' स्तः।

एवं प्रकारेण मेघदूते रसालङ्कारगुणानां सुन्दरः समावेशः कृतो विद्यते। मेघदूतस्य शैली कालिदासस्य स्वाभाविकतायाः प्रासादिकतायाश्चोत्कृष्टमुदाहरणमस्ति। गीतिकाव्येऽस्मिन् रमणीयता, स्वरसौष्ठवं माधुर्यविलासः तथा सङ्गीतलहरी दर्शनीयाः सन्ति।

गीतिकाव्यत्वम्

मेघदूतं खण्डकाव्यं नास्ति, प्रत्युत गीतिकाव्यमस्ति। गणनाऽस्य प्रवन्धगीतिकाव्ये कृताऽस्ति। अस्मिन् विरहाश्रूणां पावनी गङ्गा प्रवाहिता विद्यते। अश्रुभिः जीवने मधुरतानीता। अश्रुषु शक्तिरेतादृश्यस्ति, यत् तेभ्यो ममतायाः, वात्सल्यस्य, निश्छलप्रेम्णश्च प्रेम्णो मन्दाकिनी-प्रवाहे पूर्णा सहायता प्राप्यते। अश्रुबाहुल्यकारणात् गीतितत्त्वानां पूर्णः समावेशोऽस्ति। यद्यपि यावत् गेयस्वरं स्मरति, तावत् पुनस्तारा आर्द्राः भवन्ति। यथा—

तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चित्,
भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती। उ० मेघ० २३

वस्तुतो लोकप्रचलितमुक्तसङ्गीतस्य काव्यात्मकरूपस्य विकास एव गीतिकाव्याधारो विद्यते, यस्मिन् हर्ष-विषादयोरश्रुरोदनस्याभिव्यक्तेरावेशो वर्त्तते। मेघदूते सङ्गीततत्त्वस्थाने गीतितत्त्वं प्राप्यते। एतत्तत्त्वद्वारेणैव रागात्मकावेशभावसौन्दर्ययोरुद्घाटनं जातम्। गीतिकाव्ये सहजसरसतायास्तल्लीनता तिष्ठति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सङ्गीतानुबन्धे समागमनेन मेघदूते मार्मिकतायाः निश्छल-स्नेह-पिच्छलतायाश्च प्रवाहः समाहितोऽस्ति। मेघदूतपद्येषु सरसार्द्रान्तरात्मनः प्रेमपीडा, भावोन्मादः, मिलनातुरता, आत्मसमर्पणम्, आत्मविस्मृतिः विद्यमानाः सन्ति। प्रियतमागमन-विश्वासेनाश्वस्ताः पथिकवनिताः वायौ तरतो मेघखण्डान् पश्यन्त्यः सन्ति। सन्दर्भेऽस्मिन् गीतिकाव्यस्य मार्मिकता स्पष्टास्ति—

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः,
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसन्त्यः। पूर्वमेघः—८

पीडायाः सहानुभूतेरेतादृशा एव क्षणाः गीतप्राणाः सन्ति। अस्मिन् संयोग-वियोगयोः मार्मिकतापूर्णं स्वाभाविकं चित्रणमस्ति। मेघदूते विरहावस्थायाः स्वाभाविकं चित्राङ्कनं जातमस्ति।

वैयक्तिकहर्षशोकयोरभिव्यञ्जनायां सत्यपि कथांशे गीतितत्त्वं प्राप्यते। सङ्गीतात्मकतायाः सौन्दर्यकल्पनायाः, प्रेमवर्णनस्यार्थमाधुर्यादेश्च गीतिकाव्यस्य प्रधानतत्त्वानां समवायः मेघदूते प्राप्यते। अत्रोक्ततथ्यपुष्टिहेतवे कतिपयान्युदाहरणानि प्रस्तूयन्ते—

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतोः,
लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु।
पश्यन्तीनां न खलु बहुशो न स्थली देवतानाम्,
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति। उत्तर मे०—३

× × ×

उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चित्,
भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती। उत्तर मे०—२३

× × ×

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः,
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्त्तनाभेः।
निर्विन्ध्यायाः पथि भवरसाभ्यन्तरः सन्निपत्य,
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु। पूर्व. मे०—२८

उल्लिखितपद्येषु विषादस्य गम्भीराभिव्यञ्जना 'मन्दाक्रान्ता'संयोगेन गेयतां प्राप्तवती विद्यते। वेदनावीणायाः मूकताराणां मधुरझङ्कारः आत्मानुभूतेरभिव्यक्तौ मिलित्वा तीव्रतमो जातः। अन्तिमपद्यस्य प्रकृतिचित्रणं भावनाः मञ्जुलाः रसात्मिकाश्च सम्पादयति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वियोगी यक्षः स्वप्ने स्वप्रियतमायाः निर्दयालिङ्गनाय शून्ये स्वकरौ विस्तारयति तथा वेदनाभिभूतो भवति । तस्यैतां विरहदशां वीक्ष्य वनदेवताः रुदन्ति । मिलन-विरहयोः, हर्षशोकयोः, आनन्द-विषादयोरेतत्समन्वयात्मकं चित्रं महत्या भावुकतया सरससङ्गीतात्मकतया, तद्गेयतया च समुपस्थापितमस्ति ।

मेघदूतस्य प्रत्येकपद्ये काव्यत्वसङ्गीतयोरेकस्तरो विद्यते । सर्वत्र सङ्गीतात्मकताधारेऽन्तर्दर्शनम्, आत्मनिष्ठता, आत्मानुभूतिः, आत्माभिव्यञ्जना भावानुकूलता च विद्यमानाः सन्ति । वियोगशृङ्गारपुष्टिकृते मन्दाक्रान्ताछन्दोग्रहणं कवेः सङ्गीतात्मकतायाः सूचकमस्ति । अतएव कविकालिदासः सङ्गीततत्त्वैः सुपरिचितोऽस्ति ।

सजीवभाषया वैयक्तिकान्तर्भावानां शक्तिमदभिव्यञ्जना सङ्गीतात्मकतायाः आग्रहेण सह सम्पन्ना विद्यते । गीतिकाव्ये सङ्गीतस्य वाह्यारोपो न भवति । तस्यान्तर्निहितः प्रभावस्तिष्ठति । अतएव मेघदूतपद्येषु संक्षेपतः मनसि पठनकालेऽपि सङ्गीतात्मकताया आवेशस्तिष्ठति । अस्यान्तर्निहितसङ्गीतस्य समन्वितानुभूतिः मेघदूतेऽस्ति । सङ्गीततत्त्वस्यान्तःस्थित्या लयात्मिकानुभूतिः, समाहितप्रभावः, तथा भावनाप्रकारस्याद्भुतोपयुक्तता समागता विद्यते । अतएव कालिदासस्य मेघदूतं गीतिकाव्यस्याधिकसमीपेऽस्ति ।

मेघदूते आत्माभिव्यञ्जनदृष्टचा कलाकारः आत्मनः वासनायाः, आशाभिलाषयोरभिव्यक्त्या सह वैयक्तिकास्तित्वं प्रच्छन्नं रक्षितुं यतते । आत्मनः प्रच्छन्नतायामात्माभिव्यञ्जनमधिकाधिकं सफलं जायते । मेघदूते गीतिकाव्यस्याधारनिष्ठता प्राप्यते । कविः वैयक्तिकभावस्य चेतनायाश्च विश्वजनीनकल्पनायै भावात्मकमादर्शरूपञ्च प्रदत्तवान् । वैदिककालादेव गीतेषु वैयक्तिकभावनाया विकासलक्षणानि प्राप्यन्ते । काव्येऽस्मिन् सगुणशृङ्गारस्योन्नयनं मानवीयसौन्दर्येण सह कृतमस्ति । मानवीयवृत्तेः प्रतीकरूपेण यक्षस्य यक्षिण्याश्च चित्रणं कृतं विद्यते । वियोगसन्दर्भेऽन्तर्वृत्तीनां प्रकाशनं तीव्रतया, गम्भीरतया, मार्मिकतया, विदग्धतया च सह जातमस्ति ।

कलाकारमनसि पतनशीलकल्पनागतप्रभावस्य सौन्दर्ययुक्तं कलापूर्णञ्च चित्रणं मेघदूते विद्यते । वियोगाशयोश्चैका मधुरा गीतिर्द्रष्टव्यास्ति—

तां चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयिहृदयं विप्रयोगे रुणद्धि । पूर्व० मे० १०

विरहदिनगणनायां संलग्ना स्वप्रियस्य प्रतीक्षां कुर्वती पुष्पवत् कोमलायाः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यक्षिण्याः प्रणयाप्लुतं हृदयमाशया बद्धमस्ति । अतएव तत् अकस्मात् त्रुटित्वा विकीर्णं न जायते ।

निःसन्देहमुपर्युक्तपद्ये चित्र-सङ्गीतयोः समन्वितरूपत्वाद् गीतिकाव्यात्मकता प्राप्यास्ति । मेघदूतस्याधारः शब्दः, अर्थः चेतना तथा रसात्मकता विद्यन्ते । शब्दा एकत्र, यत्र पाठकानर्थभावभूमौ नयन्ति, तत्रान्यत्र नादेन श्रव्यमूर्त्तिविधानं कुर्वन्ति । मेघदूतशब्दानां महत्त्वं तद्द्वारेण प्रस्तुते मानसिकचित्रे ज्ञापितवस्तुनः सामञ्जस्ये चास्ति ।

गीतिकाव्ये पदे पदे स्वकीयं नादसौन्दर्यं भवति, यत्सङ्गीतबन्धनान्मुक्तं सहजञ्च विद्यते । परं यदा शब्दोऽन्यान्यशब्दमेले समायाति, तदासौ समन्वितरूपेण सङ्गीतस्य रूपं गृह्णाति । महाकविकालिदासः शब्दानां पारस्परिकसङ्घटनेन मेलेन च चामत्कारिकं काव्यविधानं कृतवान् यस्मिन् सङ्गीततत्त्वस्यान्तःस्थित्या लयात्मिकानुभूतेः, समाहितप्रभावस्य भावना प्रसारस्य चाद्भुतोपयुक्ता समागता विद्यते ।

मेघदूतस्य सङ्गीतात्मकता भावानुवर्तिनी विद्यते । शब्दशक्तेः परिचितः कविः गीतानां छान्दसतया सहैव शब्दझंकारध्वनितरागात्मिकाभिव्यक्तिकृतेऽधिकः प्रयत्नशीलो विद्यते ।

गीतिकाव्ये कविव्यक्तित्वस्य नीरक्षीरसंयोगस्तिष्ठति । प्रत्यक्षजगति, चेतनकार्येषु च कविव्यक्तित्वस्य मूलोत्सः तदीयं मनोद्वन्द्वमस्ति । यच्चेतनाचेतनयोः निरन्तरं गतिशीलं तिष्ठति । मेघदूते कविरेतस्य द्वन्द्वस्य विश्लेपणं न कृत्वा तस्य सन्तुलितं चित्रमुपस्थापितवान् । अतएव मेघदूतस्य गीतयः अन्तर्ज्वालेन परिपक्वप्राणानां स्वरगुञ्जनं सन्ति । यतो गीतिकाव्यस्योद्भव एवान्तर्ज्वालाद् भवति । काव्येऽस्मिन् गीतेष्वाकुलप्राणानां बन्ध-व्याकुलता स्पष्टास्ति ।

स्मृतेः मन्थनं गीतिकारणमस्ति । गीतिकारः कालिदास आषाढस्य नवान् मेघान् पश्यति । कविहृदये पीडोत्पद्यते तत्स्मृतिः गीतिरूपेण विकसिता जायते । यथा—

तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतोः,
अन्तर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः,
कण्ठाश्लेषप्रणयिनि जने किम्पुनर्दूरसंस्थे । पूर्व० ३

गीतेरन्याङ्गस्य प्रकृतिचित्रणस्य सद्भावोऽपि मेघदूते विद्यते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पार्श्वाभ्युदयस्य गीतिकाव्यत्वम्

ऋग्वेदगीतिकाव्यानन्तरप्राप्तेषु गीतिकाव्येषु प्राचीनतमं काव्यं कालिदासस्य मेघदूतमस्ति। एतत्स्रोतसां विवेचनं कुर्वद्भिर्विद्वद्भिः ऋग्वेदीयः 'सरमापणि-संवादः' प्राचीनस्रोतोरूपेण स्वीकृतोऽस्ति। वाल्मीकिरामायणे सीतान्वेषणप्रसङ्गे हनुमतो दूतरूपेण गगनमपि काव्यस्य प्रेरणास्रोतःसु स्थानमलङ्करोति। जैनकविभिरेकं नवीनमुद्देश्यं गृहीत्वा मेघदूतानुकारीणि गीतिकाव्यानि रचितानि। शृङ्गारवातावरणे चलन्त्याः काव्यपरम्परायाः स्वप्रतिभया शान्तरसे प्रेरणमल्पीयो महत्त्वपूर्णं कार्यं नास्ति। त्यागे विश्वस्तैः जैनलेखकैः श्रामणसंस्कृतेरुच्चतत्त्वानां विश्लेषणं पार्श्वनाथ-नेमिनाथसदृशानां महापुरुषाणां जीवनचरितेष्वकारि। कियद्भिः कविभिः मेघदूत-श्लोकानामन्तिमपदानि गृहीत्वा समस्यापूर्तिस्वरूपाणि गीतिकाव्यानि प्रणीतानि। एवं गीतिकाव्यानां जैनकविकृतानां प्रारम्भः पार्श्वाभ्युदयादेव जायते। जैनगीतिकाव्येषु साहित्यिकसौन्दर्येण साकं दार्शनिकसिद्धान्तोऽप्युपलभ्यते। विषयानुसारं मनश्शीलयो-र्दौत्ये नियुक्तिः सर्वथा नवीनः प्रयोगोऽस्ति। काव्यभाषायां संयम-सदाचार-परमार्थ-तत्त्वानां निरूपणं सहृदयजनास्वाद्यं सञ्जातं विद्यते।

मेघदूतपदान्याश्रित्य प्रणीतेषु समस्यापूर्त्यात्मककाव्येषु पार्श्वाभ्युदयकाव्यं सर्वप्रथमं विद्यते। काव्येऽस्मिन् चत्वारः सर्गाः सन्ति। सर्गेषु श्लोकानां संख्याधो-निर्दिष्टास्ति—

प्रथमसर्गे—११८

द्वितीयसर्गे—११८

तृतीयसर्गे—५७

चतुर्थसर्गे—७१

काव्यभाषायां प्रौढिरस्ति। मेघदूतवदस्मिन्नपि मन्दाक्रान्ताच्छन्दो व्यवहृत-मस्ति। काव्यशैल्याः जटिलतया कथावस्तु सहसा प्रकाशं नायाति पाठक-समक्षम्। समस्यापूर्तिप्रणाल्यां काव्यगुम्फनेन मूलपङ्क्तीनां भावेषु यत्र-तत्र विपर्यस्तता लक्ष्यते। अस्य प्रणेता जिनसेनो द्वितीयोऽस्ति।

कवेरेतस्य जीवनवृत्तसम्बन्धे प्रामाणिकमितिवृत्तं नोपलभ्यते। काव्यान्तःप्रमाणे-नैतत्स्पष्टं जायते, यदयं वीरसेनाचार्यशिष्य आसीत्। विनयसेनोऽस्य गुरुभ्रातासीत्। तदादेश एवैतत्काव्य-प्रणयने कारणमभूत्। काव्यस्य प्रत्येकसर्गे जिनसेनोऽमोघवर्षस्य गुरुः कथितो वर्त्तते। अमोघवर्षः राष्ट्रकूटदेशस्य राजासीत्। कर्नाटकमहाराष्ट्रदेश-योरपि तदीयशासनमासीत्। अयं शक संवत् ७३६ काले राज्यासीनोऽभवत्। अस्य राजधानिका मान्यखेटे मलखेडे वाऽऽसीत्। जिनसेनोपदेशेनायं जैनधर्मे दीक्षितोऽभ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वत् । प्रश्नोत्तरमालया ज्ञायते यदमोघवर्षः स्वपुत्राय राज्यं दत्वा स्वयं वनं जगाम। पार्श्वाभ्युदयस्योल्लेखो हरिवंशपुराणेऽपि वर्त्तते। पार्श्वाभ्युदयस्य रचनाकालोऽष्टमी शती वर्त्तते। वीरसेनारब्धां जयधवलां टीकां (शक संवत् ७०५) काले फाल्गुन-शुक्ल दशम्याः पूर्वाह्णे समाप्तवान्। अतो जिनसेनरचनाकालनिर्णये पार्श्वाभ्युदयानन्तरं जयधवलाटीकायास्तदनन्तरं पुराणस्य च क्रमः निश्चीयते। डा० ज्योतिप्रसादोल्लेखानुसारं वीरसेनस्वामिनः पट्टशिष्यः सेनशंकरी आचार्य-जिनसेनस्वामी अमोघवर्षस्य राजगुरुः धर्मगुरुश्चासीत्। अयं विभिन्नभाषाविज्ञो विविधविषयाणां पटुः दिग्गजो विद्वान् आसीत्। बाल्यादेव तेन सह अमोघवर्षस्य सम्बन्धोऽभवत्। जिनसेनाचार्यस्य स्थितिकालः शकसंवत् ६८०–७६५ यावत् सम्भाव्यते। स्वर्गीय-पण्डितनाथूरामप्रेमिणा स्वविस्तृतनिबन्धे जिनसेनगुरु-परम्परायां समयादौ च विचारितम्। प्रस्तुतकाव्यस्य टीकायां पार्श्वाभ्युदयस्य महती प्रशंसा विद्यते।

कथावस्तु

पोदनपुरस्यारविन्दनरेशेन बहिष्कृतः कमठः सिन्धुनदीतटे तपश्चरति। अग्रज-निष्कासनेन दुःख्यनुजो मरुभूतिः कमठसमीपं गच्छति। मरुभूतिं पश्यतः कमठस्य हृदये कोपाऽग्निः प्रज्वलति। स नमस्कुर्वतः मरुभूतेरुपरि पाषाणशिलां पातयति, येन स म्रियते। पश्चादनेकजन्मसु कमठस्य जीवात्मा मरुभूतिजीवाय कष्टं प्रयच्छति। अन्ततो गत्वा मरुभूतिजीवो वाराणस्यां महाराजविश्वसेनस्य महाराज्ञ्याः ब्राह्मीदेव्याः पुत्रत्वं गृह्णाति। अभिनिष्क्रिमणानन्तरमेकस्मिन् दिने पार्श्वनाथस्य (मरुभूतिजीवस्य) उपरि शम्बरस्य (कमठस्य) जीवस्य दृष्टिः पतति। तस्य पूर्वकालीनो वैरभाव उद्दीप्तो जायते। स स्वमायाप्रभावेण घोरवृष्टिमुपस्थापयति। स सिंहवद्गर्जति। तञ्च धिक्करोति। एतावतापि यदा पार्श्वनाथः साधनाविचलितो न भवति तदा कमठः तं युद्धायाह्वयते तथा युद्धे स्वहस्तमृतं तं स्वर्गलोकस्थिता-मलकापुरीं गन्तुमुपदिशति। शम्बरस्य (कमठस्य) विभिन्नप्रकाराणि दुर्वचनानि श्रुत्वापि पार्श्वनाथः (मरुभूतिः) मौनमास्ते। शम्बरोऽस्मिन्नवसरे पार्श्वनाथं विभिन्नकथाः श्रावयति पुनर्युद्धाय चाह्वयते। युद्धे पार्श्वनाथस्य मृत्युं सम्भाव्य स्वयं मेघरूपधारणकारणात् शम्बराय पार्श्वनाथायापि मेघरूपं दत्वोत्तरदिक्स्थिता-लकापुरीगमनाय परामर्शं ददाति।

काव्येऽस्मिन् शम्बरः (कमठः) यक्षरूपे कल्पितोऽस्ति। तस्य प्रेयसी भ्रातृपत्नी वसुन्धरा यक्षपत्नीरूपे कल्पिता विद्यते। राजारविन्दः कुबेररूपेण वर्णितो विद्यते, येन कमठः नगरनिर्वासनेन दण्डित आसीत्। मेघरूपेण (मरुभूतिः) पार्श्वनाथः चित्रितोऽस्ति। कमठानुसारं जीवनान्ते पार्श्वनाथो मेघरूपेण स्वर्गं गमिष्यति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रसंगतो राममगिरेरलकापुरीं यावत् मार्गो वर्णितो विद्यते। सर्वप्रथमं रामगिरेरुत्तरस्यां प्रस्थिते आम्रकूटगिरेः, तत्पश्चात् पुनरुत्तरस्यां प्रयाते नर्मदायाः, विन्ध्यवनस्य, दशार्णदेशस्य तस्याः राजधानिकायाः विदिशायाश्च वर्णनं कृतमस्ति। विदिशायां वेत्रवत्याः जलग्रहणानन्तरं कस्यामप्यट्टालिकायां दिनं यापयित्वा रात्रौ नीचैः नामके पर्वते विश्रम्य तदनन्तरं निर्विन्ध्याया सिन्धोश्च साम्मुख्यं कुर्वते मेघायोज्ययिनीगमनाय परामर्शं ददाति। उज्जयिन्यां जिनमन्दिरे जिनस्तुत्यनन्तरं महाकालनामकवने स्थितानां जिनालयानां दर्शनानन्तरं नगरीशोभाप्रेक्षणाय परामर्शं ददाति।

उज्जयिन्यनन्तरं गम्भीरायाः देवगिरिपर्वतस्य चर्मण्वत्याः नद्याः दशपुरनगरस्य, सीतासरितः ब्रह्मावर्तदेशस्य, कुरुक्षेत्रकनखलयोः, हिमालयक्रौञ्चरन्ध्रयोरलकापुर्यश्च सामीप्यं प्राप्तुमनुरोधः कृतोऽस्ति। कविरलकापुर्याः विविधभावभङ्गिमाभिः सह शृङ्गारवर्णनं शम्बरमुखेन कारितवान्। एवं प्रकारेण मेघे (पार्श्वनाथे, मरुभूतौ] अलकापुरीं प्राप्ते तस्य पूर्वजन्मपत्न्या वसुन्धरया सह तस्य मिलनस्य वर्णनं विहितमस्ति। सन्दर्भेऽस्मिन् वसुन्धरायाः विरहावस्थायाः वर्णनं मेघदूतयक्षप्रेयसीसदृशमेव सरसं भावुकतापूर्णञ्च विद्यते।

शम्बरेणोक्तवर्णने कृते पार्श्वनाथः (मरुभूतिः) शान्त एव तिष्ठति। एतस्मिन् शम्वरः पुनः युद्धाय तं प्रोत्साहयति। युद्धे मृते सति स्वर्गं गत्वा देवाङ्गनया सह निवासस्य प्रलोभनं ददाति। यदा पार्श्वनाथः कथमपि युद्धाय तत्परो न भवति, तदा स स्वमायाशक्त्या स्त्रीसमूहसृष्टिं कुर्वन् गानप्रारम्भं करोति, तथा नारीप्रणयचेष्टाभिः प्रियवचनैश्च तं विमुग्धं कर्त्तुमिच्छति। एतावत्यां शठतायां कृतायामपि पार्श्वनाथः ध्यानविचलितो न भवति तदा स पाषाणवर्षाभिस्तदन्तं चिकीर्षति। एवं घोरमुपसर्गं वीक्ष्य धरणेन्द्रः पद्मावती च तत्रागच्छतस्तदुपसर्गञ्चापनयतः। त्रस्तः शम्बरः गायति। नागराजः धरणेन्द्रस्तमभयं दत्वा पलायनाद्विरामयति। इन्द्रादिदेवाः केवलज्ञानपूजायै आगच्छन्ति। शम्बरोऽपि (कमठोऽपि) स्व-कुकृत्येभ्यः पश्चात्तापं तथा तीर्थंकरगुणगानञ्च करोति। स क्षमां याचमानः धर्मं गृह्णाति। देवाः आकाशतः पुष्पाणि वर्षन्ति, दुन्दुभिस्वनश्च जायते।

मूल्याङ्कनम्

पार्श्वाभ्युदयकाव्यं गीतिकाव्यमस्ति। जिनसेनेन समग्रमेघदूतं समस्यापूर्त्त्यावेष्टयैतत् काव्यं प्रणीतम्। एतस्य प्रत्येकश्लोकः मेघदूतक्रमेण श्लोकचतुर्थांशेनार्धांशेन वा वेष्टितो वर्त्तते। समस्यापूर्त्तेरावेष्टनं प्रकारत्रयेण सम्पन्नमस्ति—१ पादवेष्टनम्,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२ अर्धपादवेष्टनम्, ३ अन्तरितावेष्टनम् । प्रथमपादावेष्टने मेघदूतश्लोकस्य कतम एकचरणो गृहीतोऽस्ति । द्वितीयावेष्टने द्वितीयचरणः तृतीयावेष्टने तृतीयचरणश्च ।

पादावेष्टितः श्लोकः

श्रीमन्मूर्त्या मरकतमयस्तम्भलक्ष्मीं वहन्त्या,
योगैकाग्रचस्तिमिततरया तस्थिवांसं निदध्यौ ।
पार्श्वं दैत्यो नभसि विहरन् बद्धवैरेण दग्धः
कश्चित्कान्ताविरहगुरुणा स्वाधिकारात् प्रमत्तः । १

अर्धावेष्टितः श्लोकः

वक्रोऽप्यध्वा जगति समतो यत्र लाभोऽस्त्यपूर्वो,
भातुं शक्यं ननु वनपथात् कासिकाग्राजुंनान्तात् ।
वक्रः पन्थाः यदपि भवतः प्रस्थितस्योत्तराशां,
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः । १ । १०३

एकान्तरितः श्लोकः

उत्संगे वा मलिनवसने सौम्य निक्षिप्य वीणाम्,
गाढोत्कण्ठं करुणविरुतं विप्रलापायमानम् ।
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामां,
त्वामुद्दिश्य प्रचलदलकं मूर्च्छनां भावयन्ती । ३।३८

द्वयन्तरितः श्लोकः

तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथंचित्,
स्वाङ्गुल्यग्रैः कुसुममृदुभिर्वल्लरीमस्पृशन्ती ।
ध्यायं ध्यायं त्वदुपगमनं शून्यचित्तानुकण्ठी,
भूयोभूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती । ३।३९

कविजिनसेनेन मेघदूतोद्धृतांशानां प्रचलितानर्थान् स्वस्वतन्त्रकथानके प्रसज्य महद्विलक्षणतायाः परिचयो दत्तः । कविः विभिन्नप्राकृतिकदृश्यानां भावपूर्ण-रम्यस्थानानाञ्च चित्रणेऽपूर्वसहृदयतायाः परिचयं दत्तवान् । आम्रकूटपर्वतशिखरे संप्राप्ते मेघे पर्वतशोभां वर्णयता कविनोदलेखि—

कृष्णाहिः किं वलयिततनुः मध्यमस्याधिशेते,
किं वा नीलोत्पलविरचितं शेखरं भूभृत : स्यात् ।
इत्याशङ्कां जनयति पुरा मुग्धविद्याधरीणाम्,
त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे—१।७०

विद्याधरीणां मनसि पर्वतशिखरे स्थितान् श्यामवर्णमेघान् वीक्ष्य कृष्णसर्पाणां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नीलकमलानाञ्च भ्रमो जायते।

कविः दृश्यचित्रणे पटुरस्ति। एतद्वर्णनाधारे सुन्दररेखाचित्रं रचितमस्ति। रेवां वर्णयता कविना, रेवां पृथिव्याश्छिन्नां मालां प्रकल्प्य, तत्तटे वन्यहस्तिनां दन्तक्रीडास्तथा पक्षिणां मधुविरावान् वर्णयता, नदीतटश्चित्रमिवाङ्कितः।

गत्वोदीचीं भ्रुव इव पृथुं हारयष्टिं विभक्तां
वन्येभानां रदनहतिभिर्भिन्नपर्यन्तवप्राम्।
वीनां वृन्दैर्मधुरविरुतैरात्ततीरोपसेवां
रेवां प्रेक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णाम्। १।७५

कविः सन्ध्याकाले महाकालवने जिनमन्दिरं प्राप्तो तत्प्राप्तेः चित्रणं कुर्वन् कथयति—"हे मेघ! महाकालवने यदि सन्ध्यायां त्वं जिनमन्दिरं प्राप्नुयास्तदा सान्ध्यपूजानन्तरं स्वेदविन्दुवन्दिताः मन्दं-मन्दं चलन्तीः स्वचरणनिक्षेपैः सह मेखला-शब्दं कुर्वतीः कोमलकण्ठीः गणिकाः लीलाविकीर्णैः जलकणैः सिक्ताः कुर्याः।

सायाह्ने चेत्तदुपगतवान् धाम तत्कालपूजा-
संगीतान्ते श्रमजलकणैराचिताङ्गीः सुकण्ठीः।
मन्दं यान्तीश्चतुरगणिकाः शीकरैः सन्नयेस्त्वम्,
पादन्यासक्वणितरसनास्तत्र लीलावधूतैः।

एतदनन्तरं कविः चित्रयन् वक्ति—"हे मेघ! यदि त्वं जिनमन्दिरे दिने गमिष्यसि, तदा त्वं तत्र मणियुक्तानि शब्दायमानानि नूपुराणि दधानाः सुललित-पदन्यासैः गायन्तीः भ्रूविलासयुक्ताः रत्नजटितदण्डचामरैः श्रान्तहस्ताः वर्षाग्र-बिन्दुभिः सिक्ताः चंचला उपरि पश्यन्तीः गणिकाः द्रक्ष्यसि।"

तास्तत्राह्नर्मणिमयरणन्नूपुराः पण्ययोषाः,
प्रोद्गायन्तीः सुललितपदन्यासमुद्भ्रूविलासाः।
पश्योत्पश्या नवलजकणद्वित्रसिक्ता विलोला,
रत्नच्छायाखचितवलिभिः चामरैः क्लान्तहस्ताः।

मेघदूतस्य यक्षः प्रेमरुष्टां स्वप्रियां गैरिकवर्णे पाषाण उल्लिख्य तच्चरणयोः आत्मानमर्पयितुमिच्छन्नश्रुपातैः मलिने चित्रेऽपि संयोगं न प्राप्नोति। जिनसेनः स्वप्न-संगमाभावस्य चित्रं समुपस्थापयति। कविना विरहिण्याः दीनतायाः कृतं चित्रणं भावसौन्दर्यञ्च श्लाघनीयमस्ति—

तीव्रावस्थे तपति मदने पुष्पबाणैर्मदङ्गं-
तल्पेनाल्पं दहति च मुहुः पुण्यभेदैः प्रक्लृप्ते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

5334

तीव्रापायत्वदुपगमनं स्वप्नमात्रेऽपि नायं
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः । —४।३५

शम्बरः (कमठः) पार्श्वनाथं क्रुद्धं विदधातुं पूर्णं प्रयासं करोति । सोऽपशब्दान् व्यवहरति तथापि पार्श्वनाथः ध्यानेऽचलस्तिष्ठति । कविः जिनसेनः द्वितीयतृतीय-पङ्क्त्योः समस्यापूर्त्ति कुर्वन् कथयति—

भो भो भिक्षो मयि सहरुषि क्व प्रयास्यस्यवश्यं
त्वामुद्धेति प्रणिपतनकैः सारयिष्ये तदग्रम् ।
न प्राणान् स्वान् घटयितुमलं तावको निर्भयो वा,
मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।—४।२

भो भिक्षो ! मयि क्रुद्धे त्वं क्व गमिष्यसि ? अहं त्वां स्वासिलक्ष्यमवश्यं सम्पाद-यिष्यामि । चिरात् दैववशादभ्यस्तमौक्तिकभूषणानां त्यागनिर्णयोऽपि तव प्राणान् न रक्षिष्यति ।

किं ते वैरिद्विरदनघटां कुम्भसम्भेदनेषु,
प्रासस्थेमा समरविजयी धीरलक्ष्म्याः करोऽयम् ।
नास्मत्खड्गः श्रुतिपथमगात् रक्तपानोत्सवानाम्,
सम्भोगान्ते मम समुचितो हस्तसंवाहनानाम् ।

भो भिक्षो । वैरिहस्तिकुम्भस्थल-विदारणाभ्यस्तो रणविजयी युद्धकार्योपरान्तं (संभोगान्ते) मम हस्तसंवहनयोग्यः वीरलक्ष्म्याः बाहुस्वरूपः अयं मम खड्गः किं त्वया न श्रुतः ।

एवं प्रकारेण कविना नवीनभावयोजना कृता । अनावश्यकवर्णनाधिक्यभारैः कथानके शैथिल्यमायातमस्ति । मार्गवर्णनं वसुन्धरायाः विरहावस्थावर्णनञ्चात्र मेघदूतसमानमेवास्ति । परन्तु संदेशकथनं मेघदूतवन्नास्ति । शम्बरः (कमठः) पार्श्वनाथस्य (मरुभूतेः) धैर्य्येण, सौजन्येन, सहिष्णुतया च प्रभावितो वैरभावं परित्यज्य तच्छरणमुपैति तथा स्वापराधेभ्यः पश्चात्तापपूर्वकं क्षमाप्रार्थनां करोति ।

प्रस्तुतकाव्ये जैनधर्मस्य क्वापि कोऽपि सिद्धान्तः प्रतिपादितो नास्ति । कैलाश-पर्वते महाकालवने च जिनमन्दिराणां महत्प्रतिमानाञ्च निर्देशोऽवश्यमेव कृतोऽस्ति । ''रम्यस्थानं त्यजति न मनो दुर्विधानं प्रतीहि'', ''पापापाये प्रथममुदितं कारणं भक्ति-रेव''

नात्र संदेहो यद्गीतिकाव्यदृष्ट्या काव्यमेतदद्वितीमस्ति । कविना कालिदासस्य मूलभावाः सुन्दररीत्या प्रसारिताः सन्ति । क्वचित् कालिदासभावानां प्रसंगान्तरे कलापूर्णसूक्ष्मतया सन्निवेशप्रयासः सुन्दरः प्रतीयते । प्रकृतिचित्रणे कविना भावुक-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तायाः कल्पनाशक्तेश्च पूर्णपरिचयो दत्तः । यद्यपि काव्येऽस्मिन् न कालिदासलालित्य-मायातं तथाप्येतत्काव्यं संस्कृतकाव्येषु स्ववैशिष्ट्यमावहति ।

पार्श्वाभ्युदस्य गोतितत्त्वम्

अस्तु, गीतिकाव्यस्य निम्नाङ्कितानि तत्त्वान्यस्माभिः दृश्यन्ते—

१. रागात्मकता ।
२. वैयक्तिकता ।
३. प्रवन्धसद्भावेऽप्यात्मनिष्ठता ।
४. गेयता ।
५. कल्पनावैचित्र्यम् ।
६. सौन्दर्यात्मकता ।
७. भावसघनता ।
८. मार्मिकता ।
९. हृदयद्रावकता ।
१०. प्रकृतिचित्रणम् ।
११. स्वाभाविकरूपेण मनोरागाणामभिव्यक्तिः ।
१२. स्वपरता ।
१३. सहजतरलता ।
१४. अनुभूतेः प्रतिवद्धता ।
१५. लयात्मकता ।

कविजिनसेनेन पार्श्वाभ्युदये एकां नवीनां सौन्दर्यचेतनां बोधयित्वा समाजरुचेः परिष्कार एव न विहितः, प्रत्युत एकस्याः नवीनायाः सर्जनप्रेरणायाः सञ्चारो व्यधायि । एका नवीना जीवनदृष्टिः प्रदत्ता । वस्तुतः कविः यथार्थमात्रेण संतुष्टो नास्ति । अतस्तेन जीवनप्रगत्यै सम्भावनानां नवीनं क्षेत्रमुद्घाटितम् । यथा मानव-जीवनस्य वास्तविकमहत्ता शारीरिकविशालतायाः तत्त्वसंघटनायाश्चापेक्षया तस्य चेतनायाः जीवनशक्तेश्चोपरि अधिका निर्भरा विद्यते, तथैव गीतिकाव्यस्योत्कर्षोऽलङ्कारादिबाह्यसौन्दर्यप्रसाधनापेक्षया कल्पनोर्वरतायाः भावावेगस्य सञ्जीवनशक्तेश्चोपरि अधिकनिर्भरो विद्यते । गीतिकाव्यस्य श्रेष्ठतायै वस्तुविन्यास-नैतिकता-कलागतसन्तुलनापेक्षया कल्पनाया अनुभूतेश्च प्रवणतायाः आवश्यकता वर्त्तते । मानवीयभावानां तत्संवेगानां तदात्मानुभूतेश्च सघनयोजना पार्श्वाभ्युदये वर्त्तते ।

शृङ्गाररसस्य गीतीनां शान्तरसे परिवर्त्तनं विधाय कविजिनसेनेन प्रभावोत्पा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दकतोत्पादिता, सहैव मानवीयभावानामनेकरूपता: समन्वितरूपेण प्रकाश्य एकस्याः नवीनायाः विधायाः सर्जना विहिता। प्रवन्धसमावेशे कृतेऽपि जिनसेनेनाधिकाधिकरूपेण स्वीयरूपस्याभिव्यक्तिर्विहिता। कवेर्वैयक्तिकभावधारया गहनानुभूत्या च गीतिकाव्येऽस्मिन् भावात्मिका स्थितिरुत्पादिता। कविना हृदयस्य तद्गम्भीरभावावेशस्याभिव्यक्तिः कृता, यस्मिन् वैयक्तिकता समूहगता प्रतीयते। तदवक्रोद्देश्यञ्च जातीयजीवनस्य रञ्जनमस्ति। अतएव पार्श्वाभ्युदयकाव्यं मेघदूतवत् गीतिकाव्यस्योज्ज्वलो मणिः मन्यते।

यदि निष्पक्षालोचना क्रियेत तदा वक्तुं शक्यते यत् जिनसेनस्य कल्पनाशक्तिः कस्मिंश्चिदर्थे कालिदासादग्रेऽस्ति। यथा (पृष्ठ ५४ पद्य २।९७, २।९८) पद्यद्वयमुदाहरणार्थं विद्यते।

एताभ्यां पद्याभ्यां स्पष्टमस्ति यत् सहजशुद्धभावः, स्वच्छन्दा कल्पना, भावावेशः, स्वानुभूतिमूलकता, प्रेम्णो व्यापकप्रभावश्चाङ्किताः सन्ति। उपदेशादर्शपूर्णचित्रणस्थाने विविधजीवनव्यापारा उद्घाटिताः सन्ति।

कृतेऽपि शान्तरसनिर्वाहे वैयक्तिकतायाः आत्मनिष्ठतायाश्च निर्वाहः यथास्थानं सम्पन्नो वर्त्तते। मन्दाक्रान्ताच्छन्दसा मेघदूतवदेव संगीतात्मकता सृष्टा। गीतिकाव्येऽस्मिन् कविः विभिन्नप्राकृतिकदृश्यानां कथानकस्य भावपूर्णरम्यस्थलानाञ्च चित्रणाय पर्याप्तमवसरमधिगतवान्। आम्रकूटपर्वतशिखरे मेघे गते पर्वतशोभावर्णने कविः स्वसहृदयतायाः कल्पनाशक्तेश्च पूर्णपरिचयं दत्तवान्।[1]

पर्वतशिखरोपरि स्थितं श्यामवर्णं मेघमवलोक्य विद्याधरीणां कृष्णसर्पभ्रमोऽथवा नीलकमलमालाभ्रमः स्वाभाविको वर्तते।

रेवायाश्चित्रणे कविस्तां पृथ्व्याश्छिन्नां महतीं मालां परिकल्प्य तटे वन्यगजानां दन्तक्रीडायाः पक्षिणां मधुरकलरवस्य च वर्णनं विधाय नदीतटस्य चित्राङ्कनं कृतवान्।

अलकापुर्याः वर्णनप्रसङ्गे तत्रत्येन्द्रनीलमणियुक्तलघुपर्वतस्य, सुन्दरबालानां निवासस्थानस्य, चित्रसज्जितप्रासादानाम्, सततवर्त्तमानवर्षतोः, नराणां नारीणाञ्च विविधशृङ्गारचेष्टानां वर्णनमस्ति। निःसन्देहमत्र कविः प्रेम मानवीयस्वाभाविकप्रक्रियायाः दिव्यजीवनस्य च स्वाभाविकप्रक्रियायाः रूपेण गृहीतवान्। स प्रकृतौ, मानवेषु दिव्यप्राणिषु च एकमेव मूलं स्पन्दनं श्रुतवान्। फलतः प्रकृतौ स्वच्छन्द-

१. पार्श्वाभ्युदय १।७०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रेम्णः, दाम्पत्यप्रेम्णः, वात्सल्यस्य, श्रद्धायाः, भक्तेः मित्रतायाश्च रूपेण प्रेम्णो विविधानि अङ्गानि चित्रितानि।

नराणां नारीणाञ्च प्रेमनिरूपणे (२।११४ पद्ये) कवेः जिनसेनस्य सामञ्जस्य-वादिनी दृष्टिः प्राप्यते। तस्याः वासनायाः कामुकतायाश्च मादकचित्रेभ्य आरभ्य आत्मसमर्पणेन एकनिष्ठतया पूर्णप्रेमपर्यन्तं चित्रणमस्ति। सदैव तयोः जन्म-जन्मान्तरात्मीयतायाः संस्कारैः सुवासितस्यामरालौकिकप्रेम्णः चित्राण्यपि दृश्यन्ते।

जन्मान्तरसंस्काराः पुनर्जन्मकारणात् सन्ति। अस्मिन् जन्मनि विहिताः प्रेम-विरोधौ वात्सल्यञ्चानेकजन्मजन्मान्तरेषु चलन्ति।

कविः प्रेमिणां प्रेमिकाणाञ्च रागपूर्णाभिः हृदयस्थितिभिः पूर्णपरिचितोऽस्ति। पर तद्विश्वासः संस्कारान् प्रति पूर्णो विद्यते। कमठमरुभूत्योः कुसंस्कारः कतिपय-जन्मपर्यन्तं चलति। यतः वैरविरोधशमनं पूर्णज्ञान-केवलज्ञानप्राप्त्यनन्तरमेव जायते। एवं प्रकारेण कविना समाजगतभावनाः आत्मीयरूपाणि प्रदाय पार्श्वाभ्युदयस्य समुच्चगीतिकाव्यरूपेण निर्माणाय पूर्णः प्रयासो विहितः।

अमरुकशतकम्

संस्कृतगीतिकाव्ये 'अमरुकशतकम्' सहृदयानां हृदयहारोऽस्ति। एतत् सुभाषितानां सुन्दरमागारमस्ति। अस्य प्रत्येकगीतौ रसप्रवणता प्राप्यते। रस-भावयो-रर्थस्य च यावान् सन्निवेशः एकस्मिन् पूर्णे प्रबन्धे शक्यो भवति, तावानमरुकस्य प्रत्येकपद्ये प्राप्यते। एतत् शृङ्गारस्य ललितलीलाभङ्गीनां भावमयं स्वरूपमस्ति। अस्मिन् कामिनां कामिनीनाञ्च विभिन्नमनोवृत्तयश्चित्रिताः सन्ति।

शतकस्यास्य रचयिता 'अमरुः' अथवा 'अमरुकः' कश्चन नृपो बभूव। अस्य जन्मस्थानविषये, जन्मसमयविषये च काचिदपि निश्चिता ज्ञातव्यता नास्ति। एका किंवदन्ती प्रचलिता विद्यते यत् मण्डनमिश्रस्य पत्न्या शारदया कृतानां काम-शास्त्रविषयकप्रश्नानामुत्तरदानाय स्वयं शङ्कराचार्योऽमरुकनाम्नो नृपस्य मृतशरीरे प्रविश्यामरुकशतकं प्रणीतवान्।

अमरुकशतकस्याध्ययनेनेयं किंवदन्ती कपोलकल्पिता प्रतीयते। यतोऽस्य ग्रन्थस्य रचना कस्यापि प्रश्नस्योत्तररूपेण नाभवत्। एतत् पूर्वमेवोल्लिखित-मस्ति यत् अमरुकशतकस्य पद्यानि आनन्दवर्द्धनेन (७५० खीष्टाब्दी) तथा

१. पार्श्वाभ्युदय, १।७५।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वामनेन (८८० खीष्टाब्दी) उद्धृतानि। अत एवामरुकसमयः ७५० खीष्टाब्दात् पूर्वकालीनोऽवश्यं विद्यते। रचनासरण्या प्रतीयते यत् कालिदासात् पश्चादेवा मरुकशतकस्य रचनाभूत्।

वर्ण्यविषयः

अमरुकशतके विप्रलम्भश्रृङ्गारस्य वर्णनमस्ति। विप्रलम्भेऽपि मानविप्रलम्भस्य। मानस्यानेकरूपाणि दृश्यन्ते। मुग्धायाः मानं मध्यायाः मानं प्रौढायाः मानं नायकेन नायिकामानहारचेष्टा, नायकस्य निराशस्य निवृत्तिः, नायिकायाः पश्चात्तापः, सख्या उपालम्भः इत्यादीनि मानविषयकवर्णनामानि कृतानि सन्ति। क्वचित् नायिका दूतीं प्रेषयति, क्वचित् सखी नायिकां मानविद्यां शिक्षते। नायिका वैदग्ध्यपूर्णमुत्तरं ददाति। सखी नायिकायै मानशिक्षां ददती कथयति—अरे मुग्धे, किं त्वया वाल्येऽस्मिन्नेव शेषसमययापनं निर्णीतम्।

दृढतापूर्वकं मानं धारयन्ती तिष्ठ, स्वसरलतायाः परिमार्जनं कुरु। अस्योपरि नायिका व्याकुला जायते। तथा वैदग्ध्येन सह सखीं प्रतिवक्ति—शनैः शनैः कथय, कदाचिदेवं न भवेत् यत् मम हृदयस्थो मम प्रियतमः तव वार्त्तां न श्रुणुयात्?

सखीवार्त्तां स्वीकृत्य नायिका प्रयत्नपूर्वकं मानं कुरुते, परं सा विकला भवति। सा मानवशा स्वभृकुटीं वक्रां कृतवती, परं दृष्टौ तदीयोत्कण्ठा दृश्यते। सा चित्तं कठोरं कलयति, परं शरीरमत्यधिकं रोमाञ्चितं जायते। सा कथयति—मया स्ववाणी नियमिता, परं दग्धमुखे स्मितागमो जायत एव। यदा प्रियतमायां परोक्षस्थितायामेषा दशा विद्यते, तदा सम्मुखमुपस्थितायां तस्यां का स्थितिर्भविष्यति। नायको नायिका च मिथः मानं कुरुतः। उभावेकस्यामेव शय्यायां मिथः पार्श्वपरिवर्त्तितं विधाय स्थितौ। मिथः भाषणं त्यक्तवन्तौ तथा रोषप्रदर्शनमभिनयतः। सत्यमेतदस्ति यत् तौ स्वयं परस्परमनुनयं कर्त्तुं प्रस्तुतौ स्तः। परं गौरवरक्षाकाङ्क्षा तौ तथाकरणात् निवारयति। अस्मिनेव समये तयोरुभयोरपाङ्गे परिभ्रमत एवं तयोरक्षिणी मिलतः। एवं प्रकारेण तयोर्मानकलहभङ्गो जायते तथोभावपि हासेनोत्तेजनया वेगेन च सह मिथः ग्रीवायां श्लिष्यतः। एषाऽभवत् प्रणयमानस्य वार्ता।

ईर्ष्यामानस्यापि चित्रणं कविना विस्तारपूर्वकं कृतम्। नायिका प्रियमस्यापराधकारणात् क्षीणा जायमानास्ति। आशङ्कया, भयेन, कोपेन च तस्याः शरीरे कम्पनमुत्पन्नं जायते। प्रियतमः प्रेमपूर्वकं पृच्छति—'तव शरीरे कृशतेयती कथमुत्पन्ना? एतत्कम्पनं कथमुत्पद्यते?' एवं प्रकारेण पृच्छति प्रियतमे नायिकाया सरल-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तयोत्तरितं यदेतत्स्वाभाविकमस्ति। एवमुक्त्वा मुखं परावर्त्य स्वपक्ष्मसु लग्नान्यश्रूणि गम्भीरेणोच्छ्वासेन सह पातितवती। नायिकामानहारकालस्योत्तरप्रत्युत्तरेऽपि कियत्सुन्दरे स्तः। नायकः—"वाले",नायिका—"नाथ", नायकः—"हे मानिनि! त्यज रोषम्" नायिका—"रोषं कृत्वा मया किं कृतम् ?" नायकः—"त्वया रोषं-कृत्वा मय हृदये खेदः समुत्पादितः।"

नायिका—"तव हृदये खेदः कथं समुत्पन्नः ? त्वया कोऽपराधः कृतः ?"

नायकः—"पुनस्त्वं गद्गदस्वरेण कथं रोदिषि ?" "अहं कस्मै रोदिमि ?" नायकः—"पश्य, मम सम्मुखे रोदिषि ?" नायिका—"अहं तवाग्रे कथं रोदिष्यामि ? अहं तव कास्मि ?"नायकः—"त्वं मम प्रियतमासि ?"नायिका—"प्रियतमैव तु नास्मि, अतएव तु रोदिमि।" मानस्य पराकाष्ठापि द्रष्टव्या—नायिका मानं कृतवती। सखी मानहारं कृत्वा श्रान्ता। सान्ते कथयति—"तव प्राणप्रियतमो नीचैः शिरःकृत्वा स्वनखेन भूमिं कर्षति। सख्य आहारं पानीयञ्च त्यक्तवत्यः। निरन्तरं रुदतीनां तासां नयने सशोथे जाते। पञ्जरस्थैः शुकैः हसनपठनादिकं त्यक्तम्। तवेयं दशा विद्यते, अरे कठोरहृदये! सम्प्रत्यपि मानं त्यज।

प्रवासकारणात् नायिकावस्थायाः चित्रणं कुर्वन् कविः लिखितवान्। नायिका कथयति—प्रियतमस्य प्रस्थानसमाचारे प्राप्ते मम वलयौ निःसृत्य मणिवन्धं त्यक्त-वन्तौ। मम प्रियमित्रमश्र्वपि निरन्तरं गच्छति। धैर्यमपि स्थातुं न समीहते। चित्तं प्रथममेव गन्तुं प्रवृत्तम्। प्रियतमेन गन्तुं निश्चये कृते, सर्वैरपि सहैव गन्तुं प्रवृत्तम्। हे जीवन! त्वयापि गन्तव्यमस्त्येव, पुनः तव यदि वलयाश्रुप्रभृति जीवनसङ्गिनः सन्ति, एतेषां सङ्गं कथं त्यजसि ? त्वमपि एभिः सहैव कथं न गच्छसि ?

संयोगशृङ्गारस्योदाहरणानि न्यूनान्येवागतानि सन्ति। कक्ष एकलोऽस्ति, नायकः निद्राव्याजमुपेत्य शयानोऽस्ति। नायिका वासगृहं शून्यं नायकञ्च सुप्तं पश्यति। शनकैरुत्थिता भवति तथैतन्निर्णेतुं यत् किं नायकः वस्तुतः शेते, अधिक-कालं यावत् तन्मुखं पश्यति। यदा विश्वसिति यन्नायकः वस्तुतः शेते, तदा स्वच्छ-न्दतापूर्वकं तन्मुखं चुम्बति तथा यदा पश्यति यत् तच्चुम्बनैः नायकमुखं विकसति, कपोलौ रोमाञ्चितौ जायेते तदा लज्जया स्वशिरो नमयति, प्रियतम उत्तिष्ठति तथा हसन् तस्याः वालायाः मुखं चिरकालं यावत् चुम्बन् तिष्ठति।

एकस्मिन्नन्यस्मिन् चित्रेऽङ्कितमस्ति यत् "दम्पती रात्रिपर्यन्तं वार्तां कुर्वन्ताव-तिष्ठताम्। तत्रैव गृहस्य शुकः सारिका च पञ्जरस्थे आस्ताम्। ताभ्यां दम्पत्योः वार्ता श्रुता तथा स्मृतिमानीता। प्रातःकाले नायकस्य, नायिकायाः समस्तगुरु-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जनपरिवारसदस्यस्य चोपस्थितौ शुकः रात्रिवार्त्तायाः आवृत्त्यारम्भं करोति। नायिका चतुरतापूर्वकं स्वाभूषणेभ्यः पद्मरागस्यैकखण्डं शुकचञ्चौ रक्षति। शुकस्तं दाडिम-खण्डं मत्वा कृन्तितुं प्रारभते। एवं शुकमुखं पिहितं जायते।

अमरुकस्य वर्ण्यविषयो रससम्पृक्तोऽस्ति। तस्य प्रत्येकपद्यं ध्वनेरुत्कृष्टमुदाहरणं विद्यते। शृङ्गाररसपूर्णाः गीतयः प्रत्येकसहृदयमाकर्षन्ति। शतकेऽस्मिन् दाम्पत्य-जीवनस्य प्रणयव्यापारस्य सरसचित्रणमस्ति। शृङ्गारस्य विविधाः स्थितयोऽपि वर्णिताः सन्ति। अमरुकस्य भावाः स्वतः वाण्यां परिणताः भूत्वा वहिरागताः सन्ति। मानस्यैतावद्विस्तृतं गम्भीरञ्च चित्रणं नान्यत्रोपलब्धमस्ति।

काव्यमूल्याङ्कनम्

काव्यमूल्यदृष्ट्या अमरुकशतकमनुपममस्ति। रसगुणालङ्काररीत्यादीनां समुचितसमावेशेन सह जीवनमूल्यस्य प्रतिष्ठा विहिता विद्यते। व्यञ्जनावृत्त्याः आश्रयः प्रायः सर्वत्र गृहीतोऽस्ति। अत्रोदाहरणस्वरूपं व्यञ्जनावृत्तिसम्बन्धि पद्यमेकं समुपस्थाप्यते—

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि दूति ! वान्धवजनस्याज्ञातपीडागमे,
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्॥ अमरु० १०५

पद्येऽस्मिन् 'अधम' पदेन "अत्र तदन्तिकमेव रन्तुं गताऽस्मीति प्राधान्येनाधमपदेन व्यज्यते।"[1] व्यङ्ग्यार्थः प्रतीयते यद् दूती नायक-समीपे रन्तुं गतासीत्। संयोग-शृङ्गारस्यापि चित्रणं कविना कृतम्। यथा—

गाढालिङ्गनवायनीकृतकुचप्रोद्भिन्नरोमोद्गमा,
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा।
मा मा मानद माति मामलमिति क्षामाक्षरोल्लापिनी,
सुप्ता किं नु मृता नु किं मनसि किं लीना विलीना नु किम्?। अमरु० ४०

कश्चन नायकः रत्यानन्दे मग्नायाः नायिकाया अवस्थां वर्णयति। अस्याः नायिकायाः गाढालिङ्गनेनास्याः स्तनौ दमितौ, गाढालिङ्गनसुखेनास्याः रोमाञ्चोद्वोधनं जातम्, अत्यधिकस्नेहरसेनास्या अधोवस्त्रं नितम्वात् वारं-वारं स्रस्तं जायते, आलिङ्गनजनितपीडामसहमानेयं छिन्नभिन्नशब्देषु—"हे प्रिय, न, न, मामधिकं नेति

1. काव्यप्रकाश—१/२ की आगेकी पंक्ति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कथयन्ती निश्चेष्टा जाता । किं सा सुप्ता, यदीयं निद्रामग्नाऽभविष्यत्, तदा श्वासाश्चलन्तोऽभविष्यन्, परमस्याः श्वासा अपि न चलन्तः सन्ति, तत्किमियं मृता, किमियं मम मनसि प्रच्छन्ना ? तस्मिन्मिलिता वा ?

रतिः वर्णिता । पद्येऽस्मिन् नायिकायाः रोमाञ्चस्य तथा प्रलयनामकसात्त्विकभावस्य, छिन्नभिन्नशब्दानां कथनस्य, नितम्ववस्त्रस्रंसनस्योद्दीपनविभावस्य तथा नायकस्य वितर्कनामकसञ्चारिभावस्य व्यञ्जना विहिता विद्यते । "मा मा मानद माति मामलमिति" अंशे रतिसुखं प्राप्तायाः नायिकायाः अपूर्णवचनेषु औचित्यपालनं कृतं विद्यते । प्रथमरतिकालस्य एतावत्सुन्दरं वाणीमयं चित्रणं अन्यत्र दुर्लभमस्ति । आचार्यरुय्यकइमं प्रेयोऽलङ्कारमुवाच ।[1]

मुग्धायाः नायिकायाः स्वाभाविकचित्रणं कुर्वता कथितम्—

पटालग्ने पत्यौ नमयति मुखं जातविनया,
हठाश्लेषं वाञ्छत्यवहरति गात्राणि निभृतम् ।
न शक्नोम्याख्यातुं स्मितमुखसखीदत्तवचना,
ह्रिया ताम्यत्यन्तः प्रथमपरिहासे नववधूः । अमरु० ४१

पतिगृहमागतायाः मुग्धायाः नायिकायाः लज्जाशीलतायाश्चित्रणेऽमरुको दक्षोऽस्ति । पतिस्तस्याः अञ्चलोपान्तं धृत्वा गमनाद्रुणद्धि तथा पत्युरिमां चेष्टां न वाञ्छन्त्यपि सा लज्जया मुखं नमयति । यदा पतिः बलपूर्वकमालिङ्गनं समीहते तदा सा स्वाङ्गानि पृथक् करोति । हसन्तीः सखीः वीक्ष्य सा ताभ्यो मनसा तूत्तरं दातुं समीहते, परं मुखेन न किमपि कथयति । प्रथमागता नववधूः लज्जया हासपरिहासोक्तं वक्तुं समर्था न भवति ।

पद्येऽस्मिन् मनोमुखाद्यनुभावैः नायिकागत 'व्रीडा' नामकसञ्चारिभावस्य पुष्टिः कृता विद्यते । तथेमे मिलित्वा संयोगश्रृङ्गारस्य व्यञ्जनां कुर्वन्ति ।

एका प्रवत्स्यत्पतिका यदा प्रियविदेशगमनं निश्चितं वेत्ति तदा सा कथयति यन्मयापि मरणस्य निश्चयः कृतः । प्रियवियोगे तस्यां मरणमवश्यंभाव्यस्ति । नायिकाया अस्मिन् निश्चये नायको वोधयन् कथयति—

याताः किं न मिलन्ति सुन्दरि ! पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशासि कथयत्येवं सवाष्पे मयि ।

1. अलङ्कारसर्वस्व-काव्यमाला संस्करण पृ० २३७ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा,
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः। अमरु० १०

प्रिये विदेशं गताः किं निवृत्य पुनर्न मिलन्ति ? विदेशं गत्वा जनाः निवृत्य पुनरागच्छन्ति। अत एव मद्विषये त्वया चिन्ता न विधेया, तथा च त्वं परमदुर्बलासि, चिन्तया कष्टं भविष्यति। अतः त्वया स्वशरीरे ध्यानं देयम्।

एवमाश्वास्य नायकः विदेशाय यदा चलितः तदा नायिकाया अक्ष्णोरश्रूण्यायातानि परं तयावरोधितानि। नायकेन सान्त्वनायां दत्तायां नायिकया लज्जानिश्चल तारकनेत्राभ्यां तं वीक्ष्य हसितवती। नायिकाया हसनं प्रियविदेशगमनायानुमतिसूचकं नास्ति, अपितु भाविमरणाय प्रसन्नतापूर्वकं तत्परतायाः सूचना विद्यते।

एवंप्रकारेणामरुकशतके संयोगवियोगश्रृङ्गारयोरनेकान्युदाहरणानि लभ्यन्ते। धृष्टनायकस्य धृष्टता कां पराकाष्ठां प्राप्नोति, एतत्निम्नाङ्कितपद्ये द्रष्टव्यम्—

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा-
देकस्याः नयने पिधाय विहितक्रीडानुबन्धच्छलः।
ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति। अमरु० १९

ज्येष्ठा कनिष्ठा चैकासन एवोपविष्टे स्तः। अतः आदरपूर्वकं शनैः शनैः पृष्ठतः प्राप्नोति तथा तत्र गत्वा क्रीडाच्छलेन ज्येष्ठायाः नायिकायाः नेत्रे हस्ताभ्यां पिधाय धूर्तो नायकः स्वग्रीवां मनाक् वक्रां विधाय रोमाञ्चिते भूत्वा कनिष्ठां नायिकां चुम्बति, यस्याः मनः प्रेम्णोल्लसितं जातम्, यस्याश्च कपोलफलके हासेन सुशोभिते स्तः।

अलङ्कारयोजनादृष्ट्यास्मिन् शतके रसवत् (२) अनुमानम् (४, ५, १७), विषमः (६), सहोक्तिः (७, ३५), परिवृत्तिः (८) उत्तरम् (१७), जातिः (१२), भ्रान्तिमान् (१८), मीलितम् (१८), विशेषः (१९), सूक्ष्मम् (२१), रूपकम् (२५), पिहितम् (२६), आक्षेपः (२८) उपमा (३३), असंगतिः (३४), अवसरः (३८) लेशः (४७) व्याजोक्तिः (५०), परिकरः (५६), प्रश्नोत्तरम् (५७) परभवः (६१), अहेतुः (६०), असत्समुच्चयः (६७), विरोधः (६८), अपह्नुतिः (८१), कर्तृदीपकम् (८५), नाट्यालङ्कारः (८९) समाधिः (१०५), युक्तिः (१०६) एवं वाक्योत्तरम् (११३) अलङ्काराः परिलक्षिताः भवन्ति।

इह नाट्यालङ्कारस्योदाहरणं प्रस्तूय तद्भावसौन्दर्योपरि प्रकाशः दास्यते—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते,
मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि ।
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरःश्रोष्यति । अमरु० ७०

भो सरले ! त्वया सम्पूर्णसमयः सरलतायामेव यापितः । मानं धारय । कदाचित् पतिं प्रति कृत्रिमः कोपोऽपि विधेयः । धीरतां धर । सरलतामपनय । सख्याः वचनं श्रुत्वा तस्याः सुन्दर्याः मुखमण्डले भयरेखा अङ्किताः, तथा तया कथितम्— शनैः शनैरेतादृशं वचः कथय, यतो मम प्राणवल्लभो नित्यं मम हृदये निवसति, स इमाः वार्त्ताः श्रोष्यति ।

उत्तमनायिकायाः एतादृशं मनोज्ञं चित्रणं क्व प्राप्स्यते ? एतादृशैः चित्रैरनेककवय आन्दोलिताः । अमरुकः शृङ्गारनिरूपणमत्यन्तसूक्ष्मतापूर्वकं कृतवान् ।

अमरुकशतके पद्यानां संख्या नवत्यारभ्य पञ्चदशोत्तरशतात्मिका प्राप्यते । विभिन्नसंस्करणानामवलोकनेन ज्ञायते यत् एकपञ्चाशत्पद्यानि समानानि सन्ति । शेषपद्यानि विभिन्नरूपेषु मिलन्ति । कविना तत्कालीनविलासिदाम्पत्यजीवनस्य सुन्दरं चित्रणं कृतम् । अमरुकस्य भाषात्यन्तप्रसादपूर्णा प्रवाहयुक्ता प्राञ्जला च विद्यते ।

गीतिकाव्यत्वम्

अर्जुनवर्मदेवेन स्वस्याः रसिकसञ्जीवन्याः टीकायाः प्रारम्भेऽमरुककवित्वस्योपमाडमरुणा दत्ता । एतेन स्पष्टमस्ति यत् अमरुकस्य सर्वाणि पद्यानि गेयानि सन्ति तथा तेषु गीतिकाव्यत्वं पूर्णतया प्राप्यते । यथा—

अमरुककवित्वडमरुकनादेन विनिह्नुता न सञ्चरति,
शृङ्गारभणितिरन्या धन्यानां श्रवणयुगलेषु ।

वसन्ततिलका-शिखरिणी-शार्दूलविक्रीडितसदृशविशालच्छन्दसां प्रयोगेऽपि शुद्धवैदर्भीरीति-कारणात् नादसौन्दर्यं विद्यमानमस्ति । शृङ्गारस्य ललितलीलायाः वर्णनं माधुर्यपूर्णमस्ति । प्रसन्नमधुरपदावल्याः कारणात् प्रत्येकवर्णः अग्रवर्त्तिवर्णैः सह मिलित्वाऽपूर्वां नादानुकृतिमुत्पादयति, येन प्रत्येकवाक्यं गीतिकाव्यत्वं प्राप्नोति । मानवस्य रागात्मकास्तित्वे निहितत्वात् प्रेमवृत्तिः सार्वयुगीना सार्वभौमा चास्ति । इयं जीवनस्य सञ्जीवनी शक्तिरस्ति तथास्यामेका स्थायिनी प्रेरिका भावसत्तास्ते । संयोगवियोगयोः विविधरूपाणां चित्रणे भावात्मकता निहिता विद्यते । रसराजः शृङ्गार एवामरुककवितायाः मूलरसो विद्यते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अमरुकगीतयः स्वच्छन्दाः स्वतन्त्राः वा सन्ति। तासु वैज्ञानिकतायाः पूर्णसमावेशोऽस्ति। अवाधकल्पनायाः, असीमभावुकतायाः, विशुद्धभावात्मकतायाः, कर्मकोलाहलमुक्तचिन्ताधारायाः समवायः प्राप्तोऽस्ति। कविरमरुकः वैयक्तिकभावधारायै अनुभूतिकृते च तदनुरूपां लयात्मिकामनुभूतिं दातुं चेष्टितवान्। प्रयासेऽस्मिन्नसौ पूर्णः सफलो विद्यते।

क्षणानां महत्ताभिव्यक्तास्ति तथा ते क्षणाः स्वस्थितिकाले समग्रजीवनभूताः प्रतीयन्ते। अत्रेदं स्मरणीयमस्ति यत् अभिव्यक्तेः सार्थकतास्मिन्नस्ति यत् तेषां समग्रक्षणानां समग्रता कृतेऽखण्डितं प्रभावान्वितदृगाभिनिवेशं दातुं प्रयतेत। अमरुके एको विचारः, एकानुभूतिः, एका संक्षिप्ता स्थितिः भावाविष्टरूपेणभिव्यक्ताः सन्ति। हेमन्तकालीनपवनस्य चित्रणं कियत् भावात्मकमात्मनिष्ठञ्चास्ति द्रष्टव्यमेतत्—

एते ते कुङ्कुमाक्तस्तनकलशभरास्फालनादुच्छलन्तः,
पीत्वा सीत्कारिवक्त्रं शिशुहरिणदृशां हैमना वान्ति वाताः। अमरु० ५४

भ्रमरानन्ददायिकुन्दकुसुममरन्दमुपरि नीत्वा परितः प्रक्षिपन्तः शिशुहरिणदृशां सुन्दरीणां कुङ्कुमलेपयुक्तोच्चस्तनाहताः उच्छलन्तः तथा तासां सीत्कारिमुखमदिरां निपीय हेमन्तकालीनाः पवनाः चलन्तः सन्ति।

प्रकृतेरस्मिन् संश्लिष्टचित्रे सान्द्रभावनायाः समावेशो विद्यते तथा रसचर्वणा स्वमूलरूपे स्थितास्ति। नायिका विदेशागतपतेः बाह्यसाधनैः स्वागतं विस्मृत्य स्वयं द्वारे गत्वा स्वाङ्गोपाङ्गैरेव स्वागतार्थं मङ्गलद्रव्याणां रचनां करोति। तया वन्दनमालायाः रूपेण स्वनीलकमलनेत्र एव मार्गे विकीर्णे। सा प्रियागमनहर्षे कुन्दजात्यादिकुसुमान्यविकीर्य स्वहास्यपुष्पाण्येव परितः विकीर्य मार्गं ससुरभि कृतवती। प्रियायार्घ्यदानार्थं तया घटः जलपात्रं वा न गृहीतम्, अपितु शुभ्रसीकरसहिताभ्यां स्वस्तनाभ्यामेव प्रियायार्घ्यं दत्तम्। एवं प्रकारेण प्रियागमनसमयेऽनया नायिकया वाह्यसाधनानां प्रयोगमकृत्वा स्वान्तर्भावैरेव मङ्गलस्वागतं विहितम्। यथा—

दीर्घा वन्दनमालिका विरचिता दृष्ट्यैव नेन्दीवरैः
पुष्पाणां प्रकरस्मितेन रचितो नो कुन्दजात्यादिभिः।
दत्तः स्वेदमुचा पयोधरयुगेनार्घ्यो न कुम्भाम्भसा,
स्वैरेवावयवैः प्रियस्य विशतस्तन्व्याः कृतं मङ्गलम्। अमरु० ४५

सत्यप्यालम्बनविभाववर्णने स्वेदसात्त्विकभावस्यापि चित्रणं विहितमस्ति। रसचर्वणया सह गेयता विद्यते। अस्मिन् गीतलक्षणानि—सरागता, सुस्वरता, मधुरता, अलङ्कारता च घटिता भवन्ति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संक्षेपेणा मरुके गीतिकाव्यस्य निम्नलिखितगुणतत्त्वान्युपलभ्यन्ते—

१. वैयक्तिकता ।
२. संक्षिप्तता ।
३. भावसान्द्रता ।
४. तरलता ।
५. आत्मनिष्ठता ।
६. अनुभूतिः ।
७. आवेगपूर्णता ।
८. शब्दानां ध्वनिषु निहिता तालबद्धता ।
९. कल्पनात्मकता ।
१०. प्रेम्णो व्यापकता ।
११. आन्तरिकी सुन्दरता ।
१२. रागात्मकता ।
१३. गेयता ।
१४. संवेदनानां सघनता ।

काव्यमूल्यम्

काव्यमूल्यदृष्ट्या 'गीतगोविन्दम्' एकोऽनुपमोऽद्भुतश्च ग्रन्थो वर्त्तते । तस्योद्दाम-श्रृङ्गारप्रवाहान्तस्तले रहस्यमय्याः माधुर्यभावनायाः निगूढधारा प्रवाहिता विद्यते । समग्रसंस्कृत-साहित्ये नैतत्कोटयाः मधुरान्या रचना विद्यते । संस्कृभारत्याः सौन्दर्य-माधुर्ययोः पराकाष्ठाया अवलोकनमपेक्षितञ्चेत् गीतगोविन्दस्यानुशीलनमावश्यक-मस्ति। तस्य शब्दचित्रेषु सौन्दर्यमुपर्युपरिपरिवहति । गीतानां पदलालित्यमलौकिक-माधुर्यसञ्चारं कुरुते । शब्दार्थयोः सामञ्जस्यमेतादृशं मनोमुग्धकारि वर्ततेयत् संस्कृतादपरिचितोऽपि जनोऽस्य रसास्वादनं करोति । ईदृशीकोमलकान्तपदावली संसारसाहित्ये दुर्लभास्ति ।

गीतगोविन्दे ऋङ्गारिकीं धार्मिकीञ्च काव्यधारां सम्मेल्य विचित्रपानकं प्रस्तुत-मस्ति । अस्यां नवीनकाव्यधारायां काव्यशास्त्रीयनायिकाभेदस्यापि सम्मिश्रणं विहितं यस्य स्रोतोऽन्तः सलिलासदृशमन्तः प्रवाहितं दृश्यते । जयदेवेन सर्वप्रथमं तेषां सर्वेषां तत्त्वानां भक्तिक्षेत्रे एकत्र सन्निवेशो विहितः यानि विशेषतया गौडी-यवैष्णवानां परम्परायां पृथक्नायिकाभेदसृष्टेः कारणानि सञ्जातानि ताः सायान्यतयो-त्तरकालीनभक्तिसाहित्यं प्रभावयन्त्यन्ते क्रमशः क्षीणशक्तीनिभूत्वा रीतिकालीन-कवीनां राधाकृष्णविषयकोक्तिषु विलीनानि भूतानि । जयदेवः विविधप्रसङ्गानां परि-स्थितीनाञ्च कल्पनां विधायसः राधां विभिन्नप्रकारणां नायिकनां भूमिकायां प्रस्तुतवान् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शृङ्गाररसस्यायमनुपमः कोशो विद्यते। अस्मिन् उत्कण्ठितायाः, प्रोषितपतिकायाः, वासकसज्जायाः, विप्रलब्धायाः, खण्डितायाः, अभिसारिकायाः, एवं स्वाधीनपतिकायाः रूपेण राधां समुपस्थापितवान्।

उत्कण्ठितायाः रूपेण राधां वर्णयन् लिखितवान्—

सखि हे केशीमथनमुदारम्!

रमय या सह मदनमनोरथभावितया सविकारम्! गीतगोविन्दम्—५.

खण्डितारूपेण राधा—

रजनिजनितगुरुजागररागकषायितमलसनिवेशम्,
वहति नयनमनुरागमिव स्फुटमुदितरसाभिनिवेशम्।
हरि हरि याहि माधव! याहि केशव! मा वद कैतववादम्।
तामनुसर सरसीरुहलोचन या तव हरति विषादम्। गीतगो० १७।

शृङ्गारस्य संयोगविप्रलम्भयोरुभयोः पक्षयोः विविधावान्तर्दशानां व्यापाराणाञ्च चित्रणं गीतगोविन्दे प्राप्यते। गीतगोविन्दस्य प्रारम्भ एव वसन्तर्तोः जातः। एकत्र वासन्तीकुसुमसुकुमारावयवा राधा कन्दर्पज्वरजनितचिन्ताकुला विद्यतेऽन्यत्र ललितलवङ्गलतास्पर्शकमन्दमलयपवनयुक्ते तथा मधुकरनिकरयुते कोकिलकूजितकुटीरे कृष्णस्य व्रजयुवतिभिः सह विहारश्चलन्नस्ति। शृङ्गारस्योद्दीपनकृतेऽयमृतुः परमसरसोऽस्ति।

विहरति हरिरिह सरसवसन्ते
नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते।

माधव्या मल्लिकायाश्च परिमलेन ललितो वसन्तः मुनीनामपि मनांसि प्रभावयति। अयं तरुणजनानामकारणबन्धुरस्ति। काव्यदृष्ट्यैष सन्दर्भो विशेषमहत्त्वपूर्णोऽस्ति—

मञ्जुतरकुञ्जतलकेलिसदने,
विलस रतिरभसहसितवदने।

गीतगोविन्दम्

जयदेवोऽलिखत्—"मधुरकोमलकान्तपदावलीं शृणु तदा जयदेवसरस्वतीम्" अर्थात् जयदेवस्य कविता मधुरा, कोमलकान्तपदावल्या युक्ता वर्त्तते। गीतगोविन्दं रसिकस्य भक्तसमाजस्य कण्ठहारोऽस्ति। एतत् कलेवरदृष्ट्या, विस्तारदृष्ट्या च

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परं महत्काव्यं नास्ति, परं गुणदृष्ट्यैतावन्मूल्यवत् काव्यमस्ति यदस्य यावान् प्रभावः वैष्णवसाहित्योपर्यस्ति, तावानन्यस्य कस्यापि काव्यस्य न वर्त्तते ।

विषय-वस्तु

अस्मिन् द्वादशसर्गाः पञ्चविंशतिप्रबन्धाश्च सन्ति । सर्वप्रथमं मङ्गलाचरणस्य, प्रस्तावनायाः तथा कविपरिचयस्य चत्वारि पद्यानि दत्तानि वर्त्तन्ते । अनन्तर-मेकयाष्टपद्या तथैकेन पद्येन भगवतः दशावताराणां वर्णनमस्ति । अत एकयाष्टपद्या भगवतः स्तुतिः कृता विद्यते । एतावानंशः प्राक्कथनं भवितुमर्हति । एतत्पश्चात् वास्तविकग्रन्थस्य प्रारम्भो भवति । विरहोत्कण्ठितायाः राधायाः समक्षमुद्यान-भ्रमणावसरे गोप्येका वसन्तवर्णनं करोति तथा दूरतो भगवतः कृष्णस्य रासलीलां दर्शयति, यस्यामनेकगोपिकाः स्वप्रेमचेष्टाभिः सह भगवता कृष्णेन सह विहरन्ति । दृष्ट्वेदं राधेर्ष्यति तथा रुष्टा सती सा व्रजति । एतज्ज्ञात्वा कृष्णोऽपि वियोगव्यथा-पीडितो भूत्वा अन्यगोपिकानां संगं परित्यज्य यमुनातटे कुञ्जे राधाविषये चिन्तां कुर्वन्नास्ते । तदनन्तरं दूतीप्रयोगो विधीयते, या राधां प्रति कृष्णस्य विरहव्यथां निवेदयति ।

राधापि दूतीप्रयोगं विदधाति, या कृष्णसमक्षं राधायाः विरहव्यथां निवेदयति । अत्र वयं प्रोषितपतिकायाः साधु चित्रणं प्राप्नुमः । सखी राधायाः वियोगव्यथया पीडिता भूत्वा कृष्णं राधासमक्षमानेतुं चेष्टते । इदानीमेव चन्द्रोदयो जायते । कवि-रस्मिन् प्रसङ्गे वासकसज्जायाः, विप्रलब्धायाः, कलहान्तरितायाश्च सम्यक् चित्रणं कृतवान् । कृष्णागमने विलम्बं वीक्ष्य राधा व्याकुला जायते । तस्याः हृदयं मदनव्यथया छिन्नं जायते ।

राधा मानिन्यस्ति । कृष्ण आगत्य तस्याः मानहारं कर्त्तुं चेष्टते । राधा-कलहान्तरितास्ति । सख्यस्तां बोधयन्ति । कृष्णः राधायाः मानहारं कृत्वा गच्छति । रात्रिप्रारम्भो जायते । सखी राधामभिसाराय प्रेरयति । पश्चात् राधायाः प्रसाधना-रम्भो भवति । राधाभिलाषाणां वर्णनमागतमस्ति । सखीकृष्णोत्कण्ठाः वर्णयित्वा राधामभिसारशीघ्रतायै प्रेरयति । अभिसारो भवति ।

एतत्पश्चात् स्वाधीनपतिकायाः वर्णनमायातमस्ति । रतिश्रान्तापि राधा कृष्णं प्रति स्वप्रसाधनायाभ्यर्थनां करोति । एतत्पश्चात् संयोगशृङ्गारवर्णनं प्रारभ्यते । वियोगान्ते संयोगस्वादोऽधिकः वर्द्धते ।

काव्यप्रशंसानन्तरं गीतगोविन्दं समाप्तं जायते । काव्येऽस्मिन् वियोग-संयो-गयोरुभयोरपि प्रकारयोः शृङ्गारस्याद्भुतं वर्णनमस्ति । काव्येऽस्मिन् परम्परामुक्त-रचनाप्रणाल्या अनुसरणं नास्ति । श्लोकगद्यगीतानां त्रयाणां मिश्रितप्रयोगेण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

काव्येऽनुपमरचनामाधुर्यस्य समावेशो विद्यते। श्लोकोऽथवा पाठ्यपद्यं प्रायो वर्णनात्मकप्रसंगं यावदेव सीमितमस्ति, यस्योपयोगः कस्याप्यवस्थाविशेषस्य चित्रणे दृश्यवर्णनेऽथवा कथासूत्रनिर्वाहे कृतोऽस्ति। येषु पात्राणां मनोदशा सूचितास्ति। तथा गीतेषु भावानुभूतेरभिव्यञ्जना कृता विद्यते। अस्मिन् वर्णनं गीतं संवादः सर्वे परस्परं ग्रथिताः सन्ति। गीतगोविन्दस्य वसन्तवर्णनं संयोगश्रृङ्गारस्य क्रीडानां चित्रणस्य पृष्ठभूमिरस्ति। एवं तु गीतगोविन्दस्य समस्तप्रकृतिवर्णनमुद्दीपनरूपेण चित्रितमभूत्। परं श्रृङ्गारस्योद्दीपनदृष्ट्या वसन्तवर्णनं विशिष्टमस्ति। विरहस्यानेकदशानां श्रृङ्गारान्तर्गतानेकसञ्चारिणाम्, कामशास्त्रीयशैल्यां प्रतिपादितरतिकेलीनाम्, कचग्रहस्य, चुम्बनस्य, नखच्छदस्य, रदच्छदादेश्च सरसचित्रणं प्राप्यते। अभिलाषा - चिन्ता-स्मरण - मरण - व्याधि-वितर्कावेगासूयादैन्यादिसञ्चारिभिः सह पुलकवेपथुस्वेदादिसात्त्विकभावानां मिश्रणं श्रृङ्गाररसस्य पानकं प्रस्तौति।

अलङ्कारयोजनादिशायां गीतगोविन्दकारोऽनुप्रासप्रयोगे विलक्षणतां प्रदर्शितवान्। ललितच्छन्दसां कोमलकान्तपदावल्याश्चैतादृशः कान्तसंयोगः स्थापितोऽस्ति, यद्गीतानां पाठमात्रेण सहृदयानां हृदये तदनुरूपरसस्य प्रादुर्भावो जायते। पदमाधुर्यमनुप्रासस्य सुभगसौन्दर्यकारणात् साहित्यिकसौन्दर्यस्य सर्जकमस्ति। भावप्रवणकवित्वस्य प्रणयभावानाञ्च सुकुमारव्यञ्जनया काव्यमूल्यानां कतिधा वृद्धिः कृता। यथा—

मुखरमधीरं त्यज मञ्जीरं रिपुमिव केलिषु लोलम्।
चल सखि कुञ्जं सतिमिरपुञ्जं शिथिलय शीलनिचोलम्॥ पञ्चमसर्गः, ४

अप्रस्तुतयोजनाकृतेऽपि जयदेवः क्वचिद्दूरं न धावति। प्रस्तुतवातावरणादेवाप्रस्तुतं गृहीत्वा भावतीव्रतामुत्पादयति। कविप्रौढोक्त्या सहापह्नुतिचमत्कारः दर्शनीयोऽस्ति—

हृदि विसलताहारो नायं भुजङ्गमनायकः,
कुवलयदलश्रेणी नायं कण्ठे न सा गरलद्युतिः।
मलयजरजो नेदं भस्म प्रियारहिते मयि,
प्रहर न हर भ्रान्त्यानङ्ग क्रुधा किमु धावसि? सर्ग, ३।२

कृष्णदेवः कथयति यदरे कामदेव! त्वं मां शङ्करं ज्ञात्वा प्रतिशोधभावनया क्रोधपूर्वकं कथं धावसि? मम हृदये शान्तिकामनया रक्षितं मृणालं सर्पं मावगच्छ, मम ग्रीवायां नीलकमलपङ्क्तिं विषचिह्नं मावगच्छ। इदानीमहं विरह्यस्मि। विरहसन्तापशान्त्यर्थं लग्नं चन्दनं शङ्करविभूतिं मावगच्छ।

उल्लिखितपद्ये सत्यानुभूतेरभावोऽस्ति। कृष्णः शिवाभावस्य यत् स्पष्टीकरणं कृतवान्, तत कविप्रौढोक्तिस्त्वस्त्येव, तत्कल्पनाधार एव मिथ्या वर्त्तते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गीतगोविन्दस्य काव्यमूल्यं पदलालित्यस्य गीतशैल्याश्च नवरूपप्रतिष्ठादृष्ट्याधिक्रमस्ति। ललितच्छन्दसः कोमलकान्तपदावल्याश्चेदृशः कान्तसंयोगः स्थापितोऽस्ति, यद्गीतानां पाठमात्रेणैव सहृदयहृदयेषु तदनुरूपरसस्याविर्भाव उदेति। अस्मिन्नेकत्र संस्कृतस्य वार्णिकच्छन्दांसि प्रयुक्तानि, अन्यत्र च, संगीतस्य मात्रिकपदानि। एतयोः समवायेनापूर्वः काव्यामृतसञ्चारो विहितः।

सर्गबद्धतां प्रदाय जयदेवेनेदं महाकाव्यलक्षणैः समन्वितं कर्त्तुं चेष्टितम्, परमस्मिन् महाकाव्यलक्षणानि घटितानि न भवन्ति। परं सर्वप्रथमं संस्कृतभाषायाः काव्ये सङ्गीतबद्धतायाश्चेष्टा गीतगोविन्द एव प्राप्यते। अभिव्यञ्जनायाः सफलतादृष्ट्या गीतगोविन्दं विशेषप्रसिद्धं विद्यते।

गीतितत्त्वम्

नात्र सन्देहो यत् संस्कृते गीतिकाव्यस्य वास्तविकरूपं जयदेवस्य गीतगोविन्दे दृश्यते। गीतगोविन्दस्य कोमलकान्तपदावल्या युक्तानि गीतानि स्वसौन्दर्ये गेयतायाञ्चानुपमानि सन्ति। तादृशी मधुरतान्यत्रासम्भवास्ति। राधाकृष्णयोः केलिक्रीडाः, तद्हास-विलासौ, राग-रागिणीषु बद्धाः भूत्वा मुखरिताः जाताः। जयदेवो गीतिकाव्यक्षेत्रे एकां नवां क्रान्तिं कृतवान्। गीतगोविन्दस्य रचना आत्माभिव्यक्तिदृष्ट्या कृता विद्यते। अस्मिन् विचाराणामेकरूपतास्ति। आराध्यायात्मनिवेदनस्योल्लासे गेयतायाति। गीतगोविन्दे राधाकृष्णस्य केलिक्रीडासु भावनायाः घनीभूतत्वात् संक्षिप्तताप्यागता वर्त्तते। अतएव सफलगीतिकाव्यस्य चत्वारोऽपि धर्माः—आत्माभिव्यक्तिः, विचाराणामेकरूपता, गेयता संक्षिप्तता च प्राप्यन्ते।

गीतगोविन्दस्य प्रत्येकाक्षरे संगीतमस्ति तथा सा शक्तिर्विद्यते, या स्व'शिव' 'सुन्दर'-प्रेरणया हृत्तन्त्रीं निनादयितुं समर्थास्ति। भावप्रवणता-भावतरलताकारणात् प्रत्येकगीते गेयता विद्यते।

राधायाः सखी कृष्णं प्रति राधाया अनुरक्तेः विरहजन्यपीडायाश्च वर्णनं करोति। कमनीयगीतैः सा राधां कृष्णं चोभावपि मिलितुं प्रेरयति। तथापि कृष्णः राधासमीपं नागच्छति—"कथितसमयेऽपि हरिरहह न ययौ वनम्"[१] चन्द्रोदये जाते राधा प्रणयव्यथयाधीरा भूत्वा स्वोद्दीप्तानुरागस्याभिव्यञ्जनां परममधुरगीतेषु करोति। निःसन्देहं गीतगोविन्दस्य गीतानां पदलालित्यमलौकिकमाधुर्यस्य सञ्चारं करोति। छन्दसां नादसौन्दर्यं त्वद्वितीयमस्ति—

हरिरभिसरति वहति मधुपवने।
किमपरमधिकसुखं सखि भुवने॥ १॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

माधवे मा कुरु मानमये ।। ध्रुवपदम् ।।
तालफलादपि गुरुमतिसरसम् ।
किं विफलीकुरुषे कुचकलशम् ।। २ ।।
कति न कथितमिदमनुपदमचिरम् ।
मा परिहर हरिमतिशयरुचिरम् ।। ३ ।।
किमिति विषीदसि रोदिषि विकला ।
विहसति युवतिसभा तव सकला ।। ४ ।।
सजल-नलिनदल-शीतल-शयने ।
हरिमवलोकय सफलय नयने ।। ५ ।।
जनयसि मनसि किमिति गुरुखेदम् ।
शृणु मम वचनमनीहितभेदम् ।। ६ ।।
हरिरुपयातु वदतु बहु मधुरम् ।
किमिति करोषि हृदयमतिविधुरम् ।। ७ ।।
श्रीजयदेवभणितमतिललितम्,
सुखयतु रसिकजनं हरिचरितम् ।। ८ ।।

एवं प्रकारेण गीतगोविन्दस्य प्रत्येकाष्टकं संगीतरागैः तालैश्च गीयते । एतद्गीतं गुर्जरी रागे यतिताले गीतमस्ति ।

गीतगोविन्दस्य प्रथमसर्गस्य प्रथमाष्टकं मालवारागस्यैकताले निवद्धमस्ति । अस्मिन्नेव सर्गे द्वितीयाष्टकं गुर्जरीरागे यतिताले, तृतीयाष्टकं वसन्तरागे रूपकताले, चतुर्थाष्टकञ्च रामगिरिरागे यतिताले निवद्धानि सन्ति । द्वितीयसर्गस्य प्रथमाष्टकं गुर्जरीरागे यतिताले तथा द्वितीयाष्टकं मालवरागे, एकतालीताले निवद्धे स्तः । तृतीयसर्गस्याष्टकं गुर्जरीरागे यतिताले लिखितमस्ति । चतुर्थसर्गस्य प्रथमाष्टकं कानडरागे, एकतालीताले तथा तृतीयाष्टकं देखाख्यरागे, एकतालीताले निवद्धे स्तः । पञ्चमसर्गस्य पञ्चमाष्टकं देशवराडीरागे, पडिमताले तथा द्वितीयगीतं गुर्जरीरागे, एकतालीताले निवद्धे स्तः । षष्ठसर्गस्य गीतं 'गुणकारी'-रागे रूपकताले लिखितमस्ति । सप्तमसर्गस्य प्रथमगीतं मालवरागे परिमठताले द्वितीयगीतं वसन्तरागे, एकतालीताले, तृतीयगीतं गुर्जरीरागे, एकतालीताले, चतुर्थगीतं देशारवरागे गौडी वामठरागे लिखितानि सन्ति । अष्टमसर्गस्य गीतं भैरवरागे यतिताले निवद्धमस्ति । नवमसर्गे गुर्जरी रागः, दशमसर्गे देशीभावडरागः, एकादशसर्गे वसन्तरागः, वैराडीरागश्चैवं द्वादशसर्गे विभासरागः प्रयुक्ताः सन्ति ।

एतेषां रागतालानां व्यवहारेण गीतगोविन्दे सङ्गीतात्मकतायाः पूर्णं सर्जनं कृतम् । एतद्रागरागिणीनामाधारे काव्यस्यैतस्य गीतानि गीयन्ते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गीतगोविन्दे मनोमुग्धकारिण्याः शक्त्याः समावेशेन गेयता वर्त्तमानास्ति। अस्मिन् स्वानुभूतिपरकाण्यङ्नेकचित्राण्यङ्कितानि सन्ति। गेयतायाः सङ्गीतात्मकतायाश्चातिरिक्ता गीतिकाव्यस्यानेकगुणाः अस्मिन् समाविष्टाः सन्ति—

१. शृङ्गारभावनायाः अनुभूतिपूर्णाभिव्यक्तिः।
२. रागविशेषयुक्तात्मनिष्ठता।
३. वैयक्तिक्यनुभूतिः।
४. संवेदनशीलता।
५. भावातिरेकता।
६. पदलालित्यं चित्रात्मकता च।
७. समाहितप्रभावः।
८. संक्षिप्तता।
९. मार्मिकता।
१०. अन्तवृत्तेः प्रधानता।
११. मधुरता

रामगीतगोविन्दम्

रामगीतगोविन्दस्य रचयिता कविर्जयदेवोऽस्ति। किन्त्वयं जयदेवः गीतगोविन्दस्य रचयितुः जयदेवाद्भिन्नो वर्त्तते। ऐतिहासिकानां मतमस्ति यदद्ययावत् त्रयाणां जयदेवानां सूचना विद्यते। प्रथमो जयदेव उत्कलीयो विद्यते, येन गीतगोविन्दं प्रणीतम्, द्वितीयो जयदेवः चन्द्रालोकस्य प्रसन्नराघवस्य च रचयिता दाक्षिणात्यब्राह्मणोऽस्ति। अस्य मातुः नाम सुमित्रा तथा पितुः नाम महादेवः आस्ताम्। अयं विदर्भस्य कुण्डिनपुरवास्तव्य आसीत्। द्वितीय जयदेवः नाटककारः, अलङ्कारशास्त्रप्रणेता तथा दार्शनिक आसीत्। अस्य महाकविजयदेवस्योपाधिः 'पीयूषवर्षः' अस्ति।

चन्द्रालोके कथितमस्ति—

चन्द्रालोकमयं स्वयं वितनुते पीयूषवर्षः कृती।

एकोऽन्यः तार्किकप्रवरपक्षधरः वङ्गीयविद्वानभवत्, अस्य समयः षोडशी शताब्दी विद्यते। प्रस्तुतरामगीतगोविन्दस्य रचयिता जयदेवः मिथिलानिवासी आसीत्। स स्वयं स्वरचनाविषये लिखितवान्—

श्रीमद्विदेहनृपदेशविशेषवासो निःशेषभूमिपतिमण्डलमाननीयः,
एतच्चकार वरगानरसप्रधानं काव्यं कविप्रकरमौलिविभूषणं सत्॥

२४।४, पृ० ८९

× × ×

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीमद्रामायणक्षीरसागरान्मन्दरोपमः,
जयदेवो रामगीतगोविन्दं रत्नमाकरोत् ।

२४१५ पृ० ९० वेंकटेश्वर प्रेस, वंबई

उपर्युक्ताभ्यां पदाभ्यां स्पष्टमस्ति यत् रामगीतगोविन्दस्य रचनां मिथिलानिवासी जयदेवकविः रसप्रधानां रामकथां गृहीत्वा कृतवान् ।

यद्यपि कविः स्वसमयसम्वन्धे न क्वापि कमपि निर्देशं कृतवान्, तथापि ग्रन्थस्य भाषाशैल्याः पूर्वापरसम्वन्धस्य चाध्ययनेनानुमीयते यदस्य रचना वि० सं० १४०० निकटे जाताऽभविष्यत् ।

रामगीतगोविन्दस्य संक्षिप्तं कथावस्तु—

गीतिकाव्येऽस्मिन् रामकथाङ्किता विद्यते । कविः कथावस्तु पट्सर्गेषु, चतुर्विंशतिप्रवन्धेषु च विभाजितवान् । आरम्भे मङ्गलाचरणानन्तरं कविः कथितवान् यत् यदि रामचरणयोः प्रेम भवेत् अथ काव्यकलाज्ञानाय कौतुकं स्यात् तदा जयदेवकविनिर्मितं गीतगोविन्दमिदं पठेत्—

यदि रामपदाम्बुजे रतिर्यदि वा काव्यकलासु कौतुकम् ।
पठनीयमिदं तदौजसा रुचिरं श्रीजयदेवनिर्मितम् । ४

प्रथमगीते मीन-कूर्म-वराह-नरहरि-वामन-परशुराम-राम-कृष्ण-वुद्ध-कल्क्यवताराणां स्तुतिः वर्त्तते । द्वितीयगीते आराध्यस्य रामस्य स्तुतिर्वर्तते । स्तवनेऽस्मिन् रामस्य प्रमुखकार्याणां निर्देशो विद्यते । तृतीयगीते रामावतारस्य कथनं कुर्वता रामस्य रम्यवालरूपस्य चित्रणं निहितम् । कविः कथयति—

इन्द्रनीलाभतनुमतनुशतकोटिरुचिमिन्दुमुखचन्द्रमुरुहारम् ।
कौस्तुभामुक्तकन्धरमरुणफणिपदमम्बुरुहनयनमलितारम् ॥ रामगीत० ३।२

× × ×

कम्बुनिभकण्ठमतिनीलचिकुरावलीविजितजलवाहसङ्घातम् ।
गूढतरजत्रुमाजानुभुजदण्डधरमुरसि भृगुचरणजलजातम् ॥ रामगीत० ३।३

× × ×

कनकमयपट्टमण्डितललाटस्थलं कुन्दकुंकुमाभरदभासम्,
रुचिरमखसूत्रभृतमिन्दिरासङ्कुलं पीतकौशेयशुभवासम् । रामगीत० ३।५

एवं प्रकारेण तृतीयगीते रामस्य रम्यरूपं चित्रितमस्ति तथास्मिन्नेवगीतेऽग्रेऽवतारभेदेन रामलक्ष्मणभरतशत्रुघ्नानामपि वर्णनं विद्यते । चतुर्थगीते रामोऽयोध्यायाः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रतोलीषु विचरति तथा ते नानाप्रकारेण नागरिकाणां मनांसि मोहयन्ति। रामस्य रम्यरूपं वीक्ष्य नागरिकाः प्रसन्नाः भवन्ति तथा स्वभाग्यं प्रशंसन्ति। गीतेऽस्मिन् कविः रामस्य वेशभूषां तथा तद्रूपलावण्यं प्रशंसितवान्। कविः कथयति—

नागलतारसरागधराधरपल्लवमयहृदि हासम्।
कीरमुखाकृतिधीरसुगन्धसमीरणनासावासम्॥ रामगीत० ४।४

महाराजो दशरथश्चतुरोऽवाप्य सुतान् परं प्रसीदति। विश्वामित्रः एकस्मिन् दिनेऽयोध्यामागच्छति।

पञ्चमगीते कथितमस्ति यत् विश्वामित्रः रामस्य कोमलं करं स्पृष्ट्वा कथयति यत् जीवनं सफलयितुं रामेण सर्वतोभावेनात्मा समर्पयितव्यः। गीतेऽस्मिन्नपि कविना रामस्य मनोहरवेशभूषायाः चित्रणं कृतम्। रामो विश्वामित्रस्य यज्ञरक्षार्थं तेन सह चलति। मार्गे रामः जनकष्टदायिनीं ताटिकां हन्ति। रामो यदा विश्वामित्राश्रमं प्राप्नोति तदा सर्वे मुनयः तद्रूपसौन्दर्यं निभाल्य मुग्धाः भवन्ति।

षष्ठगीतेन द्वितीयसर्गारम्भो जायते। अस्मिन् गीते सर्वर्षयः रामं स्तुवन्ति। वाराहपरशुरामादिरूपेषु रामं स्तुवन्ति। यज्ञकालेऽनेके राक्षसा आगत्य विघ्नमुत्पादयन्ति। परं रामः ताः समस्तविघ्नबाधाः विनाश्य राक्षसान् हन्ति। समाप्ते यज्ञे रामः विश्वामित्रेण सह जनकस्य धनुर्यज्ञस्य दर्शनार्थं मिथिलां व्रजति। मार्गेऽसावहल्योद्धारं करोति ततः गङ्गामुत्तीर्य मिथिलां प्राप्नोति।

सप्तमगीते रामः लक्ष्मणं प्रति मिथिलाया महाराजजनकस्य समृद्धि-चित्रणं करोति। जनकः रामलक्ष्मणविषये विश्वामित्रं पृच्छति। विश्वामित्रश्च तत्परिचयं प्रस्तौति। रामः शिवपिनाकमवलोकयति तथा सरलया धनुर्भङ्गं करोति। धनुर्भङ्गेन सर्वत्र रामस्य जयघोषः श्रूयते।

अष्टमगीते धनुर्भङ्गं ज्ञात्वा परशुराम आगच्छति। गीतस्य प्रारम्भे कविः परशुरामस्य वेशभूषां वर्णितवान्। परशुरामः क्रुध्यति तथा रामस्य शक्तिपरीक्षां विधाय प्रसीदति।

नवमगीते रामावतारं ज्ञात्वा परशुरामः रामं स्तौति। गीतिरियं परममधुरा ललिता च विद्यते। कविना लिखितम्—

जय रामचन्द्र कमला-विहार।
जय कोशलेश करुणावतार॥

—ध्रुवपदम्।

× × ×

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रघुवंशकमलकान-दिनेश ।
कन्दर्पकोटिकमनीयवेश ॥ २ ॥

× × ×

कालाग्निसदृशकोपातिरेक,
गन्धर्वगीतपूरितविवेक ॥ ३ ॥ नवमगीत

परशुरामः रामस्य गुणान् गीत्वा स्वाश्रमं निवर्त्तते ।

दशमगीतेन तृतीयसर्गः प्रारम्यते । अस्मिन् दशमगीते जनकपुरोधाः सतानन्दः रामस्य रूपगुणान् प्रशंसति तथा तद्वेषभूषां वर्णयति। एतत्पश्चात्, जनकः कुलपति वशिष्ठं प्रार्थयते यत् हे कुलगुरो ! भवान् मम हितेच्छुकोऽस्ति । सम्प्रति मया किं विधेयम् ? आज्ञापयतु । वशिष्ठः जनकं रामचरणारविन्दयोः पूजार्थमादिशति ।

एकादशगीते जनकः रामचरणयोः महत्त्वं प्रतिपादयन् स्तौति । स रामस्य पादौ प्रक्षालयति । विधिः विवाहस्य सम्पाद्यते । जनक. युतके गाः, महिषीः तुरंगान्, गजान्, शिविकाः, नानावस्त्राभूषणानि, दास-दासीश्च ददाति । विवाहे सम्पन्ने राम अयोध्यामायाति ।

द्वादशगीते रामस्य सरयूतीरविहारस्य वर्णनमस्ति । प्रसङ्गेऽस्मिन् जलस्य, तटस्य, जलविहरणशीलहंसचक्रवाकादिपक्षिणामपि चित्रणमस्ति । कविजयदेवेन सरय्वाः वर्णनं सरसं साङ्गोपाङ्गं च विहितम् । रामः प्रत्यहं विचारगोष्ठ्या, शीलेन, यज्ञेन, चित्रेण, वाद्येन, कलया, अश्वारोहणादिभिः महाराजदशरथस्य मनोरञ्जनं करोति स्म । एकदिने महाराजदशरथेन दर्पणे कर्णमूले श्वेतकेशाः विलोकिताः, येन तन्मनसि व्याकुलताऽजायत तथा तेन कुलगुरुवशिष्ठेन सह रामस्य राज्याभिषेक-परामर्शो विहितः ।

त्रयोदशगीते कैकेय्याः वरयाञ्चायाः निरूपणमस्ति। कैकेयी नृपं दशरथं रामस्य वनगमनं भरतस्य च राज्याभिषेकं याचते । दशरथो वरं ददाति । रामः लक्ष्मणेन सीतया च सह वनं प्रयाति ।

चतुर्दशगीते लक्ष्मणो रामं प्रति प्रयागमहत्त्वं वर्णयति—

पश्य, पश्य रघुवीर प्रयागम्,
मज्जदखिलमुनिगणमतिरागम् ।
सीतया सह सन्ततमेतत् । ध्रुवपदम् ।

पञ्चदशगीतेन चतुर्थसर्गारम्भो भवति । गीतेऽस्मिन् रामः सीतां चित्रकूट-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शोभां दर्शयति। चित्रकूटस्य पशुपक्षिणां मणिमाणिक्यानाम्, प्राकृतिकरम्यप्रदेशानाञ्च चित्रणं करोति। कविरस्मिन् सन्दर्भे निर्भरसलिलशीकराणां कोकविरावादेश्च सजीवं निरूपणं विहितवान्। रामचन्द्रः दण्डकवनं प्राप्नोति।

षोडशगीते दण्डकवनचारुता चर्चितास्ति। दण्डकवने सर्वे मुनयः निर्भयाः भूत्वा निवसन्ति। अत्रत्याः पशुपक्षिणोऽपि प्रेमपूर्वकं निवसन्ति। ऋष्यमूकपर्वते रामस्य हनुमता सुग्रीवेण च सह मित्रता जायते।

सप्तदशगीते सुग्रीवः स्वमनसि रामनाममहत्त्वं स्मरति तथा तस्योदारतायाः स्नेहस्य शीलस्य च चिन्तनं विधाय मनसि आह्लादितो भवति। सीताहरणकारणात् रामः चिन्तितो विद्यते तथा सुग्रीवः सीतान्वेषणार्थं वानरसेनामादिशति।

अष्टादशसर्गे हनुमान् लङ्कां गत्वा तत्रत्यभीषणतामवलोकयति तथा निःशङ्को भूत्वा लङ्कायां सीताया अन्वेषणं करोति। हनुमान् सीतामशोकवाटिकायां प्राप्य रामस्य मुद्रिकां समर्पयति तथा सीतायै धैर्यं दत्वा तस्याश्चूड़ामणिं गृहीत्वा पुनः निवर्तते।

एकोनविंशगीते हनुमान् रामस्य सम्मुखे सीतायाः दशायाः वर्णनं करोति। अतः पञ्चमसर्गः प्रारभ्यते। गीतेऽस्मिन् सीतायाः दयनीयदशायाश्चित्रणमस्ति।

विंशगीते लक्ष्मणः रामाय समुद्रोत्तरणाय सेतुनिर्माणपरामर्शं ददाति। वानरसेना सेतुं निर्मांति। नलनीलाभ्यां निर्माणकार्यविधिः सञ्चाल्यते। सेतुनिर्माणानन्तरं रामसेना समुद्रमुत्तीर्य लङ्कां प्राप्नोति तथा परिवेष्टयति। राक्षससेनावानरसेनयोर्मध्ये महद्युद्धं भवति।

एकविंशगीते रामरावणयुद्धवर्णनं वर्त्तते। रामः कुम्भकर्णरावणवधं करोति।

द्वाविंशे देवाः रामं स्तुवन्ति तथा नभसः प्रसूनं वर्षन्ति।

त्रयोविंशगीतेन षष्ठसर्गारम्भो भवति। गीतेऽस्मिन राम अयोध्यामायाति तथा तत्र नागरिकाः रामस्य दर्शनं कृत्वाऽत्यन्तं प्रसीदन्ति तथा तं स्तुवन्ति।

चतुर्विंशगीते वैतालिकाः प्रातःकाले रामं शयनात् प्रबोधयितुं गुणान् गायन्ति। ते मधुरालापेन गायन्ति—

उदयति भानुरयं विधुना सममेति समस्ततमिस्रम्।
दधति नभोऽरुणतामरुणेन बभूव सरोजसमिश्रम्॥ रामगीत० २४।२

× × ×

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विकसति पद्मवनं सकलं विहगावलिदातिनिनादम्,
हंसविरावविबोधितचक्रनिचयगतसर्वविषादम् । २४।३

रामस्तवनमाहात्म्येन सह गीतिकाव्यं समाप्यते ।

काव्यमूल्यं गीतितत्त्वञ्च

एतत् तालवद्धं गीतिकाव्यमस्ति । प्रथमजयदेवस्य गीतगोविन्दानुकरणोपरि तृतीयजयदेवेनेदं रामगीतगोविन्दं व्यरचि । गीतगोविन्दस्य वर्ण्यविषयः कृष्णेन सम्बद्ध आसीत् तथा कृष्णेन सम्बद्धस्य वृन्दावनस्य, यमुनायाः, करीलकुञ्जादेः साङ्गोपाङ्गचित्रणं कृतमस्ति । एवमेवास्मिन् गीतिकाव्ये रामेण सम्बद्धायाः अयोध्यायाः, सरय्वाः, चित्रकूटस्य, दण्डकारण्यादीनां स्थानानां मधुरचित्रणमस्ति । निश्चयत एतत् गीतगोविन्दस्यानुकरणमस्ति तथा कतिपयललितपदानि गीत-गोविन्दात् गृहीतानि सन्ति ।

अलङ्कारयोजनादृष्ट्या गीतिकाव्येऽस्मिन् रूपकोपमोपमोत्प्रेक्षाद्यर्थालङ्का-रा अनुप्रासयमकादिशब्दालङ्काराश्च समाविष्टाः सन्ति । ललितमधुरपदयोः योजनां विधायैतद्गीतिकाव्यरमणीयतासम्पादने कविना चेष्टितम् । मानवः कवितायां ललितपदैः स्वसहजकलात्मकप्रवृत्तेः परिचयं ददाति । यदास्माकं भावनोद्दीप्ता जायते, तदास्माकं वाण्यपि स्वयमेवोद्दीप्ता जायते । मनसः ओजसः माध्यममावेगोऽस्ति, वाण्या ओजस सहजमाध्यममस्ति 'अतिशयोक्तिः' । यतः आत्मदर्शनप्रदर्शनयोरतिशयतत्त्वमनिवार्यतो भवति । अतिशयोक्तेरर्थोऽस्ति— असाधारण्युक्तिः ।

उपमालङ्कारः समस्तसादृश्यमूलकालङ्काराणां मूलं मन्यते । सादृश्याभावेऽस्या-लङ्कारस्य स्थितिः न सम्भाव्यते । एवं तु कवितात्मा भावः विचारः कल्पना च विद्यते । एतैरेव कवितायां स्थायित्वमायाति । सादृश्यं कविता-कामिनीं सुन्दरीमधिकां निर्माय स्थायित्ववृद्धिं करोति । ललितपदशय्या अलंकृतायामपि चमत्कारमुत्पाद-यति । अत्र प्रस्तुतगीतिकाव्यात् कानिचनोदाहरणानि प्रस्तूयन्ते । उपमायाः योजना निम्नलिखितपद्येषु विद्यते—

रामवदनमतिमञ्जु विलोकय ।
शारदकोटिशशिनमिव निर्मलमक्षिचकोरं रोपय ॥ ४।१, पृ० १६

पद्येऽस्मिन् 'शारदकोटिशशिनमिव' वाक्यांशे उपमास्ति । रामस्य मुखं शत-शरत्कालीनविधूनां निर्मलतासदृशं स्वच्छं मनोज्ञं तथाकर्षकं विद्यते । अस्य मुखस्याव-लोकनाय अक्षिचकोरो नियोजनीयः । अक्षिचकोरे रूपकस्यापि सम्भावना विद्यते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यतोऽक्षिणि चकोरारोपः कृतोऽस्ति । प्रकारान्तरेण समस्तपद्यस्य सहैव ग्रहणेऽतिशयोक्तिरपि सम्भाव्यते ।

रामस्य रूपचित्रणे उपमायाः अन्यमपि द्रष्टव्यमुदाहरणम्—

क्षीरपयोनिधिवीचिविनिन्दकविशदमनोहरहासम्,
कुन्दकुसुमकमनीयलसद्दशनावलिकिरणविकाशम् ॥ ४।३। पृ० १६

क्षीरसमुद्रस्य तरङ्गसदृशे मनोहरहास्ये सुन्दरकुन्दकुसुमसदृशायां दशनावल्यामप्युपमास्ति । उपमायाः (राम० २१४, पृ० १०) (२।१ पृ० १०) (५।२०, पृ० २४) प्रयोगे उपलब्धोऽस्ति । रूपकस्य सुन्दरमुदाहरणं निम्नप्रकारमस्ति—

रघुवंशकमलकाननदिनेश ।
कन्दर्पकोटिकमनीयवेश ॥ राम० ९, २, पृ० ३९

अत्र 'रघुवंशकमलकाननदिनेशे' रूपकमस्ति । रामः रघुवंशरूपकमलकाननविकासाय सूर्योऽस्ति । रामभावनादृष्ट्या गीतिकाव्येऽस्मिन् वीर-श्रृङ्गार-भयानकरसानां सुन्दरपरिपाकोऽस्ति । एकविंशगीते रामरावणयुद्धप्रसङ्गे वीररसस्य सुन्दरं चित्रणमायातमस्ति । वीरसम्बन्धि-विभावानुभावसञ्चारिभावानां पूर्णा सामग्री विद्यते । रामः रावणं भर्त्सयन् कथयति—

तिष्ठ विमूढमते समरे दशकण्ठमिति प्रवदन्तम्,
प्रस्फुरिताधरपल्लवयुगप्रविभासिमनोहरदन्तम् ॥ २१।७, पृ० ६९

× × ×

रामस्य वीरवेषं चित्रयन् लिखितवान्—

करकोदण्डशरप्रभया लसमानसमस्तशरीरम्,
शक्रसमर्पितवर्मभृतं समराब्धिविलङ्घनधीरम् ॥ २१।३, पृ० ६८

श्रृङ्गाररसस्य चित्रणसन्दर्भे संयोगवियोगावुभावपि पक्षौ लभ्येते । संयोगश्रृङ्गाररूपेण सरयूतटे रामविहारस्य चित्रणं कृतमस्ति । यथा—

विहरति हरिरिह सरयूकूले,
पद्मरागचामीकरमकरतबद्धविविधतरुमूले ॥ १२।१, पृ० ५१

× × ×

सादरमज्जदमितयुवतीकुचकुङ्कुमपिङ्गलनीरे ।
शमदमादिसाधनविवेकवशमुनिजनसंकुलतीरे ॥ १२।२। पृ० ५१

अशोकवने स्थितायाः विरहाग्निपीडितायाः सीतायाः दयनीयावस्थायाः चित्रणं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हनुमता कृतम् । यद्यप्यस्मिन् प्रसङ्गे विभावादेरुत्पत्तिर्न जातास्ति, तथा वियोगावस्था मूर्त्तिमती बभूव । यथा—

विरहतया विदधाति न हासम् ।
जनयति वह्नितविषमनिश्वासम् ॥१९।६। पृ० ७३

× × ×

कृशशरीरगतिरतिशयदीना ।
भूमिशयासनसलिलविहीना ॥ १९।२। पृ० ७२

एवमेव प्रसाद-माधुर्य्यौजसां समावेशोऽपि काव्येऽस्मिन् निहितोऽस्ति । युद्धवर्णन-प्रसङ्गे समुद्रसेतुबन्धनप्रसङ्गे चौजोगुणोऽस्ति । प्रसादमाधुर्य्ययोस्तु स्थितिः सर्वत्र विद्यते ।

सङ्गीततत्त्वदृष्ट्यापि गीतिकाव्यमेतत् समृद्धमस्ति । अस्मिन् वसन्तरागः (राम गी० २), मालवरागः (गीत १५), गुर्जरीरागः (गीत ३, १२, २०), रामकरी (गीत ६, १०), आशावरीरागः (गीत ४, ७, ८, १५, १६), देशवराडीरागः (गीत ११), देशरागः (गीत १९), तथा भैरवीरागः प्रयुक्ताः सन्ति । रूपकतालः (गीत १,३,६,५,७,८,९,१२,१५,१६,१८) प्रतिमण्ठ-तालः (गीत ५) अष्टतालितालः (गीत ११) यतितालः (गीत १३) प्रयुक्ताः सन्ति । वसन्तरागे उभयोः मध्यमयोः ललिताङ्गेन गृह्येते । उत्तराङ्ग-प्रधानत्वात् अस्मिन् तारषड्जे विशेषं बलं दीयते । अस्य परजरागस्य च स्वराः सदृशाः सन्ति । अतः मे ध रें सां और रें नि ध प मे ग मे ग प्रयोगेणायं रागः शीघ्रमेव स्पष्टो जायते । मालवरागस्य गणना प्रातःसान्ध्यकाले च गीयमान-रागेषु विधीयते । सांध्यकालीनरागेषु विशेषरूपेणास्य स्थानं विद्यते । अस्य विचित्रता 'रे ग ध' स्वरेषु निर्भरास्ति । उत्तरभारते 'आशावरी'-रागे कोमलर्षभं संयोज्य गानप्रचारोऽस्ति । तं च कोमलर्षभस्याशावरीं कथयन्ति । परं दाक्षिणात्या इमं तीव्रर्ष-भेण गायन्ति । रागस्यास्य वैचित्र्यं ग, प, ध स्वरेषु निर्भरमस्ति । अवरोहेऽयं रागः विशेषरूपेण विकसति ।

रामकरीरागस्य साधारणरूपं भैवररागसदृशमस्ति । अस्य रागस्य प्रथमप्रकारे 'म नि' स्वरावरोहे वर्जितौ स्तः । द्वितीयप्रकारे आरोहावरोहयोः सप्तापि स्वराः प्रयुज्यन्ते । परमयं प्रकारः भैरवरागेण सह मिलति । पार्थक्यमेतावदेवास्ति यत् अस्य मध्य-तार-स्थानयोः विस्तारो भवति । अस्य तृतीयप्रकारे उभौ मकारौ तथौभौ 'नि' स्वरौ प्रयुज्येते । एवं तीव्र'म'स्य कोमल 'नें' श्च प्रयोगः विचित्रप्रकारेण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवति। म प ध नि ध प, म, ग, रे सा एवं त्रयः स्वराः रामकरीरागस्यास्मिन् प्रकारे मिलन्ति।

भैरवः परं प्राचीनः गम्भीररागो वर्त्तते। रागेऽस्मिन् रे-ध स्वरावत्यन्तमहत्त्व-पूर्णौ विद्येते। भैरवस्यारोहे ऋषभस्याल्पत्वं तिष्ठति तथा मध्यमात् ऋषभोपरि वक्र-तया गमने माधुर्यमस्य वर्द्धते।

देशरागस्य स्वरूपं सोरठारागेण मिलति। रागेऽस्मिन् गान्धारस्वरः स्पष्टरूपेण गृह्यते। अस्यारोहे 'ग-ध' स्वरौ वर्जितौ स्तः। आरोहे—सा रे म प नि सां तथावरोहे सां नि ध म प ग रे ग सा स्वराणां व्यवहारो भवति।

गुर्जररागे आरोहे सा रे ग म ध नि सां तथावरोहे सां नि ध प म ग सा स्वराः प्रयुज्यन्ते। अयं प्रातःकालीनो रागोऽस्ति। एवं रामगीतगोविन्दं गीतितत्त्वैः पूर्णमस्ति।

गीतिगिरीशम्

यद्यपि गीतिगिरीशं प्रकाशितं विद्यते परं तस्यानुपलब्धेः तस्योपरि प्रकाशः सम्भवो नास्ति। अस्योपलब्धैः कैश्च पद्यैरस्य मौलिकता सिद्ध्यति।

गीतवीतरागः

गीतवीतरागस्य रचना गीतगोविन्दाधारे श्रीमदभिनवपण्डिताचार्यचारुकीर्त्ति-महोदयेन कृता। अयं दक्षिणभारतस्थितश्रवणवेलगोलानामकजैनमठस्य भट्टारक आसीत्। इदं स्थानं 'मैसूर'राज्येऽवस्थितमस्ति। श्रवणवेलगोलायाः समस्तभट्टार-काणां नाम चारुकीर्त्तिः प्राप्यते। अस्य मठस्य भट्टारके जातमात्र एव नाम परिव-र्त्तितमभवत् तथा 'चारुकीर्ति' नामकरणमभूत्। एतत् तत्सिंहासनस्य भट्टारका-णामुपाधिनाम वर्तते। संस्कृत प्राकृत भाषयोः मूर्धन्यविद्वान् डा० ए० एन० उपाध्ये महोदयः शिवाजी विश्वविद्यालयस्य पत्रे (जरनले) कियतीनां पाण्डुलिपीनामाधारे गीतवीतरागस्य रचयितरि तद्विषयवस्तुनि च परमः प्रकाशो दत्तः। निबन्धेऽस्मिन् डा० उपाध्ये महोदयेन काव्यस्यास्य कन्नड-टीकाया अपि निर्देशः कृतः। अस्य ग्रन्थस्य प्रशस्तेराधारे रचयितुः पण्डिताचार्यस्य जन्म सिंहपुरेऽभवत्। यदायं श्रवणवेलगोलायां भट्टारकपदमधिगतवान्, तदास्योपाधिः चारुकीर्त्तिरभूत्। असौ ग्रन्थस्यास्य प्रणयनं श्रवणवेलगोलायां परमपूज्यगोम्मटस्वामिनः चरणसमीपे कृतवान्। काव्यान्ते प्रशस्तिरङ्किताऽस्ति, या निम्नप्रकारा विद्यते—

गाङ्गेयवंशाम्बधिपूर्णचन्द्रः यो देवराजोऽजनि राजपुत्रः,
तस्यानुरोधेन च गीतवीतरागप्रबन्धं मुनिपश्चचकार। १।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्राविडदेशविशिष्टे सिंहपुरे लब्धशस्तजन्मासौ,
वेलुगोलपण्डितवर्यश्चक्रे श्रीवृषभनाथवरचरितम् । २ ।
स्वस्ति श्रीवेलगोले दोर्बलिजिननिकटे कुन्दकुन्दान्वयेनोऽ-
भूत् स्तुत्यः पुस्तकाङ्कश्रुतगुणभरणः ख्यातदेशीगणार्यः,
विस्तीर्णाशेषरीतिप्रगुणरसभृतं गीतयुग्वीतरागम्
शस्ताधीशप्रबन्धं बुधनुतमतनोत् पण्डिताचार्यवर्यः ।

इति श्रीमद्रायराजगुरुभूमण्डलाचार्यवर्यमहावादवादीश्वररायवादिपितामहसकल विद्वज्जनचक्रर्वात्तिवल्लाड्रायजीवरक्षापालकृत्याद्यनेकविरुदावलीविराजितश्रीमद्बेलुगुलसिद्धसिंहासनाधीश्वरश्रीमदभिनवचारुकीर्त्तिपण्डिताचार्यवर्यप्रणीतगीतवीतरागाभिधानाष्टपदी समाप्ता ।

—श्री जैनसिद्धान्तभवन, आराकी पाण्डुलिपि ।

काव्यरचयित्रा स्वसमयस्य परिचयो न दत्तः । बोम्भरसस्य टीका (१८४२-४४) मध्ये लिखितास्ति । तथा प्राप्तपाण्डुलिपिभ्य एका पाण्डुलिपिः (१७५८) खीष्टाब्दस्योपलब्धास्ति । अतएवास्य काव्यस्य रचना १७५८ खीष्टाब्दात् पूर्वमभूत् । पार्श्वाभ्युदयस्य टीका चतुर्दशखीष्टाब्देरभूत् । अत एव गीतवीतरागस्य कर्त्तुः समयः १४००–१७५८ खीष्टाब्दस्य मध्येऽस्ति ।

वर्ण्यविषयः

गीतवीतरागः गीतवीतरागप्रबन्धोऽपि कथितः । अस्मिन् कविना स्वाराध्यस्यर्षभदेवस्य दशजन्मनामाख्यानं गीतेषु निबद्धवान् । सूक्ष्मकथावस्तु चतुर्विशतिप्रबन्धेषु विभक्तमस्ति । प्रथमप्रबन्धे महाबलस्य धर्मप्रशंसा, द्वितीये महाबलस्य वैराग्योत्पादनम्, तृतीये ललिताङ्गस्य वनविहारः, चतुर्थे श्रीमत्याः जातिस्मरणम्, पञ्चमे वज्रजंघस्य पट्टकार्थविवरणम्, षष्ठे वज्रजङ्घस्य श्रीमत्याश्च सौन्दर्यवर्णनम्, सप्तमे श्रीमत्या विरहवर्णनम्, अष्टमे भोगभूमिवर्णनम्, नवमे आर्यस्य गुरुगुणस्मरणम्, दशमे श्रीधरस्य स्वर्गवैद्यवर्णनम्, एकादशे सुविधिपुत्रसम्बोधनम्, द्वादशे अच्युतेन्द्रस्य दिव्यशरीरवर्णनम्, त्रयोदशे वज्रनाभेः सौन्दर्यवर्णनम्, चतुर्दशे सर्वार्थसिद्धिविमानस्य, पञ्चदशे महादेव्याः, षोडशे मरुदेव्याः स्वप्नानां, सप्तदशे प्रभातस्य, अष्टादशे जिनजन्माभिषेकस्य, एकोनविंशतितमे परमौदारिकदेहस्य, विंशतितमे ऋषभदेववैराग्यस्य, एकविंशतितमे भगवत ऋषभदेवस्य तपसः, द्वाविंशतिमे समवशरणवेद्याः, त्रयोविंशतितमे समवशरणभूमेः, चतुर्विंशतितमे अष्टप्रतिहार्याणां वर्णनानि विद्यन्ते ।

गीतिकाव्येऽस्मिन् दशावतारवत् राज्ञो जयवर्मणः, महाबल विद्याधरस्य, ललि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ताङ्गदेवस्य, वज्रजङ्घस्य, आर्यस्य, श्रीधरस्य, सुविधेः, वज्रनाभेः, सर्वार्थसिद्धेः, ऋषभदेवस्य च गीतात्मकनिरूपणं कृतं विद्यते ।

अलकापुर्यां महाबलनामको राजा स्वयंबुद्ध-महामति-सम्भिन्नमति-शतमति नामकमन्त्रिभिः सह राज्यमकरोत् । राजा मन्त्रिषु शासनभारं परित्यज्य भोगोपभोगसेवनासक्तो बभूव । एषु मन्त्रिषु स्वयंबुद्धः, एकान्तवाद-शून्यवादस्य समर्थकः । उक्तसिद्धान्तस्य निःसारतामुपदिष्टवान् । एकस्मिन् दिने राजा महाबलः निशान्ते स्वप्नं दृष्टवान् यद् दीपकस्य प्रकाशः क्षीणः जायमानोऽस्ति । स्वायुषोऽन्तं विज्ञाय राजा महाबलः सल्लेखनां धृतवान् तथा मृत्वैशानस्वर्गे ललिताङ्गनामकः महर्द्धिदेवो बभूव ।

ललिताङ्गः स्वदेव्या स्वयंप्रभया सह सांसारिकभोगे मग्नो जातः । यदायुषः षड्मासाः शेषा अभवन्, तदा तस्य ग्रीवायाः मन्दारमाला मलिनाभवत् यतो ललिताङ्गः मानसिकवेदना अनुभूतवान् । स धैर्यं धृत्वा चैत्यवृक्षाधः समाधिद्वारेण स्वर्गायुः पूर्णं कृतवान् तथा ततश्च्युतो भूत्वापूर्वविदेहस्य पुष्कलावती देशस्योत्पलखेटनगरस्य राज्ञो वज्रबाहोः राज्ञ्याः वसुन्धरायाः गर्भाद् वज्रजङ्घनामको नृपपुत्रोऽभूत्, तथा स्वयम्प्रभा 'पुण्डरीकिणी' नगर्याः राज्ञः वज्रदन्तस्य गृहे 'श्रीमती' नाम्नी पुत्री बभूव । यशोधरगुरोः कैवल्यमहोत्सवकृते देवानाकाशमार्गेण गच्छतो निरीक्ष्य श्रीमती पूर्वभवं स्मृतवती तथा सा स्वप्रियं ललिताङ्गं प्राप्तुं विकला कृतसंकल्पा च जाता । पण्डितया धात्र्या तस्याः साहाय्यं कृतम् । सा श्रीमतीनिर्मितैः प्रतीकैः युक्तं चित्रपटं गृहीत्वोत्पलखेटनगरस्य महादूतजिनालयं प्राप्तवती । अत्र चित्रपटं प्रसारितवती तथा दर्शकाः तं वीक्ष्य चकिताः जाताः । परं तस्या यथार्थरहस्यात्सर्वेऽनभिज्ञा अतिष्ठन् ।

ललिताङ्गजीवः वज्रजङ्घः महापूतजिनालये समागच्छति तथा तं चित्रपटं वीक्ष्यैव पूर्वजन्म स्मरति । फलतोऽसौ स्वप्रियायाः स्वयंप्रभायाः जीवं प्राप्तुं व्यग्रो भवति । पण्डितायै धात्र्यै सोऽपि चित्रपटमुपहरति, यस्मिन् स्वयंप्रभायाः जीवनरहस्यमङ्कितं करोति । वज्रजङ्घः पुण्डरीकिण्यां नगर्यां समागच्छति तथा श्रीमत्या सह तस्य विवाहः सम्पन्नो भवति । एकस्मिन् दिने शरत्काले वज्रजङ्घस्तथा श्रीमती शयनागारे शयनं कुर्वतावास्ताम् तथा सुगन्धितद्रव्यस्य धूमो व्याप्त आसीत् । गवाक्षे पिहिते श्वासावरोधेन तयोः निधनं जातम् तथा तौ पात्रदानप्रभावात् उत्तरकुरौ "आर्य आर्या च" बभूवतुः । प्रीतिकरमुनिराजस्य सम्पर्कात् आर्यो मृत्वेशानस्वर्गे श्रीधरनामो देवो बभूव । आर्यापि तस्मिन् स्वर्गे देवी बभूव ।

स्वर्गच्युतः श्रीधरदेवजीवः पूर्वविदेहस्य 'सुसीमा'नगर्यां सुदृष्टिराजगृहे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुविधनामकः पुत्रो जातः । सुविधःपुत्रस्यानुरागकारणात् दिगम्बरीं दीक्षामधृत्वा गृह एव श्रावकव्रतान् पालयन् अच्युतेन्द्रो जातस्तथा ततश्च्युतो भूत्वा वज्रनाभिश्चक्रवर्ती बभूव । एतत्पश्चात् अत्र षोडशकारणभावनानां चिन्तनं कृत्वा तीर्थंकरः प्रकृतिबन्धो बभूव । अत्र प्रायोपगमनसंन्यासं धृत्वा सर्वार्थसिद्धिविमाने समुत्पन्नो जातः ।

सर्वार्थसिद्धेः च्युतोभूत्वा साकेतनगर्याः महाराजनभिरायस्य मरुदेव्याश्च गृहे पुत्ररूपेण जन्म लेभे । ऋषभदेवस्य सुमेरुपर्वतोपरि मघवता जन्माभिषेकोत्सवः सम्पादितः । बहुकालं यावत् राज्यंसुख-सम्पत्तिञ्चोपभुज्य तत्पश्चात् एकां मार्मिकीं घटनामनुभूतवान् । नीलाञ्जना नाम्नी नर्त्तकी नृत्यन्ती सहसा विलीना जाता । ऋषभदेव इमामघटितघटनां पश्यन्नेव विरक्तोऽभवत् । स्वर्गात् लौकिकान्तिकदेवैरागत्य तस्य वैराग्यस्य पुष्टिः कृता । स साकेत-पट्टे भरताभिषेकं विधायान्यपुत्रान् यथायोग्यं राज्यं दत्वा दीक्षितो जातः । ऋषभदेवः घोरं तपश्चरणं कृत्वा केवलज्ञानं प्राप्तवान् तथा समवशरणसभायां जनतायै सुखशान्त्युपदेशं दत्तवान् । अन्तेऽसौ निर्वाणपदं प्राप्तवान् ।

काव्यमूल्यम्

कस्या अपि 'कृतेः काव्यशास्त्रीयमूल्यनिर्धारणाय तस्यां प्रतिपादितजीवनस्य स्थायिमूल्येषु, तथ्येषु, सिद्धान्तेषु च विचारः परमावश्यको भवति । गीतवीतरागस्यामृतवाण्यां काव्यकलाया उचितसमवायः प्राप्यते । अस्मिन् प्रेम्णो ज्ञानस्य-सौन्दर्यस्य, भक्तेश्च समन्वयात्मकं रूपं विद्यते । अस्मिन् प्रबन्धकाव्योचितं स्वाभाविकं सौन्दर्यं गीतिकाव्योचितं माधुर्यं स्तोत्रकाव्योचिता तन्मयता च प्राप्यन्ते । रसानुभूत्यां गीतगोविन्दसदृश्यां सत्यां श्रृङ्गारशान्तरसधारा प्राप्यास्ति । कविः स्वकल्पना-वैभवेन नित्यं नवीनां सृष्टिं करोति तथा जीवनस्य वास्तविकर्मावगत्यै प्रयतते । मानवस्यान्तः प्रदेशो चेतनायाएको गूढः प्रबलश्चावेगोऽस्ति । अनुभूतिस्तस्यावेगस्य सत्या सजीवा साकारा च प्रतिभास्ति। एतस्यै अनुभूत्यै व्यक्ति-धर्म-समाज-देशकालानाञ्च बन्धनं नापेक्षितमस्ति । कविः स्वविचाराणां हृदयगतभावनानाञ्चाभिव्यक्तिं काव्यशास्त्रस्य माध्यमेनैव करोति । प्रेम, विवाहः, हर्ष-विनोदौ, रस-माधुर्यप्रभृतिजीवनमूल्यानि काव्यपरिवेशे अभिव्यज्यन्ते ।

ज्ञानेन्द्रियाणां माध्यमेन यासां भावनानां संवेदनानाञ्च प्रभावो मनस उपरि पतति, तासां संस्काराः अङ्किताः भवन्ति । कविरन्यः सहृदयो वा संस्कारानिमान् स्वप्रेषणीयक्रियया पाठकानां चित्तेषु प्रेषयति । एषा प्रेषणकुशलतैव काव्यशास्त्रीयं मूल्यमस्ति । अन्यशब्देषु कथयितुं शक्यते यत् कविकल्पना शब्दानामवलम्बेन बिम्ब-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निर्माणं करोति, येषां दर्शनं चर्मचक्षुर्भिर्न जायते। मूर्तिविधायिनी कल्पना सुन्दरातिसुन्दराणां बिम्बानां प्रतिमानाञ्च निर्माणं विदधाति। यतः सौन्दर्यानुभूतिजन्यस्यानन्दस्य प्राप्तिर्जायते। कोऽपि कलाकारः स्वकृत्या जनमानसे यावदधिकं भावोद्रेकमुत्पादयितुं समर्थोभवत्ति, सा कृतिः काव्य-तत्त्वदृष्ट्या तावती मूल्यवती ज्ञायते। वस्तुतः कस्यापि ग्रन्थस्य काव्य-शास्त्रीयं मूल्यं जीवनयोग्यामानन्दानुभूतिं तथा जीवनसंस्कृतेरुदात्तप्रेरणांप्राप्यानन्दसरोवरे चित्तं समाहितं कर्त्तुं प्राप्तायां क्षमतायामेव निर्भरं भवति।

प्रस्तुतकाव्ये गीतवीतरागे जीवनमूल्यानां विवेचनप्रसङ्गे रसचर्वणापि परमोत्तमरूपेण घटितास्ति। श्रीमती स्वपूर्वजन्मनः पतिं ललिताङ्गं स्मरति। सा स्वसंकल्पितपतिवियोगे व्यथिता जायते। कविः पण्डिताचार्योऽस्मिन्नवसरे यद्गीतं प्रस्तुतवान्, तत् केवलं श्रीमत्या एव हृदयाभिव्यक्तिं न करोति, प्रत्युत चेतनात्मकसमस्तप्राणिनां हृदयस्याभिव्यञ्जनां करोति—

चन्दनलिप्तसुवर्णशरीरसुधौतवसनवरधीरम्,
मन्दरशिखरनिभामलमणियुतसन्नुतमुकुटमुदारम्।
कथमिह लप्स्ये दिविजवरं मानिनिमन्मथकेलिपरम् ॥ध्रुवपदम्॥
इन्दुरविद्वयनिभमणिकुण्डलमण्डितगण्डयुगेशम्,
चन्दिरदलसमनिटिलविराजितसुन्दरतिलकसुकेशम् ॥कथमिह॥
शारदशशधरवदखिलह्लादनकारकवदनसुकान्तम्,
भूरिमनोहरनर्म्मकथनरसस्यन्दिलपनवरशान्तम् ॥कथमिह॥
केलिरणन्मणिगणघृणिरञ्जितहारकदम्बकमानम्,
बालदिवाकरकाशविभूषणशोभितवत्सधरेनम् ॥कथमिह॥
विविधमणिरचितभूषण भूषित कोमलतरभुजदण्डम्,
सुविशदसदमलसरसगुणनिकरनिधिनिक्षेपकरण्डम् ॥कथमिह॥
स्फुरदन्त्यकाञ्चनविरचितरसनाविलसितमध्यशरीरम्।
वरवज्रसारशिरीषसुकोमलवामजङ्घोरुयुगेरम् ॥कथमिह॥
मृदुलसरलत्तलचलनविलोलितविमलकमलसमपादम्।
सदमलचेलसदञ्चलचञ्चलमञ्जुलकेलिविनोदम् ॥कथमिह॥
योजनपरिमितविक्सुरभीकृतदेहभृदभिनवकायम्।
व्याजरहितनवरसभरितामरभोगपयोनिधिसोमम् ॥कथमिह॥

इन्दुर्घर्मकरायते प्रियतमे वायुश्च हीरायते,
लेपोऽपि ज्वलनायते कुसुमसन्मालाहि जालायते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आवासो गहनायते स्मरवशाद्देहोऽपि कारायते
हा कष्टं पतिविप्रयोगसमयः संवर्त्तवेलायते ॥ ४ ॥
—गीतवीतरागः, चतुर्थप्रवन्धः, प्रथमाष्टकम्

उपर्युक्तगीते श्रीमती ललिताङ्गस्यवेशभूषामाहारविहारौ, क्रियाकलापम्, अङ्गप्रत्यङ्गानि, तथान्यजीवन-मूल्यानि चिन्तयन्ती स्वमनोव्यथाः व्यनक्ति । अस्यै चन्द्रः घर्मवत्, शीतवायुः वज्रावर्त्तसदृशः, चन्दनलेपोऽग्निज्वालसमः, पुष्पमाला सर्पसमूहवत् भवनमातङ्कपूर्णदरीवत् शरीरं कारागारतुल्यञ्च प्रतीयन्ते ।

स्पष्टमस्ति यदुपर्युक्तगीते विप्रलम्भशृङ्गारस्य सम्यक् परिपाको जातः । पदशय्यायाः, पदविन्यासस्य तथा सङ्गीतस्य प्रभावेण विप्रलम्भगतिः परिवर्द्धिता । अनुभावानां वर्णनमपि वर्त्तते । सन्दर्भेऽस्मिन्नृविभिन्नसञ्चारिणां व्यञ्जनापि प्राप्यते ।

सप्तमप्रवन्धे श्रीमत्याः विरहस्य सरसचित्रणं प्राप्यते । अस्मिन् विप्रलम्भस्य करुणरसस्य चापूर्वं सम्मिश्रणमस्ति ।

संयोगशृङ्गारस्य चित्रणप्रसङ्गे मरुदेव्याः अङ्गप्रत्यङ्गानामाभूषणानाञ्च सरसं सजीवञ्च वर्णनमस्ति । सञ्चारिभावा अप्येकत्र जाताः संयोगशृङ्गारं गतिशीलं कुर्वन्ति । अत्रोदाहरणार्थं काश्चन पंक्तय उद्ध्रियन्ते—

अलिकुलकुन्तलभरनिटिलेन विलसितशशिदलसमकुटिलेन,
सा वनिता सुविराजिता सुभगा वनितासु विराजिता । गीत० दशमप्रवन्धः ८

× × ×

केयूरकालादिविभूषिताङ्गा पीयूषसारस्तववस्त्रसङ्गा,
पतिव्रताशुद्धगुणौघसङ्घा विभासिता कान्तिपयस्तरङ्गा ॥
दशमप्रबन्धः, श्लोकः ६

शान्तरसप्रसङ्गः ऋषभदेवस्य दीक्षावसरे समुपस्थितोऽस्ति । नीलाञ्जनानाम्नी नर्त्तकी नृत्यति । ऋषभदेवः तन्नृत्यदर्शने तल्लीनो वर्त्तते । अस्मिन् समये सहसा तस्याः देवनर्तक्याः आयुः समाप्तं जायते । तथा तत्स्थानेऽन्या देवनर्त्तकी नृत्यारम्भं करोति । ऋषभदेवः एतत्कारुणिकदृश्यं दृष्ट्वा विह्वलो जायते । स सांसारिकपदार्थान् क्षणिकानवगच्छति । सोऽनित्यतासम्बन्धे विचारमग्नो भवति । तन्मनः भोगोपभोगेभ्यो विरक्तो भवति । स द्वादशभावनानां चिन्तने मग्नो जायते । ऋषभदेवस्यास्याः निर्वेदस्थित्याः कविपण्डिताचार्यः साकारं चित्रणं कृतवान् । यथा—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नीलाञ्जनात्यल्पनिजेप्सितासु विद्युल्लतावद्विलसार सद्यः ।
दृष्टावधिज्ञानविलोचनोऽसौ निनिन्द संसारशरीरभोगान् ।

विंशतितमः प्रवन्धः, श्लोकः—४

× × ×

तनयपरिजननिचयवन्धमूले इह कष्टधनदुरितघोरजाले ।

× × ×

चर्मकुलभरितपृथुपूतिसदने इह कष्टधर्महतधूर्तमदने ।

गी० एकविंशतितमः प्रवन्धः

अलङ्कारैः भावोद्रेके सफलता प्राप्यते तथा भावानां व्यञ्जना चित्ररूपेण संपद्यते, यात्यन्तप्रभावपूर्णा तथाकर्षिका भवति । कविकल्पनायाः तूलिका यथार्थाधारे आकर्षकभावनायाश्चित्रमंकितं करोति तथा सुन्दरतमसत्याभासं मूर्त्तरूपेण दातुं चेष्टते । निरीक्षणद्वारेणालङ्कारप्रयोगे सफलता प्राप्यते तथा भावानामालंकारिकचित्रणमपि सरलं जायते । निश्चयतोऽलङ्काराः तदानीमेवाकर्षकाः प्रभावोत्पादकाः सौन्दर्यसाधकाश्च भवन्ति, यदा तेषां प्रयोग उन्नतसरण्यां सहजरूपेण क्रियते । अलङ्कारप्रयोगः यदा भावान् स्पष्टान् रमणीयान् च विधाय रसात्मकतायां वृद्धिं कुर्यात्, तदावश्यमेवाभिनन्दनीयोऽस्ति । यतो यदालङ्कारः कवितां कमनीयां कृत्वा तस्याः स्थायित्वस्य वृद्धिं करोति तथा कविताया आत्मानं—भावं विचारं कल्पनाञ्च चमत्करोति, तदैव तस्य यथार्थोपयोगिता विद्यते । अन्यथा स आडम्वरभूत एव भवति ।

गीतवीतरागे कल्पनाचमत्कारेण सह उपमायाः, उत्प्रेक्षायाः, रूपकस्य, अतिशयोक्तेः, अर्थान्तरन्यासस्य, अनुमान-काव्यलिंगयोश्च समावेशः प्राप्यते । उपमोत्प्रेक्षयोस्तु प्रयोगः एतावान् अधिको जातोऽस्ति यत् सर्वत्र भावावेशस्थितिरुत्पद्यते । पण्डिताचार्यः यया कोमलकान्तपदावल्या काव्यं रचितवान्, तया प्रस्तुतभावाः उद्‌बुद्धाः सन्ति । रससिद्धकविना पण्डिताचार्येण अस्यां लघुकायायां कृतौ विम्वग्रहणस्य पूर्णः प्रयत्नो विहितः । अत्रोपमाया उदाहरणं प्रस्तूय कवेः विम्वग्रहण क्षमतायां प्रकाशो दीयते—

अलिकुलकुन्तलभरनिटिलेन, विलसितशशिदलसमकुटिलेन—प्रवन्धः, १५.

× × ×

सुललितवाणी क्रीडाचलनिभमिलितसुषमनिटिलेरम् ।
अलियुतकमलजलदनिभताराकलिततनयनयुगधारम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चण्डकिरणविधिमण्डलवियदिव कुण्डलश्रवयुगभासम् ।
पीडितशशिसरसिजसमशुभगुणमण्डितवदनविलासम् ॥

गीत० एकोनविंशतितमः प्रवन्धः ।

केशानां सौन्दर्य-विम्वं प्रस्तुवता वार्त्ताद्वयं कथितमस्ति (१) केशाः भ्रमर-समूहवत् कृष्णाः सन्ति (२) तथा केशाः खण्डितचन्द्रवत् कुटिलाः सन्ति। केशानां दृश्यरूपस्य प्रस्तोतायं चाक्षुषो विम्वोऽस्ति। रूपस्य भावसौन्दर्यस्य च तरङ्गैर्विम्व आर्द्रोभवन्नस्ति। केशानां कुटिलतायां क्षीयमाणकुटिलचन्द्रस्य चाक्षुषप्रत्यक्षं साकारं जायते। एवमेव सघनकृष्णकेशेषु भ्रमरकुलस्य चाक्षुष-प्रत्यक्षमस्ति। अन्यथा प्रस्तुताः केशा एव सन्ति। एतेषां सौन्दर्यवोधोऽलिकुलेन वक्रचन्द्रेण च प्रदर्शितोऽस्ति।

द्वितीयोदाहरणे ललितवाण्याः, नयनद्वयस्य, श्रवणयुगलस्य, वदनस्य च चित्राङ्कनं कृतमस्ति। उपमया चाक्षुषविम्वानामेव विधानं कृतमस्ति। भ्रमर-युक्तकमलवत्तथा मेघयुततारासदृशं नेत्रद्वयं सुशोभितमासीत्। भ्रमरयुक्तकमलतुल्यने त्रद्वयकथनेन त्रीणि तथ्यान्युपस्थितानि भवन्ति—

१. नेत्रे कृष्णवर्णे स्तः।
२. नेत्रे कमवलवत् दीर्घायते विचेते।
३. भ्रमरयुक्तकमलवदाह्लादके सुन्दरे च वर्तेते।

'जलदनिभा तारा'—कथनेनापि कथितसौन्दर्यवोधो भवति। भावनायाः विचारणायाश्च विविधतत्वानि स्वविविधताः परित्यज्य विम्वपूर्णतायां परिण-तानि जायन्ते। उक्तावुभावपि विम्वौ कल्पनानयनाभ्यामस्मभ्यं नवोत्सवं दत्तः।

कर्णयोः शोभिते कुण्डले नभःस्थितचन्द्रमण्डलसमाहितरविकिरणतुल्ये प्रतीयेते। कविपण्डिताचार्यः तथ्येनानेन प्रभावित आसीत् यत् चन्द्रमसि स्वतः-प्रकाशो नास्ति। अस्मिन् प्रकाशः रविरश्मिभ्य एवायाति। अतएव कर्णकुण्डलयोः मूर्तरूपोपस्थापनायोक्तः चाक्षुषबिम्वो व्यवहृतोऽभवत्। मनुष्यः स्वप्राणभावना मन्यपदार्थेष्वारोप्यात्मानं तेषु प्रवेशयति। सहितेषु स्वचेतनां स्वभावं व्यवहारञ्च समर्पति। काव्यमूलकविम्वेषु सौन्दर्यानुभूतेः सहजभावना प्राप्यते।

मुखार्थं प्रस्तुतद्वयमङ्कितमस्ति—(१) पूर्णचन्द्रः (२) सरसिजम्।

यद्यपि उपमानद्वयमपि परम्पराभुक्तत्वात् नवीनं मौलिकञ्च नास्ति। परं कवि-प्रयोग-शैलीदृशी प्रभाविकास्ति यत् तयोः रूपमाधुर्यं साक्षात् जायते तथा मौलिकता-प्रतीतिः सम्पद्यते। साधारणतः प्रत्येककाव्यबिम्वं कियदंशेषु रूपात्मकं भवति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विम्वेष्वर्थगर्भत्वप्राप्तिरावश्यकी भवति। एषु सर्जनात्मकता निहितास्ति। यावदन्तः प्रविश्यते, तावदानन्दोऽधिको जायते। एवं पण्डिताचार्यस्य प्रायः समस्तकाव्ये रूपकोपमालङ्कारयोः विम्वयोजना प्राप्यास्ति। रूपकोदाहरणं द्रष्टव्यमस्ति—

कमलमुखीकरधूतचमरीरुहनिकरम्,
विमलचरित्र सुपुत्रकविसरः भूमिपतौ ॥ प्रथमः प्रवन्धः।

× × ×

परिजन-पुरजन-सेवनं निजपावनं
निरुपमसुखतरुलापम् ॥ द्वितीयः प्रवन्धः।

× × ×

रतिपति-भूपति-चामर-नतिनिभ विदलितकुसुमरसाले,
अतिसुरभीकृत दिग्वनितामुखमलयजपङ्क्तिविशाले ॥ तृतीयः प्रवन्धः।

उपर्युक्तोदाहरणेषु कमलमुख्याः, सुखतरोः, दिग्वनितायाश्च रूपकाणि सन्ति। कविनात्र चाक्षुषाणां घ्राणमूलकानाञ्च विम्वानां योजना कृता। उक्तत्रिषूदाहरणेषु गतिमयता रूपायितास्ति। अतएवेमे आवयविकाः विम्वा अपि भवितुमर्हन्ति। एषु शरीरस्नायूनांमुत्तेजनापूर्वकं मंथनमभूत्। मुक्तैरप्यलङ्कारैरत्रौचित्यस्य व्यवहारत्वात् सरसतोत्पादिता। कमलमुख्या चमरीरुहकम्पनं क्रियाशीलतां प्रदर्शयति। महावलविद्याधरसेवायै कमलमुख्योऽङ्गना उपस्थिताः सन्ति। ताः स्वहावभावान् प्रदर्शयन्त्यश्चमरं वहन्ति।

मङ्गलाचरणपद्ये कविः 'सद्ध्यानरत्नाकरे' तथा 'संसारविषाब्धौ' रूपकयोजनां विधाय संसारस्वरूपमुपस्थापितवान्। पद्यस्य समस्तविशेषणानि संसारोच्छेद-कर्षभनाथपक्षे घटयित्वानुभूतिपरकविम्वस्य संघटना समुपस्थापिता। यथा—

विद्याव्याप्तसमस्तवस्तुविसरो विश्वैर्गुणैर्भासुरो,
दिव्यश्राव्यवचः प्रतुष्ट नृसुरः सद्ध्यानरत्नाकरः।
यः संसारविषाब्धिपारसुतरो निर्वाणसौख्यादरः,
स श्रीमान् वृषभेश्वरो जिनवरो भक्त्यादरात्पातु नः।

प्रथमः प्रबन्धः, श्लोक–१

ललितपदस्यार्थसौन्दर्यस्य च दृष्ट्योक्तपद्यं प्रभावकमाकर्षकञ्चास्ति कवेश्छन्दसि भाषायाञ्चापूर्वमाधिपत्यमस्ति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पण्डिताचार्यस्यास्मिन् गीतिकाव्ये पात्राणां मानसिकप्रक्रियायां कल्पनानुभूत्योरपूर्वं सामञ्जस्यं घटितमस्ति। अस्मिन् दृश्यजगतः रूपसौन्दर्यमन्तर्जगतश्च प्रेममाधुर्यं भावात्मिकयैकतया सहाभिव्यक्ते स्तः वाह्यान्तर्जगतोरीदृशी रागात्मिकान्वितिः प्रत्येकपाठकं वशीकरोति।

शैली-दृष्ट्या समस्यन्तत्वात् गौडीशैली वर्त्तते, कोमलकान्तपदावल्याः प्रयोगत्वात् गौडीसदृशी विकटता नास्ति। अतएवात्र वैदर्भीरीतिजन्यप्रसादगुणस्य माधुर्यस्य लालित्यस्य च सद्भावसहितस्य श्रृंगारस्य शान्तरसस्य चोदात्तमनोहर परिपाकः विद्यमानोऽस्ति। अस्मिन् भवभूतेरोजस्तथानादसौन्दर्यंजयदेवस्य ललित पदावली च प्रचुरतया समाहिताः सन्ति।

प्रबन्धात्मकता गीतगोविन्द-सदृश्येवास्ति। कविः तालवद्धगीतानां सर्जनं कोमलकान्तपदावल्या आश्रये कृतवान्। तस्य ध्यानं प्रबन्धसंघटनायां तथा नास्ति, यथा गीतिपरम्परायाः पुष्टावस्ति। वस्तुतः गीतवीतरागस्य काव्यसौन्दयं संस्कृतस्य ललितपदावल्यामाश्रितमस्ति, यत् कर्णयोः रसं वर्षति।

काव्येऽस्मिन् श्रृङ्गारस्य मादकमदिरास्थाने शान्तरसस्यामृतमस्ति, यस्य पानं कृत्वा कोऽप्यमरत्वं प्राप्तुं शक्नोति। यथा क्षेमेन्द्रः दशावतारचरितं प्रणीय सहजालङ्कृतपदविन्यासशैलीमङ्गीकृतवान्, तथैवाराध्यर्षभदेवस्य दशभवान् वर्णयित्वा पण्डिताचार्योऽपि। सत्यपि जयदेवप्रभावे काव्येऽस्मिन् क्षेमेन्द्रसदृशी कल्पना, दृश्यं पदमाधुर्यञ्च सन्ति।

एतत्सत्यमस्ति यत् गीतवीतरागे संगीतं पदलालित्यञ्चापूर्वे स्तः। परन्तु, संसार-सागरतरणाय तीर्थङ्करर्षभदेवगुणानां स्मरणं मननं चिन्तनञ्च उपादेयानि सन्ति। आराध्ये आराधके चोभयोरपि योग्यतादृष्ट्या समाना शक्तिरस्ति। पार्थक्यन्तु शक्तेरभिव्यक्तावस्ति। अतएव काव्यमूल्यदृष्ट्या काव्यमेतत् समृद्धमस्ति।

गीति-तत्त्वम्

गीतवीतरागे गीतगोविन्दसदृशमेव गीतितत्त्वं प्राप्यते। अस्मिन् गुर्जरीरागे,[१] देशीरागे,[२] वसन्तरागे[३] रामक्रियायाम्,[४] माणवगौडीरागे[५], कन्नडरागे,[६] आसा-

---

१. गीतवीतराग, द्वितीय प्रबन्ध और एकादश प्रबन्ध।

२. वही प्रथम प्रबन्ध।

३. वही तृतीय प्रबन्ध और एकोनविंशतितम प्रबन्ध।

४. वही, चतुर्थ प्रबन्ध।

५. वही षष्ठ प्रबन्ध।

६. वही अष्टम प्रबन्ध।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वरीरागे,[1] देशवरालिरागेः,[2] गुण्डक्रियारागे,[3] पञ्चमरागे[4] तथा सौराष्ट्ररागे[5] गीतानि निवद्धानि सन्ति। तालेषु—अष्टतालः,[6] यतितालः,[7] तालत्रिउडः,[8] प्रतिभनृतालः,[9] एकतालः,[10] यतियतितालश्च[11] प्रमुखाः सन्ति। एवं प्रकारेणास्मिन् गीतिकाव्ये रागतालयोजनां विधाय कविपण्डिताचार्यः इमं प्रवन्धं पूर्णं गेयं रचितवान्।

प्रकृति-विकृति-भेदाभ्यां षड्जाद्येकोनविंशति-स्वरैः वर्णैश्चालङ्कृतो यो ध्वनिविशेषो मानवानां चित्तानुरञ्जनं करोति, स एव रागोऽस्ति। रागाणामुत्पत्तिः स्वरसंयोगेन भवति। स्वरसमूहानां यथाविधिगानस्य नाम वर्णोऽस्ति। वर्णाश्चत्वारः सन्ति (१) स्थायी, (२) आरोही, (३) अवरोही (४) सञ्चारी।

षड्जादिस्वरेषु यःकोऽपि स्वरो भूयोभूयो विलम्वेन रागादावुच्चरितो भवति, सोऽथवा यस्मिन् स्वरे रागः कियत्कालं यावत् तिष्ठति, स स्थायी कथ्यते। स्वराणां क्रमेणोर्ध्वंगतिरर्थात् षडज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषाद-स्वराणां क्रमोच्चारणमारोही कथ्यते। स्वराणां क्रमशोऽधोगतिः—अर्थात् निषाद-धैवत-पञ्चम-मध्यम-गान्धार-ऋषभ षड्ज क्रमेणोच्चैर्नीचैरवरोहः—'अवरोही' कथ्यते। स्थाय्यारोह्यवरोहिणां त्रयाणां सम्मिश्रणेन स्वर-सञ्चारः सञ्चारी कथ्यते।

रागाणां चत्वारि कथ्यन्तेऽङ्गानि—(१) रागाङ्गम् (२) भाषाङ्गम्, (३) क्रियाङ्गम् (४) उपाङ्गम्। रागस्यच्छायामात्रानुकरणं रागाङ्गम्, भाषायाश्छायामात्राश्रयो भाषांगम्, रागादिगाने उत्साहः क्रियागं रागाङ्गञ्च, रागाङ्गस्य, क्रियाङ्गस्य, भाषाङ्गस्य च सामान्यमात्रमनुकरणमुपाङ्गं कथ्यन्ते।

उपर्युक्तसङ्गीतस्य सामान्यविवेचनेनैतत्स्पष्टमस्ति यत् गीतवीतरागे येषां

---

१. वही नवमप्रवन्ध।
२. वही दशम प्रवन्ध।
३. वही द्वादश प्रवन्ध।
४. वही त्रयोदश प्रवन्ध।
५. वही षष्ठ प्रवन्ध।
६. वही तृतीय प्रवन्ध।
७. वही चतुर्थ प्रवन्ध।
८. वही षष्ठ प्रवन्ध।
९. वही दशम प्रवन्ध।
१०. वही दशम प्रवन्ध।
१७. वही द्वादश प्रवन्ध।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रागाणां प्रयोगो विहितः, ते सर्वे मङ्गलमयाः सन्ति तथा तेषां गानेन भावावल्याः विस्तारः सरलतया भवति। गुर्जरी-रागं कतिपये विद्वांसः भैरवरागान्तर्गतमेव मन्वते। गुर्जरीरागे सम्पूर्णाः जातयः सन्ति, तथास्य स्वरः ऋषभोऽस्ति। मूर्च्छनास्य पूर्वी वर्त्तते। अस्मिन् कश्चनाभासः 'बंगाली'-संज्ञस्य वर्त्तते। अस्य रूपं निम्नप्रकारमस्ति—

"रि ग म प ध नि स रि"

गुर्जरीरागः श्रोतॄणां विशेषप्रियोऽस्ति। रागेऽस्मिन् प्रेम्णः मन्मथस्य च भावः प्रकटः क्रियते। द्वितीय-सप्तमैकादश-प्रबन्धानां गीतयो रागेऽस्मिन् निबद्धाः सन्ति। सप्तमप्रबन्धे श्रीमत्याः विरहवर्णनमपि गुर्जरीराग एव सम्पन्नमस्ति। रतेः करुणायाश्चाभिव्यञ्जनाकृते रागोऽयमधिक उपयुक्तो वर्त्तते। यथा—

श्रितरमणीस्तनमण्डलं नवकुण्डलम्,
वितत‌ललितनवमालम्।
—गीत, द्वितीयप्रबन्धः।

देशीरागः प्रसिद्धरागोऽस्ति। सङ्गीतरत्नाकरे देशिरागे रागाङ्ग-भाषाङ्ग-क्रिय ङ्गोपाङ्गानां चतुर्णामपि समावेशः स्वीकृतोऽस्ति। रागपद्धतिः भारतीयसङ्गीतस्य स्वकीया विशेषता विद्यते। देशिरागाणां संख्या सारङ्गदेवानुसारं २६४ वर्त्तते। गीतवीतरागे यस्य देशिरागस्य निबन्धनमस्ति, तस्मिन् ऋषभवर्जितषाडवजातीयायाः देशाख्यायाः ग्रहांशन्यासस्वरो गान्धारोऽस्ति। अस्मिन् हरिणाश्वायाः मूर्च्छनायाः प्रयोगो भवति—

ग म प ध नि स ग।
अथवा
ग म प ध नि स रि ग।

गीतवीतरागस्य प्रथमप्रबन्धे रागस्यास्य प्रयोगो जायते। रागेणानेन गीतेषु मृदुलकठोरकार्याणां स्वरानुबन्धनं कृतमस्ति। यथा—

भरितपयोधितटप्रमितावनिभागः सरसचरित्रकलत्रसुभोगः,
भूमिपतौ कर्मफलेन जय धरणीशपते खेचरभूप जय धरणीशपते।
—प्रथमः प्रबन्धः

वसन्तरागः प्रसिद्धोऽस्ति। रागेऽस्मिन् शृङ्गार-विलास-वैभवानन्दानां चित्रणं कृतमस्ति। नारदसंहितायां प्रमुखषड्रागेषु वसन्तरागस्थानमस्ति। वसन्तरागो मङ्गलरूपो मन्यते। तृतीयपर्वणि ललिताङ्गवनविहारस्य मनोरमचित्रणं प्राप्यते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रामक्रिया मन्दमध्यमरूपयोः गीयते। गीतवीतरागप्रणेतास्य रागस्य प्रयोगं चतुर्थप्रबन्धे कृतवान्। अस्य रागस्य रूपं निम्नप्रकारमस्ति—

रि स ध स म रि प ध प म रि प म रि स

अनेन रागेण श्रोतृषु चेतनोत्पाद्यते। कस्यापि दृश्यविशेषस्यैतादृशं चित्रणञ्च क्रियते, यत्पात्रान्तः प्रदेशेऽनुरागमुत्पादयति।

कन्नडरागस्य प्रयोगोऽपि शृंगाररसे भवति, अपवादरूपेण शान्तरसोऽपि गीयते। अस्य ग्रहांशन्यास-स्वरः निषादोऽस्ति। स्वरूपं निम्नप्रकारमस्ति—

नि स स रि ग म प ध

कन्नडरागस्य व्यवहारः भोगभूमेः वर्णने कृतो विद्यते। गीतवीतरागे अस्य-रागस्य संयुक्तभेदा अपि मिलन्ति। आशावरी-रागे करुणरसो निबध्यते। इयमृषभ-गान्धारहीना औडवजातीयास्ति। अस्य ग्रहांशन्यासस्वरो धैवतोऽस्ति। यथा—

ध नि स म प ध

अथवा

म ध नि स रि ग म

गीतवीतरागआशावर्याः व्यवहारः नवमप्रबन्धे कृतोऽस्ति। अस्यामार्येण गुरुगुणानां स्मरणं क्रियते। आशावरी-रागे हृदयममतायाः, हृदयव्यथायाश्च सुन्दरं चित्रणं कृतमस्ति।

देशवरालिरागे देशकार्यायाः वैराट्याः रागिन्याश्च मिश्रणं प्राप्यते। अस्मिन् उत्तरमन्द्रमूर्च्छनानां प्रयोग आवश्यकोऽस्ति। अस्य न्यासस्वरः षडजोऽस्ति। स्वरूपं निम्नप्रकारमस्ति—

स रि ग म प ध नि स

रागेऽस्मिन् वैभव-विभूति-समृद्धि-चित्रणैः सह वीररसस्यापि चित्रणं क्रियते। गीतवीतरागे वैभवचित्रणायास्य व्यवहारो भवति।

पञ्चमरागः पञ्चमहीनः षाडवजातीयः शृंगाररसपूर्णश्चास्ति। अस्य ग्रहांशन्यास-स्वरः षडजोऽस्ति। रागेऽस्मिन् उत्तरमन्द्रायाः मूर्च्छनायाः प्रयोगो भवति। मतान्तरेणायं संपूर्णः जातीयो मन्यते। स्वरूपव्यवस्था निम्नाङ्कितास्ति—

स रि ग म प ध नि स

अथवा

स रि ग म प ध नि स

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवं प्रकारेण गीतवीतरागस्य गीतानि रागेषु निबद्धानि सन्ति। रागैः सह ताल-स्यापि प्रयोगो विहितोऽस्ति। सङ्गीते समयः तालो विद्यते। गीतस्य शोभा तालेन भवति। तालं विना गानं वादनं नर्त्तनं वा व्यर्थमस्ति। कासाञ्चन विशेषमात्राणामवकाशे नियमितोभयोः करयोः संयोगेनाथवा तालवाद्यद्वारेण समय-मापनं तालः कथ्यते। सङ्गीतकलायां स्वररागलक्षणातिरिक्तं तालमयमात्राज्ञानमावश्यकमस्ति। गीतवीतरागेऽष्टतालस्यैकतालस्य यतितालादेश्च प्रयोगः प्राप्यते। कवि-पण्डिताचार्यः ताल-व्यवहारेण काव्येऽस्मिन् गेयतामुत्पादितवान्। अभिनवताल-मञ्जर्यां कथितमस्ति—

कालः क्रियापरिच्छिन्नस्तालशब्देन भण्यते।
ततः प्रतिष्ठितं सर्वं ताले काले प्रतिष्ठितम्। अभिनवतालमञ्जर्यां

तालस्य दश प्राणाः कथिताः सन्ति—

कालो मार्गः क्रियाङ्गानि ग्रहो जातिः कलालयः,
यतिः प्रस्तारकथ्येति ताल-प्राणाः दश स्मृताः। तदेव

काल-मार्ग-क्रियाङ्ग-ग्रह-जातिकला-लय-यति-प्रस्ताराः इमे दश प्राणाः सन्ति। तालस्यैकावर्तस्य समयः: पूर्णस्थायिनोऽन्तरायाः वा समयोऽथवा विभिन्नभागानां मात्राणां वा समय—इमे सर्वे कलान्तर्गताः सन्ति। तालपथः मार्ग कथ्यते। कन्नड-रागे पञ्चत्रिंशत्तालानां पद्धतिः प्रचलितास्ति।

चतुरन्तरकालसमैका मात्रा भवति। पञ्चत्रिंशत्तालीयरचनायां लघुमात्राः परिवर्तन्ते। करे ताल-प्रदर्शन-विधिः क्रिया कथ्यते। तालस्यानुद्रुत-द्रुत-लघु-गुरु-प्लुत-काकपदाः षडङ्गानि मतानि। उत्तरापेक्षया दक्षिणभारतस्य सङ्गीते तालस्य विशेषध्यानं रक्ष्यते। रागाणां तालेन सह निबन्धनेन श्रुतिमधुरता विशेषरूपेणायाति। गीतवीतरागे कृतमेतदेवास्ति। अतः ललितपदावल्या सह रागतालसंयोगेन गीतवीतरागे संगीततत्त्वमुत्पन्नं कृतम्।

प्रबन्धगीतस्यान्यगुणा अपि काव्येऽस्मिन् समाहिताः सन्ति। भावसान्द्रतादृष्ट्या काव्यमिदं गीतगोविन्दादप्यग्रेऽस्ति। यद्यपि गीतगोविन्दस्य पदावल्याः स्पष्टानुकरण-मस्मिन् प्रतीयते, परं भावक्षेत्रे कविपण्डिताचार्यः जयदेवादग्रेऽस्ति। अमरुककविसदृशी भावसघनता जयदेवे नास्ति, परं गीतवीतरागकाव्यं विविधवैविध्यकारणात् अधिकं भावपूर्णं मार्मिकञ्चास्ति—

सुललितचन्दनपल्लवसङ्गमकोमलकमलसमीरे,
अलिकुलगुंजितकोकिलकूजितमेरुनिकुञ्जकुटीरे।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्यवहरदतिसुरभिभरितवसन्ते नर्त्तनसकलजनेन समं निजविरहिसुरस्य दुरन्ते ॥
—गीतवीत, तृतीयः प्रबन्धः ।

गम्भीरानुभूतेः मधुमयचषकं काव्येऽस्मिन् प्राप्तमस्ति । कविपण्डिताचार्यः शृङ्गारिकगीतिपरम्परां शान्तरसोन्मुखं वीतरागतोन्मुखं च विधाय एकां नवीनां शैलीं स्थापितवान् । कविः लोकानुकरणं कुर्वन् शृङ्गारं प्रति नानादरभावमभिव्यज्योदारचारित्रिकधारणायाः, विषयभोगत्यागस्य निरभिलाषजीवनयापनादेश्च सिद्धान्तानां स्थापनां कृतवान् । सत्यामपि विषयपरकतायां रचना विषयि-प्रधाना विद्यते । जागतिकभावानां वैयक्तिकनिर्माणप्रयासः श्लाघ्योऽस्ति । कल्पना, लयान्विति:, आत्मानुभूतेः गम्भीरता, मार्मिकादिगुणाश्च काव्येऽस्मिन् समवेताः सन्ति ।

एवमेव रामगीतकाव्यमपि लिखितमस्ति । द्वादश्याः शताब्द्याःपश्चात् लिखितानि सर्वाणि गीतकाव्यानि जयदेवस्य गीतगोविन्दस्यानुकरणानि सन्ति ।

कविपण्डिताचार्य आत्मानं परोक्षे विधाय स्वमनोनीतपात्रैः स्वभावानां प्रकाशनं कृतवान् । अतएव गृहीतेऽपि कथावस्तुनि काव्ये निजभावनानामभिव्यक्तिचेष्टा कृता विद्यते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चतुर्थोऽध्यायः

संस्कृत-गीतिकाव्यादानप्रदानञ्च

उत्थानिका

भाषा-विचारयोरभेदः सम्बन्धोऽस्ति। मानवमस्तिष्के यदा विचारा आयान्ति, तदा स तान् विचारान् कस्यामपि भाषायां गायति। वाण्या उत्पत्तिविषये पणिनिनालिखितम्—"आत्मा बुद्ध्यार्थानवगत्य मनः विवक्षया प्रेरयति। मनः शरीरस्याग्नि-शक्ति प्रेरयति तथा सा शक्तिः वायुं नुदति, येन शब्द-वागुत्पत्तिर्जायते।[1]"

भाषोत्पत्तेरनया प्रक्रियया ध्वन्यते यत् गीतिप्रवृतेर्मूलाधार आत्मवादोऽस्ति! अनेकगीतिकारेष्वेषा प्रवृत्तिः प्राप्यते। ते स्व-भावेषु लीना, चतुर्दिक-प्रवृत्तिभ्यस्तेऽनभिज्ञाः भवन्ति। संस्कृतगीतिकाव्यस्य प्रादुर्भावः वैदिकमन्त्रेभ्यो मन्यते। परमेषु मन्त्रेषु वैयक्तिकताऽत्यल्पास्ति। मन्त्राणां गायनं कस्मिंश्चिदवसरविशेषे सामुदायिकी रागात्मिकामनुभूतिमुद्बोधयितुं वाद्यविशेषेण सहाभवत्। एवं वैदिकर्चां समवेतगायने—उच्चारण-स्वर-लय-ताल-नाट्य-विधानस्य कठोरता-कारणात् संगीततत्त्वं रक्षितमभूत्, परं वैयक्तिकतायाः समावेशो नाभवत्।

वैदिकर्क्षु भाव-भाषा-दृष्ट्या तत्कालीनजनभाषायाः जनसाहित्यस्य च प्रभावोऽभवत्। भाषाविज्ञानस्य वरिष्ठः विद्वान् डा० पी० डी० गुणे महोदयः स्वकीये, 'एन् इन्ट्रोडक्सन टू कम्परेटिव फिलोलॉजी' नामके ग्रन्थेऽलिखत्—"प्राकृतानामस्तित्वं निश्चितरूपेण वैदिकभाषाभिः सह विद्यमानमासीत्। एतेभ्य एव प्राकृतेभ्यः परवर्तिसाहित्यिकप्राकृतानां विकासोऽजनि। वेदानां पण्डितानाञ्च भाषया सह मंत्राणां रचनाकालेऽपि भाषैकेदृशी प्रचलितासीत्, या पण्डितानां भाषापेक्षयाधिका विकसितासीत्[2]।"

---

१. आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। पाणिनीय शिक्षाश्लोक—६, चौखंबा-संस्करण, सन् १९४८ ई०

२. एन् इन्ट्रोडक्सन टु कम्परेटिव फिलोलॉजी, पृ० १६३, द्वितीयसंस्करण, सन् १९५० ई०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अत एवच्छान्दससमानान्तरप्रचलितजनभाषाया गीतीनां प्रभावः वैदिकमंत्रेषु सुरक्षितोऽस्ति । डा० प्रबोधबेचरदास पण्डितउक्तवान्—"एतत्कालस्य कियन्ति साहित्यरूपाणीदृशानि सन्ति, यानि बाह्यतः 'संस्कृतम्' सन्ति, येषामुपरि संस्कृतस्यावरणमस्ति, नीचैः प्राकृतप्रवाहो विद्यते । एतत्साहित्यं समाजस्य नागरिकग्राम्ययोरुभयोरपि वर्गयोः सफलमभवत् । एतदादर्शाः सन्ति महाभारतसदृश्यो रचनाः । वस्तुतोऽस्य महतोग्रंथस्य नीचैः प्रवाहे प्राकृतभाषायाः बहिश्च संस्कृतभाषायाः रूपमस्ति ।[1]

आदानम्

छान्दस्या साहित्यिकसमृद्ध्या जनभाषायाः काव्यरूपाण्यात्मसात् कृतानि । साहित्य-प्रादुर्भावस्य प्रक्रिययेदं स्पष्टमस्ति यत् प्रारम्भे गीतिकाव्यान्येव निःसृतानि भवन्ति । यदा गीतीनामेका सुनिश्चिता परम्परा पुष्यति, तदा प्रबन्धात्मककाव्यानामवतारणा सम्भाव्यते । अत एव वैदिकर्क्षु तत्कालीनप्रचलितजनभाषायाः काव्यरूपाणां प्रभावोऽवश्यं विद्यते । डा० हरदेव बाहरी महोदयः वैदिककाव्यस्य विकासस्य स्रोतः प्राकृतं तत्कालीनां जनभाषां वा स्वीकृतवान् ।[2]

एतत्सार्वजनीनं तथ्यमस्ति यत् शिष्टसाहित्येन सह लोकभाषास्वपि जनसाधारणस्य मनोरञ्जनार्थं साहित्यसृष्टिर्भवति । कालान्तरे चेमाः लोकभाषाः क्रमशः परिमार्जितास्तथा विकसिताः सत्यः साहित्यिकभाषायाः पदं गृह्णन्ति । छान्दसयुगे या लोकभाषा प्रचलितासीत्, यस्याः स्वरुपं साहित्यिकरूपञ्चाथर्ववेदे लभ्येते, यस्मिन् रूढिवादितायाः गन्धोऽपि नास्ति । तस्याः प्रभावश्चर्ग्वेदोपरि वर्तते । ऋग्वेदस्य मन्त्रेषु लोकसाहित्यस्य स्वरूपं समाहितमस्ति । अतः प्रारम्भादेव लोकगीतानां प्रभावः संस्कृतगीतिकाव्ये वर्त्तते ।

द्वादश्याः शताब्द्याः प्रथमचरणस्य विद्वान् गोवर्द्धनाचार्यः शृङ्गारिकरचनां प्राकृतस्य समुचितां रसवाणीमुक्तवान्[3] । निःसंदेहं प्राकृते प्रेमसम्बन्धिनां कवितानामुत्कृष्टादर्शाः प्रचुरमात्रायां मिलन्ति । रुद्रट-वामन-मम्मट-वाग्भट्टानन्दवर्द्धन-विश्वनाथादि साहित्यशास्त्रिणः रस-ध्वन्योरुदाहरणं प्राकृतकाव्येभ्योः गृहीत्वा संस्कृतापेक्षया प्राकृतमाधुर्यं सङ्केतितवन्तः । अत एतत्स्वीकरणे कापि विप्रतिपत्तिर्नास्ति यत् शृङ्गारकरुणादिभावानामभिव्यक्तिकृते प्राकृतकाव्यपरम्परात्यन्तमुपादेयास्ति । पण्डितश्री-

---

१. प्राकृतभाषा, पार्श्वनाथविद्याश्रम, वाराणसी, सन् १९५४, पृ० १६ ।
२. प्राकृत भाषा और साहित्य, पृ० १३ ।
३. आर्यासप्तशती, १।५२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कृष्णविहारी मिश्रोलिखितवान्—"संस्कृते मिलितवर्णानां प्रचुरतया प्रयोगो विहितो भवति। प्राकृते त्वेतन्निराकरणाय चेष्टा जाता। प्राकृतभाषा संस्कृतापेक्षया कर्ण-मधुरास्ति। यद्यपि पाण्डित्यप्रभावेण संस्कृते प्राकृतापेक्षया कविता विशेषरूपेण जाता, परं प्राकृतस्य कोमलता तदानीमपि स्वीकृतासीत्, यदा संस्कृते कविताऽभवत्। संस्कृतकाव्यं कियतीनांवार्त्तानांकृते प्राकृतस्यर्णं वहति[1]। उक्तावतरणेन स्पष्टमस्ति यत् संस्कृतकाव्येन प्राकृतात् तथा काव्यतत्त्वानि गृहीतानि, यथा प्राकृतकवितया स्वरूप-स्थापत्यपुष्ट्यै संस्कृतात् समासशैली गृहीता। वस्तुतः संस्कृत-प्राकृताभ्या-मुभाभ्यां मिथः प्रभावितम्।

वाल्मीकिरामायणस्य "ततस्तु तौ रामवचः प्रचोदितावगायताम्" (१।४।३६) अंशस्य तिलकटीकायां लेखको लिखितवान्—"गानं द्विविधं मार्गो देशी चेति। तत्र प्राकृतावलम्बि गानं देशी, संस्कृतावलम्बिगानं मार्गः। तयोर्मध्ये मार्गाख्यगानं-मार्गावल्वनसामग्र्यावगायताम्।"

अर्थात् गानं द्विप्रकारकमस्ति (१) मार्गः (२) देशी। प्राकृतावलम्बि गानं "देशी" तथा संस्कृतावलम्बिगानं 'मार्गः' कथ्यते। लवकुशौ मार्गगान मवलम्ब्य रामायणमगायताम्।

मार्गगानं शास्त्रीयगानं कथ्यते। एतस्योद्देश्यमामुष्मिकमस्ति। देशिगानं जनगानमस्ति। इदं जनसाधारणः गायति तथास्योद्देश्यमैहिकमस्ति। प्रथमं स्वर्गस्य मोक्षस्य वा हेतुः वर्त्तते। द्वितीयञ्च मनोरञ्जनस्य। देशिगानं लोक संगीतमस्ति, इदं जनभाषायामभवत्। अतो लोकसम्बद्धदेशिगानस्य प्रभावो मार्गगानोपरि अस्वाभाविको नास्ति। देशिगानमेव समयप्रक्रियायां पतित्वा मार्ग-गानस्य रूपं गृह्णाति। यथा नद्याः प्रवाहे पतितः पाषाणखण्डः धारया शनैःशनै-राहतः चिक्कणस्तु जायत एव, परं यदा कदा शालिग्रामस्याकृतिमपि प्राप्नोति। तथैव लोककण्ठेभ्यो निर्गतं काव्यं सङ्गीतञ्च समयप्रवाहे कलाकारैः प्राप्येते। कलाकाराश्च ते आभिजात्ये सम्भ्रान्ते च कलयतः। निष्कर्ष एषोऽस्ति यत् आरम्भादेव लोककाव्यस्य प्रभावः संस्कृतकाव्योपरि पतन्नागच्छति। अतः संस्कृत-गीतिकाव्यस्योत्सस्य लोककाव्यत्वे नाश्चर्यमस्ति। संस्कृतगीतिकाव्ये समाविष्टः श्रृंगारस्तु स्पष्टतः प्राकृतस्य दानांशोऽस्ति। खीष्टाब्दात् पूर्वं श्रृंगारिकप्रवृत्तेः स्वस्यां पूर्णतः स्वतन्त्रास्तित्वं गाथासप्तशत्याः पूर्वं न प्राप्यते। ग्रन्थेऽस्मिन् यस्य लौकिक-श्रृंगारस्यापूर्वं सुन्दरचित्रणमस्ति, तस्य संस्कृतसाहित्ये प्रवेशः आलंकारिकयुगे ततः पूर्वं वाऽभवत्। अमरुक-गोवर्द्धनादयस्तु प्रत्यक्षत एतत्प्रभाविताः सन्ति।

१. देव और विहारी, पञ्चम संस्करण, पृ० २०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रञ्जनात्मकजीवनपरिधौ लोकगीतानां लोकगाथानाञ्चालिखितसाहित्यस्यापि स्थायि-महत्वपूर्णं स्थानमस्ति। अस्याः मौखिकगानपरम्परायाः समीपे निरन्तरं रच्यमानानां-नच्छन्दसान्न्यूनतासीन्न च भावानां, न भाषायाः, नाभिव्यञ्जनकौशलस्यैव। लोक-गीतं 'स्व'—द्रावकतत्त्वैः पूर्णतया सम्पृक्तमस्ति। अत एवैतैः लोकगीतैः प्रभाविते-जाते (क्लासिकल) आभिजात्य साहित्यमुत्पद्यते। साहित्येऽस्मिन् काव्यचमत्कारे विलासितायाम्, कौशले च वलं दत्तमस्ति।

तथ्यमेतदस्ति यत् कविः स्वसमसामयिकवातावरणे श्वासं गृह्णाति। तस्मि-न्नेव जीवति। अतः स कवितायै भावसामग्रीचयनं स्व-समकालिक-क्रियाकलापेभ्यः करोति, येन सामूहिकवस्तुनामवलोकनमपि काव्यप्रक्रियायां वैयक्तिकं जायते।

जीवनदर्शनपद्धतिः प्रत्येक-व्यक्तेः पृथक्-पृथक् भवति तथा जीवनमूल्यमपि द्रष्टुरवलोकनक्षमताकारणात् पृथक्-पृथक् भवति। अतएव संस्कृतस्य गीतकाव्य-प्रणेतृभिः स्वसमये जीवन-जगतोः यादृशोऽनुभवः कृतः, तदनुभवस्य तद्रूपेणाभिव्यक्तेः प्रयासः कृतः। फलतः प्रवन्धकाव्यानामन्तः यत्र सामूहिकभावनाः वैयक्तिक्योऽभ-वन्, तथा यत्रात्मनिष्ठाभावाः घनीभूताः जाता, तत्र ते सर्वे सन्दर्भाः गीतिकाव्येषु परिणताः जाताः।

वातावरणसृष्टिकृते संस्कृतनाटक-कारैः भावमयगीतीनामवतारणाकृता। कवेः शैल्याः रुचेश्चानुसारं क्वचित् परिस्थितेः भावमयता वर्ण्यविषयस्य विशेष-चित्रणेनाभिव्यक्ता कृता तथा क्वचित् नादात्मकता ध्वनिवैशिष्ट्यद्वारेणाभिव्यक्ता।

संस्कृत-गीतिकाव्योपरि थेर-थेरी गाथानां प्रभाव :

साधारणतः आत्मचेतनायाः उन्मेषः उपनिषद्युगेऽभवत्। परं 'थेर-थेरी' गाथासु यस्याः वैयक्तिकतायाः बीजानि प्राप्यन्ते, तानि नोपनिषद्-युगे विकसिता न्यभवन्। वौद्धभिक्षुषु प्रायः एतादृशा एव जना आसन्, ये प्रियविनाशेन, अनिष्ट-संयोगेन, तथान्यवैयक्तिकदुःखैरुद्विग्नाः सद्धर्मशरणमागताः आसन्। बुद्धशासन-स्यावलम्वमवाप्य ते संतोषं शान्तिञ्च गृहीतवन्तः।

संसारस्य नश्वरताया उपदेशं प्राप्य मनसि निर्वेद उद्बुद्धः। बुद्धस्य शान्तया-मृतवाण्या तेषां विषमतानां कटुतानाञ्च प्रक्षालनं कृतम्। थेर-थेरी गाथा ईदृशाना-मेव भिक्षूणां भिक्षुणीनाञ्च वाणी अस्ति यस्यां तेषां तासाञ्च वैयक्तिकाः मार्मिको-द्गाराः अभिव्यक्ताः सन्ति। एतासां गाथानां प्रभावः संस्कृतस्य तथेतरभाषाणां गीतिकाव्योपरि स्पष्टं दृश्यते। यथा—

रोपेत्वा रुक्खानि यथा फलेसी मूलेतरुं छेतु तमेव इच्छसि।
तथुपमं चित्त इदं करोषि यं मं अनिच्चम्हिचले नियुज्जसि। थेरगाथा ११२१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हे चित्त ! अनित्येऽस्मिन् संसारे मां नियोज्य त्वमीदृशमेव कार्यं करोषि, यथा कोऽपि फलेच्छया वृक्षमारोप्य तन्मूलं कृन्तितुमिच्छेत् ।

एकस्य सत्यसाधोः कामना दर्शनीयास्ति—

कदा नु हं दुब्बचनेन वुत्तो ततो निमित्तं विमतो व हेस्सं ।
अथो पसट्ठो पि ततो निमित्तं तुट्ठो न हेस्सं तदिदं कदा मे । थेरगाथा ११००

कदाहं स्वस्मै प्रयुक्तानि दुर्वचनानि श्रुत्वा दुःखी न भविष्यामि । कदा चाहं प्रशंसामधिगत्यापि प्रसन्नो न भविष्यामि । किं कदाचित् ममेदृशाः वासरा आगमिष्यन्ति ?

थेरगाथासु नैतिकादर्श-सम्बन्धि-भावनाभिः सह प्राकृतिकचित्राण्यप्युपलभ्यन्ते । एकः भिक्षुः स्वकुटीरे उपविशन् वर्षाः विलोक्य तद्विषये मनसि शोचति—

छन्ना मे कुटिया सुखा निवाता वस्सदेव यथासुखम् ।
चित्त मे सुसमाहितं मिमुक्तं आतापि विहरामि वस्स देवाति ।

थेरगाथा १

वर्ष देव, सुखपूर्वकं वर्ष । मम कुटी छन्ना विद्यते, या वातरहिता सुखकारिणी च विद्यते । मम चित्तं समाधौ दृढतापूर्वकं लीनमस्ति । तत्कामासक्तेः विमुक्तमस्ति । निर्वाणोद्योगः चलन्नस्ति, देव वर्ष, सुखपूर्वकं वर्ष !

पद्येऽस्मिन् वर्षाकाले तीव्रपवनस्य चलनं कामाग्नेः वृद्धिः, कुटीस्थितजनस्य विकलता च वर्णिताः सन्ति । सार्वजनीनापि भावना वैयक्तिक्यस्ति ।

एकस्यान्यस्य भिक्षुकस्य भावनापि द्रष्टव्या—

वस्सति देवो यथा सुगीतं
छन्ना मे कुटिका सुखा निवाता
तस्सं विहरामि वूयसंतो
अथ चे पत्थयसि पवस्स देव ॥

वस्सतिदेवो, थेरगाथा, ३२५ ।

वीतरागो वीतदोसो वीतमोहो,
अथ चे पत्थयसि पवस्स देव ।

वस्सति देवो, तदेव, गाथा ३२९

उपर्युक्तपद्यानि प्रगीतानि सन्ति । "वस्सति देवो यथा सुगीतं" अथ चे पत्थयसि पवस्स देव' पदावल्योः वारंवारमावृत्तिः 'ध्रुव'कार्यं करोति । पदेषु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लयात्मकसामञ्जस्यमस्ति। सहैव वैयक्तिक्या अनुभूतेः हृदयस्पर्शि चित्रणमस्ति। मसृणकल्पना, उत्कृष्टशिल्पविधानञ्च गीतिश्रेण्यामेतानि प्रतिष्ठापयतः।[1]

इतिहासकारो विण्टरनिट्ज: थेरगाथाः गीतिरत्नानि कथितवान्। प्रकृतेः भावपूर्णं चित्रणं थेरीगाथासु निहितमस्ति। वर्षासौन्दर्येण भिक्षूणां मनःसु मोहकःप्रभावो दत्तः। मनोहरकालेऽस्मिन् नीलग्रीवाः मयूराः वदन्ति। तेषां केका सर्वान् हर्षोन्मत्तान् विदधाति। विस्तृता वसुन्धरा परितः हरीतिम्ना पूर्णास्ति। भूमौ जलं पूर्णमस्ति तथा नभसि मेघाऽच्छन्नाः सन्ति। एष समाधिकृते सुन्दरः समयोऽस्ति। यदा प्रकृतौ उल्लासः उत्साहश्च स्तः तदा भिक्षुमनः कथं नोल्लसितं भवेत्। यथा—

यदा वलाका सुचिपण्डरच्छदा कालस्य मेघस्य भयेन लज्जिता,
पलेहिति आलयभालये सिनि तदा नदी अजकरणी रमेति यं।
सोमेन्ति आपगा कूलं महलेनस्स पच्छतो—थेरगाथा ३०६, ३०९

अर्थात् यदा स्वच्छपक्षाः वकाः कृष्णमेघेभ्यो भीताः स्वविवरानन्विष्यन्तः उड्डीयन्ते। अस्मिन् समये संप्लवकारणात् शब्दं कुर्वन्ती नदी मह्यं रोचते।

अस्याः नद्याः उभयोः कूलयोः जम्बूवृक्षाः सन्ति, तत्र मम मनः कथं रंस्यते। महामार्गपश्चात् नद्याः तटेऽनेकनिर्झरिण्यः सुशोभनाः सन्ति, आसु निर्झरिण्यः शब्दायन्ते।

यद्यपि बौद्धधर्मे सांसारिकरागस्य निषेधः प्राप्यते। परं प्रसंगत एषणानां तृप्त्यै उल्लासपूर्णा अपि गीतयः खुद्दकनिकाये प्राप्ताः सन्ति। आसु गीतिषु विभिन्नप्रकारस्य वैयक्तिकभावनाः निहिताः सन्ति।

थेरीणां गाथाः थेरगाथापेक्षयापि महत्त्वपूर्णाः सन्ति। बौद्धभिक्षुणीभिरासु गाथासु स्वजीवनं संगीतस्य काव्यस्य च भाषयोः मुखरं कृतम्। नैतिकसत्यम्, सान्द्रानुभूतिः, अपराजितवैयक्तिकध्वनिः, एतासां गीतीनां विशेषताः सन्ति। मार्मिकतैतासां गीतीनां जीवनमस्ति। थेरीनां प्रवृत्तिः स्वपूर्वजीवनोन्मुख्यधिकास्ति। यतः गीतिषु गृहस्थजीवनस्य काठिन्यमेताभिर्विवेचितम्। कस्याश्चन गौतम्याः वशिष्ठ्याश्चोक्तिषु सन्तानवियोगस्य मर्मच्छेदिन्यो गाथाः निहिताः सन्ति। पटचारायाः गाथासु तत्करुणजीवनस्य समस्ता कथाभिव्यक्तास्ति। थेरीनामनेकगीतयः 'अहं' पदात् प्रारभ्यन्ते। आसु गीतिषु विविधसन्तापाः, मानसिकव्यथाः, प्रव्रज्यापूर्णजीवनस्य विभिन्नोक्तयश्च विद्यन्ते। सांसारिकानन्दं निर्वाणशान्तिञ्चादाय

---

१. Indian Literature Vol २. P. 061

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मानसिकद्वन्द्वोऽपि व्यक्तः कृतो विद्यते । विण्टरनित्जस्य कथनमस्ति—"थेर-थेरी-गाथाः धार्मिककाव्यं सन्ति, याः स्वरमणीयतायाः शक्तिमत्तायाश्च कारणात् ऋग्वेदादारभ्य कालिदासामरुकपर्यन्ते साहित्ये भारतीयगीतिकाव्यस्य सर्वश्रेष्ठोदाहरणस्य-स्थानग्रहणस्याधिकारिण्यः सन्ति ।" निश्चयतः थेर-थेरी-गाथास्वनुभूतेः गहनतया सह वैयक्तिकताया अपि अपूर्वः संयोगो वर्त्तते । शान्तिपूर्णसाहित्यस्य निर्माणे थेर-थेरीगाथानामासां महत्त्वपूर्णं स्थानमस्ति । आसु वैयाक्तिकतायाः पर्याप्तपुटः प्राप्यते ।

थेरीगाथासु खीष्टाब्दपूर्वाणां कतिपयशताब्दानां भारतीयनारी-समाजस्य मनोव्यथायाः सामाजिकजीवनस्य च पूर्णाभिव्यक्तिः प्राप्यते । एतासां गीतीनामात्मा भावुकतया व्याप्तो विद्यते । यथा थेर्यः प्रव्रज्याग्रहणात्पूर्वं स्वतन्त्ररूपेण लोकगीतं गायन्त्य आसन्, तथैव प्रव्रजिताभि ताभिः स्वानुभवः भावुकतापूर्वकः व्यक्तः कृतः । उदाहरणार्थमत्र भिक्षुण्या अम्बपाल्याः वार्धक्यसम्बन्धिता उद्गाराः सन्ति। यथा—

कालका अमरवण्णसदिसा वेल्लितग्गा मम मुद्धजा अहु ।
ते जराय सालवाक सदिसा सच्चवादिवचनं अनञ्ञथा ॥ थेरगाथा २५२

× × ×

काननस्मिं वनखण्डचारिणी कोकिला व मधुरं निकूजितं ।
तं जराय खलितं तहिं तहिं सच्चवादिवचनं अनञ्ञथा ॥ तदेव २४१

अर्थात् भ्रमरसदृशाः कृष्णाः सघनाश्च केशाः वृद्धावस्थायाः कारणात् शणवत्-श्वेताः जाताः । सत्यवादिनो वचनं नान्यथा भवति ।

वनखण्डे विचरणशीलायाः कोकिलायाः कूकस्य सदृशो मम स्वरोऽद्य वार्धक्यवशः स्खलितोजातः । सत्यवादिनोवचनं नान्यथा भवितुं शक्नोति ।

उपर्युक्तगाथासु "सच्चवादिवचनं अनञ्ञथा" ध्रुवपदमस्ति अस्यावृत्तिः प्रत्येकपदेऽस्ति । ऋग्वेदस्य "सजनासः इन्द्रः" ध्रुवतुल्यमुक्तपदमपि 'ध्रुवपदम्' वर्त्तते । अस्यावृत्त्या गीतिषु भावसञ्चारो विहितोऽस्ति । थेर-थेरी-गाथासु भावसान्द्रतैतावत्यधिकास्ति, यया गीतेः समस्त-गुणस्वीकृतौ नास्ति कश्चन विरोधः ।

खीष्टाब्दात्पूर्वं प्रचलितानामासां गाथानां प्रभावः संस्कृतगीतिकाव्येऽवश्यं वर्त्तते । यद्यपीमाः गाथाः ऋग्वेदसूक्तैरवश्यं प्रभाविताः सन्ति, तथोभयोर्मूलोत्सः लोकगीतिष्वस्ति, तथापि संस्कृतस्य प्रमुखगीतिकाव्येषु प्रभावेऽस्य स्वीकृते कस्यापि प्रकारस्य विप्रतिपत्तिर्नास्ति । देवत्वक्षेत्रात् कवितायाः अवतरणं यदा मानवीयक्षेत्रे जातम्, तदवाक्तभावपूर्णगीतीनां प्रणयनं जातम् । गीतिकाव्यं वस्तुतः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मानवीयक्षेत्रस्य काव्यमस्ति । एतदेव नरकाव्यमपि कथितम् । अतोगीतीनां विकासः देवकाव्यापेक्षया मानवकाव्यादधिकःतर्कसङ्गतः प्रतीयते । संक्षेपेण एतावदेव वक्तुं शक्यते यत् संस्कृत-गीतिकाव्यं शैलीनामनुभूतीनाञ्च दिक्षु थेर-थेरी-गाथाभिरवश्यं प्रभावितमस्ति । अतएव थेर-थेरी-गाथानां निम्नांकिततथ्यं विशेषरूपेण संस्कृत-गीतिकाव्ये समाविष्टमस्ति—

१. जीवनस्य मार्मिकानुभवानां सरला, सहजा तथा हृदयस्पर्शिण्यभिव्यक्तिः ।
२. लोकगीतिभिः प्रभावितत्वात् लोकतत्त्वानां समावेशः ।
३. (टेकस्य) ध्रुवपदस्य वा स्थितिः ।
४. क्षणान्वितेः सद्भावः ।
५. स्वतन्त्ररूपेण गीतिलेखनपरम्परायाः प्रवर्त्तनम् ।
६. आत्मनिष्ठतायाः वैयक्तिकतायाः वाऽभावः ।
७. सङ्गीतेन सह नियोजनम् ।

भर्तृहरेः वैराग्यशतके थेर-थेरी-गाथानां समस्तभावना अङ्किताः सन्ति । जीवने निर्वेदक्षणानामभिव्यञ्जना कारणमुक्त-थेर-थेरी गाथाः सन्ति । वैराग्ये नीति-शतके च एतासां गाथानां भावशैलीवर्ण्यविषयदृष्ट्याऽत्र पर्याप्तःप्रभावो वर्त्तते । आरम्भादन्तं यावत् वैराग्यसम्बन्धिन्यः प्रवृत्तयः जीवनमूल्यञ्च उक्तगाथाभ्यो निःसृताः सन्ति । लोकरञ्जनात्मकभावप्रधानकाव्यरचनायाः प्रेरणायां गाथाना-मासां महत्त्वमस्ति । आसु केवलं वैराग्यवाद एव न निहितो वर्त्तते, वैराग्येण सह जीवनस्यान्यपक्षा अपि प्रस्फुटिताःसन्ति ।

नर-काव्यस्यावतरणं वाल्मीकेः रामायणकाव्याद्भवति । कालदृष्ट्या च थेर-थेरी-गाथास्तत्कालीनाः एव प्रायः सन्ति । भिक्षुभिः भिक्षुणीभिश्च स्वान्तरिक-भावनाः भावुकतापूर्णगीतिषु अभिव्यक्ताः । चक्रं चालयन्त्यो नार्यः प्राचीनकालादेव गीतं गायन्त्यः आगच्छन्ति । एतेषां गीतानां विषयाः यात्रा, उत्सव;, संस्कारः, देववन्दना, स्तुतिः श्रृंगारादयः भवन्ति । काचन गायिका स्वभावना अपि 'लय' "ध्रुव" सङ्गीताधारे व्यनक्ति तथा सम्पूर्णगीते गीतौ वैका वैयक्तिकभावनाऽनुस्यूता भवति । विषयस्य समग्रावलोकनकारणात् सम्पूर्णगीते एकैव भावना प्राप्यते । इयं भावना सामाजिकी न भवति, वैयक्तिकी भवति । फलतः एष निष्कर्षः सहज एव निःसृतो भवति, यत् संस्कृतस्य गीतिकाव्यैः थेर-थेरी गाथाभ्यः कियन्ति तत्त्वानि गृहीतानि ।

गाथासप्तशत्याः, वज्जालग्गस्य च प्रभावः

गाथासप्तशत्यां संकलिताः गाथाः स्वासु स्वतन्त्रं लोकरसं सम्पादयन्ति । एत-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्सार्वजनीनं सत्यमस्ति यत् समाजे सर्वदैकत्र लोककाव्यस्य लोकप्रभावितकाव्यस्य वा धारा प्रवाहिता भवति तदान्यत्राभिजात्यवर्गस्य काव्यस्य लोक-प्रभावितं काव्यं जीवनस्थ सहजरागेण सहजच्छन्दसा चान्वितं तिष्ठति, परमभिजात्यकाव्यं स्वसुदृढमर्यादासु बद्धं भवति । लोकजीवनाद् गृहीतास्तथ्यभावाः साहित्याय नवजीवनं ददति । साहित्ये गृहीतः एकः विशिष्टो लोकस्वरः एकच्छन्दाः भूत्वा लक्षणग्रन्थेषु स्थिरः जायते । गाथासप्तशत्याः समस्तगाथाः लोकजीवनेन सह सम्बद्धाः सन्ति ।

गाथासप्तशत्याः गाथाः कस्याप्येककालस्य रचनाः न सन्ति । सातवाहनहालस्य समक्षमेककोटिगाथा उपस्थिता आसन् । स ताभ्यः उत्तमानां सप्तशतगाथानां संकलनं कृतवान् ।[1] इमाः सर्वाः गाथाः अत्यन्तरमणीयाः भावपेशलाः सन्ति । एतस्य संकलनस्य प्रत्येकगाथा स्वतन्त्रास्ति तथा आमुष्मिकतायाः चिन्तया मुक्तास्ति । अस्मिन् लोकजीवनस्य विविधपक्षाणां सजीवाभिव्यक्तिः कृता विद्यते । आसु वर्णितानि दृश्यानि सरलान्येवं ग्रामजीवनसम्बद्धानि सन्ति । तत्रत्याः जनाः विलाससामग्रीभिः वञ्चिता अपि प्रेम्णः, दयायाः, सहृदयतायाः, एकनिष्ठतासदृशभावानाञ्च धनिनः सन्ति ।

काव्येऽस्मिन् प्रधानतया तत्कालीनसमाजस्य संयोगविप्रलम्भश्रृङ्गारयोः मूर्तिमच्चित्रणं कृतमस्ति । अस्य काव्यस्य नायिकाः ग्रामाणां मुग्धयुवत्यःसन्ति । प्रेम्णः करुणायाश्च भावनां तथा प्रेमिणां रसमयीनां क्रीडानां सजीवं वर्णनं प्राप्यते । ग्रामाणां दरिद्रतायाः करुणदृश्यमपि हृदयस्पर्श्यस्ति । कृषकयुवकः स्वगुर्विणीं पत्नीं तस्याः दोहदं पृच्छति । पत्युरार्थिककष्टचिन्तया सा केवलां जलेच्छां प्रकटयति । मुसलधारं जलं वर्षति, कुटीरे जलं स्रवति । कृषकपत्नीं स्वप्रियवत्सरक्षार्थं तदुपरि नत्वा जलविन्दून् स्वशिरसि गृह्णाति । परं सा नैतज्जानाति, यत् एवं रीत्या सा स्वनयननीरैः तमार्द्रं करोति ।

दाम्पत्यजीवनस्यानेकरोचकघटनाः वर्णिताः सन्ति । अपराधी पतिः रुष्टायाः पत्न्याः चरणयोः पतित्वा क्षमां याचते । एतावति तस्य कनिष्ठो बालकः आगत्य पितुः पृष्ठे आरोहति । मानिनी भार्या स्वहासावरोधेऽसमर्था जाता । पत्नी पत्यै स्वशिशोः विकसितं प्रथमदन्तं दर्शयन्ती अकथनीयहर्षोल्लासस्यानुभवं करोति ।

---

१. सत्तसताइं कइवच्छलेण कडोय मज्झ-आरंभि ।
हालेण विरइआइं सालंकाराणं गाहाणं ॥ —प्रथम शतक, गाथा ३—
चौखम्बा, १९६९ ई० तथा हिस्ट्री ऑव इण्डियन लिटरेचर—नाईकाण्ट

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भोजन-निर्माणकाले पत्न्याः कज्जललग्नहस्तेन मुखे कृष्णाच्छाया लग्ना जायते । तां वीक्ष्य हसन् पतिः कथयति—सत्यमिदानीं तव मुखे चन्द्रमसि च कोऽपि भेदो नास्ति । यथा—

घरिणी ऐ महाणसकम्मलग्गमसिमलिइएण हत्थेण ।
धित्तं मुहं हसिज्जइ चंदावत्थं गअं पइणा ।।

प्रथमशतकम्, गाथा १

कवेः कोमला भावुकता दर्शनीयास्ति । काव्यस्यास्य प्रत्येकगाथायां गीतिकाव्यस्य तत्त्वानि प्राप्यन्ते । ईदृशं सरसं मधुरञ्च काव्यमन्यन्नास्ति । एतत्काव्यं कालिदास-भवभूति-जयदेवामरुकप्रभृतिसंस्कृतकवीन् प्रभावितवान् । अनेकप्रणयचित्रैः सहर्तोः ग्रामजीवनस्य च भव्यचित्राणि मिलन्ति । नायकनायिकानां विभिन्नभावनानामनुपमचित्रणमपि प्राप्यते ।

गाथासप्तशत्याः संस्कृतगीतिकाव्यं निम्नलिखितथ्यानि सामूहिकरूपेणागृह्णात्—

१. रसराजश्शृङ्गारस्य बहुलता ।
२. नायक-नायिकानां विशेषदशानां चित्रणम् ।
३. प्रवृत्तिनिमित्तः रसाभिनिवेशः कलात्मकता च ।
४. आत्मनिवेदनस्य प्रवृत्तिः ।
५. भावसघनता ।
६. आन्तरिकद्वन्द्वानां समावेशः ।
७. नारीसौन्दर्यस्योत्कर्षः नायकनायिकानां विविधभावाश्च ।
८. हृदयस्योल्लास-विषादयोः तीव्रावस्थायाश्चित्रणम् ।
९. लोकानुभूतेः प्रकाशनक्षमता ।
१०. हार्दिकवेदनायाः अभिव्यञ्जना ।
११. आत्मनिष्ठतायाः आत्माभिव्यञ्जकता ।

मेघदूतोपरि प्राकृतगाथानां प्रभावः

कोमलसुकुमारभावानामभिव्यक्तौ कालिदासोऽद्वितीयोऽस्ति । अस्य गीतिकाव्ये मेघदूते शृङ्गाररसस्य सम्भोग-विप्रलम्भयोः, उभयोः पक्षयोः, सूक्ष्मं मार्मिकमुद्घाटनं प्राप्यते । सुन्दरोत्प्रेक्षाणामुदाहरणं मेघदूते वर्तते । अद्भुतकल्पनाशक्तेः कारणात् मेघदूते शब्दचित्राणां बहुलतास्ति । अन्तर्जगता सह बाह्यजगतोऽपि सूक्ष्मचित्रमुपलभ्यते ।

मेघदूतात् पूर्ववर्त्तिनी—गाथासप्तशतीवज्जालग्गञ्चोभेऽपि काव्ये स्तः । यद्यपि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वज्जालग्गस्य संकलनं जयवल्लभसूरिः कृतवान्। एतासांसंगृहीत गाथानां छाया रत्नदेवेन लिखिता। मुम्बयय्या भण्डारकरप्रतिवेदनानुसारमियं छाया वि० स० १३९३ काले प्रस्तुताभवत्। 'वज्जालग्गे' ७९३ गाथाः संकलिताः सन्ति। एतासां गाथानां विभाजनं प्रथम-द्वितीयशतकरूपाभ्यां न कृत्वा गीतीनां वर्ण्यविषयानुसारं कृतमस्ति तथा सर्वासां नाम्नामग्रे 'वज्जा' पदं संलग्नमस्ति। अस्य ग्रन्थस्य गाथाः पर्याप्तप्राचीनाः सन्ति। संग्रहकर्ता लिखितवान्—

विविहकइ विरइयाण गाहाणं वरकुलानि घेत्तूण।
रइयं वज्जालग्गं विहिणा जयवल्लह णाम॥ वज्जा० ३।

अस्य संग्रहस्य कालनिर्णयः नाद्य यावत् जातः। परमधिकांशविद्वांसः खीष्टाब्दस्य तृतीयां चतुर्थीं वा शताब्दीं मन्वते। वज्जालग्गस्य प्रभावः मेघदूतोपरि स्पष्टं दृश्यते—

दूरयरदेस परिस-ठियस्स पियसंगमं महंतस्य।
आसावंधोच्चिय मा-णसस्स अवलंवए जीवं॥ पियोल्लासवज्जा ७८६

प्रियतमे दूरदेशं गते वियोगस्य कठिनसमये मनुष्याणां प्राणरक्षामाशान्वधनं करोति। अस्याः गाथायाः भावः मेघदूते निम्नप्रकारः समाहितो विद्यते—

आशावन्धः कुसुमसदृशं प्रायशो ह्यंगनानाम्।
सद्यः पाति प्रणयि-हृदयं विप्रयोगे रुणद्धि॥ मेघदूतम्, पूर्व. ९

प्रायः स्त्रीणां कुसुमसदृशं शीघ्रमेव पतनशीलं प्रेमिहृदयं वियोगे अशावन्धः सुरक्षितं करोति।

गाथासप्तशत्यामप्येव भावः प्राप्यते। सम्भवतः कालिदासस्ततोऽपि प्रेरणां प्राप्तवान्—

विरहाणलो स्नेहज्जइ आसावंधेण वल्लहजणस्स,
एकागामपवासो माए मरणं विसेसेइ॥ गाथासप्तशती १।४३

प्रवासे गतस्य प्रियजनस्य विरहसन्तापः तस्यागमनाशया सह्यते। अर्थात् आशावन्धनमेव विरहिणीनां प्राणानवरुणद्धि।

कालिदासः मेघदूते "याञ्चामोघा वरमधिगुणे नाधमे लब्धकामा[1]" सूक्तिं

---

१. मेघदूत- पूर्वमेघ, ६ श्लोक।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लिखितयान्। अस्याः सूक्त्याः विकासः गाथासप्तशत्याः निम्नलिखितगाथांयाः सम्भाव्यते। कापि सूक्तिः कस्यापि प्रचलिततथ्यस्य आधारे फलिता भवति—

हिअ अण्णएहिँ समअं असमत्ताइं पि जह सुहावंति।
कज्जाइँ मणे ण तहा इअरेहिँ समाविआइं पि॥ गाथा स० १।६१

हृदयस्य वार्त्तायाः विज्ञान् सहानुभूतिपूर्णविदग्धपुरुषान् प्रति कस्यै अपि वार्त्तायै अनुरोधे कृते यदि तेऽनुरोधं न पूरयेयुस्तदापि ते उत्तमा एव सन्ति। इतरव्यक्तिभिः सह कार्ये पूर्णेऽपि कस्यै अपि वार्त्तायै अनुरोधो नोचितो वर्त्तते।

तुलनात्मकदृष्ट्या विचारे कृते ज्ञायते यत् मेघदूतस्योक्तं सूक्तिवाक्यं गाथासप्तशत्या उपर्युक्त गाथया केवलं प्रभावितमेव नास्ति, किन्तु तदुत्सउक्तगाथैवास्ति।

मेघदूते समागतमस्ति—"वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श[1]" अर्थात् आपाढस्य प्रथमदिने पर्वतशिखरे लग्नं मेघं दृष्टवान्। गाथासप्तशत्यामागतेन "गअकलहकुंभसंणिह" (३।५८) अंशेन उक्तं तथ्यं ध्वन्यते तथा निम्नलिखितगाथानां प्रभावः स्पष्टः परिलक्षितो भवति।

सव्वत्थ दिसामुघ्पसारि एहिँ अण्णोण कह अलग्गेहिं।
छल्लिव्व मुअइ विञ्झो मेहेहिं विसंत्यंन्तेहि॥ गा० २।१५

× × ×

आलोअंति पुलिंदा पव्वअसिहरट्ठिआ धणुणि सण्णा।
हत्थि उलेहिँ व विज्झं पूरिज्जंतं णवब्मेहि॥ तदेव २१६

विन्ध्याचलस्य नितम्बभागे संलग्नो मेघो गजसमूहसदृशो दृश्यते।
अनयोः गाथयोः प्रभाव उक्तपंक्तौ तर्कसंगतोऽस्ति।

मेघदूतस्य—"तां चावश्यं दिवसगणनातत्परामकेपत्नीम्"[2] अवधि-दिनानां गणनायां लग्नां स्वभ्रातुः जायां द्रक्ष्यसि।

एतद्भावकृते महाकविकालिदासः गाथाशप्तसत्याः निम्नलिखितगाथाभिः प्रभावितोऽस्ति। आसु गाथासु विरहिण्याः नायिकायाः अवधिगणनायाः वार्त्ता कृता विद्यते।

१. वही, पूर्वमेघ, २ पद।
२. वही, पूर्वमेघ, ११ पद।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हत्थेसु अ पाएसु अंगुलिगणणाइ अइगआ दिअहा।
एण्हि उण केण गणिज्जउ त्ति भणेउ रुअइ मुद्धा ।। गा० ४।७

× × ×

अज्जं गओ त्ति अज्जं गओ त्ति अज्जं गओत्ति गणरीए।
पढम च्चिअ दिअहद्धे कुड्डो रेहाहिं चित्तलिओ ।। तदेव ३।८

× × ×

ओहिदिअहागमासंकिरीहिं सहिआहिं कुडुलिहिआओ।
दो तिण्णि तहिं विअचोरिआएँ रेहा दुसिज्जंति ।। तदेव ३।६

दिवसगणनायाः अस्याः पद्धत्याः प्रभावः कालिदामेन गृहीतश्चेन्नात्राश्चर्यम्। यक्षः सन्देशं प्रेषयन् मेघं प्रति कथयति यत् त्वं मम प्रियां प्रति कथयेः यत्, प्रस्तर-खण्डेषु गैरिकधातुरागेण प्रणयकुपितं तव चित्रमङ्कितं कृत्वा यदैव तव चरणतले पतितामात्मीयांमूर्तिमङ्कितांकर्त्तुमिच्छामि, तदैवागमाश्रुराशिराविर्भूतो दृष्टि लुम्पति। हन्त, विधाता स्वप्नेऽपि नास्माकं मिलनं सोढुं शक्नोति। पद्येऽस्मिन् आगते "क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः" पदे गाथासप्तशत्याः निम्न-गाथायाः प्रभावोऽस्ति। अस्यां गाथायां चित्राङ्कनमश्रुकारणादसम्भवमस्ति। अतः चित्रदर्शनेन मनोविनोदस्थितिरपि सम्भवा नास्ति। यथा—

तुह विरहुज्जाअरओ सिविणे वि ण देइ दंसणसुहाइं।
वाहेण जहालोअण विणोअणं से हअं तं पि ।। गाथा० ५।८७

तव विरहे सा न स्वपिति। अतः स्वप्ने दर्शनं सम्भवं नास्ति तथा अश्रुबहु-लताकारणात् चित्रदर्शनमपि न सम्भाव्यते।

तुलनया स्पष्टं प्रतीयते यत् कालिदासस्योक्तपदे गाथासप्तशत्याः प्रभावोऽस्ति। किमाश्चर्यं यत् महाकविः चित्रदर्शनसम्बन्धि तथ्यं गाथासप्तशत्याः गृहीतवान्।

एवमेव महाकविः कालिदासः मेघदूते संगीतेन यक्षिण्याः मनोविनोदप्रसङ्गेऽश्रुकारणात् वीणातारणामार्द्रतायाश्चर्चां कृतवान्। अस्मिन् सन्दर्भेऽपि गाथासप्तशत्या समानता विद्यते। यथा—

तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चित्,
भूयोभूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती ।। उत्तरमेघः २३

× × ×

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मैंअच्छलेण भरिउं कस्स तुमं रुअसि गिष्मरुक्कण्डं ।
मण्णुपडिरुद्ध कण्ठद्धणित रूलिअक्खरुल्लावं ॥ गाथा ४।३४

स्पष्टमस्ति यत् कण्ठेऽवरुद्धे गायन-वादने सम्भवे न भवतः। महाकविकालिदासोऽपि उक्ततथ्यस्याभिव्यञ्जनां कृतवान्[1] ।

प्रवासजन्यविप्रलम्भस्य चित्रणे मेघदूतेन गाथासप्तशत्या अवश्यं प्रेरणा गृहीता ।

अमरुकशतकोपरि गाथासप्तशत्याः प्रभावः

शृङ्गार-प्रेम्णोश्चित्रणपरम्परायाः विकासो मूलतः प्राकृतसाहित्येऽभवत् तथा संस्कृत-धारायै तेन नवा दिक् प्रदत्ता। संस्कृतस्योन्मुक्तप्रेम्णः चित्रणस्य प्रवृत्तेः प्रवेशः प्राकृतस्य गाथासप्तशत्या एवाभवत्। संस्कृतगीतिकाव्येऽमरुकस्य महत्त्वपूर्णं स्थानमस्ति। एतत्सम्बन्धे पूर्वं विस्तरेण विचारोऽभवत् ।

अमरुकशतकस्यानेकपद्यानि गाथासप्तशत्याः प्रभावितानि सन्ति। कानिचन पद्यानि तु पूर्णतश्छायाः प्रतीयन्ते। अत्रोदाहरणार्थं कानि चन पद्यान्युद्ध्रियन्ते। अमरुकस्य प्रसिद्धं पद्यमस्ति—गृहं शून्यं वीक्ष्य शयनादुत्थाय प्रियतमया शयनव्याजमुपागतस्य प्रणयिनो वदनं निश्चिन्ततया सह चुम्बितम्। येन तस्य कपोलः पुलकितोजातः। इदं दृष्ट्वा सा लज्जिता जाता तथा प्रियतमः हसन् तां चिरकालं यावत् चुम्बितवान्—

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैः,
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विश्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं—
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता। अमरुक शतकम्, ७७ पद्यम्

इदं पद्यं निम्नलिखितगाथया प्रभावितमस्ति—

अलिअपसुतअविणिमीलिअच्छ दे सुहअ मज्झ ओआसं ।
गण्डपरिउं वणापुलइअङ्ग ण पुणो चिरा इस्सं ॥ गाथासप्तशती।१।२०

निद्राव्याजमुपागत ! नयने पिधाय, किन्तु, कपोलचुम्बनेन रोमाञ्चित ! प्रिय ! मह्यमपि शय्यायां स्थानं देहि। इदानीमहमतः परं विलम्बं न करिष्यामि ।

---

१ उत्तरमेघः, ४२ पद्यम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उक्तगाथया पूर्वं पद्यं प्रभावितमस्ति

सुप्तोऽयं सखि सुप्यतामिति गताः सख्यस्ततोऽनन्तरम्,
प्रेमावेशितया मया सरलया न्यस्तं मुखं तन्मुखे।
ज्ञातोऽलीकनिमीलने नयनयोर्धूर्त्तस्य रोमाञ्चतो,
लज्जासीन् मम तेन साप्यपगता तत्कालयोग्यैः क्रमैः। अमरुक, प्रबन्धः ३७

"अयं तु सुप्तः त्वमपि शयनंकुरु" इत्युक्त्वा सख्यः स्वगृहं गतवत्यः। मया सरलभावेन प्रेमवशं प्रियमुखोपरि स्वमुखं स्थापितम्, येन स रोमाञ्चितो जातः। एतस्मात् अस्य कपटिनः मिथ्यानेत्रनिमीलनस्य भेदः प्रकाशमागतः। यतोऽहं लज्जिता। तेन समयोचितव्यापारैः तदपि दूरे कृतम्।

स्पष्टमस्ति यत् कविरमरुकः एकस्या एव गाथायाः भावं पद्यद्वये निवद्धुं चेष्टितवान्। यस्यां चेष्टायां स सफलोऽप्यभूत्।

कोपिन्याः नायिकाया एकं चित्रं गाथासप्तशत्यामागतमस्ति। अस्य चित्रस्य भावं विस्तृतं विधाय कविरमरुकः पद्यं रचितवान्। यथा—

आ अंवरंतकवोलं खलिअक्खर जम्पिर्वरिं फुरेतोट्ठिं।
मा धिवस्तु त्रिसरोसं समोसांति पियं भरिमो।

आरक्तकपोलाभ्यां स्फुरदोष्ठाभ्याञ्च विकीर्णशब्देषु कोपवशादेवमुक्त्वा यत्' मा मा स्पृश" गच्छन्त्याः प्रियायाः स्मृतिरायाति।

अस्याः गाथायाः भावोऽमरुकेनैवं प्रकाशितः—

स्वं दृष्ट्वा करजक्षतं मधुमदक्षीवा विचार्येर्ष्यया,
गच्छन्ती क्वनु गच्छसीति विधृता वाला पटान्ते मया।
प्रत्यावृत्तमुखी सवाष्पनयना मां मुञ्च मुञ्चेति सा,
कोपप्रस्फुरिताधरा यदवदत्तत्केन विस्मार्यते॥ अमरुक—५५

स्वेनैव कृतं नखचिह्नं दृष्ट्वा मधुमत्ता प्रिया यदेर्ष्यावशं किञ्चित्शोचित्वा गन्तुं प्रवृत्ता तदैवं कथयन्ती यत्" क्व गच्छसि" तस्याञ्चलं धृतवान्—सा वक्रीभूत्वा सजलनयनाभ्यां कोपेन च कम्पिताधराभ्यां यत्किञ्चिदुक्तवती. तत्कः विस्मर्तुं शक्नोति ?

मानावस्थां वर्णयन्त्याः गाथासप्तशत्याः गाथाद्वयमस्ति। अमरुकशतके गाथयोरनयोः भाव एकस्मिन्नेव पद्ये समाविष्टोविद्यते—

पणअकुविआणँ दो ह्णवि अलि अपसुत्ताणँ माणइल्लाणं।
णिच्चलणिरुद्ध णीसास दिण्ण कण्णाणँ को भल्लो। गाथा० १.२७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अण्णोण्ण रुडवखन्त रपेसिऊमेलीण दिट्ठिपसराणं ।
दोच्चिअ मण्णे रुअभंडणाइ समहं पहसिआइं । वही ६।९९

परस्परं रुद्ध्वा शयनव्याजमुपेतौ, श्वासौ रुन्धन्तौ निश्छलावास्ताम्, परं परस्परं वक्रदृष्ट्या दर्शनक्रमे उभयोः दृष्टिर्मिलिता तथोभावपि हसितुं प्रारब्धवन्तौ।

अमरुकस्य पद्यम्—

एकस्मिन् शयने पराङ्मुखतया वीतोत्तरं ताम्यतोः,
अन्योन्यस्य हृदि स्थितेऽप्यनुनये संरक्षतोः गौरवम् ।
दम्पत्योः शनकैरपाङ्गवलनान्मिश्रीभवच्चक्षुषो :—
भग्नोमानकलिः सहासरभसव्यासक्तकण्ठग्रहः । अमरुक ६६

मानलीलां वर्णयन्नमरुकः कथयति नायकः नायिका च मानधारणं कुर्वन्तौ शय्यायामेकस्यामेव पराङ्मुखौ शयानावास्ताम् । अनुनयेच्छोभयोः मनसोरासीत्, परमुवावपि स्वगौरवरक्षां कुवन्तावास्ताम् । यदा परस्परं दृष्टिं दत्तवन्तौ तथा नयने मिलिते, किमधिकं मानभङ्गोजातः । उभावपि हसन्तौ परस्परमालिङ्गन-पाशे बद्धौ ।

गाथासप्तशत्यां महिलानां मानमर्यादा-चित्रणं कुर्वन्नमरुको लिखितवान्—

हसिएहिं उवालम्भा अच्चुवचारेहिं रूसि अव्वाइं ।
अँसूहिं मंडणाई एसो भग्गो सुमहिलाणं । गाथा० ६।१३

हासेनोपालम्भः, अतिशिष्टाचारः, रोषस्तथाश्रुभिः कलहः श्रेष्ठमहिलानां मार्गो-ऽस्ति । अमरुकः इमं भावं व्यक्तं कुर्वन्लिखितवान्—

कृतो दूरादेव स्मितमधुरमभ्युद्गमविधिः,
शिरस्याज्ञा न्यस्ता प्रतिवचनमत्यानतिमति ।
न दृष्टेः शैथिल्यं मिलन इति चेतो दहति मे,
निगूढान्तःकोपा कठिनहृदये संवृतिरियम् ॥ अमरुक ॥ ९८

दूरादेव स्मितेन सह मधुराभ्युत्थानं दत्तम् । अत्यन्तविनयेन सह शिरो नमयित्वाज्ञा स्वीकृता । दृष्टौ प्राप्तायां दृष्टौ किमपि शैथिल्यं नायातम् । एतत्सर्वैःमम हृदयं संतप्तम् । हे कठिनहृदये तवास्मिन् अत्यादरस्यावरणे कोपोऽन्तर्निहितोऽस्ति । एका विरहिणी स्वसखीं कथयति—

अज्ज सहि केण गोसे केपिभंणेवल्लहं भरंतेण,
अह्मं मअण सराह अहि अ अव्वण फोडनं गीअम् ॥ ४।१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हे सखि ज्ञायते यदद्य प्रातरेव स्वप्रियतमां स्मरतैतादृशं गीतम्गीतम्, येनास्माकं कामाहतहृदयस्य व्रणेपु आघाता कृत:।

इदमेव मानममरुको निम्नप्रकारेण प्रकटितवान्। अत्रामरुककल्पनायाः प्रतिभायाश्च चमत्कारः दर्शनीयो विद्यते।

रात्रौ वारिभरालसाम्बुदरवोद्विग्नेन जाताश्रुणा,
पान्थेनात्मवियोग-दुःखपिशुनं गीतं तथोत्कण्ठया।
आस्तां जीवितहारिणः प्रवसनालापस्य सङ्कीर्त्तनम्,
मानस्यापि जलाञ्जलिः सरभसं लोकेन दत्तो यथा। अमरुक–५४

रात्रौ जलपूर्णमेघस्य ध्वनिं श्रुत्वा-व्यग्रः सजलनयनः पथिकः स्ववियोगसूचकं गीतं विकलतयेदृश्या गीतवान्, यत् जनैः, प्रवासस्य वार्त्ता तु दूरे तिष्ठतु, भावायापि जलाञ्जलिर्दत्तः। मानिन्याः द्वेपस्य चित्रणं कुर्वता गाथासप्तशत्यां कथितम्—

इज्झासि इज्झसु कढ्सि कट्टसु अहफुडसि हिअअ ना फुडसु,
तहवि परिसेसिओ च्चिअ सो हु मए गलिअ सभावो। गाथा ५।१

हृदय! त्वम् ज्वलसि चेज्ज्वल! उज्ज्वलसि चेदुज्ज्वल! स्फुटसि चेत्स्फुट, मया तु सद्भावरहिता सा त्यक्ता।

अमरुक इममेव भावं पल्लवितं कुर्वन् लिखितवान्—

स्फुटति हृदयं कामः कामं करोतु तनुं तनुम्,
न सखि, चपलप्रेम्णा कार्यं पुनर्दयितेन मे।
इति सरभसं मानावेशादुदीर्य वचस्तया,
रमणपदवी सारङ्गाक्ष्या निरन्तरमीक्षिता। अमरुक–७३

हृदयंस्फुटति चेत्स्फुटेत्, कामः शरीरं क्षिणोति-चेत् क्षिणुयात् किन्तु, सखि, अस्थिर-प्रेम-प्रियेण सह मम नेदानीं कोऽपिसम्बन्धः। मृगाक्षी मानावेशे इदं कथयित्वा तन्मुखं पश्यन्ती स्थिता, यद्दिशि तत्प्रियश्चलितः।

प्रियदर्शन-सदृशं प्रियग्रामसीमादर्शनमपि सुखदायि भवति। गाथा-सप्तशत्यां भावमिमं स्पष्टं कुर्वता लिखितम्—

अच्छउ दाव मणहरं पिआइ मुहदंसणं अइ महग्घं,
तरगामछेत्तसीमा विझत्ति दिट्ठा सुहावेइ। गाथा २।६८

एतदेव तथ्यममरुकेनैवं प्रदर्शितम्—

आस्तां दूरेण तावत् सरभसदयिता लिङ्गनानन्दलाभ,
स्तद्गेहोपान्तरथ्या-भ्रमणमपि परां निर्वृतिं संतनोति॥ अमरुक–१००

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पञ्जरे पालिता सारिका नायिकायाः रतिकालीनं विस्रम्भवचनं सर्वसमक्षं प्रकटयति । गाथा-सप्तशत्यां कथितमस्ति—

पञ्जरसरिं अत्ताणणेसि किं एत्थ रइहराहिंतो,
वीसम्भजंपिआइं एसा लोआणं पअहेइ । गाथा० ६।५२

अमरुककविः उक्तगाथायाः भावं गृहीत्वा स्वसारिकाया उक्तस्थितिं प्रकटीकृतवान् । नायिका स्वचातुर्य्येणोक्तस्थितिं निगूहति । यथा—

दम्पत्त्योर्निशि जल्पतो गृंहशुकेनाकर्णितं यद्वचः,
तत्प्रातर्गुरुसन्निधौ निगदता श्रुत्वैव तारं वधूः ।
कर्णालम्बितपद्मरागशकलं विन्यस्य चञ्च्वाः पुरो,
व्रीडार्ता प्रकरोति दाडिमफलव्याजेन वाग्बन्धनम् । अमरुक—१६ पद्यम्

रात्र्याः वार्त्तां पालितशुकः श्रावितवान् । प्रातः काले वधूः गुरुजनसमक्षमेव-तासां वार्त्तानामावृत्तिं शुकमुखाच्छ्रुत्वा लज्जनतमुखी वभूव । अतः सा कर्णधृत-पद्मरागमणेः खण्डं निष्कास्य शीघ्रतया तन्मुखाग्रे रक्षितवती । भ्रमेण दाडिम-बुद्ध्या शुकस्य मुखं पिहितं जातम् ।

कविरमरुकः 'प्रासादे सा दिशि-दिशि च सा पृष्ठतः सा पुरः सा[1]' पद्यं गाथा सप्तशत्याः" जं जे पुलएसि दिसं पुरओ लहिअव्वं दीससे तत्तो[2]" गाथया प्रभावितो भूत्वा लिखितवान् । एवमेव "वाले नाथ विमुञ्च मानिनि[3]" पद्यं पसिअ पिए का कुविआ[4] "गाथया प्रभावितो भूत्वा" चरणपतनं "सख्यालापा[5]" पद्यं पाअपडणाणं मुद्धे[6] गाथया प्रभावितो भूत्वा "श्रुत्वा नामापि यस्य स्फुटधनपुलकं[7]" "तस्स कहाकंटइए" गाथया,[8] "मलयमरुतां व्राता वार्त्ता[9]" दिट्ठा चूआ अग्घाइआ[10] "गाथया च प्रभावितः, चिन्तामोह-विनिश्चलेन मनसा[11]" "वालअ तुमाहि अहिअं[12]" गाथया, "सन्दष्टेऽधरपल्लवे[13]" पद्यं "मण्णे आसाओच्चिअ[14]" गाथयैवं "कोपात् कोमल लोलवाहुलतिकापाशेन[15]" पद्यमेकं पहरुव्विणं हत्थं[16] मुहयारुएग वीऊंतो" गाथया प्रभावितो भूत्वा लिखितवान् ।

---

१. अमरुक १०१ । २. गाथा ६।३७। ३. अमरुक ५३ ।
४. गाथा ४:८४ । ५. अमरुक ९५ । ६. गाथा ४।६५ ।
७. अमरुक ५९ । ८. गाथा० ७।५९ । ९. अमरुक—३३ ।
१०. गाथा० ११९७ । ११. अमरुक०—८७ । १२. गाथा ३।१५ ।
१३. अमरुक ३७ । १४. गाथा० ६।९३ । १५. अमरुक ८,१६ ।
१६. गाथा० १,८६ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अमरुकशतकं श्रृङ्गारिकभावनाभिव्यक्ति-कृते गाथासप्तशत्याः अत्यधिकमृणि वर्त्तते। संयोग-विप्रलम्भ-श्रृङ्गारसम्वन्धिनीनामवस्थानां, भावनानामेवमूहात्मक-तथ्यानामभिव्यञ्जनापि गाथासप्तशत्याधार एव सम्पन्नाभूत् नायकस्य नायिकायाश्च प्रेम-श्रृङ्गार-सम्वन्ध्यभिव्यक्त्याधारश्च गाथासप्तशती वर्त्तते।

सीलं वरं कुलाओ दालिद्दं भव्वयं च रोगाओ।
विज्जा रज्जाउ वरं खमा वरं सुट्ठु वि नवाओ। वज्जालग्गं, वीर-
वज्जा ८५

शीलं कुलात् महदस्ति। दरिद्रता रोगाच्श्रेष्ठास्ति। विद्या राज्यादुत्तमास्ति। क्षमा तपस उन्नता श्रेयष्करीचास्ति।

उपर्युक्तपद्ययोः तुलनया स्पष्टमस्ति यत् कविभर्तृहरिः 'वज्जालग्गं' काव्यात् प्रेरणां गृहीत्वा स्वकल्पनाशक्त्या प्राप्तभावं विस्तृतवान्।

श्रृङ्गारशतके विपरीतरतेः चित्रणमस्ति। एतद्भावकृते कविः गाथासप्तशत्याः प्रेरणां गृहीतवान्। यथा––

उरसि निपतितानां स्रस्तधम्मिल्लकानां,
मुकुलितनयनानां किञ्चिदुन्मीलितानाम्।
उपरि सुरतखेदस्विन्नगण्डस्थलाना––
मधरमधु वधूनां भाग्यवन्तः पिवन्ति। श्रृङ्गारशतकम्, पद्यम् २५

एतद्भावकृते गाथासप्तशत्यां कथितमस्ति––

दरवेदिरोरु जुअलासु मउलिअच्छीसु लुलिअचिहुरासु,
पुरिसाइ दीसु कामो पिआसु सज्जाउहो वसइ। गाथा० ७।१४

प्राकृते वैराग्यशतकमुपलब्धमस्ति, किन्त्वस्याः प्रणेतुः नामाज्ञातमस्ति। रचनाकालनिर्णयाय किमपि सबलप्रमाणं नोपलब्धमस्ति। एतत् काव्योपरि गुण-विनयेन वि० स० १९४७ समये संस्कृतवृत्तिर्लिखिता।

वर्ण्यविषयः, स्थापत्यम्, भावाः, अन्यानि च कतिपयसांस्कृतिकतत्त्वान्यस्य रचना-कालं प्राचीनं सूचयन्ति। प्राकृते नीतिगीतीनां वैराग्यगीतीनाञ्च विकासः समयसार–प्रवचनसार - मूलाचार–दशवैकालिकोत्तराध्ययन–धम्मरसायण-कल्याणा-लोचनादिभ्यो जातः। बीजसूत्रमुक्तार्षग्रन्थेषु विद्यमानमस्ति। अतो यद्वैराग्य-शतकमुपलब्धं तस्य वर्ण्यविषयः भर्तृहरिशतकेभ्यः प्राचीनमपि सम्भाव्यते। अस्य ग्रन्थस्य कतिपयपद्यानि नीति-वैराग्यशतकयोः पद्यानि प्रभावयन्ति। यथा––

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रूवमसासयमेयं विज्जुलयाचंचलं जए जीयं।
संझाणुरागसरिसं खणरमणीयं च तारुण्णं।। वैराग्यशतकम्, गा० ३६

शारीरिकसौन्दर्यं रोगादिभिः विकृतत्वादनियतमस्ति; जीवनं विद्युल्लतासदृशं क्षणविध्वंसि वर्त्तते यौवनञ्च संध्याकालीनारुणिमसमानं क्षणमात्रं सुन्दरं प्रतीयते।

विहवो सज्जणसंगो- विसय सुहाइं विलासललियाइं।
नलिणीदल-अग्ग धोलिर-जललव—परिचंचलं सव्वं—वैराग्यशतकम् १४

वैभवं सज्जनसंगतिः, विषयसुखं सुन्दरविलास-सामग्री च कमलपत्रे संलग्न-जलविन्दुसदृशं क्षणस्थायि विद्यते।

निसाविरामे परिभावयामि गेहे पलित्ते किमहं सुयामि,
उज्ज्झंतमप्पाणमुविक्खयामि जं धम्मरहिओ दिअहे गमामि। वैराग्य ३९

एतासां गाथानां प्रभावः वैराग्यशतकपद्येपु प्राप्यते।

भर्तृहरेः शतकत्रये प्राकृतगाथानां प्रभावः

प्राकृतगीतिकाव्यस्य, भावस्य, शैल्याः, शिल्पविधानस्य च दृष्ट्या, भर्तृहरेः शतकत्रये प्रभावोऽस्ति। तस्य शृङ्गारशतकन्तु गाथासप्तशत्याः भावानामनुकरण एव लिखितमस्ति। नीतिशतकस्य वज्जालग्गायर्णधारणमनुचितं नास्ति। वैराग्यशतकोपरि थेर-थेरी-गाथानामपि पर्याप्तप्रभावोऽस्ति। निश्चयतः भर्तृहरिः स्व-शतकत्रयस्य प्रणयनं प्राकृतगाथाभिः प्रेरणां प्राप्य कृतवान्। एतत्सत्यमस्ति यत् प्रेरणायां प्राप्तायामपि मौलिकतायाः न्यूनता नास्ति। कवेः स्वविशेषताः सर्वत्र दृश्यन्ते—

शतकत्रयारम्भः निम्नाङ्कितपद्याज्जायते। ध्वन्यतेऽस्मादेव पद्यात् शतकत्रय-निर्माणकारणम्—

यां चिन्तयामि सततं मयि सा विरक्ता,
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः।
अस्मत्कृते तु परितुष्यति काचिदन्या,
धिक् तां च तं च मदनं च इमां च मां च।

अहं यां चिन्तयामि, सा मयि विरक्तास्ति। साप्यन्यमिच्छति जनं स जनोऽन्यसक्तो वर्त्तते। सोऽन्यजनोऽपि कस्यामप्यन्यस्यां सुन्दर्यामासक्तो वर्त्तते, या तं नाभिलष्य मामिच्छति। अतोऽस्मान् सर्वान् तथास्माभिः सह कामदेवमपि धिगस्ति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रेम्ण उक्तविडम्वनाकृते भर्तृहरिः निम्नलिखितगाथया प्रभावितोऽस्ति। गाथा-सप्तशत्यामपि उक्तप्रकारस्य प्रेमविडम्वना प्राप्यते—

सा तुज्झ वल्लभा तं सि मज्झ वेसो सि तीअ तुज्झ अहं।
वालअ फुडं भणामो पेम्मं किर वहुविआरं त्ति। गाथा० २।२६

हे वालक, अविवेकिन्, सा तव प्रिया वर्त्तते त्वं मम प्रियोऽसि। तस्याः तुभ्यं द्वेषोऽस्ति तथा तव मह्यम्। प्रेम्णि वहवो दोषाः सन्ति।

एतत्सत्यमस्ति यत् भर्तृहरिः उक्तगाथायाः भावविस्तारं कृत्वा एकस्याः नवायाः भावनायाः समावेशं वाञ्छितवान्।

भर्तृहरिः नीतिशतके क्षमायाः, क्रोधस्य, जातेः, मित्रामित्रादेश्च मूल्याङ्कनं कुर्वन् जीवनस्य कठोरतासु निर्देशं कृतवान्।

क्षान्तिश्चेत् कवचेन किं किमरिभिः क्रोधोऽस्ति चेद्देहिनाम्,
ज्ञातिश्चेदनलेन किं यदि सुहृद् दिव्यौषधैः किं फलम्।
किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्याऽनवद्या यदि,
व्रीड़ा चेत् किमु भूषणैः सुकविता यद्यस्ति राज्येन किम्।

—नीतिशतकम, २१ पद्यम्

यदि क्षमा वर्त्तते तदा कवचस्य कावश्यकता वर्त्तते। सति क्रोधे शत्रूणां किं प्रयोजनं वर्त्तते? ज्ञातिवन्धुषु सत्सु वह्नेः कावश्यकतास्ति, मित्रेषु वर्त्तमानेषु उत्तमौषधैः किं फलम्? दुर्जनेषु विद्यमानेषु सर्पाणां किं कार्यम्? निर्दोषायां विद्यायां धनस्य कावश्यकता? लज्जायां सत्यामाभूषणस्य कावश्यकता। सुन्दर-कवितायां विद्यमानायां राज्यस्य किं प्रयोजनं विद्यते

उक्ताशयकृते प्रेरिका 'वज्जालग्गस्य' निम्नलिखिता गाथा विद्यते। वज्जा-लग्गस्य संग्रहोऽपि तृतीयायां चतुर्थ्यां वा शताब्द्यामभूत्, तथा तस्मिन् संकलिताः गाथाः परमप्राचीनाः सन्ति।

आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्रीः,
अर्थाः संकल्पकल्पाः घन-समयतडिद्विभ्रमाः भोगपूगाः।
कण्ठाश्लेषोपगूढं तदपि च न चिरं यत् प्रियाभिः प्रणीतम्,
व्रह्मण्यासक्तचित्ता भवत भवभयाम्भोधि-पारं तरीतुम्।

वैराग्यशतकम्—३६

× × ×

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भोगास्तुंगतरंगभंगतरलाः प्राणाः क्षणध्वंसिनः,
स्तोकान्येव दिनानि यौवनसुख-स्फूर्त्तिः प्रियासु स्थिता ।
तत्संसारमसारमेव निखिलं बुद्ध्वा बुधावोधका,
लोकानुग्रहपेशलेन मनसा यत्नः समाधीयताम् ।। वही, ३४

× × ×

भोगाः मेघ-वितानमध्य-विलसत्-सौदामिनी-चञ्चलाः ।। तदेव ३५

एवं भर्तृहरिः प्राकृतगीतिभ्यः प्रभावं प्रेरणाञ्च प्राप्य स्व-शतकत्रयस्य रचनां कृतवान् । उत्तराध्ययन-दशवैकालिकयोः वैराग्यशतकस्याधिकांशपद्यानां स्रोतां स्युपलब्धानि । वैराग्यभावनायाः पुष्टिकृते बौद्ध-जैन-वाङ्मयेभ्यः स्रोतोग्रहणस्य कल्पना नानुचितास्ति ।

आर्यासप्तशत्यां प्राकृतगीतीनां प्रभावः

गाथासप्तशत्या अनुकरणोपरि 'आर्यासप्तशत्याः' रचनाभूत् । आकार-प्रकारावुभयोरपि समानौ स्तः । परं शिल्पे भेदोऽस्ति । गाथासप्तशती शतकेषु विभाजितास्ति । परमार्यासप्तशती वर्णानुक्रमाधृतास्ति । शैल्याः वर्ण्यविषयस्य च दृष्ट्या गोवर्द्धनः गाथासप्तशत्याः पूर्णतोऽनुकरणं कृतवान् । अतः प्रभाव-वार्त्ता परं स्पष्टास्ति । शताधिकगाथानां भावच्छायां गृहीत्वा स आर्याणां प्रणयनं कृतवान् ।

नायिकां ज्वरग्रस्तां श्रुत्वा बहुदिनानन्तरं समागतं प्रियं ज्वर-प्रशंसाच्छलेनोपालम्भं ददाना नायिका कथयति ।

ज्वर वीतौषधबाधस्तिष्ठ सुखं दत्तमखिलं ते ।
अशुभलोकाकर्षणपाषाण ! सखे न मोक्ष्यसि माम् । आर्या २४०

गाथासप्तशत्यां कथित एष भावः—

सुह उच्छअं जणं दुल्लहं पि दूराहि अम्ह आणवंत ।
उअ आरअ जर जीअं पि णेंत ण आवरा होसि ।। गाथा० १।५०

कापि प्रोषितपतिका स्वप्रियागमनस्य प्रतीक्षायां दिवसगणनां करोति । एतदर्थं सा भित्तौ रेखामङ्कितां करोति, यथा भवनभित्तिः कपोलस्थलपाण्डुरा जाता । एष भावो गोवर्द्धनेन निम्नप्रकारः प्रकटीकृतः ।

त्वद्गमन-दिवसगणना-वलक्षरेखाभिरङ्किता सुभग ।
गण्डस्थलीव तस्याः पाण्डुरिता भवनभित्तिरपि । आर्या ६२०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गाथासप्तशत्याम्—

अज्जं गओत्ति अज्जंगओत्ति गणरीए।
पढम न्विअ दिअहद्धे कुड्डो रेहाहिं चिन्तलिमो ॥ गाथा ३।८

कामकलाविलाससमये या नायिकाऽत्यन्तचञ्चला प्रवीणा दृश्यते, सैव प्रातःकालेऽवनतमुखी शान्ता च दृश्यते। नायिकायाः अस्य परिवर्त्तनस्य चित्रणं कुर्वन् गोवर्द्धनो लिखितवान्—

विनयविनता दिनेऽसौ निशि मदनकलाविलसदङ्गी,
निर्वाणज्वलितौषधिरिव निपुणप्रत्यभिज्ञेया ॥ आर्या० ५१३

गाथासप्तशत्यामुक्तभावः प्राप्तोऽस्ति। गोवर्द्धनः केवलं रूपान्तरं कृतवान्—

अण्णासआइँ देंती तह सुरए हरिसवि असि अकवोला,
गोसे वि ओण अमुही अह सेत्ति पिआं ण सद्दहिमो। गाथा० २।२३

रात्रौ सुरतसमये शत-शताज्ञादात्रीं प्रियां प्रातःकालेऽवनतमुखीं वीक्ष्य विश्वासो न जायते, यत् इयं सैवास्ति।

ग्रामनायकस्यायुधव्रणैः कर्कशे वक्षसि तस्य पत्न्याः शयने काठिन्यं प्रतीयते, परं तद्रक्षितो ग्रामः सुखपूर्वकं स्वपिति।

पहरवणमग्ग विसमे जाआ किच्छेण लहइसे णिद्दं।
गामणि उत्तस्स उरे पल्ली उण सा सुहं सुवई ॥ गाथा० १।३१

आर्यासप्तशत्यां वीरवध्वाः श्रियश्च सुख-पूर्वकशयनस्य चित्रणमुक्तभावपृष्ठभूमावेव कृतं विद्यते। यद्यपि गोवर्द्धनार्याः गाथासप्तशत्याः अनुवादमात्रं सन्ति, तथापि कथने वैचित्र्यमस्ति।

विविधायुधव्रणार्वुदविषमे वक्षःस्थले प्रियतमस्य,
श्रीरपि वीरवधूरपि गर्वोत्पुलका सुखं स्वपिति। आर्या ५१६

गाथासप्तशत्यां कथितमस्ति यत् नायकहृदयेऽन्यप्रेयसीनां निवासकारणात् नायिकातद्धृदये न प्रविशति। यथा—

महिला सहस्सभरिए तुह हिअए सुहअ मा अमअंती,
दिअहं अवण्णकम्मा अंगं तणुअंपि तणुएइ। —गाथा २।८२

गोवर्द्धन उक्तभावं विस्तारयन्लिखितवान्—

प्रददाति नापरासां प्रवेशमपि पीनतुङ्गजघनोरुः,
या लुप्तकीलभावं जाता हृदि बहिरदृश्यापि ॥ आर्या० ३७४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थात् नायिकां नायकहृदये कीलवत् लग्नां कथितवान्। यतोऽन्याकृते तत्र-स्थानं नास्ति। व्याधवाणलक्ष्यीभूता मृगी मरणकाले सतृष्णनेत्राभ्यां हरिणं पश्यति—

आ अण्णा अड्ढिअ णिसि अभल्लमम्माह आइ हरिणीए।
अद्दंसणो पिओ होहिइ ति वलिउं चिरं दिट्ठो॥ गाथा० ६।९४

कर्णाकृष्टेण वाणेन मर्माहता मृगी मृत्युकाले प्रियं पश्यन्ती स्थिता। यतोऽतःपरं पुनः कदापि दर्शनं न भवितुं, शक्नोति—

गोवर्धन इमं भावं गृहीत्वार्यां रचितवान्—

दृष्ट्यैव विरहकातरतारकया प्रियमुखे समर्पितया,
यान्ति मृगवल्लभायाः पुलिन्द-वाणार्दिताः प्राणाः। आर्या० २४३

कस्यामप्यनासक्तनायिकायामासक्तनाथकंप्रति दृढ़प्रेमसत्त्वेऽपि उपेक्षितनायिको-पालम्भं ददाति। यथा—

सा तुज्झ वल्लहा तं सि मज्झ वेसो सि तीअ तुज्झ अहं,
वालअ फुडं भणामो देम्मं किर बहु विआरं त्ति॥ गाथा० २।२६

सा तव प्रियास्ति, त्वं मम प्रियोऽसि। सा तुभ्यं द्वेषं करोति। त्वं च मह्यं द्वेषं करोषि। सत्यं त्वेतदस्ति यत् प्रेम्णि बहवो विकाराः भवन्ति—

गोवर्द्धनोऽस्य भावस्य परिवर्त्तनं विधाय एकां नवां कल्पनामुपस्थापितवान्—

या दक्षिणा त्वमस्यामदक्षिणो दक्षिणस्त्वमितरस्याम्,
जलधिरिव मध्यसंस्थो न वेलयोः सदृशमाचरसि—आर्या० ४८०

यानुकूलास्ति, त्वं तस्यामनुकूलो नासि, प्रत्युतान्यस्यां नायिकायामनुकूलोऽसि। तवाचरणं वेलयोर्मध्ये स्थितस्य समुद्रस्य सदृशमनुचितमस्ति।

कस्यामपि नायिकायामनुरक्तं नायकं विरहेण प्रतिदिनं क्षीयमाणं विलोक्य तस्य स्वकीया नायिकापि संयोगं कारयितुं सक्रियां चेष्टां करोति, गाथासप्तशत्यामुक्ततथ्यस्य चित्रणंकुर्वता लिखितमस्ति—

सो तुज्झ कए सुन्दरि तह छीणो सुमहिलो हलिअ उत्तो।
जह से मच्छरिणीएँ वि दोच्चं जाआएँ पडिवण्णं॥ गाथा० १।८४

सुन्दरि! त्वदर्थं हलिकपुत्रः एतादृशः क्षीणो जातो यत्तस्या ईर्ष्यावती पत्नी अपि दूतीकार्यं कर्त्तुं प्रस्तुता वर्त्तते।

गोवर्द्धनेन उक्तगाथायाः प्रभावं गृहीत्वा नायिका प्रतिदिनं क्षीयमाणा दर्शिता—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रियविरहनि:सहाया सहजविपक्षाभिरपि सपत्नीभिः,
रक्ष्यन्ते हरिणाक्ष्याः प्राणाः गृहभङ्ग-भीताभिः । आर्या ३८०

प्रियविरहकारणात् निःसहायाः सपत्न्यः स्वभावतो विरुद्धा अपि, गृह-विनाश-भयात् मृगाक्ष्याः प्राणरक्षां कुर्वन्ति ।

स्नानसमये मुक्तकेशानां चित्रणं कुर्वता गाथासप्तशत्यां लिखितम्
पत्तणि अंवप्फसाण्हाणुत्तिराणाएँ सामंतगीएँ ।
जलविन्दुएहिँ चिहुरा रुअन्ति वन्धस्सव भएण ।। गाथा—६।५५

नायिकास्नान-समये मुक्तकेशाः भाविवन्धनभयात् जलविन्दुरूपेणाश्रूणि वर्षन्त-इव प्रतीयन्ते ।

एनमेव भावं गृहीत्वा गोवर्द्धनाचार्यः लिखितवान् यत् नायिकायाः मुक्तमानस्य चिकुरकलापस्य वन्धनगतत्वात् सिन्दूरस्य सीमन्तरूपेण हृदयं विदीर्णमिव प्रतीयते ।

वन्धनभाजोऽमुष्याश्चिकुरकलापस्य मुक्तमानस्य ।
सिन्दूरितसीमन्तच्छलेन हृदयं विदीर्णमिव । आर्या ४०७

नायिकायाः संकेतस्थलेऽप्राप्तौ नायकस्य तत्र निवृत्तौ तथा स्वैतद्विडम्वना-प्रकाशने नायिकामुखं म्लानं जायते । गाथासप्तशत्यामस्य वर्णनं निम्नप्रकारमस्ति—

सामाइ सामलिज्जइ अद्धच्छिपलोइरीअ मुहसोहा,
जंम्वूदलकअकण्णाव अंश भरिए हलिअपुत्ते ।। आर्या ४०६

हलिकयुवा यदाजम्वूप्ररोहं कर्णयोः निधाय भ्रमन् दृष्टस्तदा कटाक्षदक्षायाः सुन्दर्याः मुखच्छाया श्यामा अभवत् ।

गोवर्द्धन इममेव भावं गृहीतवान्—

कोपवति पाणिलीलाचञ्चलचूताङ्कुरे त्वयि भ्रमति,
करकम्पितकरवाले स्मर इव सा मूर्च्छिता सुतनुः । आर्या १९०

करे करवालं गृह्णन् कामसदृशः स्वहस्तगतयाम्रमञ्जर्या क्रीडन् तव सरोष-भ्रमणे सा कृशोदरी मूर्च्छिता ।

प्रिया-प्रदत्तांमालां युवकः धृतवानस्ति । स तया मालया परं सुशोभितो वर्त्तते । कथितम्—

सा तुइ सहत्थदिण्णं अज्जवि रे सुहअगंधरहिअं पि,
उव्वसि अण अरधर देव देव्व ओमालिअं वहइ ।।गाथा० २।९४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हे सुभग ! त्वया या माला स्वहस्तेन तस्यै प्रदत्ता, सा यद्यपि गन्धहीना जाता, तथापि परित्यक्त-नगरदेवता-सदृशी सा तां धृतवत्यस्ति ।

इममेव भावमवलम्ब्य गोवर्द्धनेनार्या लिखिता—

अपनीतनिखिलतापां सुभगस्वकरेण विनिहितां भवता,
पतिशयनवारपालिज्वरौषधिं वहति सा मालाम् । आर्या० ४६

हे सुभग ! त्वया स्वहस्तेन समस्ततापहरणशीला या माला तस्यै दत्ता, सा तां स्वपत्या सह शयनरूपतृतीयकज्वरौपधिरूपेण रक्षति ।

नार्याः अङ्गोपाङ्गसौन्दर्य-चित्रणे गोवर्द्धनःगाथासप्तशत्याः उपमानानां चयनं कृतवान् । दम्पत्योः समसुखदुःखतां प्रतिपादयन् गाथासप्तशत्यां कथितवान्—

समसोक्खदुक्खपरिवड्ढिआणं कालेण रूढपेम्माणं,
मिहुवाणं मरइ जं तं खु जिअइ इअरं मुअं होइ । गा० २।४२

समान-दुःखसुखयोः तथा कालक्रमेणारूढप्रेमवतोः पतिपत्न्योः यः निधनत्वं याति, वस्तुतः स एव जीवति तथा यो जीवति, स पञ्चत्वं गच्छति ।

गोवर्द्धनोऽपि तथ्यमिदं व्यक्तवान्

निष्कारणापराधं निष्कारणकलहरोषपरितोषं—
सामान्यमरणजीवनसुखदुःखं जयति दाम्पत्यम् ।। आर्या ३०४

अकारणापराधकलहरोषपरितोषयुक्तस्य, समानमरणजीवनसुखदुःखशीलस्य दाम्पत्यस्य जयोऽस्तु ।

स्पष्टमस्ति यत् गोवर्द्धनः गाथासप्तशत्याः शब्दावलिं शैलीञ्चानुकृतवान्—

गीतगोविन्दोपरि प्रभावः

गीतगोविन्दोपरि क्षेमेन्द्रस्य दशावतारचरितस्य स्पष्टप्रभावो विद्यते । क्षेमेन्द्रे ऽद्भुतवाग्वैदग्ध्यम्, अतुलशब्दचयनशक्तिः, वहुवस्तुस्पर्शिनी दृष्टिः तथा विशाला सहृदयता विद्यन्ते । क्षेमेन्द्रः दशावतारचरिते कृष्णचरितं विशेषरूपेण लिखितवान् । राधाकृष्णाभ्यां साहित्यिकमहत्त्वदानस्य श्रेयः क्षेमेन्द्रस्याधिकमस्ति । कृष्णे मथुरां गते विरहाग्निसंतप्तो भूत्वा यमुनायाः तटवर्त्तिनि स्निग्धे श्यामले हरितनिकुञ्जे गोपीभिः रागेण सह कृष्णस्य गुप्तगुणानामेवं मधुरं गानं कृतम्, यत् गोभिः चर्वित-चर्वणं त्यक्तं तथा कर्णावुत्थितौ कृत्वा मुग्धाभिश्च ताभिः गानश्रवणे प्रवृत्तम् । गीतिः निम्नप्रकारास्ति—

ललित-विलास-कला-सुख-खेलन—
ललना-लोभन-शोभन-यौवन—
मानितनवमदने ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अलिकुलकोकिलकुवलयकज्जल—
कालकलिन्दसुताविवलज्जल—
कालिय-कुल-दमने ।
केशि-किशोर-महासुरमारण—
दारुण-गोकुल-दुरित-विदारण—
गोवर्द्धनधरणे ।
कस्य न नयनयुगल रतिरङ्गे
मज्जतिमनसिजतरलतरङ्गे,
वररमणीरमणे । —दशावतार०, ६३

स्पष्टमस्ति यत् उक्तप्रकाराः गीतयः जनमानसात् लोकगीतिभ्यो वा गृहीताः सन्ति । जयदेवप्रयुक्तायाः गीतगोविन्दस्य कोमलकान्तपदावल्याः स्रोतः क्षेमेन्द्रस्य दशावतारचरितमस्ति । गीतिकारः जयदेवः राधाकृष्णयोः मनोऽनुकूलरतोत्सवाय क्षेमेन्द्रस्यैव वासन्तंवातावरणमङ्गीकृतवान्, भागवतकारस्यशारदंवातावरणं न स्वीकृतवानसौ । भारतस्य लोकजीवने वसन्तः यावत् प्रभूतं हर्षमुल्लासञ्च गृहीत्वायाति, तावत् शरदृतुः नैव । वसन्तः ऋतुराजः कथ्यते । अयमेव वसन्तः जयदेव वाण्यामवतरन् दृश्यते । जयदेवस्य रास-सम्बन्धिनी वसन्तश्रीः द्रष्टव्यास्ति—

ललितलवंगलतापरिशीलनकोमलमलयसमीरे
मधुकर-निकर-करम्बित-कोकिल-कूजित-कुञ्ज-कुटीरे ।।
विहरति हरिरिह सरसवसन्ते ।
नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते ।
उन्मदमदन-मनोरथ-पथिक-वधूजनजनितविलापे,
अलिकुलसंकुलकुसुमसमूहनिराकुलवकुलकलापे,
मृगमदसौरभ-रभसवशंवद-नवदलमाल-तमाले ।
युवजन-हृदय-विदारणमनसिजनखरुचि-किंशुकजाले ।।
गीतगो० सर्ग १ अष्टपदी, ३.

जयदेवस्येदं वासन्तं चित्रं क्षेमेन्द्रस्य वसन्तवर्णनेन प्रभावितमस्ति । क्षेमेन्द्रः लिखितवान्—

अथाययौ यौवनकृद्वल्लीनां कुसुमाकरः
कुर्वाणः सरसां प्रीतिलतां जनमनोवने ।
चञ्चच्चूतरजः पुञ्ज-पीताम्बर-मनोहरः,
अतसीकुसुमश्यामः शुशुभे नवमाधवः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नम्रानना नवोद्भूत-रजसा स्तवकस्तनी,
मालती यौवनवती कन्येवोच्छ्वासिनी वभौ,
वभुर्मलयनिःश्वासा इव चन्दनचुम्बिनः ।
पवनाः पन्नगीदंश-शङ्कयेव शनैः शनैः ।
कूजत्कोकिलकण्ठवंशविरुतैः स्फायिन्यवासे परम्,
चूतामोद-मदाकुलालि-पटली-वीणा-स्वन-स्वादुताम् ।
शिक्षा-चक्षण-दक्ष-दक्षिण-मरुद्दत्तोपदेशक्रमैः,
मञ्जर्यो ननृतुर्मधूत्सवलसत्पृष्पायुधाराधने ॥

—दशावतार० २३०-२३४

क्षेमेन्द्रस्योषा-अनिरुद्धयोःप्रेममिलनवत् राधाकृष्णयोः प्रेममिलनं वर्णितमस्ति। अतः संक्षेपेण गीतगोविन्दोपरि क्षेमेन्द्रस्य पर्याप्तः प्रभावो विद्यते ।

एतदतिरिक्तानां प्राकृतपिङ्गलसूत्रस्योदाहरणानामपि गीतगोविन्दोपरि प्रभावोऽस्ति । इमानि उदाहरणानि पर्याप्तप्राचीनानि सन्ति तथा जयदेवात् पूर्ववर्तीनि सन्ति । अत्रोदाहरणानि प्रस्तूयन्ते —

जिणि वेअ धरिज्जे महिअल लिज्जे पिट्ठिहि दन्तहि ठाउ धरा ।
रिउवच्छ विआरे छल तणु धारे वन्धिअ सत्तु पआल धरा ॥
कुलखत्तिअ कम्पे दहमुह कट्टे कंस अकेसि विणास करा ।
करुणे पअले मेच्छह विअले सो देउ णरा अणु तुम्हवरा ॥

प्रा० पि० सूत्र परि० ५ छन्द २७२

यः पृष्ठे वेदान् निधाय पृथ्वीं प्रापितवान्, दन्तयोराधाय धरामुद्धृतवान्, शत्रोः हिरण्यकशिपोः वक्षो विदारितवान्। यः वामनरूपं धृत्वा शत्रुं रसातलं प्रेषितवान् । यः क्षत्रियकुलं भयभीतं चकार । दशमुखं जघान । कंसं केशिनञ्च नाशितवान् । यः बुद्धरूपेण करुणां प्रसारितवान् तथा कल्किरूपेण म्लेच्छान् रावितवान्, स नारायणः तुभ्यं वरान् ददातु । अस्य पद्यस्य प्रभावः जयदेवस्य निम्नांकितश्लोकोपरि वर्त्तते—

वेदानुद्धरते जगन्ति वहते भूगोलमुद्बिभ्रते,
दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते ।
म्लेच्छान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ।

गीत० गो० सर्ग १।१

प्राकृतपिङ्गलसूत्रस्योदाहरणेषु राधायाः गोपिकानाञ्च प्रणय-व्यापारस्योल्लेखो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विद्यते । अस्य प्रभावोऽपि गीतगोविन्दोपरि वर्त्तते । गीतगोविन्दपश्चाद्वर्तीनि—रामगीतगोविन्द-गीतवीतराग-प्रभृति-गीतिकाव्यानि गीतगोविन्देन प्रभावितानि सन्ति ।

प्रदानम्

संस्कृतगीतिकाव्येन यावत् लोकभाषाभ्योगृहीतम्, ततोऽधिकं लोकसाहित्याय प्रदत्तम् । हिन्दी-गीतीनां मूलस्रोतः संस्कृत-प्राकृतापभ्रंशगीतिषु समाविष्टमस्ति । यथा प्राकृतकाले गाथास्तथा संस्कृतयुगे श्लोकाः सर्वाधिकाः मान्या आसन्, तथैवापभ्रंशकाले दोहाथवाद्रूहोच्छन्दः सर्वाधिकं समादृतमभवत् । एतन्निर्विवादं सत्यमस्ति यत् लोकहृदयं प्राचीनकालादेव गीतिषु निवसदागच्छति । गीतिभ्यो जनता स्वहृदये स्थानं ददाति । सिद्धानां चर्यागीतानि प्रसिद्धानि सन्ति । एतेषां गीतानां प्रभावः विद्यापतौ, कवीरे मीरायाञ्च वर्त्तते । गीतगोविन्दे तालस्वरेषु गीतीनां वन्धस्य यस्य स्थापत्यस्य प्रयोगोऽभूत्, तस्य पूर्णः प्रभावः हिन्द्यादिलोकभाषाणां कविषु वर्त्तते ।

एतत्स्मरणीयमस्ति यत् संस्कृतकविषु महाकविक्षेमेन्द्र एवैतादृशोऽभूत् यः नारीभिः गीयमानाय प्राकृतगीति-प्रकाराय संस्कृतरूपं प्रदत्तवान् । पीयूषवर्षी जयदेवः क्षेमेन्द्रपद्धतेः पूर्णं विकासं विधाय शास्त्रीयगीतीनां रचनां विहितवान् । एकस्य विदुषःमतमस्ति यत् गीतीनां स्वरूपमग्रे हिन्दीकविभिः तदेव रक्षितं यत् सिद्धपरम्परयागच्छदासीत् । जयदेवस्याष्टपदीनां रूपं हिन्दीज्ञैः न स्वीकृतम्, तेषांभावक्षेत्रमवश्यं हिन्दीज्ञेषु प्रभावकमभवत्[1] ।

महाकविकालिदासस्य मेघदूतात् एकस्याः नवायाः गीतिपरम्परायाः प्रारम्भो जातः, या संदेशकाव्यसंज्ञया दूतकाव्यसंज्ञयावाभिहिता । कालिदासात् पश्चात् संस्कृते मेघदूतमनुकृत्य कतिपयानि संदेशकाव्यानि लिखितानि । एतेषु सर्वेषु सन्देशकाव्येषु विचाराः भावाश्च कालिदासस्यैव सन्ति, केवलं कलेवरेषु परिवर्त्तनं वर्त्तते । कियद्भिः कविभिः मेघदूतस्य समस्यापूर्त्तिं विधाय कालिदासस्य भावक्षेत्रपरिवर्त्तनस्य पूर्णः प्रयासो विहितः ।

अपभ्रंशे लिखितं 'सन्देशरासक' काव्यं मेघदूतस्यानुकरणमस्ति । पार्थक्यमेतदेवास्ति यत् मेघदूते सन्देशं यक्षः मेघेन प्रेषितवान्, परं सन्देशरासके सन्देशं प्रिय-

---

१. लालधर त्रिपाठी 'प्रवासी'—गीतिकाव्यका विकास, हिन्दी प्रचारक पुस्तकालय, वाराणसी, पृ० ४१९ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तमा पथिकेन प्रेषितवती। विरहभावनायाश्चित्रणमुभयत्र समानरूपेण जातमस्ति। सन्देशकाव्येषु हंस-शुक-पिक-सारंग-काक-पवन-मेघ-नदी प्रभृत्युड्डयनशील-प्रवहणशीलचेतनाचेतन-पदार्थेभ्योऽसंख्यगीतेषु प्रणयसंदेशं समर्प्य विरहिणो जनाः स्वहृदयाश्वासनस्य निरूपणं कृतवन्तः। मेघदूतस्यात्यन्तस्वाभाविकमार्मिककल्पनानामुपयोगं विहितवन्तः। सन्देशरासकस्य सम्पूर्णं वस्तु गीतिकाव्यात्मकमस्ति। अस्मिन्नपि मेघदूतानुकरणे कथाक्षीणतन्तूनां निवन्धनं जातं विद्यते। तथापि गीतिषु स्वतन्त्रतायाः वैयक्तिकतायाश्च सद्भावो विद्यते।

मेघदूतकाव्यस्य प्रभावः जायस्युपर्यपि वर्त्तते। जायसीकविः पद्मावते पद्मिन्यै रतनसेनस्य प्रणयसन्देशं शुकद्वारेण प्रेषितवान्। विरहिणी नागमती हंसं काकञ्च प्रियसमीपे-संदेश-प्रापणाय प्रार्थयते।

रामकथासम्वन्धिकाव्येषु रामोहनुमद्द्वारेण सीतायै प्रेमविरहयोः, सान्त्वनाशयोः संदेशं प्रेषयति तथा तदुत्तरे सीता स्वमर्मव्यथां रामंप्रति प्रेषयति। सूरदासः स्वरामकथा-सम्वन्धिपद्येषु अस्य प्रसंगस्यात्यन्तं हृदयावर्जकं चित्रणं कृतवान्। तुलसीदासः मानसे तथान्यरचनासु संदेशप्रसंगेऽस्मिन् स्वभक्ति-समन्वितां संवेदनां प्रकटितवान्।

दूतकाव्यसम्वन्धि-संस्कृतगीतीनां प्रभावः कृष्णभक्तकाव्येषु वर्त्तते। कृष्ण उद्धव-द्वारेण गोपीभ्यः सन्देशं प्रेषयति। श्रीमद्भागवतस्य दशमस्कन्धस्य, (४६-४७) अध्याययोः कथासूत्रं गृहीत्वा सूरदासेन मेघदूतादिकाव्यानुकरणोपरि मौलिकरचना लिखिता। सूरदासप्रणीत-भ्रमर-गीतानुकरणोपर्यनेककृष्णकाव्यप्रणेतृभिः सन्देशकाव्य-विधा समृद्धा कृता। रीतिकालीनकविभिरपि मार्मिकप्रसंगस्यास्योपयोगो विहितः।

आधुनिककविभिरपि भक्तिरीतिकालीनपरम्परायाः अस्याः विशिष्टविधायाः समृद्ध्यै काचिदपि न्यूनता न विहिता। व्रजभाषायाः समर्थकवेः जगन्नाथदासरत्नाकरस्योद्धवशतकमस्या एव परम्परायाः काव्यमस्ति।

मेघदूतपरम्पराया हिन्दीभाषायां यथेष्टविकासोऽभवत्। सत्यनारायणकविरत्नेन स्वभ्रमरदूते यशोदापक्षेण कृष्णाय सन्देशः प्रेषितः। तस्मिन् समसामयिकदेशदशयासह देशभक्तेः समाजसुधारस्य, समाजसेवायाः भावनाः अंकिताः सन्ति। अयोध्यासिंह उपाध्यायः 'हरिऔधः' स्वप्रसिद्धकाव्यग्रन्थे प्रियप्रवासे पवनं दूतं परिकल्प्य सन्देशं प्रेषितवान्, तस्मिन् व्रजस्य वियोगदशायाः समसामयिक-सन्दर्भे वर्णनं कृतमस्ति तथा सन्देशे देशभक्तेः समाजसेवायाश्च भावनाः प्रकटीकृताः सन्ति।

हिन्द्यां (खड़ी वोली) सन्देश-विषयक-गीतिकाव्यस्य रचना विशेषरूपेण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नाभूत् । 'पत्रकाव्य'रूपेण सन्देश-गीतिकाव्यस्य परम्परायाः पूर्णो विकासोऽभवत् । मैथिलीशरणगुप्तस्य 'पत्रावली' तथा 'निराला कवेः 'छत्रपतिशिवाजीकापत्र' रचनाः प्रसिद्धाः सन्ति ।

हिन्दीकाव्ये पत्रगीतेः विकासः संस्कृतस्य सन्देशगीतिकाव्यादेवाभूत् । मीरा पत्रगीति-चर्चां कृतवती । सा कथितवती—"सबके पिय परदेश बसतु हैं लिखि-लिखि भेजे पाती, मोरा पिया हिरदय मो बसता, गूँज करों दिन राती" सूरदासस्य गोपिका अपि पत्रं लिखितुं वाञ्छति परं ताः दुर्दैवशात् पत्रं न लिखन्ति । आधुनिक-प्रसिद्धकविः जनार्दनप्रसाद झा 'द्विजः'—'टूटा हिमहार' शीर्षकमेकं पत्रगीतिकाव्यं लिखितवान्, यत् (६ अक्टूबर, १९२७) चाँद-पत्रे प्रकाशितमस्ति। अस्मिन् सन्देश-गीतिकाव्यस्य सर्वे गुणाः सन्ति ।

संस्कृतसन्देशगीतिकाव्यस्यैकमन्यंरूपं विकसितं हिन्दीभाषायाम्—"उपालम्भ काव्यम्' अप्यस्ति) संस्कृतगीतिकाव्ये सखीकर्मान्तर्गतमेतदस्ति । नायकायोपालम्भं प्रदाय नायिकामनोनुकूलविधानमुपालम्भो विद्यते । हिंन्दीभाषायाः भक्ति-काव्यमस्याः सङ्कुचितसीमायाःअधिकं व्यापकं विस्तृतं वर्तते । काव्येऽस्मिन् मानवीय हृदयस्य गम्भीराः मार्मिकी चाभिव्यक्तिर्वर्तते। वस्तुतउपालम्भोऽस्माकं भावस्थितेः परिणामोऽस्ति, यः सर्वेषु रसेषु समाविष्टो भवितुं शक्नोति । अस्याधारः गम्भीरा-त्मीयता प्रेम च वर्त्तते । प्रेमी स्वप्रेमपात्रात् पृथक् भूत्वा विकलो विह्वलश्च जायते। तस्य मिलनोत्कण्ठा तीव्रा भूत्वा तं व्यथितं करोति। परमस्मिन् भावावेगेऽपि तस्य मनसि प्रेमानुभूतिरधिका गम्भीरा जायते । एतादृश्यामेव मनः स्थितौ प्रेमी कमपि सहचरं सहृदयं सहचरीं वा माध्यमरूपेण परिकल्प्य स्वप्रेमपात्रायोपालम्भं ददाति । एवं प्रेम्णः विभिन्नविभावादयः समक्षमायान्ति । अस्याः सम्पूर्णाभिव्यक्तेः केन्द्रीय-भावना भवति मिलनस्याशाभिलाषे च। प्रेमस्वरूपानुसारं एषाशा विश्वासश्च विभिन्नरूपेषु प्रकटौ भवतः ।

शृङ्गारस्य वियोगपक्षे उपालम्भः संयोगाकाङ्क्षया संपृक्तो भवति । तस्मिन् प्रियस्य समस्तातीत व्यापारः तन्निष्ठुरतारूपेण चित्रितो भवति । परं तन्मूले प्रेमि-कायाः स्वसुखद-कल्पनानां स्मृतिरन्तर्निहिता भवति। सहैव वियोगपरिस्थितेः दोषारोपणं प्रियोपरि कृत्वा मिलनकामनापि व्यज्यते । हिन्दी-साहित्ये प्रवृत्तेरस्याः विकासः मेघदूताद्भवति । परमेतद्भावात्मकप्रवृत्तेः मूलं लोकभावनायामपि प्राप्यते । युग-युगेभ्यः प्रेमविरहगीतानां रूपेण अस्याः प्रवृत्तेः विकासः प्राप्यते ।

अत एव स्पष्टमस्ति यत् संस्कृतस्य प्रबन्धगीतिभिः हिन्दीकाव्यविधायाः सन्देश-काव्यंपत्रकाव्यमुपालम्भकाव्यञ्च पूर्णतया प्रभावितानि सन्ति । अनेकभावाः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मेघदूत-पवनदूत-हंसदूत-नेमिदूत-चेतोदूतैश्चानुप्राणिताः सन्ति । हिन्दी-भाषायाः प्रवन्धात्मकगीतयः संस्कृतगीतिभ्यःप्रभाविताः सन्ति । हिन्दीभाषायाः रीतिकालीन-कविभिः कालिदास-अमरुक-गोवर्धन-भवभूति-जयदेव प्रभृतिभ्यः श्रृंगार-प्रेम्णोः नायकस्य नायिकायाश्च सामग्री गृहीता सहैव स्वतन्त्ररूपेण गीतानां प्रणयनमपि उक्तकाव्यरूपेषु वर्णिततत्त्वाधारेषु कृतम् ।

संस्कृतगीतिकाव्यस्य प्रभावः छायावादयुगीनहिन्दीगीतिकाव्येषु पर्याप्तोऽस्ति । काव्येऽस्मिन् भावदृष्टयाध्यात्मिकमिलन-विरहयोः,संसारस्य नित्यतानित्यतयोः जीवनदर्शनस्य, लौकिकप्रणयस्य, प्रकृतौ मानवीयभावानां प्रक्षेपणस्य तस्यां दिव्यानुभूतेः वैयक्तिकाशानिराशयोः, हर्षविषादयोः, राष्ट्रीयतायाः, निम्नवर्गान् प्रति करुणा-देश्चाभिव्यञ्जना जाता। 'निराला' कवेः परिमलो गीतिका, प्रसादस्य 'आँसू', झरना, लहर, पन्तस्य गुञ्जनं, पल्लवः, महादेव्याः नीरजा, सांध्यगीतम्, दीपशिखा, रामकुमारवर्मणः चित्ररेखा, आकाशगङ्गा, वच्चनस्य निशानिमन्त्रणम्, एकान्तसंगीतम् आकुलअन्तर, सियारामशरणस्य दूर्वादलम्, दूरागतज्ञानम्, मैथिलीशरणगुप्तस्य-झङ्कारः, सुभद्राकुमारी चौहानस्य कलह-हरणम्, रामनाथसुमनस्य 'अपने कलेजाका तूफान' गोपालशरणसिंहस्य कादम्विनी, दिनकरस्य द्वन्द्वगीतम्, रसवन्ती जानकीवल्लभशास्त्रिणः रूप-अरूप, शिप्रा तथा रामनाथपाठक प्रणयिनः साथी, वरसात प्रभृति-प्रसिद्ध-हिन्दी-गीतिकाव्यानि सन्ति । एषु गीतिकाव्येषु संस्कृतगीतिकाव्यानां यथेष्टप्रभावोलक्षितो भवति ।

प्रबन्धकाव्यकृते यथा सम्वन्धनिर्वाहस्य क्षमता अपेक्षिता भवति, तथैव गीतिकारे समाहारकौशलस्य शक्तिरपरिहार्या भवति । हिन्दीगीतिकारैः संस्कृत-अंग्रेजी-वंगला-साहित्येभ्यः प्रभावोगृहीतः । महाकविनिराला गीतयः रागरागिणीषु निवन्धनकारणात् संस्कृतेनपूर्णप्रभाविताः सन्ति । उदाहरणार्थ काचन पङ्क्त्यउद्धियन्ते—

जीवन प्रातसमीरण-सा लघु
विचरण निरत करो !
तरु-तारेण-तृण-तृणकी कविता
छवि मधु सुरभि भरो ।
अञ्चल-सा न करो चञ्चल
क्षणभङ्गुर,
नत नयनों में स्थिर दो बल,
अविचल उर
स्वर-सा करदो अविनश्वर
ईश्वर मज्जित ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शुचि-चन्दन-वन्दन-सुन्दर,
मन्दर-सज्जित,
मेरे गगन-मगन मन में अयि
किरणमयी विचरो !
—परिमल

निराला-पन्त-महादेवीषु संगीत-चेतनायाः वैशिष्ट्यं तालोपरि निर्भरमस्ति तथायंतालः मुक्तच्छन्दोविधाने समाहितोऽस्ति। निरालोपरि संगीतस्य पूर्णः प्रभावोऽस्ति। अयं गीतगोविन्द-दशावतार-रामगीतगोविन्द-प्रभृति-संस्कृतगीतिकाव्यैः सहोपनिषद्-गीतोत्तररामचरितादिग्रन्थेभ्योऽपि प्रेरणां गृहीतवान्।

'वनकुसुमों की शय्या' शीर्षक कवितायां निराला कविः शरत्-शिशिर-चित्रणं सुन्दररूपेण कृतवान्। यथा—

सोती हुई सरोज-अंक पर,
शरत्-शिशिर दोनों बहनों के
सुख-विलास-पद-शिथिल-अंग पर
पद्म-पत्र पंखे झलते थे
मिलती थी कर-चरण-समीरण धीरे-धीरे आती—
नींद उचट जाने के भय से भी कुछ-कुछ घबराती ॥—परिमल,
प्रथमावृत्ति, पृ० ५६-५६

यथा संस्कृतस्य गीतिकाराः वसन्तेन प्रभाविताः सन्ति तथा वसन्ते आलम्बनोद्दीपनाभ्यां सह मानवीयभावनानामारोपणं कुर्वन्ति, तथैव महादेवी वसन्तरजन्यां मानवीकरणं विधाय स्वदायभागं स्वीकृतवती। यथा—

धीरे-धीरे उतर क्षितिज से
आ वसन्त रजनी।
तारकमय नव वेणी-बन्धन,
शीश फूलकी शशि का नूतन
रश्मि वलय सित घन अवगुण्ठन
मुक्तादल अभिराम बिछा दे
चितवन से अपनी।
—नीरजा, प्रथमसंस्करण पृ०—४—५.

प्रसाद-काव्येषु गीतितत्त्वस्य प्रमुखतास्ति। सस्वीकृतवान्—"बिना गान के कोई कार्य नहीं—गानं विना किमपि कार्यं नहि। विश्वस्य प्रत्येकैककम्पे एक-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तालीऽस्ति । प्रत्येकपरमाणुमिलने एकः समो विद्यते । प्रत्येक हरितपत्रकम्पने एको लयोऽस्ति[1] स्पष्टमस्ति, प्रसादस्याध्ययनं संस्कृत-गीतिकाव्यानां विशेष-मासीत् । फलतः स स्व-गीतिकृते संस्कृतगीतिभ्यः पर्याप्तप्रभावं प्रेरणाञ्च गृहीतवान् 'आँसू' काव्ये लिखितवान्—

झंझा झकारे गर्जन था
विजली थी, नीरदमाला
पाकर इस शून्य हृदयको
सवने आ डेरा डाला ।[2]

× × ×

तू भूल न री पंकज-वनमें,
जीवन के इस सूनेपन में,
ओ प्यार पुलक से भरी ढुलक
आ चूम पुलिन के विरस अधर ।[3]

पन्तोऽपि संस्कृत-काव्येभ्यः पर्याप्तप्रेरणां गृहीतवान् । अतएव संक्षेपेणेदमेव कथयितुं शक्यते यत् संस्कृतगीतिकाव्यस्य हिन्दी-गीतिकाव्योपरि पूर्णः प्रभावोऽस्ति । संस्कृतवाङ्मयस्याक्षयकोषात् मणि-माणिक्यं गृहीत्वा हिन्दी-कविभिः हारनिर्माण-स्य कार्यं विहितम् । एतत्सत्यमस्ति यत् हिन्दी-कविषु अंग्रेजी-वँगला काव्यानामपि प्रभावोऽस्ति । परं संस्कृतगीतिकाव्यस्य दानमविस्मरणीयमस्ति ।

१. प्रसाद, स्कन्दगुप्त विक्रमादित्य, भारतीभण्डार, प्रयाग, दशम संस्करण पृ० ५४-५५ ।
२. आँसू, भारती-भण्डार, प्रयाग, नवम संस्करण, पृ० १५ ।
३. लहर, भारती भण्डार, प्रयाग, पञ्चम संस्करण, पृ० ९ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पञ्चमोऽध्यायः

संस्कृतगीतिकाव्यानां सांस्कृतिकमूल्यांकनम्

प्रास्ताविकम्

संस्कृतगीतिकाव्यस्य पूर्णतोमूल्याङ्कनं तदैव सम्भवमस्ति, यदा काव्येन गीति-मूल्यैश्च सह सांस्कृतिकमूल्याङ्कनमपि क्रियेत। काव्येषु भारतीयसंस्कृतेरविरलधारा प्रवाहिता भवति। तस्याः धाराया। अध्ययनाभावे संस्कृतकाव्यानामनुशीलनमपूर्णमेव मंस्यते।

जीवनमूल्यानां तथा तन्मूल्यदृष्टीनां विवेचनं संस्कृतिः कथ्यते, यैः याभिश्चात्मशोधनमाचारो-व्यवहारश्च संस्कृताः जायन्ते। वस्तुतः संस्कृतिः तेषां गुणानां समुदायोऽस्ति, यान् मानवोऽनेकेप्रकाराभिः शिक्षाभिः महत्प्रयत्नैश्चार्जयति। संस्कृतेः सम्बन्धः मनुष्यस्य बुद्ध्या, स्वभावेन, मनोवृत्तिभिश्च सह वर्त्तते आचार-विचारयोः विभिन्नप्रकाराणं रुचीनां च परिष्करणं संस्कृतेरन्तर्गतमस्ति।

मनुष्यस्य समस्ताः भूषणभूतचेष्टाः संस्कृतौ परिगणिताः सन्ति—यत-आभिश्चेष्टाभिरेव चेतना प्रबुद्धा जायते तथा जीवन-मूल्यानां ज्ञानाय प्रेरणा प्राप्यते। अतएव संस्कृतिः मानवीयव्यक्तित्वस्य सा विशेषताविद्यते, या व्यक्तेः व्यक्तित्वं सर्वाभिः दृष्टिभिः महत्वपूर्णं सम्पादयति। अतएव सौन्दर्यबोधाय, जातीयचेतनायै, जीवनमूल्याय, आध्यात्मिकदृष्ट्यै तथात्मिकविकासायावश्यकचरित्रस्य गणना संस्कृतौ विधीयते।

जीवनात् मल-कालुष्ययोः, निर्बलतायाश्चापनयनं तथा तत्स्थाने सर्वाङ्गीण-स्वच्छतायाः तथा सामञ्जस्यपूर्णबलस्य स्थापना जीवनस्य सत्या संस्कृतिरस्ति। व्यक्तेः सर्वासु शक्तिषु प्रवृत्तिषु चात्मोत्थानेन सह समाजकल्याणदिक्षु नियोजितासु एव संस्कृतिः चरितार्था भवति। अतः संस्कृतिरेवासत्यात्सत्यं तिमिरात् प्रकाशं मृत्यो-रमरत्वमनैतिकतायाः नैतिकतां भौतिकताया अध्यात्मवादं शारीरिकसौन्दर्यादात्मिक-सौन्दर्यं मानवं गमयति। मानव-हृदये संपद्यमानो देवासुरसंग्रामोऽथवा भौतिकाध्या-त्मिकद्वन्द्वमध्ये आसुरीं भौतिकीञ्च वृत्तिं पराजित्य दैवीनामात्मिकवृत्तीनाञ्चोद्बोधनं संस्कृतेः सहायतयैव भवति। संस्कृतिः जीवनं परिष्कृत्य तस्मिन् सुविचारानङ्कुरि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तान् करोति । तथैतेऽङ्कुराः कालान्तरे कल्पपादपाः भूत्वा सुस्वादु फलानि वाघ्यां-त्मरम्रं ददति ।

गीतिकाव्येष्वपि व्यक्तित्वस्य भद्रतानामभद्रतानाञ्च निरूपणं मूल्यविशेषाणामपेक्षया कृतमस्ति । व्यक्तित्वस्य विशेषताः स्वयं मूल्यवत्योभवन्ति, अथवा जीवनमूल्याना-मुत्पादनं सरंक्षणसाधनानि जायन्ते । अतएव सांस्कृतिकमूल्यांङ्कनकृते जीवनमूल्यानां विश्लेषणं परमावश्यकमस्ति । भारतीयसाहित्ये जीवनमूल्यकृते पुरुषार्थशब्दस्य प्रचलनं वर्त्तते । चतुर्भ्यः पुरुषार्थेभ्योऽर्थकामौ मनुष्यस्य जीवनेच्छायाः जीवनसंभो-गस्य च प्रतीकौ स्तः । संसारस्य समस्तसंघर्षाः अनयोः वस्तुनोः कृते जायन्ते। धर्म-एकं नियामकं तत्व वर्तते. यस्य सोमायाः अन्तर्गत अर्थकामयोः सम्पादनमपेक्ष्यते ।

सांस्कृतिकाध्ययनहेतुवर्गीकरणम्

गीतिकाव्यस्य सांस्कृतिकाध्ययनाय तस्य प्रवृत्तिमूलकं वर्गीकरणमावश्यकमस्ति, यतः द्वि-सार्धद्विसहस्रवर्षाणामस्यां दीर्घपरम्परायामेकसदृशी संस्कृतिः न स्थातुं शक्नोति । संस्कृतेः रूपान्तरं तत्स्वरूपविकासो वा स्वाभाविकोऽस्ति । द्विसहस्र-वर्षाणां संस्कृतिः एकस्मिन्नेव रूपे न स्थातुं शक्नोति ! अतएव तस्याः प्रवृत्तिमूलकं वर्गीकरणं निम्नाङ्कितमस्ति—

१. आरम्भिक गीतिकाव्यम् ।
२. प्रवन्धात्मकगीतिकाव्यम् ।
३. स्वतन्त्रगीतिकाव्यम् ।
४. स्तुतिपरकं गीतिकाव्यम् ।
५. तालवद्धं गीतिकाव्यम् ।

आरम्भिकगीतिकाव्यस्य सांस्कृतिकमूल्यम्

संस्कृतगीतिकाव्यस्य प्रारम्भः ऋग्वेदस्य गीतिभ्यो जायते । भारतीयसंस्कृते-रितिहासे वेदानां स्थानं महत्त्वपूर्णमस्ति । श्रुतेराधारशिलायामेव भारतीयसंस्कृतेः भव्यप्रासादः प्रतिष्ठितोऽस्ति । आचार-विचारयोः, निवासस्य, धर्म-कर्मणोः, रीति-नीत्योः ज्ञानाय वेदानां ज्ञानमावश्यकमस्ति । इष्टप्राप्तयेऽनिष्टपरिहाराय, वेदानामु-पादेयता प्रसिद्धास्ति । वैदिकर्षिभिः स्वानुभूत्यां तीव्रताधानाय मधुमत्याः सालङ्का-रायाः वाण्याः प्रयोगो विहितः। वैदिकगीतिषु नानाविधाःदेवाः यज्ञागमनाय प्रार्थिताः सन्ति । उषाविषयकमन्त्रेषु सौन्दर्यभावनाया आधिक्यमस्ति । इन्द्रविषयकमन्त्रेषु तु तेजस्वितायाः प्राचुर्यमस्ति ।

उषायाः प्रत्येकनवागमनेन सह जीवनस्यैकदिनस्य व्ययं परिणामतः जीवन-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सीमा समीपमागच्छन्ती दृष्टा। अनया दर्शनदृष्ट्या उपायाः यद्वर्णनं कृतं तत् करुणायाः संस्पर्शमवाप्यात्यन्तं मार्मिकं जातम् । कविः दृष्टवान् यत् इयं प्राचीना तथा दिव्योषा प्रतिदिनमेकसदृश्या साजसज्जया सज्जिता रञ्जिता चायाति तथा मनुष्यजीवनं क्षीणं कुर्वन्ती याति ।

मानव-हृदयस्य मार्मिकव्यथायाः करुणचित्रणमक्षसूक्ते जातमस्ति । अस्मिन् द्यूतकारस्य मनोदशाया अङ्कनं विहितमस्ति । कान्तायाः मृदूपदेशस्यावहेलनां कृत्वा स्वसर्वस्वमक्षेभ्यः समर्प्य पश्चात्तापानले ज्वलतोऽक्षकारस्योक्तयः करुणाप्लुताः सन्ति । स सर्वस्वं नाशयित्वा स्वपत्न्याः स्मरणं विदधाति । स शोचति यत् तया कदापि मह्यं कटु न भाषितम् । कदापि रुष्टा न जाता । मां मम मित्राणि च प्रति सा कल्याण्यजायत । परं मयाक्षव्यामोहे स्वपतिपरायणा पत्नी गृहात् निष्कासिता ।

द्वेष्टि श्वश्रूरपजाया रुणद्धि न नाथितो विन्दते मर्डितारम् ।
अश्वस्येव जरतो वस्न्यस्य नाहं विन्दामि कितवस्य भोगम् ॥

—ऋग्वेद, १०।३४।३

अर्थात् श्वश्रूः द्वेषंकरोति, पत्नी समीपेऽपि नायाति, आपदि कोऽपि सहायको न मिलति । मम दशा तद्वृद्धाश्वसदृशी वर्त्तते, यस्य मूल्यं केवलमेकं वस्त्रं भवति ।

विवशतायाः कीदृशं मर्मस्पर्शि चित्रणं वर्त्तते । प्रसङ्गतोऽवगम्यते यत् द्यूतकार-पत्यापमानिता भूत्वा पत्नी स्वपितृगृहं गच्छति । द्यूतशालायां स्वसर्वस्वं विहाय यदा तदक्षिणी विकसिते, तदा तच्चेतनोद्बुद्धा । अवसरः प्राप्तः । श्वश्रूः अपमानं कृतवती । पत्नी निष्कासितवती । इदानीं स वृद्धाश्ववत् निरर्थकोऽस्ति । तस्य किमपि मूल्यं नास्ति, उपयोगो न वर्त्तते ।

अक्षसूक्ते व्यसनिनो जनस्य मनोदशायाः सुन्दरं चित्रणमस्ति । एतत् गीति-काव्यदृष्ट्या संस्कृतिदृष्ट्या चात्यन्तमहत्त्वपूर्णं विद्यते ।

इन्द्रस्तुतिषु युद्धव्यञ्जना परममनोज्ञरूपेणाभवत् । आलम्बनरूपेण वृत्र-शम्बरादेः वर्णनं विद्यते । अहिवधवर्णने कविः रुद्धजलस्यालङ्कारिकं वर्णनं करोति । कथयति च—

अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष ।
वाश्रा इव धेनवः स्यन्दमाना अञ्जः समुद्रमवजग्मुरापः ॥

—ऋग्वेदः, २।३५।६

चिरकालं यावदवरुद्धायात एव पुञ्जीभूताय मुक्ताय, शब्देन सह प्रवहमाणाय-जलाय, संध्याकाले गोप्रचारात् निवृत्ताभिः, स्ववत्सेभ्यश्शब्दं कुर्वन्तीभिः सोत्कण्ठ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धेनुभिरुपमा कियत्युपयुक्ता विद्यते । यो जनः विशालजलराशिमवरोधितवान्, सोऽसाधारणशक्तिशाल्यभविष्यत् । अतस्तद्वधकर्त्ता मघवा स्वतः वीरः प्रतीयते । एवमिन्द्रविषयकमन्त्रेषु तेजस्विता प्राप्यते । जीवनमूल्यदृष्ट्या सूक्तमिदं महत्त्वपूर्णं वर्त्तते ।

हास्य-रसदृष्ट्या मण्डूकसूक्तस्य शिशुअंगिरससूक्तस्य च गीतयः गृह्यन्ते । एतासु गीतिषु कविः तत्कालीनपरिस्थितिष्वपि प्रकाशं दत्तवान् । वरुणसूक्ते देवविषयकरतेः भक्तिभावनायाः वा चित्रणं मिलति । वशिष्ठः भावविस्मृतो भूत्वा वरुणस्य मानसिकसाक्षात्कारमध्ये कथयति—

पृच्छेतदेनो वरुण दिदृक्षवो एमि चिकितुषो विपृच्छं ।
समानमिन्मे कवयश्चिदाहुरयं ह तुभ्यं वरुणो हृणीते ॥

ऋग्वेद ७।८६।३

हे वरुण ! अहं भवद्दर्शनं कामये । अहं भवन्तं तत्पापं पृच्छामि, यतोऽहं भवत्पाशे बद्धोऽस्मि । सर्वे विपश्चितो मां कथयन्ति यद्वरुणदेवो त्वद्रुष्टोऽस्ति ।

अस्याः गीतेरुत्तरार्द्धे स्तोतुः मानसिकव्यथा वर्त्तते । वरुणस्याप्रसन्नतायां ज्ञातायामेव वशिष्ठः उद्विग्नो जायते । स मनःप्रत्यक्षवरुणंप्रति स्वापराधं पृच्छति तथा स्वप्राचीनसम्बन्धं स्मारयति ।

अवद्रुग्धानि पित्र्या सृजानो न यावयं चकमा तनूभिः,
अवराजन् पशुतृपं न तापं सृजा वत्सं न दाम्नो वशिष्ठम् । ऋ० ७।८६

हे वरुण ! मम कृतान् मम पूर्वजकृताँश्चापराधान् क्षमस्व । हे राजन् यथा स्तैन्यप्रायश्चित्ते विहिते तस्करो मुच्यते, यथा वत्सः रज्जोः मुच्यते, तथैव मां स्वपाशान्मोचय ।

उक्तगीत्यां ज्ञानस्य प्रकाशस्थाने भावनायाः विशदसरसता विद्यते । अनुभूतेरखण्डतात्मानुभूतेश्च पराकाष्ठा वर्त्तते ।

ऋग्वेदस्य पुरूरवोर्वशी-संवादे (ऋ० १०।८५), यम-यमीसंवादे (ऋ० १०।१०) तथा सरमापणि-(ऋ० १०।१३०) संवादे एकप्रकारस्य प्रबन्धात्मक गीतयोलभ्यन्ते । पुरूरवोर्वशी-कथा (रोमाण्टिक) प्रेम्णः प्राचीनं भव्यंनिदर्शनमस्ति । यस्यां स्वर्गलोकसुन्दरी उर्वशी पृथ्वीतलस्य मानवराजस्य पत्नीत्वं स्वीकरोति । परं प्रतिज्ञा-भंग-कारणात् सा तस्य सङ्गं त्यक्त्वा प्रयाति । सूक्तेऽस्मिन्नष्टादशगीतयस्सन्ति, येषु केषुचनोर्वश्या उक्तयः सन्ति, केषुचन च पुरूरवस उक्तयो विद्यन्ते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यम-यमी-सूक्ते विचित्रं जीवनमूल्यमङ्कितं विद्यते। यमी यममनेकप्रलोभनै र्लोभयति, परं यमः स्वोदात्तचरितस्य परिचयं ददानोऽस्मादनैसर्गिकसम्बन्धाद्दूरे तिष्ठति। साहित्यिकसौन्दर्यदृष्ट्या उक्तावुभावपि संवादौ परममधुरौ स्तः। अनयोः नारीजीवनस्य सुन्दरं चित्रणं विद्यते।

यजुर्वेदस्य गीतयः ऋग्वेद-सदृशाः सरसाः न सन्ति। परं सामवेदस्तु गीति-रूपेण प्रसिद्धोऽस्ति। सामशब्दस्यार्थोऽस्ति ऋचा सह सम्बद्ध-स्वर-प्रधान-गायनम्। सामगानस्य चत्वारो भेदाः सन्ति (१) ग्रामः—गेयगानम्, (२) आरण्यकगानम् (३) ऊहगानम्, ऊह्यगानम्—रहस्यगानम्। ग्रामे गेयगाने वा प्रयुक्तस्वर-रागा-देराश्रयं गृहीत्वोहगानस्य निर्माणं भवति तथारण्यगानस्य स्वरागादेराधारे ऊह-गानस्य रचना कृतास्ति। सामवेदिनां विश्वासोऽस्ति यत् आरण्यगानस्य स्तोत्राणि एवं विलक्षणानि विचित्राणि च सन्ति यत् ग्रामे गायनेन तैरनर्थसम्भावना जायते। एतानि एतादृशानि पूतानि सन्ति यदेतेषां ज्ञानमरण्य एवोचितमस्ति।

ऊहस्यार्थोऽस्ति 'ऊहनम्' अर्थात् कस्मिंश्चिदवसरविशेषे मन्त्राणां सामयिक-परिवर्त्तनम्। ऊह्यगानस्य परिपूर्णोऽर्थोऽस्ति—'ऊह्यरहस्यगानम्' तथा रहस्यात्म-कत्वादेवेमानि 'अरण्यगानस्य' विकृतिगानानि मन्यन्ते। अरण्य-सदृशानीमानि गानान्यपि रहस्यात्मकानि भवन्ति। अतः सर्वसाधारण-समक्षमेतेषां गानं निषिद्ध-मस्ति। सामगायनपद्धतिः परमक्लिष्टास्ति, तस्य वास्तविकज्ञानाय सूक्ष्माध्ययन-स्यावश्यकता विद्यते। सामगानस्य पञ्चभागाः भवन्ति—

१. प्रस्तावः—मन्त्रस्यारम्भिकभागः, यः 'हुँ' वर्णादारभ्यते।
२. उद्गीथः—अस्यारम्भे 'ॐ' स्वरो योज्यते।
३. प्रतिहारः—अनेन खण्डद्वयायैकं रूपं प्रदीयते।
४. उपद्रवः—इममुद्गाता गायति।
५. निधनम्—अस्मिन् मन्त्रस्यान्तिमपदांशयोः 'ॐ' भवति।

आरम्भिक गीतिकाव्येषु भौगोलिकतत्त्वानां प्रचुरतोपलभ्यते। ऋग्वेदे (१। ७१।७), १।१९०।७ समुद्रे पतनशीलानां नदीनामुल्लेखो दृश्यते। ऋग्वेदे (१। ४७।६) तथार्ववेदे (१९।३८।२) 'तुग्र'-पुत्रस्य 'भुज्योः' आख्यानमङ्कितमस्ति। अस्मिन्कथितमस्ति यत् भुज्युरतिमहतीं समुद्रयात्रां कृतवान्, यस्यां शतनौदण्डानां जलयानस्य व्यवहारोऽक्रियत। यदा भुज्यु-जलयानं निमज्जदभवत् तदा तेनाश्विनी कुमारौ प्रार्थितौ। दयालुभ्यामश्विनीकुमाराभ्यां तज्जलयानं कूले कृतं तथा भक्तानां प्राणाः रक्षिताः। एतेनाख्यानेन स्पष्टमस्ति यत् वैदिकार्याः दीर्घां समुद्रयात्राम-कुर्वन्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ऋग्वेदीयगीतिषु अनेकानेकनदीनां विवरणमस्ति अंशुमती (ऋ० ८।९५।१४) अञ्जसी (ऋ० १।१०४।४) अनितभा (ऋ० ५।५३।९); असिक्नी (ऋ० १०।७५।५, आपया (ऋ० ३।२३।४) आर्जीकीया (ऋ० १०।७५।५) कुभा (ऋ० ५।५३।९) कुलिशी (ऋ० १।१०४।३) कुमु (ऋ० १०।७५।६) गङ्गा (ऋ० १०।७५।५) तथा (६।४५।३१) गोमती (१०।७५।६) जाह्नवी (ऋ० ३।५८।६) तृष्टामा (ऋ० १०।७५।६) दृषद्वती (ऋ० ३।२३।४) अश्मन्वती (ऋ० १०।५३।८) परुष्णी (ऋ० ५।५२।९, १०।७५।५, ७।१८।८-९), मरुद्वधा (ऋ० १०।७५।५) यमुना (ऋ० ५।५२।१७, ७।८।१९, १०।७५।५, यव्यावती (ऋ० ६।२७।६), रसा (ऋ० १।११२।१२, ५।५३।९, १०।७५।६), वितस्ता (ऋ० १०।७५।५), विपाश् (ऋ० ४।३०।११) विवासी (ऋ० ४।३०।१२), वीरपत्नी (ऋ० १।१०४।३), शिफा (ऋक् १।१०४।३) शुतुद्री (ऋ० ३।३३।१, १०।७५।५) श्वेत्या (ऋ० १०।७५।६) सरयु (ऋ० ४।३०।१८), सरस्वती (ऋ० २।४१।१६) सिन्धु (अथर्व० ६।२४।१, ७।४५।१, १२।१।३, १४।१।४३) सुषोमा (ऋ० १०।७५।५) सुसुर्त्तु (ऋ० १०।७५।६) हरियूपीया (ऋ० ६।२७।५)-नद्य उल्लिखिताः सन्ति । एभिरुल्लेखैः स्पष्टमस्ति यदार्याः उक्तनदोनांतटेषु भ्रमणं निवासञ्च कुर्वन्ति स्म तथासां नदीनां जलस्य यथेष्टोपयोगं कुर्वन्ति स्म ।

वैदिकगीतिषु देश-नगर-प्रदेशानामपि वर्णनमायातमस्ति । आसु गीतिषु जाति-वाचक-शब्दानां वाहुल्यमस्ति, येन जातीनां तथा निवासस्थानानामर्थः सहैव निःसरति । एतादृशाः शब्दाः वहुवचने व्यवहृताः सन्ति । इमे शब्दाः जनपदवाचिनः मन्यन्ते । आर्या यत्र गच्छन्ति स्म, स्वप्राचीनप्रियनामानुसारं गन्तव्यस्थानानां नामानि रक्षन्ति स्म ।

पूर्वादिदिक्षु निवासिभ्यो वैदिकगीतिषु प्राच्योदीच्यापाच्यादिशब्दानां प्रयोगोऽभवत् । अंग–(अथर्व ५।२२।१४) कीकट–(ऋ० ३।५३।१४) कुरु–(ऋ० १०।३३।४) गान्धार–(ऋ० १।१२६।७) चेदि–(ऋ० ८।५।३७) बह्लिक–(अथर्व ५।२२।५-७०९) महावृष–(अथर्व-५।२२।४) शर्यणावत्देशानामुल्लेखः कृतो विद्यते ।

समाजव्यवस्था, विवाहः कुटुम्बश्च

वैदिकगीतिषु वर्णितः समाजः सुव्यवस्थित आसीत् । एतेषां कुलां पितृपरम्परया मन्यते स्म ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एतेषां समाजे[1] एकपतिव्रतस्यैकपत्नी[2]-व्रतस्थ च प्रचार आसीत्। पतिः गृहस्वामी तथा पत्नी गृहस्वामिनी अभवताम्। सदाचारोपरि विशेषं ध्यानं दीयते स्म। पितृ-पुत्र्योः, भ्रातृ-स्वस्त्रोः विवाहो निषिद्ध आसीत्। युवतीनां कन्यानां विवाहोऽभवत्[3]। पतिवरणे कन्यानामीषत् स्वातन्त्र्यमासीत्।[4] अविवाहिताअपि स्थातुं शक्नुवन्ति स्म तथा ऋषिकाः अपि भवितुं शक्नुवन्ति स्म। ऋग्वेदे स्त्रीनिर्मित. सूक्तान्यपि विद्यन्ते। अगस्त्यपत्नी लोपामुद्रायाः (ऋ० १।१७९) कक्षीवतः स्त्रियाः घोषायाः (ऋ० १०।३९) रोमशायाः (ऋ० १।१२६।६), सूर्यायाः (ऋ० १०।८५) अपालभाया (ऋ० ८।८०), जुह्वाः (१०।१०९) विश्ववारायाश्च सूक्तान्युपलभ्यन्ते।

कन्या मातुः पितुः भ्रातुर्वा संरक्षतायां निवसति स्म[5]। कन्या-विवाहे स्त्रीधनं वस्त्राभूषणानि च दीयन्ते[6] स्म। विवाहान्ते नववधूः वृषभयानमारुह्य पतिगृहं गच्छति स्म। तत्र पतिगृहे पत्युः वृद्धस्य पितुः मातुः लघुभ्रातुः स्वसुश्च-रक्षणं करोति[7] स्म तथा यज्ञादिर्धार्मिककार्येषु पत्या सह भागं गृह्णाति स्म।[8] वैवाहिकबन्धनमामरणं मन्यते स्म।

विवाहानन्तरं कन्यात्यक्तमलिनवस्त्राणि ब्राह्मणेभ्यो दीयन्ते स्म।[9] राज-कन्यानां विवाहः ऋषिभिः सहाप्यभवत्।[10] ऋग्वेदे निर्लज्जायाः, व्यभिचारिण्याः गुप्तप्रसविन्याश्च नार्याः उल्लेख आयाति।[11] ऋग्वेदे (४।५।५) असती पति-विद्वेषिणी च नारी नरकप्राप्तिकारणं मन्यते। ऋग्वेदे १।११७।१८ उपपतीना-मुल्लेखोवर्तते। विधवाविवाहो निषिद्ध आसीत्। ऋग्वेदे (१०।४०।२ उपमा-

---

१. ऋग्वेद १०।७५।२१।

२. वही १।७१।१, ७।२६।३, १०।१०।११, १।११६।१०, ८।१९।३६।

३. ऋ० १०।८५।९, १०।३०।५-६, ऋग्वेद के दशम मण्डल के ८५ वें सूक्त में सूर्या के साथ विवाह करने के लिए रथों की दौड़ लगायी गयी थी। सूर्या-का विवाह सोम के साथ हुआ और अश्विनों ने इसके घटकका काम किया। पत्नी को उपदेश भी दिया गया है तथा शुभङ्करी होने की प्रार्थना की गयी हैं। ऋ० (१०।८५।४३)।

४. ऋग्वेद १०।२७।१२।

५. वही १०।१७।७, ४।५।५।

६. वही १।१०९।२ तथा ५।४६।२, १०।३९।१४।

७. वही १०।८५।४६।

८. वही ८।३१।५।

९. १०।८५।२९।

१०. वही ७।८०।२।

११. १०।४०।६, २।२९।१।

१२. १०।१६२।५।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रूपेण विधवायाः देवृकामना व्यक्तास्ति (८।३३।१७) ऋग्वेदे स्त्री चञ्चलमनोमयी तथाल्पधिषणा कथितास्ति । (८।३३।१८'१९) ऋग्वेदे स्त्रीणामोष्ठाद्यङ्ग-प्रदर्शन-निषेधः कथितः । स्त्रियोयदा गृहात् बहिः गच्छन्ति स्म, तदा ताः वस्त्रैः स्वशरीरमाच्छादयन्ति स्म । स्त्रीणां समाजे आदरपूर्णस्थाने-जातेऽपि अङ्गानामनावरणता वर्जिता वर्त्तते । ऋग्वेदे ६।१७।७ भृत्यस्य तद्वर्त्तनस्याप्युल्लेखो वर्त्तते । भृत्यः गृह-गार्हस्थ्यकार्येषु सहायको भवति स्म ।

उत्तराधिकारः

पितुरुत्तराधिकारी पुत्रो भवति स्म । यतः स एव तस्यान्तिमसंस्कारं करोति स्म । पुत्री केवलसम्मानाधिकारिण्यभवत् ।[1] ऋग्वेदे (३।३१।१) कथितमस्ति-यत् पुत्राभावे दौहित्रकारणात् पुत्री धनं प्राप्नोति स्म । ऋग्वेदात् (२।१७।७) अवगम्यते यत् आजीवनमविवाहितायै कन्यायै अपि पितृसम्पत्तेः कश्चन भागो दीयते स्म ।

पुत्राभावे दत्तकपुत्रग्रहणस्य प्रथाऽचलत्, परं तत्पुत्रे विशेषश्रद्धा नाभवत् ।[2] अतः प्रत्येकव्यक्तिः पुत्रकामनामकरोत् ।[3]

सम्पत्तिः

सम्पत्तिः चलाऽचला चोभप्रकाराभवत् । चलसम्पत्तौ पशु-सुवर्णभूषणदासादीनां गणनाऽभवत्, अचलसम्पत्तौ च गृह-क्षेत्रादयो गण्यन्ते स्म । पशुधनंमुख्यममन्यत । वीरयोग्यपुत्रोऽपि सम्पत्ति-संरक्षकत्वात् वर्द्धकत्वाच्च सम्पत्तौ परिगणितोऽभवत् । ऋग्वेदात् (१।११७।१२) स्पष्टमस्ति यत् सुवर्णसुरक्षायै कलशे निधाय भूमौ स्थाप्यते स्म । ऋग्वेदादेव (५।२७।२) सुवर्णमुद्रायाः प्रचलनस्य निर्देशः प्राप्यते ।

आजीविकायाः साधनम्

पशुधनं मुख्यमासीत् । वृषभाः हलकर्षणंयानकर्षणञ्च कुर्वन्ति स्म ।[4] कदाचिदेषामुपयोगः युद्धरथेऽप्यभवत् । आजीविका-साधनानि अश्वा अप्यभवन् । अश्वानां

---

१. वही ३।३१।२ ।　　　　२. ऋग्वेद ७।४।७ ।

३. ऋग्वेद में पुत्र की कामना ही मिलती है, पुत्री की कामना नहीं है । (५।२३।१, ६।२०।१, ७।१।२१ । यजुर्वेद में तत्काल उत्पन्न हुई कन्याओं के परित्याग की बात बतलायी गयी है और ऐतरेय ब्राह्मण में कन्या को चिन्ता का कारण माना गया है ।

४. ऋग्वेद ८।४६।३० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रयोगः युद्धे, रथकर्षणेऽश्वधावनेचाऽभवत्।[१] खरैरपि रथाः कृष्यन्ते स्म।[२] श्वानः रक्षाकार्येण सह मृगयासाहाय्यमपि विदधति स्म।[३] पशुपालनेन कृष्याचोभाभ्यामाजीविका साध्यते स्म। उष्ट्राः भारवहने युद्धकार्येषु च प्रयुज्यन्ते स्म।[४] गजः नृपवाहने प्रयुक्तोऽभवत्।[५] गो-मेषाजादिपशुपालने विशेषध्यानं दीयते स्म। गवां गोचरभूमिः 'गोष्ठ'संज्ञयाभिधीयते स्म। "सहस्रं मेददतो अष्टकर्ण्यः[६] वाक्यांशेनानुमीयते यत् गवादिपशूनामभिज्ञानाय तेषांकर्णयोः चिह्नानि निर्मीयन्ते स्म। अत्र 'अष्टकर्ण्य' शब्देनाष्टचिह्न युक्ताः गावः मन्यन्ते। आर्याः स्वपशुभ्यो तृणानयनाय वहिरगच्छन्।

कृषेरुन्नत्यै (करीप) गोमयसारः दीयते स्म तथा सेचनप्रवन्ध आसीत्।[७] सेचकाः पुरुषाः धान्यरक्षायै कोलाहलं विधाय पक्षिनिवारणं कुर्वन्ति स्म।[८] परिपक्वेषु धान्येषु तानि दात्रेण सृण्या वा छित्वा पर्वेषु वध्नन्ति स्म[९] तथा खलाधाने आदाय मर्दयित्वा सूप-शूर्पसाहाय्येन अन्नानि तुषेभ्यः पृथक् कुर्वन्ति स्म।[१०] इमे धान्य-स्वच्छकाराः 'धान्यगुकृतः' कथ्यन्ते स्म।[११] सम्पन्नेऽन्ने ऊर्दरण[१२] परिमाणं विधाय स्थव्यां पूरयित्वा रक्ष्यते स्म।[१३]

अन्नदक्षेत्रमार्त्तनं कथ्यते स्म।[१४] सेचनस्य पूर्णः प्रवन्ध आसीत्। अश्मचक्राणां (चरखियों का) ह्रदानां कुल्यानाञ्च प्रवन्ध आसीत्।

ऋग्वेदे 'यव'-धान्ये'-शब्दद्वयं मिलति। इमावुभावपि शब्दौ साधारणतयान्नद्योतकौ स्तः। अनुमीयते यत्तदानीं यवानां तण्डुलानाञ्च व्यवहारोऽधिकोऽभवत्। पशुपालनात् कृषेश्चातिरिक्तं मृगयया जीविकासम्पादनमभूत्। आखेटाय धनुर्वाणयोरुपयोगोऽभवत्। जालपाशयोरपि व्यवहारोऽभूत्। ऋग्वेदेऽ (१।१२५।२)

---

१. ऋ० ४।२।८।
२. वही ८।७४।७०।१।७६।२।
३. वही ८।४६।२८।
४. वही ८।६।४८, १।१३८।२।
५. वही ४।४।७।
६. वही १०।६२।७।
७. वही १०।१०१।६।
८. ऋ० १०।६८।१।
९. वही १०।१०१।३।
१०. वही १०।६१।२।
११. वही १०।९४।१३।
१२. ऋ० २।१४।११।
१३. वही १०।६८।३।
१४. वही १।१२७।६।
१५. वही १।११०।५।
१६. वही ८।९१।५।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्य संज्ञा 'निधाथवामु[1]क्षिजा' वर्त्तते। व्याधः निधापतिः कथ्यते स्म। जीवानां ग्रहणसमये मृगः (ऋश्यः) ऋश्यदया, वराहाः श्वभिः, महिष्यः ज्यया, वन्य-गजाः हस्तिनीनां सहायतया तथा सिंहाः प्रच्छन्नतया ध्रियन्ते स्म। पञ्जरवद्ध-सिंहस्याप्युल्लेखो वर्त्तते।

शिल्पः

तक्षक-लौहकार-वैद्य-कुलाल-रथकार-नाविक-निषाद-तन्तुवायादीनामुल्लेखोऽनेक स्थानेष्वायातोऽस्ति। स्वस्वाभाविक-रुचि-प्रवृत्यनुसारमार्याः स्व-व्यवसाय-निर्वाचनं कुर्वन्ति स्म। ऋग्वेद-सूक्ते (९।११२) विभिन्न-व्यवसायिनां स्वाभाविकप्रवृत्तीनां सुन्दरचित्रणमायातमस्ति। तक्षकः रथ-परशु-पात्रादि निर्माणमकरोत्।[2] कर्मारः (लौहकारः) अपक्वलौहं-ध्मातृसहायतयाऽमले द्रावयित्वानेक वस्तु-रचनामकरोत्।[3]

वाणनिर्माण-कार्यमपि कर्मारोऽकरोत्। वाणगति-निर्वाहार्थं तत्पृष्ठभागे पक्ष योजनाप्यभवत्। ते पक्षवन्तो वाणाः समीचीनाः ज्ञायन्ते स्म तथा तेषां मूल्यं सुवर्णादप्यधिकमभवत्। हिरण्यकारः सुवर्णाभूषणान्यरचयत्। अतएव सिन्धुकृते 'हिरण्यमयी' सञ्ज्ञा दत्ता विद्यते। चर्मकारः चर्मणां प्रत्यञ्चाम्, जलाकर्षणाय रज्जु रथाकर्षणाय च रज्जुं निर्माति स्म। ऋग्वेदस्यानेकमन्त्रैरेतदपि ज्ञायते यत् चर्म-परिष्कार-कलयार्याः अभिज्ञा आसन्। तन्तुवायो वस्त्रं वयति स्म।[4] तस्य वस्त्रं वेम-तसर-ओतु-तन्तु-सहायतया निर्मीयते स्म। साधारणतया वस्त्र-वयनस्य कार्यं नार्योऽकुर्वन्।[5] मालाकारः पुष्पमाला अरचयत्।[6] नापितः छुरिकया केशान् कृन्तति स्म।[7] तदानीं कर्मणा जातेः कोऽपि सम्बन्धो नासीत्। कुटुम्ब-निर्वाहार्थमेकपरिवारस्य जनाः विभिन्न-प्रकारस्य कार्यं कुर्वन्ति स्म। एकस्मिन् मन्त्रे कथितमस्ति—

---

१. ऋग्वेद—१।१२५।२ २. वही १०।२८।१०, १०।३९।४, १०।८५।९, ३।६।१२ रथ की सुन्दरता के लिए सुवर्ण का भी उपयोग किया जाता था (१०।८५। ९०) ७।५५।८ में वह्य का उल्लेख है, यह सम्भवतः पालकी या डोली के अर्थ में आया है।

३. वहो १०।७२।२—धौंकनी पक्षियों के परों की बनी होती थी।

४. वही ६।९।२ ५. वही २।३६, ५।४७।६।

६. वही २।३२।४। ७. वही १०।१४२।४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कारुरहं ततो मिषगुपलप्रक्षिणी नना ।
नानाधियो वसूपवोऽनु गा इव तस्थिमेन्द्रायेन्दो परिस्रव ॥
९।११२।३

अहं स्तोत्ररचयिता (स्तोता) अस्मि । मम पिता वैद्योऽस्ति । मम माता पाषाणेनान्नं पेषयति। एवं प्रकारेण वयमेकपरिवारस्य सदस्याः विभिन्नकर्माणः स्मः।

ऋग्वेदे (१०।२६।६) 'वासो-वाय'शब्द आयातोऽस्ति, यस्यार्थोऽस्ति— 'धौतवस्त्रवायः' । वैदिकगीतिषु उत्तरच्छद-द्विपट्ट-कम्बलादि-कुविंदापेक्षया धौत-वस्त्रतन्तुवायेषु भेदः कृतो विद्यते । तन्तुवायव्यवसायसम्बद्धपारिभाषिकशब्दाः निम्नप्रकाराः सन्ति—

तन्त्रः (करघा) (ऋग्वेद १०।७१।९)
तसरः (ढुरकी)(ऋग्वेद १०।१३०।२)
व्युतम् (बुना कपड़ा) (ऋग्वेद ७।१२२।२)
ओतुः (वाना) (ऋग्वेद. ६।९।२)
स्यूतम् (सिला कपड़ा)
वयित्री (अथर्व-१०।७।४२)
पेशस्—सूती धोती
ताप्यम्—क्षौमम्—रेशमी
शिप्र—उष्णीषः
परुष्णी—ऊनी वस्त्र
दूर्श—वस्त्र
अधोवस्त्रम्—नीविः
पवस्तम्—चादर (अथर्व ४।७।६)
ऊर्ध्ववस्त्रम्—अधिवासः (आ० १।१४०।९, १०।१०।२)

व्यापारः मुद्रा च

व्यापारःसाधारणतया वस्तुविनिमयेनाऽभवत् । ऋग्वेदे (८।२४।१०) लिखित-मस्ति यत् मह्यमिन्द्राय दश गाः दत्वा कः क्रेष्यति । वस्तुक्रयकाले मूल्यनिर्धारणा-योत्तरप्रत्युत्तरेऽभवताम् । वारमेकं पण्ये निश्चिते तन्मूल्ये न्यूनता वा वृद्धिर्नाऽभवत्[1]। ऋग्वेदे (५।२७।२) शतनिष्कप्रासेरुल्लेखो मिलति । निष्कप्रयोगः (५।१९।३) ग्रीवाभूषणार्थेऽपि कृतो विद्यते । इयं कापि सुवर्णमुद्रा प्रतीयते । स्थलव्यापारे वित्तो-

१. ऋग्वेद, ४।२४।९ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पस्करपरिवहनाय पशूनां व्यवहारोऽक्रियत । वध्रयः (ऋ० १४६।३० वृषभाः) उष्ट्राः गर्दभाः, महिषाः (ऋ० ८।१२।८) श्वानः (ऋ० ८।४६।२८) प्रयुज्यन्तेस्म ।

समुद्रव्यापारस्योल्लेखो मिलति[१]। ऋग्वेदस्य मन्त्रेषु साधारणनौकातिरिक्तायाः शतारित्रायाः नौकायाः प्रयोगो लभ्यते।[२] अश्विनोऽनुग्रहेण शतारित्रनौकामारुह्य समुद्रयात्रिणः तुग्रपुत्रभुज्योरुद्धारस्योल्लेखः प्राप्यते (ऋ० १।११२।६, ६।६२।७, १०।४०।७, १०।६५।१२) । समुद्रमार्गेणापि व्यापारनिर्देशो विद्यते ।

व्यापाराय विनिमयकार्यनिमित्तं धेनोः परमोपयोगितासीत् । परं मुद्राणां नाणकानां वा प्रचलनमासीत् । कक्षीवतः ऋषेराख्यानेन निष्कस्य मुद्रार्थे प्रचलनं सिद्ध्यति ।

वैदिककाले ऋणग्रहणप्रथासीत् । द्यूतकरा ऋणमादायाक्षैः खेलन्ति स्म । ऋणशोधनाय ऋग्वेदे—(ऋणं सन्नयति) वाक्यमायातमस्ति । द्यूते ऋणशोधनाभावे द्यूतकार आजन्मदासतां स्वीकरोति स्माथवा चौरवत् ऋणिनां द्रुपदे वध्यते स्म । पूर्वजैः गृहीतमृणं तद्वंशधराः शोधयन्ति स्म। ऋणपरिशोधाय वरुणः प्रार्थितोऽभवत्। पणिजना एवाधिकतरलाभायर्णदानस्य व्यापारमकुर्वन् ।

भोजनम्, पानमाभूषणञ्च

भोजने दधि[३]-घृत-छिन्ना[४]-मधु-रोटिका[५] अपूप[६]-सत्तुक[७]-मांसानां मुख्य-रूपेण व्यवहारोऽभवत् । मांसे साधारणतया मेषाजाद्यनिंद्यपशूनां मांसं खाद्यते स्म । गवि पूज्यभावनासीत्[८] तथा तद्वधः निन्द्योऽमन्यत[९] । ऋग्वेदे गोमांसेनेन्द्र[१०]संतोषाय तथाश्वमेधयज्ञेऽश्वस्य तथा वृषभस्य मांसेन हवन-विधानस्य वर्णनमायातमस्ति[११]। गोवधस्थानस्य[१२] तथा गोवधादेरुल्लेखो मिलति[१३] । तस्युनरेशस्य सुदासपितुः

---

१. वही ४।५५।६, ७।८८।३ ।

२. वही १।११६।५ ऋग्वेद में पालवाली नाव का भी उल्लेख है (१।१४।३५) ऋग्वेद में कृशन शब्द (१।३२।४) आया है, जिसका अर्थ मोती है ।

३. ऋग्वेद ८।२।९।

४. वही, ६।४८।१८ ।

५. वहीं ४।२४।५ ।

६. वही १०।४५।९ ।

७. वही १।८७।९, ऋग्वेद (१।१२२।१) में भँड़भूँजेका भी उल्लेख आया है ।

८. वही ६।२८ तथा १०।१६९ सूक्त।

९. वही ८।९।१५-१६ ।

१०. वही १०।१६९।३ ।

११. वही १०।९१।१४ ।

१२. १०।८९।१४ ।

१३. वही १।६१।१२ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दिवोदासस्योपाधिः 'अतिथिग्व'[१] आसीत् । केचन विद्वांसः एतस्यार्थं गोमांसेनातिथि-सत्कारममन्यत[२] । आर्या इक्षोरपि व्यवहारमकुर्वन् ।

सुरा[३]-सेवनं निन्द्यममन्यत,[४] यतोऽस्मादेव कारणात् सभायां कलहोऽभूत्[५] । सोमरसपानं धर्मोऽमन्यत । ऋग्वेदस्य समस्तनवममण्डले सोम-प्रशंसाऽभवत् । सोमरसः वभ्रुवर्णः पिङ्गलवर्णो वाऽभवत् । रसेऽस्मिन् जलदुग्ध-दधि-सक्तुकमधुप्रभृति-मिश्रणमभूत् । अयमेकः मादक उल्लासवर्द्धको वा रस आसीत् । योद्धृगणोऽपि युद्धकालेऽस्योपयोगमकुर्वन् ।

आर्यस्त्री-पुरुषावुभावपि सुवर्ण-कुण्डले (कर्णशोभने[६]), मालाम्,[७] निष्कम्,[८] चङ्क्रणम्,[९] नूपुरं,[१०] हारञ्च[११] धारयतः । एतदतिरिक्तस्य मण्यादेः मणिग्रीवस्य[१२] धारणप्रचलनमासीत् । विवाहसमये कराभूषणधारणस्योल्लेखो मिलति ।[१३] स्त्रीणामेकाभूषणस्य नाम 'कुटीरम्' प्राप्यते ।[१४] ऋग्वेदगीतिषु शिशोराभूषणानामपि निर्देशो विद्यते[१५] । स्वर्णकारम् 'निष्कं कृण्वान्' कथयन्ति[१६] स्म । अश्वा अपि स्वर्णाभूषणैः सज्जिता अभवन् ।

आर्याः केशान् मसृणान् विधाय कङ्कतिकया प्रसाधयन्ति स्म । स्त्रियो वेणीवन्धनमकुर्वन् । ऋग्वेदे (१०।११४।३) एकया युवत्या वेणीचतुष्टय (कपर्दा[१७])-धारणस्योल्लेखः प्राप्यते । पुरुषाः जटावलयं रक्षन्ति स्म । वशिष्ठकुलीना वलयं दक्षिणभागे रक्षन्ति स्म[१८] । श्मश्रुरक्षण[१९]कर्त्तनयोः[२०] प्रथासीत् । एकप्रकारा

---

१. वही १।५३।८ ।
२. वही ९।८६।१८ ।
३. साधारणतया धान से बनी सुरा का उपयोग होता था, परन्तु यज्ञ में सोमरस पिया जाता था ।
४. ऋग्वेद ७।८६।६ ।
५. वही ८।२।१२ ।
६. वही १।१२२।१४ ।
७. वही ५।५३।४ ।
८. २।३३।१० ।
९. ५।५८।३ ।
१०. ५।५४।११ ।
११. वही २।३४।२४ ।
१२. वही १।१२२।१४ ।
१३. वही ५।६०।४ ।
१४. वही ८।५।८ ।
१५. वही ९।१०४।१० ।
१६. वही ८।४७।१५ ।
१७. वही १०।११४।३ ।
१८. वही ७।३३।१ इनके श्वेतवस्त्र पहनने का भी उल्लेख मिलता है ।
१९. २।११।१७ ।
२०. वही १०।१४२।४ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वर्त्तुलकेशरचना 'ओपश' संज्ञयाभिधीयते स्म ।

मनोविनोदः

आर्याणां मनोविनोदसाधनेषु रथाश्वयोः धावनस्य नृत्यस्य गानस्य च गणनासीत् । धावनम्— 'आजिः'[1] तथा धावनक्षेत्रस्य च 'काष्ठा'[2]ऽथवा 'सप्त'[3] संज्ञासीत्। एतानि क्षेत्राणि महान्ति अभवन् तथा परिमीय निर्मीयन्ते स्म । रथे चत्वारोऽश्वाः युज्यन्ते स्म । अक्षस्यापि मनोरञ्जनसाधने गणनासीत् । अक्षाणां पाशानां च संख्या ५३ आसीत् एतेषां वर्णः पीत आसीत् ।

नृत्ये आघात्या (झांझेन) तालोऽपि दीयते स्म । वाद्येषु दुन्दुभेः कर्कर्याः (वीणा या सारंगी, क्षोणी) तथा वाणस्य (वाद्यविशेषः यस्य सप्तस्वराः स्पष्टं श्रूयन्तेस्म) तथैतदतिरिक्तस्य नाल्याः नाड्याः वा (वंशी) प्रयोगोऽभवत् ।

रोगश्चिकित्सा च

ऋग्वेदे यक्ष्मणो राजयक्ष्मणो वोल्लेखोऽस्ति तथा तन्नाशाय राजयक्ष्मनाशकं सूक्तद्वयमस्ति । एवमेव चक्षुःप्राप्तिसूक्तम्, गर्भरक्षणसूक्तम्, गर्भाशीर्वादसूक्तम्, गर्भसञ्चारणसूक्तम् तथा सर्वाङ्गरोगनाशकसूक्तानि मिलन्ति । जलौषधिभ्यां कल्याणकामना कृता विद्यते । वैदिकगीतिषु जलचिकित्साया औषधचिकित्सायाश्च निर्देशो मिलति । ऋग्वेदे (१०।९७।६) अश्वावती, सोमावती, ऊर्जयन्ती, उरोजस्, नाम्न्य ओषधयः मिलन्ति । ऋग्वेदे (१०।९७।१) "या ओषधीः पूर्वा जाताः" कथयित्वा अचरवृक्षाणां चरजीवेभ्यः प्राक् उत्पत्तिः कथिता । एवमेव (१।११६।१५) ऋग्वेदे छिन्नचरणस्य स्थाने लौहचरणस्य प्रयोगस्य, अन्यत्र कुष्ठ-अन्धत्व-बाधिर्य-निवारणस्य (१।११७।७-८) । १।११७।२४ सूक्ते छिन्नशरीराङ्गानां सीवनस्य वार्धक्य-निवारणस्य(१।११६।१०) तथा नपुंसकनार्यै पुत्रदानस्यो(१।११६।१३) ल्लेख आयातोऽस्ति । हस्तस्पर्शेणापि (१०।६०।१२) तथा (१०।१३६।६) रोगनाशस्योल्लेख उपलभ्यते ।

समाज-व्यवस्थाशासनञ्च

ऋग्वेदे समाजः पञ्चभागेषु विभक्त आसीत्—१. गृहम् कुलं वा २. ग्रामः ३. विश् (वर्गः संघो वा) ४. जनः (जनता) तथा ५. राष्ट्रम् (देशः) ।

कुलम् सामाजिक एकांकः आसीत् । एकस्यैव कुलपतेराश्रये निवसन्तोऽनेक-

---

१. वही १।१७३।६ । २. वही १।११६।१७ ।
३. वही ५।३५।७ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कुटुम्बिनः निवसन्ति स्म । कुलपतिः कुलपः कुटुम्बपिताथवा ज्येष्ठो भ्राताऽभवत्[1] ।

ऋग्वेदगीतिषु राष्ट्रभावनापि विद्यमानासीत् । ते राष्ट्रस्थिरतायै देवान् प्रार्थयन्तेस्म[2] । ते राज्ञो शत्रूणामाक्रमणकरिणाञ्च पराजयायागृह्णन्ति स्म[3] । तेषु स्वराज्यभावना समुत्पन्नासीत् । ते तदुन्नतौ तत्परा अभवन्[4] ।

यस्मिन् स्थाने सम्मिलितपरिवाराः तत्पशवश्च निवसन्तिस्म, तद्गृहं कथ्यते स्म । वृहद् गृहं हर्म्यं कथ्यतेस्म । अस्मिन् प्रकोष्ठाधिक्यमभवत् । गृहं पाषाणेन, मृदा, काष्ठेन, वेणुना च निर्मीयतेस्म । लघु गृहं कुटी कथ्यतेस्म । लघुगृह-निर्माणे तृणपत्राणामुपयोगोऽभवत् । ऋग्वेदे (५।६२।६) एकसहस्रस्तम्भगृहस्योल्लेखोऽस्ति । ६।४६।९ सूक्ते समागतेन त्रिधातुशब्देन प्रांगणत्रययुक्तस्य त्रितलयुक्तस्य वा गृहस्य बोधो भवति । गृहरक्षकः 'वास्तोष्पति' देवोऽमन्यत ।

कुटुम्बानां समूहः ग्रामः कथ्यतेस्म[5] । ग्राममुख्यो ग्रामणीः कथ्यतेस्म । ग्रामवासिनामावश्यकतायाः प्रत्येकवस्तुनः तथैव निर्मीयतेस्म । ग्रामे वैद्या अपि निवसन्ति स्म ।[6]

ग्रामाद् महत्तरा वसतिः 'विश्' कथ्यते स्म । ऋग्वेदे (१।८९।१०) 'पञ्चजसा' लिखितमस्ति । यास्केन सायणेन चास्यार्थः, 'देव-पितृ-गन्धर्वासुरराक्षसाः' अथवा 'ब्राह्मण-क्षत्रिय-वैश्य-शूद्र-निषादाः' कृतः । जनगोप्ता राजाऽभवत् ।

ऋग्वेदे (१०।५७३।५ तथा ४।४२।१) राष्ट्रोल्लेख आयातो विद्यते । ऋग्वेदे (५।५३।११) गणशब्द आयाति । शर्ध-व्रत-गण-शब्दानामर्थाः क्रमशः कुल-ग्राम-जातिगणाः क्रियन्ते । एवमेव ऋग्वेदे (१०।१७०।२) कुलपतीनामधिनायकानां कृते 'व्राजपति' शब्द आयाति । तदानीमार्यानार्ययोर्मध्ये जायमानानवरतयुद्धकारणाद् राज्ञः स्थितिरनिवार्यासीत् । ऋग्वेदे (१०।१२४।८) कथितमस्ति यद् भयकाले राजानं विना प्रजा नाश्रयमलभत । अतः राजैवाक्रमणकाले आक्रान्तावस्थायाञ्च प्रजास्वेकतांररक्ष । राजा कुलक्रमागत एवाभवत् । ऋग्वेदात् (१०।११३।१-२) अस्य निर्वाचनोपरि प्रकाशः पतति । ऋग्वेदात् (१।११६।१) स्पष्टं भवति यत् शत्रवोऽपराधिनश्च कारागारे प्रेष्यन्ते स्म ।

राज्ञो मन्त्रिपरिषदभवत् । तत्र सर्वप्रथमं स्थानं पुरोधसोऽभवत् । अयं राज्ञः गुरुः, उपदेशकः, मार्गदर्शकः तथा शुभचिन्तकोऽभवत् । तृत्सुजातेः राज्ञः सुदासस्य

---

१. ऋग्वेद १०।१७९।२.
२. वही १०।१७३।५.
३. वही १०।१७४।२.
४. वही ५।६६।६.
५. वही १।४४।१०.
६. वही २।३३।४.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पुरोधाः ऋषिः विश्वामित्रः वशिष्ठश्चास्ताम्। पुरोधाः धार्मिककृत्यैः सह राजकार्यमपि सम्पादयति स्म। अन्यमन्त्रिषु सेनानीः ग्रामणीः अप्यभवताम्। राज्ञो वैयक्तिकोऽनुचरः 'उपस्तिः' 'द्रभ्यो' वा कथ्यते स्म।

राजकार्ये प्रजायाः मन्तव्यप्रकाशनाय सभा समितिर्वाभवत्। पृथ्वी, अन्तरिक्षम्, द्युलोकः—इमे त्रयो लोकाः कथिताः सन्ति। पृथ्व्यां मानवाः, अन्तरिक्षे वायुलोके वा मेघाः, विद्युत्, पवनश्च तथा द्युलोके सूर्यः निवसन्ति। ऋग्वेदे (१०।८९।४) कथितमस्ति—यथाक्षेण चक्रद्वयं दृढरूपेण धृतमस्ति, तथैव इन्द्रेण पृथ्वी-द्युलोकौ दृढीकृतौ। सूर्यो यदा पूर्वदिशः पश्चिमां चलति, तदा प्रकाशमार्गोऽस्मत्सम्मुखे भवति तथान्धकारभागः उपरि। अतएव दिने वयं प्रकाशं प्राप्नुमः। पश्चिमाकाशं गते सूर्ये अन्धकारांशोऽस्मत्सम्मुखे भवति, प्रकाशांशश्च देवाभिमुखं याति। एवं दिनस्य रात्रेश्च व्यवस्था भवति। सूर्यं वर्णयता कथितम्—

अष्टौ व्यख्यन् ककुभः पृथिव्यास्त्रीधन्व योजना सप्तसिन्धून्।
हिरण्याक्षः सविता देवः आगाद्दधद्रत्ना दाशुषे वार्याणि॥

—ऋ० १।३५।८

सूर्येणाष्टावपि दिशः प्रकाशिताः। सूर्येण प्राणिनां त्रयोऽपि संसारा सप्तसिन्धवःश्च प्रकाशिताः। सुवर्णनेत्रः सवितृदेवः हव्यदात्रे यजमानाय वरणीयदानं दत्वात्रागच्छतु।

सूर्यतेजसः चन्द्रमसि प्रकाश आयाति। अस्य सिद्धान्तस्य विवेचनं निम्नप्रकारमस्ति—

अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम्।
इत्था चन्द्रमसो गृहे॥ (ऋ० १।८४।१५)

अस्मिन् गतिशीले चन्द्रमण्डले यत्तेजोऽस्ति, तदादित्यकिरणो वर्त्तते, एवं ज्ञातव्यम्। द्वादश राशयः (१।१६४।११) पञ्चर्तवः द्वादशमासाश्च (१।१६४।१२) निर्दिष्टाः मिलन्ति। मघायाः पूर्वाफाल्गुन्याः उत्तराफाल्गुन्याश्च निर्देशः ऋग्वेदे (१०।८५।१३) विद्यते। एवं खगोलसम्बन्धिन्योऽनेकमहत्त्वपूर्णाः चर्चाः गीतिषु समाहिताः सन्ति।

प्रबन्धात्मकगीतिकाव्यम् : सांस्कृतिकमूल्यांकनम्

काव्यमूल्यानां सदृशमेव प्रबन्धात्मकगीतिकाव्यानां सांस्कृतिकमूल्यमनल्पमस्ति। प्रबन्धात्मकगीतिकाव्यस्य प्रारम्भः कालिदासस्य मेघदूतात् ऋतुसंहाराच्च भवति। अस्याः परम्परायाः अनुसर्त्तारः सर्वे संदेशकाव्यनिर्मातारः सन्ति। एतैः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कविभिः प्रवन्धात्मकगीतयः प्रणीताः। महाकाव्य-नाटकयोः समाहितासु गीतिष्वपि सांस्कृतिकमूल्यानां प्रचुरतास्ति, परं सौविध्यायात्र केवलं दूतकाव्येषु सन्देशकाव्येषु च निहितसांस्कृतिकतत्त्वानां निरूपणं करिष्यते।

मेघदूत-पवनदूतादिसमस्तगीतिकाव्येषु ग्राम्यजीवनस्य नागरिकजीवनस्य च विशदं चित्रणमायातमस्ति। उज्जयिन्याः, अलकाया अयोध्यायाश्च वैभवचित्रणं यत्र पाठकानाकर्षति तत्र ग्रामाणां नैसर्गिकशोभापि। महाकविकालिदासेन मेघदूते ग्रामसुपमायाः विशदाङ्कनं कृतम्।

ग्राम्यजीवनम्

प्रवन्धात्मकगीतीनामध्ययनेन ज्ञायते यद्ग्रामाणां प्रमुखा जीविका कृषिकर्मस्वाधृतासीत्। कृपकाः स्वशस्यसम्पन्नक्षेत्रेषु गर्ववन्त आसन्। यतः अन्नानि पर्याप्तान्यभवन्। सः दिनपर्यन्तं क्षेत्रे कार्यमकरोत्, तथा तद्भोजनं तत्रैव नीयमानमभवत्। भोजनप्रापणकार्यं नार्यः कुर्वन्ति स्म। वपनात्, पूर्वं हलपूजायाः प्रथासीत्। अवसरेऽस्मिन् स्त्रियः हलोपरि स्वस्तिकादिमङ्गलचिह्नाङ्कनं कुर्वन्ति स्म। ताः कृपिकार्ये पुरुषाणां सक्रियं साहाय्यं विदधति स्म। मेघदूतस्य "त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः, प्रीतिस्निग्धैर्जनपदवधूलोचनैःपीयमानः[1]" अंशेन ध्वन्यते यत् कृषिकर्म वर्षोपरि निर्भरमासीत्। अतएव क्षेत्रसहायिकाः भ्रूविलासानभिज्ञाः नार्यः मेघस्यादरपूर्वकमवलोकनं कुर्वन्ति स्म।

तत्कालहलकर्पणनिःसृतसुरभिभिः क्षेत्राणां परिसरः सौरभसम्पन्नोऽभवत्। "हलोत्कृष्टा हि भूर्जलदजलकणव्यतिकरात् सुरभिर्भवति। सद्यस्तत्क्षणं सीरणहलेन यदुत्कर्षणं विलेखनं तेन सुरभि सुगन्धि।[2]" टीकोद्धरणेन स्पष्टमस्ति यत् ग्राम्यजीवनस्य वातावरणं परमचारु वर्त्तते स्म। क्षेत्रसुरभिः सर्वमनसामाकर्षणमकरोत्। ग्रामेष्विक्षूणां रसं निःसार्य गुडनिर्माणमभवत्।

ग्राममभित उपवनानि जलाशयाश्चाभवन्। उपवनेषु जम्ब्वाम्र-विल्व-कपित्थ-मौलश्रीप्रभृति वृक्षा अभवन्। कदम्ब-शिरीष-पिप्पल-वकुल-मालती-कुरवक-चम्पक-जात्यादयः ग्रामोपवनेषु प्राप्यन्ते स्म। मेघदूते कविः ग्रामोपवनं वर्णयन् लिखितवान्—

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
र्नीडारम्भैर्गृहवलिभुजामाकुलग्रामचैत्याः।

---

१. मेघदूत—रञ्जनसूरिदेव, द्वितीय संस्करण, पूर्वमेघ, १६।
२. वही, मल्लिनाथ टीका।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः,
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसाः दशार्णाः ।[1]

दशार्णदेशपरिसर उपवनव्याप्त आसीत्। उपवने वन्यजम्ब्वाम्रादिवृक्षा आसन्। ग्रामवीथिकासु पवित्रपिप्पलतरव आसन्, येषु काक-पारावताः स्वविगुडं निर्माय निवसन्ति स्म। ग्रामपरिसरः स्वप्राकृतिकसुषमया विशेषरूपेण जनाकर्षणमकरोत्। ग्रामनिकटवर्तिषु वनेषु निम्ब-कदम्ब-मधूक-पलाश-अंकोट-क्रौंच-कपित्थादिवृक्षाः प्राप्यन्ते स्म ।[2]

सामाजिकजीवनम्

गीतिकाव्येषु वर्णिता जीवनपरिधिः परमसीमितास्ति, अतः सामाजिकजीवनोपरि पूर्णः प्रकाशः पतति। वियोग-संयोगयोरनेकचित्राणि मिलन्ति। नार्याः समाजे महत्त्वपूर्णं स्थानमासीत्। कस्मादपि कारणाद् विदेशं प्रयाते पत्यौ सा महाकष्टमनुभवति स्म। नार्याः शृङ्गारसौन्दर्यं पत्य एव सार्थकमासीत्। पत्युः सम्मुखं कौशेयवस्त्रैः विभिन्नालङ्कारैश्च स्वशरीरमलङ्कृत्याङ्गरागैः सुगन्धितद्रव्यैश्च सुवासिता तथा मदिरापानैरुन्मत्ताऽभवत्। वीणां वादन्त्यः मधुरगायनैः पतिमनुरञ्जयन्ति स्म।[3]

प्रत्येकर्त्तौ ताः पुष्पादिभिः शृङ्गारं विधाय पतिहृदयमावर्जयन्ति स्म।[4] पत्युरनन्यप्रेमप्राप्तिरेव तासां परमोद्देश्यमासीत्। सौभाग्यवतीभ्यः स्त्रीभ्यः सन्तानप्राप्तेः

---

१. वही, पूर्वमेघ, २३ ।

२. छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैः। पूर्वमेघ—१८।

३. सुवासितं हर्म्यतलं प्रियामुखोच्छ्वासविकम्पितं मधु।
सुतन्त्रिगीतं मदनस्य दीपनं शुचौ निशीथेऽनुभवन्ति कामिनः। ऋतु० १।३
नितम्बविम्बैः सुदुकूलमेखलैः स्तनैः सहाराभरणैः सचन्दनैः।
शिरोरुहैः स्नानकषायवासितैः स्त्रियो निदाघं शमयन्ति कामिनाम्।
वही १।४

४. शिरोरुहैः श्रोणितटावलम्बिभिः कृतावतंसैः कुसुमैः सुगन्धिभिः।
स्तनैः सहारैर्वदनैः ससीधुभिः स्त्रियो रतिं सञ्जनयन्ति कामिनाम्।
वही २।१८
मालाः कदम्बनवकेसरकेतकीभिरायोगिताः शिरसि बिभ्रति योषितोऽद्य।
कर्णान्तरेषु ककुभद्रुममञ्जरीभिरिच्छानुकूलरचितानवतंसकांश्च ॥
वही २।२१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तथा "भर्तुर्बहुमता भव" आशीर्वादो दीयते स्म। मेघदूत-ऋतुसंहार, पार्श्वाभ्युदय-नेमिदूत-प्रभृतिप्रबन्धगीतिकाव्यैरेतत् स्पष्टमस्ति यत् पत्युः सम्मानप्राप्तिः नार्य्याः सार्थक्यं काम्यासीत्। वियोगकाव्यैरपि एतदेव ध्वन्यते यत् पतिस्नेहप्राप्तौ नारी स्वजीवनं मनुतेस्म।

वियोगावस्थायां नारी

वियोगावस्थायां प्रत्येकप्रकारशृङ्गारस्य नारी त्यागं करोति स्म। पतिरेव सौन्दर्यस्य यौवनस्य च भोक्ता आसीत्। अतः तस्मिन्प्रवासिनि शृङ्गारेच्छा हृदयात् स्वयं निःसरति स्म। स्ववेशविन्यासादेश्च विरक्तिरभवत् तथातीतं स्मृत्वा मनः सान्त्वयति स्म। सा पतिगुणान् गायतिस्म तत्स्मृतौ च केनापि प्रकारेण स्वसमययापनं करोति स्म। पतिविरहे क्षीणायाः पत्न्याः चित्रणं मेघदूते निम्नाङ्कितं विद्यते—

"शिशिरमथितां पद्मिनीम्"[1]

वियोगे रुदन्त्याः नार्याः नयने श्वयथुयुक्तेऽभवताम्। उष्णश्वासैः ओष्ठवर्णः मलिनोऽभवत्। चिन्तायुक्तकपोलयोः करौ निक्षिप्य न्यवसत्। केशाः विकीर्णाः तन्मुखमाच्छायन्ति स्म। मेघावृतचन्द्रवत् मलिनमप्रसन्नञ्च मुखं विरहजन्यं दुःखं प्रकटयतिस्म। कथितम्—

नूनं तस्याः प्रबलरुचितोच्छूननेत्रं प्रियाया
निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम्।
हस्तन्यस्तं मुखमसकलव्यक्तिलम्बालकत्वा-
दिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्ति॥

—मेघदूतम्, नागरीप्रकाशनम्, पटना, उत्तरमेघ २१

विरहिणी पत्नी रात्रिन्दिवं पत्युः मङ्गलकामनायै प्रार्थनां करोति स्म। सा बलिं ददातिस्म। मनोरञ्जनाय पत्युश्चित्रनिर्माणं करोति स्म। कदाचित् पञ्जरबद्धया सारिकया सह वार्त्तां करोतिस्म तथा कदाचित् मलिनवसनाङ्के वीणामादाय पत्युः यशोगीतं गायति स्म। पतिस्मृत्यानायासमेव प्रवाहिताश्रुभिः वीणाऽऽर्द्राऽभवत् तथा स्मृतावचेतना भूत्वा सा स्वरारोहावरोहौ विस्मरति स्म। कथितम्—

आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनुवा भावगम्यं लिखन्ती।
पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद्भर्त्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति।

उत्तरमेघ, पटना-संस्करण, पद्य २२

× × ×

---

१. मेघदूत-उत्तरमेघ, पद्य २०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उत्सङ्गे आ मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चिद्,
भूयोभूयः स्वयमपि कृतां मूच्छर्नां विस्मरन्ती,।

वही, उत्तरमेघ, पद्य २३

देहल्यां नित्यं पुष्पाणि रक्षित्वा, कदाचित् राशिं गणयित्वा ज्ञायते स्म यत् कियन्ति दिनानि व्यतीतानि तथा प्रियमिलनस्य कियन्ति दिनानि शेषाणि सन्ति। कथितम्—

शेषान् मासान् विरहदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः।

उत्तरमेघ, पटना संस्करण, पद्य २४

विरहिण्याः मनोव्यथायाश्चित्रणं मेघदूतसदृशमेव नेमिदूतेऽपि विहितमस्ति। अस्य गीतिकाव्यस्य नायको योगासक्तो भूत्वा पर्वतशिखरे समुपविष्टोऽस्ति तथा नायिकाभिलाषाहेतुकवियोगव्यथिता भूत्वा तत्सम्मुखं स्थिता याचते। सास्य लोकस्य सौन्दर्यस्य, ऐश्वर्यस्य विलासस्य च वर्णनं करोति। नायकं कर्त्तव्यं स्मारयति तथा यथासम्भवं तस्मिन् संभोगप्रवृत्तिमुद्बोधयितुं यतते। परमन्ते सा पार्वतीसदृशी समस्तवैभवविलाससौन्दर्यादिं तिरस्कृत्य सखीमुखेन स्वपवित्रप्रेम्णा तथानन्यसाधनेन युक्तस्य प्रवासहेतुकविप्रलम्भस्य सजीवं वर्णनं करोति, यस्मिन् राजमत्याः अभिलापस्य, चिन्तायाः, स्मृतेः, कृशतायाः व्याकुलतादीनाञ्च चित्रणं कृतमस्ति। सहैव तस्याः उद्वेग-प्रलापस्वप्नादिदशानामपि सम्यक् चित्रणं विहितमस्ति। राज्यमत्याः मातापि तां प्रबोधयति; परं तस्याः व्यथा न्यूना न जायते—

मातुः शिक्षाशतमलमवज्ञाय दुःखं सखीना—
मन्तश्चित्तेष्वजनयदियं पाणिपङ्केरुहाणि।
हस्ताभ्यां प्राक् सपदि रुदती रुन्धती कोमलाभ्यां,
मन्द्रस्निग्धैर्ध्वनिभिरवलावेणिमोक्षोत्सुकानि ।

नेमिदूत, कोटा-संस्करणम्, पद्य १०६

विरहिणी नायिका रात्रौ स्वप्ने स्वप्रियदर्शनं विधाय स्वमनोवेदनां शमयति। परं दुर्भाग्येन निद्रानाशेन स्वप्नेऽपि पत्या सह प्रियवार्त्तां न कर्तुं शक्नोति। एकं तु विरहिणी स्वपित्येव न, प्रियस्मृतौ सा रजनीं नयनयोरेव यापयति। कविविक्रमेण नायिकायाः अस्याः मनःस्थित्याः सुन्दरं चित्रणं कृतम्—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रात्रौ निद्रां कथमपि चिरात् प्राप्य यावद्भवन्तम्,
लब्ध्वा स्वप्ने प्रणयवचनैः किञ्चिदिच्छामि वक्तुम् ।
तावत्तस्याः भवति दुरितैः प्राक्कृतैर्मे विरामः,
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ।

नेमिदूत, कोटासंस्करण, पृ० ११३

विरहिणी भूषणधारणं परित्यजति । अञ्जनाभावे तदक्षिणी रूक्षे जाते । मदिरापानाभावे भ्रू विलासः सङ्कुचितो जायते ।[1] यस्मिन् दिने पतिः विदेशं गच्छति, तद्दिने या वेणी बध्यते स्म, सा प्रिये समागते एव मुच्यते स्म । प्रियः स्वयमेवागत्य वेणीं मुञ्चति स्म । तस्यां पुष्पाणि न ग्रथितान्यभवन् । चिरकालं यावत् बन्धनात् सा वेणी कठिना रूक्षा चाऽभवत् । विकीर्णमिसम्बद्धां वेणीं प्रवृद्धनखैः, करैः, स्वमुखात् वारंवारं निवारयति स्म ।[2] एकैव वेणी क्रियते स्म । मेघदूतस्याध्ययनेनैवं प्रतीयते यत् वेणी पृष्ठे न भूत्वा गण्डस्थलाग्रेऽभवत् । कविः कपोलयोः वारं-वारं वेण्यागमनं संकेतितवान् । केशेषु तैलाभावेन परुषकेशाः वारं-वारं मुखे आगच्छन्ति स्म ।[3]

विरहिण्याः स्नानमपि तैलोद्वर्त्तनरहितेन शुद्धजलेनाऽभवत् । तस्याः वेशभूषयैव विरहावस्था स्पष्टाऽभवत् ।[4] रूक्षकेशानां प्रसारेण तस्याः मुखसौन्दर्यमपि न्यूनमभवत् । तथा चिन्तया दुर्बलत्वात् लावण्यमपि क्षीणमजायत ।

विरहावस्थायां पूर्वाभ्यास-कारणात् शीतलदायि-वस्तुनां तथा जालमार्गेण प्रवेशं कुर्वद्भिश्चन्द्रकिरणैः विरहिणी स्वतप्तशरीरं शमयितुमिच्छति स्म । परं विरहकारणात् तानि शन्ति-दायीनि वस्तूनि विपरीतानि सिद्धानि जायन्ते स्म ।[5]

संक्षेपेण प्रोषितभर्तृका क्रीडां, शरीर-संस्कारं समाजोत्सवदर्शनं हास्यं परगृहगमनादिकञ्च परित्यजति स्म । एष एव तस्या आदर्श आसीत् । पति-वियोगे

---

१. रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेह शून्यम्—उत्तरमेघ, पटना संस्करण ३२ ।

२. आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा,
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयां ।
स्पर्शक्लिष्टामयमितनखेनासकृत्सारयन्ती
गण्डाभोगात् कठिनविषमामेकवेणीं करेण । वही, उत्तरमेघ, २९

३. मेघदूत, पटना, संस्करण, उत्तरमेघ, पद्य २८

४. वही पृष्ठ २८

५. पादानिन्दोरमृतशिशिराञ्जालमार्गप्रविष्टान्,
पूर्वप्रीत्या-गतमभिमुखं सन्निवृत्तं तथैव ।। उत्तरमेघ, पद्य २७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

राजुलस्य, यक्षपत्न्याश्च कृशशरीरं दर्शितम् । प्रवन्ध-गीतिषु कन्यायाः मातृरूपायाश्च नार्याश्चित्रणं नास्ति । नेमिदूते राजुलमातावश्यमेव स्वपुत्रीं सान्त्वयति । अवसरेऽस्मिन् तस्याः ममता प्रकटीभूतास्ति तथा सन्तानाय कल्याणं कामयमानायाः मातुः स्वरूपं पूर्णतया प्रकटीभूतमस्ति—

वत्से शोकं त्यज भज पुनः स्वच्छतामिष्टदेवाः,
कुर्वन्त्येवं प्रयतमनसोऽनुग्रहं ते तथामी ।
भर्तुर्भूयो न भवति रहः सङ्गतायास्तथा ते,
सद्यः कण्ठच्युतभुजलता-ग्रन्थि-गाढोपगूढम् ॥

नेमिदूतम्, कोटा संस्करण, १०४

एवं मातृममताया अभिव्यक्तिर्जाता । गीतिषु नारीः प्रति महत्त्वपूर्णोद्गराः व्यक्ताः सन्ति ।

नारी-शिक्षा

प्रवन्ध-गीतिकाव्येषु नारीशिक्षा-दीक्षासंकेतोऽपि लभ्यते । नेमदूत-शीलदूतादिषु कथितमस्ति यत् चित्राङ्कन-गायन-वादन-प्रसाधनकलादयः नारीभ्यः प्रिया आसन् । पति-वियोगे यक्षपत्नी चित्रं रचयति । वीणोपरि गायन्ती मूर्च्छनां विस्मरति ।[1] अतएव स्पष्टमस्ति यत् नार्यः कला-कौशलयोः प्रवीणा अभवन् ।

आहारः पानञ्च

साधारणतः भोज्यपदार्थः द्विप्रकारोऽभवत्—भक्ष्यः भोज्यश्च । भक्ष्यवर्गे ते पदार्था आयान्ति, ये कृन्तित्वा खाद्यन्ते स्म । यथा रोटिकाः, मोदकाश्च । भोज्ये ते पदार्थाः सम्मिलिताः सन्ति, येषु दन्तानामधिकश्रमो नाऽभवत् । यथौदनो द्विदलादिश्च । प्रवन्धात्मकगीतिकाव्येषु भोज्यपदार्थानां चर्चायाः प्रायोऽभावो विद्यते । एतस्य मुख्यकारणमेतदस्ति यत् भोजन-चर्चा ग्राम्या स्वीकृता । अतो गीतिकाव्यलेखकैः पेयपदार्थास्तु वर्णिताः परं भोज्यपदार्था न वर्णिताः । फलानामुपयोगः क्रियते स्म । एतस्य निर्देशः मेघदूतादिकाव्येषु मिलति । वर्त्तमानवत् ताम्बूलानां पूगीफलानाञ्चोपयोगोऽभवत् । ऋतुसंहारे कथितम्—

---

१. उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा ।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चिद्—
भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती । उत्तरमेघ, पद्य २३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गृहीतताम्वूलविलेपनस्रजः पुष्पासवामोदितवक्त्रपङ्कजा ।[1]

पेयपदार्थेषु मधुपानवर्णनं मेघदूत-ऋतुसंहारादिप्रबन्धगीतिषु समायातमस्ति। मधुपानेन नार्यः स्वमुखं सुगन्धं कुर्वन्ति स्म। तथाहि तासां मुखेभ्यः सद्यः मौलश्रीसुरभिरायाति स्म।[2]

रति-प्रसङ्गे स्त्रीभिः सह पुरुषा अपि मदिरां पिवन्ति स्म। ग्रीष्मर्तौ प्राचीनां सुरां शरदृतौ पुष्पासवं पिवन्ति स्म। महाकविकालिदासेन मदिरायै मद्यासव-मधुवारुणी-कादम्वरी-शीध्वादिशब्दानां प्रयोगो विहितः ![3]

वेशभूषा

संस्कृतौ वेशभूषाया अपि स्थानमस्ति। आरम्भे संस्कृतौ धर्ममोक्षयोरेव स्थानमासीत्; परं सम्प्रति अर्थ-कामयोरपि जीवनस्य महत्त्वपूर्णांगसत्त्वात् संस्कृतौ गणना भवति। कामः भारतीयजीवनस्य विशिष्टांगोऽस्ति, नात्र संदेहः। यद्येवं न स्यात्, काव्येष्वयं नेदृशं स्थानमप्राप्स्यत्। भारतीयचिन्तकानां मतानुसारमर्थ-धर्म-काम-मोक्षाणां सन्तुलितप्रयोगेणैवोन्नतिर्जायते। धर्ममोक्षयोरासक्तिः कामार्थयोस्त्यागश्च सर्वथानुचितोऽस्ति। यतोऽट्टालिकायां भवने, अलङ्कृतनगरे, वेशभूषायां वस्त्राभूषणादौ च सर्वत्र कामप्रवृत्तिः दृश्यते। अस्याः प्रवृत्तेः सर्वाधिका प्रतिष्ठा सौन्दर्यप्रसाधने प्राप्यते। सौन्दर्यचित्रणं प्रत्येककविकृते परमावश्यकमस्ति।

संस्कृतगीतिषु कवीनां चित्तवृत्तिः यथा नारी-सौन्दर्यवर्णने प्रवृत्ता, न तथा पुरुषसौन्दर्यवर्णने। पुरुषसौन्दर्ये कठोरता तथा वीरतैव सर्वत्र मिलतः। परं कमनीयता चारुता लावण्यञ्च नारीसौन्दर्यस्यैव प्रतीकमस्ति। स्त्रीणां प्रत्येकाङ्गे लावणस्य सुकुमारतायाश्च दर्शनं क्रियते। यक्षः स्वपत्न्याः सौन्दर्यमेकस्मिन्नेव श्लोके व्यनक्ति—

तन्वी श्यामा शिखरिदशना पक्वविम्वाधरोष्ठीं,
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्याम्,
या तत्र स्यात् युवति विषये सृष्टिराद्येव धातुः।

—उत्तर मेघ, पटना संस्करण, पद १९

सा कृशाङ्गी विद्यते, तस्याः दन्तपंक्तिः शिखरिणी विद्यते। तस्याः ओष्ठौ

---

१. ऋतुसंहार ५।५।
२. पुष्पासवामोद-सुगन्धि-वक्त्रो निश्वासवातैः सुरभीकृताङ्गः—ऋतु. ४।१२।
३. आसेवन्ते मधु रतिफलं कल्पवृक्ष-प्रसूतम्—उत्तरमेघ, ५।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पक्वविम्वसदृशौ विद्येते, तस्याः गात्रयष्टिर्मध्ये कृशा वर्तते। तस्याः कटाक्षैश्चकित-हरिणीनेत्रयोः स्पर्धा भवति। तस्याः नाभिः गम्भीरा विद्यते, नितम्वभारेण तस्याः गतिः मन्थराऽस्ति। स्तनभारेण साग्रे नताऽस्ति। एतेषां लक्षणानामेकत्र समवायेनैवं प्रतीयते यत् सालकापुर्याः युवतिषु विधातुः प्रथमा रचना विद्यते।

अत्र 'तन्वी-श्यामा'-पदे युवत्याः रूपाङ्कनं कृतमस्ति। नात्रोपमायाः वैलक्षण्यं न वा कल्पनाया ऊर्मिलतैवास्ति। कविः सरलतया बालायाः ललामरूपस्याङ्कनं कृतम्। रमण्याः सुरूपतायै तस्याः तन्वङ्गीत्वमावश्यकमस्ति। अथ 'श्यामा'-पदेन यौवनमध्यस्थात्वं ध्वन्यते।

नारीसौन्दर्यस्य कानिचनोपमानानि मेघदूतस्यैकस्थलेऽनायासमेवैकत्र जातानि। यक्षः स्वसन्देशो कथयति—हे प्रिये! प्रियङ्गुलतायां तव शरीरम्, चकितहरिणी-नेत्रयोः कटाक्षः, चन्द्रमसि मुखकान्तिः, मयूरपङ्खेषु केशाः तथा नद्याः लहरीषु चञ्चलभ्रूसमता दृश्यन्ते। परमेकत्र हे क्रोधमयि! तव छविः नैव दृश्यते।

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्,
हन्तैकस्मिन् क्वचिदपि न ते चण्डि सादृश्यमस्ति॥ उत्तरमेघ, ४१

यक्षः श्यामायां, मृग्याम्, चन्द्रे, मयूरे, लहरीप्रभतिषु स्वप्रेयस्याः अङ्गानां समतां प्राप्नोति, परं स समग्रं सौन्दर्यं क्वचिदेकस्थले न पश्यति। प्राकृतिकोपमा-नानां विकीर्णानि सौन्दर्याणि एकमात्रयक्षिण्यां पुञ्जीभूतानि सन्ति।

ऋतुसंहारे सौन्दर्यस्यादर्शः निम्नप्रकारः प्रस्तुतोऽस्ति—

नेत्रेषु लोलो मदिरालसेषु गण्डेषु पाण्डुः कठिनः स्तनेषु।
मध्येषु निम्नो जघनेषु पीनः स्त्रीणामनङ्गो बहुधा स्थितोऽद्य॥
—ऋतुसंहार ६।१२

शारीरिकसौन्दर्ये सर्वप्रथमं वर्ण आयाति। गीतिकाव्येषु "कनकममलकान्तिः"[1] महत्त्वमगात्। युवावस्थायां शरीरयष्टौ स्वयमेवानुपमं लावण्यमायाति। वात्सल्या-वस्थायां व्यतीतायां शरीरयष्टिः स्वयमार्कषिका जायते। शरीरयष्टयाः 'तन्वीत्व'[2] मावश्यकं मतमस्ति।

केशसौन्दर्ये आयताः घनाः कृष्णाः कुञ्चिताश्च केशाः सौन्दर्यसाधकाः भवन्ति। केशानां यथार्थसौन्दर्येण मयूराणां प्रसारिताः पक्षाः अधिकसादृश्यं वहन्ति। वियो-

---

१. ऋतुसंहार–६।३२। २. उत्तरमेघ–२२।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गावस्थायां शिखिवर्हंभारमिममेवालोक्य यक्षस्य पत्न्याः केशा अनायासमेव यक्षस्मृतिपथमागताः।[१] आनितम्बविलम्बिकेशवती युवती सुन्दरी मन्यते।[२] आयता अपि केशा यदि अकुञ्चिताः भवन्ति तदा सौन्दर्यवृद्धिर्न भवति। अत एव गीतिषु कुटिलकेशाः, अरालकेशाः, विकुञ्चितकेशाश्च उत्तमाः अमन्यन्त।[३]

भ्रूविलासः सौन्दर्यहेतुरमन्यत। लहरीसदृशी वक्राथवाऽराला भ्रूः सौन्दर्यकारणभूता मता। भ्रुवोरुपमा धनुषापि दत्ता विद्यते। कामधनुषः पराजयित्री आयता मनोहरा भ्रूः सौन्दर्यपराकाष्ठा मन्यते। यक्षपत्नी नदीवीचिसदृशया भ्रुवा सम्पन्नासीत्।

आयते विशालेनेत्रे सौन्दर्यप्रसाधने मते। ऋतुसंहारस्य कामिनीनां नेत्रे श्रवणतटनिपक्ते उपान्तलोहिते च स्तः—

श्रवणतटनिपक्तैः पाटलोपान्तनेत्रैः। ऋतु० ५।१३

कविकुलगुरुणा 'उत्पलाक्षि'-सम्बोधनस्यानेकस्थलेषु प्रयोगो विहितः[४]। विशालेषु जातेष्वपि नेत्रेषु तदैव लोभनत्वमायाति, यदा तेषु कश्चन भावः स्यात्। अतएव नेत्रैः सह कटाक्षस्यापि कविना निर्देशः कृतः। सरलता, निर्व्याजता तथा किञ्चिदाश्चर्यं कव्यभिप्रेतमस्ति। कथितम्—

अवेक्षमाणाः हरिणेक्षणाक्ष्यः प्रबोधयन्तीव मनोरथानि। ऋ० ४।१०

यक्षपत्नी मृगाक्षी तथा 'ऋतुसंहारस्य' कामिन्यः हरिणेक्षणाक्ष्य आसन्। यथा मृगस्य निर्व्याजतायाः, चञ्चलतायाः आश्चर्यस्य च भावः नेत्रसुषमावृद्धिं करोति, तथैव कौमुदीजीवनस्य मत्ततापि नयने मनोहरे विदधाति।

अधरौ पल्लवसदृशौ सुन्दरौ मतौ। एतयोररुणता विद्रुम-विम्वाफल-प्रवालसदृशी प्रसिद्धा वर्त्तते। यक्षपत्न्या अधरौ पक्वविम्बाफलसदृशौ स्तः[५]।

दशनानां सौन्दर्यमपि चर्चितं भवति। 'शिखरिदशना'शब्देन लघुलघुरदानां सुन्दरता ध्वन्यते। दन्तानामुपमा कुन्दकलीभिर्दीयते।[६]

---

१. उत्तरमेध–४६।

२. शिरोरुहैः श्रोणितटावलम्बिभिः
स्त्रियः रतिं सञ्जनयन्ति कामिनाम्। ऋतु० २।१८।

३. केशान्नितान्तघननीलविकुञ्चिताग्रा-
नापूरयन्ति वनिता नवमालतीभिः। वही ३।१९

४. उत्तरमेघ–३७, ऋतुसंहार-३।२८, ३।१७, २।१२।

५. पक्वविम्बाधरोष्ठी—उत्तरमेघ १९।

६. उत्तरमेघ १९।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मदिरया सुवासितं मुखं सौन्दर्ये मदसृष्टिं करोति। स्वयं कविगुरवे मदिरा-सुवासितं मुखं प्रियमस्ति। अनेकगीतिषु मुखस्यासवगन्धस्य वर्णनमायातमस्ति। यक्ष-पत्न्याः मुखोच्छ्वासः भूसदृशः सुगन्धितो विद्यते। वर्षासु जातासु यथा पृथ्व्याः सुगन्धः आयाति, तथैव मुखोच्छ्वासादपि। कथितम्—

धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य[१] बाले। उत्तरमेघ—४८

एवं वाण्याः, मुखविम्बस्य, बाह्वोः, पयोधरयोः, कटेः, त्रिवलयस्य, नितम्बस्य, जघनप्रदेशस्य, चरणयोः, चलनस्य, मुद्रादेश्च सौन्दर्याणि वर्णितानि।

वस्त्रेषु कार्पासिक-कौशेयौर्णादीनां त्रिविधानामपि वस्त्राणामुपयोगः प्राप्यते। कौशेय-दुकूलांशुकतनूनिस्तवांशुकादिव्यवहारस्योल्लेखः प्राप्यते।

दुकूलं[२] वृक्षत्वक्सूत्रैः निर्मीयतेस्म। वंगदुकूलं श्वेतमभवत्।[३] विवाहादि-माङ्गलिकावसरेषु क्षौमकौशेययोः प्रयोगोऽभवत्। अंशुकाद्दुकूलं स्थूलमभवत्। यतः पुरुषाः दुकूलमेव धारयन्ति। स्त्रियोऽपि शरीरनिम्नभागे दुकूलस्यैव प्रयोगं कुर्वन्तिस्म।[४] दुकूलवर्णः ज्योत्स्नासदृशः धवलोऽभवत्[५]।

अंशुकम्—ग्रीष्मर्तौ अंशुकस्य प्रयोगोऽभवत्[६]। एतत् सर्वाधिकं सूक्ष्मवस्त्रमस्ति। अंशुकमेतावच्छ्वेतमभवत् यत् चन्द्रमसः निर्मलकिरणानां भ्रमोऽजायत। अंशुकानि बहुप्रकाराण्यभवन्। यथा—सितांशुकम्[७], चीनांशुकम् रक्तांशुकम्[८], नीलांशुकम्[९]। ऋतुसंहारेण ज्ञायते यत् नववधूः रक्तांशुकं धारयतिस्म।

ऋत्वनुसारिणी वेशभूषा

ऋतुसंहारे सर्वर्तुवेशभूषाः वर्णिताः सन्ति। वर्षासु स्त्रियः सूक्ष्मं श्वेतं वस्त्रं धारयन्तिस्म। सुन्दरमुक्तामालां धृत्वा केशान् केतकी-कदम्ब-केसरादिपुष्पैः प्रसाधयन्ति स्म[१०]। रशनां, स्वर्णजटितकुन्डले तथा कृष्णागरुलेपं धारयन्तिस्म[११]।

---

१. ऋतुसंहार, ६।३६।
२. ऋतुसंहार १।४, २।२६, ३।७, ४।३।
३. डा० मोतीचन्द, प्राचीन वेशभूषा, भूमिका, पृ० ८।
४. ऋतुसंहार १।४, २।२६, ४।३।
५. ऋतुसंहार, ३।७। डा० मोतीचन्द, प्राचीन वेषभूषा, पृ० ५५। पौण्ड्र देश में बने दुकूल नीले और चिकने होते थे।
६. ऋतुसंहार १।७, ३।१, ४।३, ६।५
७. ऋतुसंहार ३।१।
८. वही ६।२१।
९. विक्रमो०, अंक ३ पृ० १९८।
१०. ऋतुसंहार २।१८, २।२१, २।२६।
११. वही २।२०, २।२२, २।१९।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शरत्काले नार्यः स्वकुञ्चितकृष्णकेशेषु मालतीपुष्पाणि ग्रथित्वा चन्दनेन शरीरमलंकुर्वन्तिस्म । मुक्ताहाररशनाद्याभूषणान्यपि सुशोभितानि जायन्तेस्म ।[1]

हेमन्ते घोरशीतकारणात् हार-चन्दनकङ्कणाद्याभूषणानां धारणं वर्जितमभवत् । नवीनं क्षौमवस्त्रं सूक्ष्मकञ्चुकी च ध्रियेतेस्म[2] ।

शिशिरकाले धनिकवर्गाः स्थूलवस्त्रं कूर्पासकं धारयन्तिस्म । नार्यः नितम्वेषु कौशेयवस्त्रं दधतिस्म । चन्दनस्थाने केसरस्य प्रयोगोऽभवत् । कूर्पासकं नार्य एव धारयन्तिस्म ।[3]

वसन्ते पुष्पमालायाः चन्दनस्य च प्रयोगारम्भोऽभूत् । रक्तं दुकूलं कुङ्कुमरञ्जिता कञ्चुकी कर्णयोः केशयोश्च कर्णिकारः, अशोकपुष्पाणि च ध्रियन्ते स्म । मुखे पत्ररचना, वक्षःस्थले: प्रियंगुः कालीयकं कस्तूरिका केसरलेपश्च ध्रियन्तेस्म । कृष्णागरुणा सुगन्धितस्यालक्तकेन रञ्जितस्य च वस्त्रस्य धारणेन तासां सौन्दर्यं विकसितमभवत्[4] ।

आभूषणम्

संस्कृतप्रवन्धगीतिकाव्येषु विविधानामाभूषणानां प्रयोगो मिलति । रत्नजटितमाभूषणम्[5], स्वर्णाभूषणम्[6], मुक्ताभूषणम्[7], पुष्पाभरणानि[8], च ध्रियन्तेस्म । वैदूर्यमणि[9]-इन्द्रनील[10]-महानील[11]-पद्मराग[12] - प्रवाल[13] - मरकत[14]—चन्द्र - कान्त[15]-सूर्यकान्त[16]-सितमणीनामुल्लेखो[17] मिलति ।

---

१. वही ३।१,३।३,३।१९,३।२० । २. वही ४।२ ।
३. वही ५।२,५।८,५।१०,५।९ ।
४. ऋतुसंहार ६।३,६।७,६।५,६।६,६।७,६।१४,६।१५ ।
५. वही २।५ मणिकुण्डल २।२०, मणिनूपुर ३।२७ ।
६. कांचनकुण्डल, ऋतुसंहार ३।१९ ।
७. मदीयैर्मुक्ताजालं चिरपरिचितं—उत्तरमेघ, पटना संस्करण, पद्य ३३ पूर्वमेघ ३४ ।
८. ऋतुसंहार २।१८,२।२१,२।२५,३।१९,४।२,५।८,६।३,६।३३ ।
९. उत्तरमेघ १६, ऋतुसंहार २।५ । १०. पूर्वमेघ ५०, उत्तरमेघ १७ ।
११-१२. रघुवंश १८।३२,१७।२३ । १३ पूर्वमेघ ३४ ।
१४. पूर्वमेघ ३४ । १५. उत्तरमेघ ९ ।
१६. उत्तरमेघ ५ । १७. ऋतुसंहार २।२५ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कर्णाभूषणेषु कर्णपूर-कनककमलावतंसानां निर्देशः प्राप्यते। कर्णपूरोऽयतनं कर्णपुष्पमस्ति। कर्णपूरशब्देन स्पष्टमस्ति यत् एतदाभूषणं कर्णौ आच्छादयतिस्म। अस्य पृष्ठभागे कीलकं निवद्धमभवत्। येन तस्मिन् स्थैर्यमागच्छत्।

कुण्डलं[1] मणि-काञ्चनयोरुभयोरभवत्। अस्याभूषणस्य व्यवहारं कन्या वालकश्चो-भावकुरुताम्। इमे वर्तुलेऽभवताम्। ये कीलकेन पिहितेऽभूताम्।

कनक-कमल-कर्णपूरयोरधिकं पार्थक्यं नास्ति। कनककमलं कमलाकृत्यभवत्, यतः कनककमलं लम्वमङ्गीकृतम्। अन्यच्चैतत्पतनशीलमासीत्। उत्तरमेघेऽस्य पतनवर्णनमायातमस्ति—

गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः,

पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च। उत्तरमेघ, पटना संस्करण, पद्य ९।

स्पष्टमस्ति यत्कनककमले कीलकं नाऽभवत्। कण्टकं संलग्नमभवत्। अत्र कनककमलस्यैकोऽर्थः स्वर्णवर्णकमलमप्यस्ति। परमाभूषणसन्दर्भत्वात् स्वर्णनिर्मित-कर्णाभरणस्वीकृतिरधिकोपयुक्तास्ति।

अवतंसः[2]—अवतंसवर्णने पुष्पावतंसानामुल्लेखो मिलति। पुष्पाणि कर्णयोः घ्रियन्तेस्म। अवतंसौ तालपत्रसदृशावभवताम्।

कर्णाभूषणेषु विविधाभूषणानां व्यवहारोऽभवत्। तारहार-हारशेखर-हारयष्टि-हारलम्वहार-मुक्ताजाल-इन्द्रनील-मुक्तामयहारादेः कथनं प्रवन्ध-गीतिषु विद्यमान-मस्ति।

तारहारः[3]—एषः स्थूलः मुक्ताहारोऽस्ति। इमं पुरुषाः धारयन्ति स्म। इयं स्थूलमुक्तानां मालासीत्, परं नार्यः लघु-लघुमौक्तिकानां मालां धारयन्ति स्म। डा० वासुदेवशरण अग्रवालस्य कथनमस्ति यत् सुन्दरमौक्तिकानां हारः गुप्तकाले 'तारहारः' कथ्यते स्म[4]।

हारशेखरः[5]—मुक्तावलीसदृशः हारशेखरः मौक्तिकमालास्ति। हारशेखरः मुक्तावल्यपेक्षया लघुतरोऽभवत्। अयं हारः मस्तकाकारसदृशोऽभवत्, तथा कण्ठा-सक्तो जायते स्म।

---

१. वही २।१०। २. वही २।१८।
३. रघुवंश, ५।५२।
४. हर्षचरितम्—एक सांस्कृतिक अध्ययन, प्रथम संस्करण, पृ० १७८।
५. ऋतुसंहार, १।६।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हारः[१]—हारस्यानेकप्रकारा आयाताः सन्ति। साधारणतया मुक्ताहारो हारः कथ्यते स्म।

लम्वहारः—यथा हारशेखरः लघुहारोऽभवत् तथैव लम्वहारः लम्बो हारोऽभवत्। साधारणतः पुरुषा नार्यपेक्षया लम्बं हारं धारयन्ति स्म। अतः लम्वहारः पुरुषाणां हारः कथितः। स्त्रियोऽपि स्तनालम्विहारं दधति स्म।

हारयष्टिः[२]—हारयष्टिरनेकपङ्क्तिरभवत्। परमस्यां चन्द्रहारवत् अनेकपक्षाः नाभवन्। हारयष्टिपङ्क्तीनामपेक्षया अनेकभेदाः भवन्ति।

मुक्ताजालः[३]—अलकेषु मुक्ताजालस्योपयोगोऽभवत्। मेघदूते कथितम्—

या वः काले वहति सलिलोद्गारमुच्चैर्विमाना,
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम्। पूर्वमेघ, पटना संस्करण, ६३

उत्तरमेघेऽपि—

मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारैः
नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम्। उत्तरमेघ, पटना सं० ९

कराभूषणेषु वलयस्य[४], कनकवलयस्य[५], कंकणवत् शिखरिवलयस्य[६] शिञ्जावलयस्योल्लेखः[७] आयातोऽस्ति। अंगदः भुजवन्धोऽस्ति। वलयश्च केयूरोऽस्ति, यो मणिवन्धे धार्यतेस्म। पूर्वमेघेऽयं प्रकोष्ठस्थितः कथितः। आकारेऽयं वर्त्तुलोऽभवत्। शिवः सर्पाणां वलयं दधातिस्म[८]।

कट्याभूषणेषु मेखलायाः[९], रशनायाः[१०], काञ्च्या[११]श्चोल्लेखो विद्यते। चरणाभूषणेषु नूपुरधारणनिर्देशो मिलति।

पुष्पाभरणानां विविधोल्लेखाः मिलन्ति। नार्यः कुरवक[१२]-नवकदम्व[१३]नावकेसरैश्च शृङ्गारं कुर्वन्ति स्म।

---

१. ऋतुसंहार, १।१८।
२. ऋतुसंहार, १।४, १।२८, २।१८, ३।३, ३।२०, ६।७ उत्तरमेघ ३०।
३. पूर्वमेघ-वलय...., ६१, पूर्वमेघ, ४. कनकवलयभ्रंशरिक्तप्रकोष्ठ—२।
५. तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयम्—पूर्वमेघ, १।६१।
६. शिञ्जावलयसुभगैर्नर्त्तितःकान्तया मे, उत्तरमेघ, पद्य १६।
७. भुजगवलयं शम्भुना दत्तहस्ता—पूर्वमेघ प० ६०।
८. ऋतुसंहार १।४, १।६। ९. ऋतुसंहार ३।३, ३।२०, ६।२६।
१०. वही २।२०, ६।७, ३।३६, ४।४, क्वणितकनककाञ्ची, ऋतुसंहार ३।२६।
११. वही, १।५, ३।२७, १४।४, ३।२०। १२. चूडापाशे नवकुरवकम्, उत्तरमेघ २
१३. उत्तरमेघ—२।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वर्षर्तौ केशपाशं सुगन्धितं कुर्वन्ति स्म[1]। कदाचित् वकुलमालया, कदाचित् मालतीमालयालङ्कुर्वन्ति स्म[2]। शरदृतौ घनकृष्णकेशेषु मालतीपुष्पाणि ग्रथ्नन्ति स्म[3]। वसन्तः पुष्पैः शृङ्गाराय प्रसिद्ध आसीत्[4]। जाती-केतक्यादिपुष्पमालाभिः केशसज्जाया उल्लेखो मिलति[5]। वेणीवन्धन-केशवन्धन-अलकवन्धन-अलकसंयमनादिशब्दैर्वेणीवन्धनस्य संकेतो लभ्यते।

कर्णयोः शिरीष-यवांकुर-नीलकमलाम्रमञ्जर्यः ध्रियन्ते स्म। केशरचनाया अपि विविधप्रकारा आसन्। मुखसौन्दर्याय पत्ररचनायाः, मस्तके तिलकस्य, नेत्रयोरञ्जनस्य, ओष्ठयोः रागस्य, लाक्षारागस्य चोपयोगोऽभवत्। ऋतुसंहारे नारीणां शृङ्गारस्य, सज्जायाश्च सुन्दरं वर्णनमस्ति—

ईषत्तुषारैः कृतशीतहर्म्यः सुवासितं चारु शिरश्च चम्पकैः,
कुर्वन्ति नार्योऽपि वसन्तकाले स्तनं सहारं कुसुमैर्मनोहरैः। ऋतु० ६।३

× × ×

कुसुम्भरागारुणितैर्दुकूलैर्नितम्वविम्वानि विलासिनीनाम्,
तन्वंशुकैः कुंकुमरागगौरैरलङ्क्रियन्ते स्तनमण्डलानि॥ ऋतु० ६।५

× × ×

कर्णेषु योग्यं नवकर्णिकारं चलेषु नीलेष्वलकेष्वशोकम्,
पुष्पञ्च फुल्लं नवमल्लिकायाः प्रयान्ति कान्ति प्रमदाजनानाम्॥ ऋतु० ६।६

क्रीडा-विनोदौ

एकरसता जीवनस्याभिशापोऽस्ति। अतः क्रीडाविनोदयोरपि चित्रणं काव्येष्वायातमस्ति। प्रवन्धात्मकगीतिषु जलक्रीडायाः, लोकनृत्यस्य, संगीतस्य, चित्रकलायाः, उद्यानक्रीडायाः, कन्दुकक्रीडायाः, पुत्तलिकाक्रीडायाः, कनकसिकतानिक्षेपक्रीडायाः, सिकतापर्वतक्रीडादेश्च निर्देशो लभ्यते। जलक्रीडा ग्रीष्मर्तौ गृहदीर्घिकायाम्, दीर्घिकायाम्, नद्यां वा सम्पद्यते स्म। [6]जलविहारेण युवतीनां सुवासितशरीरं

---

१. ऋतुसंहार, २।२२। २. वही २।२५।
३. वही ३।१९। ४. वही ५।८।
५. वही ६।३, ६।३३।
६. चूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या—
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैः मरुद्भिः। पूर्वमेघ.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्पृष्ट्वा जलमपि सुगन्धितं जायते स्म। जलस्योच्छलोर्मयः सुन्दरीणां नयनाञ्जनं प्रक्षाल्य मदपानकालीनारक्ततां तासां नयनेषु पूरयन्ति स्म।

संगीतनृत्यादिकं चिरन्तनं मनोविनोदसाधनं मन्यते। विरहिण्यः नार्यः संगीतेन स्वमनोविनोदं कुर्वन्तिस्म। स्त्रियः पुरुषाश्चोभावपि संगीतमर्मज्ञा अभवन्। यक्ष-पत्नी संगीतेनैव स्वमनोविनोदं करोति[1]।

चित्रकलायाः गणनापि विनोदसाधनेषु कृता विद्यते। स्त्री पुरुषश्चोभावपि चित्रकलायां प्रवीणौ अभवताम्। विरही यक्षोऽपि स्वपत्न्याः चित्राङ्कनं करोति। विरहिणी[2] यक्षपत्न्यपि यक्षस्य चित्रं निर्माय स्वमनो विनोदयति[3]।

शुक-सारिकाणां पालनं तैः सह वार्त्तालापश्च मनोविनोदसाधनमासीत्। यक्ष-पत्नी पञ्जरस्थया सारिकया सह वार्त्तां कुर्वन्ती स्वमनो विनोदयति[4]।

सिकताकणेषु मणेरन्वेषणम्—वालुकाकणैः मणिं प्रच्छाद्य तदन्वेषणरूपखेलं कन्याः खेलन्तिस्म। मेघदूतेऽस्य खेलस्य वर्णनमायातमस्ति[5]।

सिकतापर्वतकेलिः—नदीतटे वालुकाभिरष्ठीलां निर्माय क्रीडनं कन्याभ्यो रोचते स्म। खेलमिमं युवत्योऽपि खेलन्ति स्म।

पुष्पत्रोटनम्,[6] माल्यनिर्माणम्,[7] पुष्पशय्यारचना पुष्पैः स्वालङ्करणञ्च नारीणां मनोविनोदसाधनान्यासन्।

मेघदूतेन ज्ञायते यत् ग्रामवृद्धाः पौराणिकमैतिहासिकञ्च कथानकं कथयित्वा जनसमाजस्य मनोरञ्जनं कुर्वन्ति स्म[8]।

---

१. उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चित्,
भूयोभूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती। उत्तरमेघ.

२. मत्सादृश्यं विरहतनुवा भावगम्यं लिखन्ती—उत्तरमेघ, पटना संस्करण, प.२२।

३. त्वामालेख्य प्रणयकुपितां धातुरागैः शिलायाम्—वही, पद्य ४२।

४. पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थाम्—वही. पद्य २२।

५. अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेप्य गूढैः,
सङ्क्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः। उत्तरमेघ, पटना संस्करण, पृ० ४।

६. पुष्पलावीमुखानाम्—पूर्वमेघ, पटना संस्करण, प० २६।

७. ऋतुसंहार ३।१, २।१२।

८. प्राप्यावन्तीमुदयनकथाकोविदग्रामवृद्धान्
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम्' ॥ पूर्वमेघ, प० ३०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कलासु सङ्गीत-नृत्य-चित्राणां पूर्णसङ्केतो मिलति । सङ्गीतस्य पारिभाषिकाः शब्दा नाद[1]-स्वर[2]-ग्राम[3]-मू[4]र्च्छना-ताल[5]-लयादयः मेघदूते आयाताः सन्ति । मेघदूतस्य निम्नांकितपद्ये सङ्गीतस्य सुन्दरं चित्रणमस्ति—

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः,
संसक्ताभिः त्रिपुरविजयो गीयते किन्नरीभिः।
निर्ह्लादस्ते मुरज इव चेत् कन्दरेषु ध्वनिः स्यात्
सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः । पूर्वमेघ, पटना संस्करण, प.५६.

वास्तुकलायाः अनेकसङ्केताः प्रबन्धगीतिषु विद्यन्ते, प्रबन्धगीतिषु सुन्दर-वर्णनमायातमस्ति । उज्जयिन्याः, अलकायाः द्वारिकायाश्च साङ्गोपाङ्गवर्णनमायातं वर्तते । नगर-मध्ये आपणोऽभवत् । नगरमुख्यमार्गो राजपथः कथ्यतेस्म । राजपथ-मुभयतः भवनान्यासन् ।

प्रासादा अनेकप्रकारा अभवन्—विमानप्रतिच्छन्दः, मणिहर्म्यं मेघप्रतिच्छन्दः, देवच्छन्दकादिः । विमानप्रतिच्छन्दकमष्टकोष्ठमकनेकशिखरैश्च युक्तं विशालमभवत् । पी. के. आचार्यः मणिहर्म्यं स्फटिकमयं रत्नजटितञ्च मनुते ।[6]

मेघदूते सौध-हर्म्ययोः सम्बन्धे निर्देशः प्राप्यते । सौधः कृतपलस्तारः सुधया लिप्तः उच्चाट्टालिकायुक्तोऽभवत् । मानसारे हर्म्यं सप्तकोष्ठकं भवनं कथितम्[7] । वस्तुतः सौध-हर्म्ये उच्चच्छत्रयुक्ते भवने स्तः । मेघदूते उज्जयिन्यामेतादृशस्यैव भवनस्य वर्णनं लभ्यते[8] । एषु भवनेषु कपोताः निवसन्तः कथिताः । कपोताः उच्च-भवनेष्वेव निवसन्ति । कुबेरराजधानिकाया अलकायाः भवनानां शिखराणि मेघान् स्पृशन्ति वर्णितानि[9] । येषां भवनानां छत्राणि व्यावृतानि भवन्ति स्म, तानि हर्म्याणि

१. ऋतु० ६।३४ ।
२-३-४. उत्तरमेघ २३ पद्यकी मल्लिनाथी टीका ।
५. उत्तरमेघ, प० १६ ।
६. A dictiorary of Hirdu Architcclure Pase 467
७. मानसार २५, २९ तथा A Diclıoraro of lirdu Archirectre, Pege 642.
८. तां कस्यांचिद्भवनवलभौसुप्तपारावतायाम्, पूर्वमेघ प० ३४ ।
९. विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः,
सङ्गीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ उत्तरमेघ, १

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सौधाः वा कथ्यन्ते स्म[1]। धौत-हर्म्ययोरपि संकेतोऽस्यैव भवति। आयताकारप्राङ्गणेन युक्तं भवनं गृहंकथ्यते स्म[2]। एषां गृहाणां मध्ये शयनागार-अग्न्यागार-गर्भ-वेश्म-सारभाण्डगृहान्यभवन्।

भवनेषु वातायनान्यभवन् राजपथाभिमुखवातायनानां वर्णनमायातमस्ति। गवाक्षस्य सामान्यसंज्ञा वातायनमस्ति। अस्यालोकमार्गः, गवाक्षः, जालमार्ग-इति त्रयो भेदा आसन्। आलोकमार्गनाम्ना[3] व्यज्यते यदयमेतादृशो गवाक्ष आसीत्, येन प्रकाशः गृहे प्राविशत्। शाब्दिकव्युत्पत्त्यनुसारं गवाक्षः[4] गोनयनसदृशोऽभवत्। जालमार्गे[5] काष्ठ-पाषाण-लौहादीनां जालिका संलग्नाऽभवत्। जालमार्गेभ्यः धूमो वहिरागच्छत्। वातायनैः चन्द्र-ज्योत्स्नाऽन्तः प्राविशत्। येन मेघखण्डाः अन्तः प्रविश्य भित्तिचित्राणि मलिनान्यकुर्वन्।

स्नानागारेषु यन्त्रधारागृहं धारागृहं वा संलग्नमभवत्। धारागृहादीनां वर्णनं हर्षचरितादिग्रन्थेषु विस्तारपूर्वकं विहितं वर्त्तते। राजपथः मेघदूते 'नरपतिपथः' कथितः।

भौगोलिकसंकेतानां दृष्टया प्रबन्धगीतीनां मूल्यं सर्वाधिकमस्ति। अवन्ती (पूर्व-मेघ-३०) आम्रकूटः (पूर्वमेघ-१६) उज्जयिनी (पूर्वमेघ २७) कनखलम् (पू. मे. ५०) कुरुक्षेत्रम् (पूर्वं० मे० ४८) कैलासः (पू० मे० ११) क्रौञ्चरन्ध्रम् (पू० मे० ५७) गन्धवती (पूर्वमेघ ३३), गम्भीरा (पू० मे० ४०), चर्म-ण्वती (पू० मे० ४५) जाह्नवी (पूर्वमेघ ५०), दशपुरम् (पू० मे० ४७) दशार्णः (पूर्वमेघ २३), देवगिरिः (पूर्वमेघ ४२) निर्विन्ध्या (पूर्वमेघ २८) नीचैः गिरिः (पू० मे० २५) रेवा (पू० मे० १९) विदिशा (पू० मे० २४) विन्ध्यम् (पू० मे० १९) वेत्रवती (पूर्वमेघ २४), सरस्वती (पूर्वमेघ ४९) सिन्धुः (पूर्वमेघ २९) हिमालयश्च (पू० मे० ५२) उल्लिखिताः मिलन्ति।

स्वतन्त्रसंस्कृतगीतिकाव्यस्य सांस्कृतिकपृष्ठभूमिः

शुद्धभावोद्गाररूपेण गीतीनां विकासः लोककण्ठेभ्य एव जातोऽस्ति। जनसाधारणहृदयं स्वभावतः स्वच्छन्दमुन्मुक्तमकृत्रिमं निष्कपटं द्वैविध्यशून्यञ्च भवति। अतः मानवस्य सहजविकसितभावनाप्रवणहृदयेभ्यः स्वतन्त्ररूपेण गीतीनां विकासो जातः। स्वतन्त्रगीतिषु जीवनस्य विविधरूपाणि नोपलब्धानि जायन्ते पुरुषार्थस्य मूल्यविवेचनाभ्यां कामार्थाभ्यां सह जीवनस्याचारविषयकमूल्यानां कथनमपि स्वतन्त्र-

---

१. उत्तरमेघ २५। २. पूर्वमेघ ७। ३. उत्तरमेघ २२।
४. उत्तरमेघ ३५। ५. पूर्वमेघ ३२, उत्तरमेघ ६।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गीतिकाव्येषु प्राप्यते । प्रवन्धात्मकगीतिषु प्रवन्धस्य क्षीणास्तित्वकारणात् वेशभूषा, मनोविनोदः, सौन्दर्यमेवं जीवनस्याहारपानादितत्त्वानि समाविष्टान्यभवन्, परं स्वतन्त्रगीतिषु वैयक्तिकतायाः प्राधान्यकारणात् सांस्कृतिकतत्त्वानामल्पतास्ति ।

शतकत्रयस्य संस्कृतिः

स्वतन्त्रगीतिषु शतकत्रयं सूक्तिमुक्तावली, अमरुकशतकम्, राक्षसकाव्यम्, तथा चौरपञ्चाशिका प्रमुखाः सन्ति । एतेषां प्रमुखगीतिकाव्यानामाधारोपरि सांस्कृतिकपृष्ठभूमेः विवेचनमभिप्रेतमस्ति । भर्तृहरेः शतकत्रये आचारसम्वन्धि जीवनमूल्यानां निरूपणं कृतमस्ति । भर्तृहरिः संसारस्यानुभवं कृतवान् तथा स्वानुभवाधारे व्यक्तिसमाजकल्याणार्थं नैतिकमूल्यानां विवेचनं कृतम् । नीतिशतके तेन तेषामुदात्तगुणानां ग्रहणायाग्रहः कृतः, येषां समवायः समाजस्य परममङ्गलसाधको भवति । एतन्मते मनुष्यस्तद्गुणानामुपार्जनेनैव महान् जायते, तस्य जीवनं परिष्कृतं सांस्कृतिकं वा जायते । अतः कविः भर्तृहरिः समाजव्यक्त्योः जीवनस्य परिष्काराय संस्काराय वा आचारसम्वन्धिमूल्येषु विशेषं वलं दत्तम् । नीतिशतके समागतानामाचारमूल्यानां निम्नप्रकारेण परिगणना भवितुमर्हति—

१. सज्जनदुर्जनस्वभाववर्णनम् ।
२. विवेकस्योपयोगिता आवश्यकता च ।
३. ज्ञानस्योपयोगिता महत्त्वञ्च ।
४. मनस्विनः वृत्तिः ।
५. अर्थस्य प्राधान्यं गौरवञ्च ।
६. राज्ञाश्चित्तचञ्चलता ।
७. सेवाया अतिदुष्करत्वम् ।
८. संसर्गबलादेव तत्रोत्तमादिगुणवत्त्वम् ।
९. परोपकारस्य मूल्याङ्कनम् ।
१०. सन्मित्रलक्षणं महत्त्वञ्च ।
११. शीलमाहात्म्यम् ।
१२. कर्मणो भाग्यस्य च महिमानौ ।
१३. सुकृतस्य फलनिरूपणम् ।
१४. धीरस्य महत्त्वम् ।

एवंप्रकारेण नीतिशतके भर्तृहरिः नीतेराधारसम्वन्धिनो तेषां तथ्यानां निरूपणं कृतम्, येषां जीवनेन सह सम्बन्धोऽस्ति । कविमतमस्ति—साहित्यसङ्गीतकलाविहीनः, साक्षात्पशुः पुच्छविषाणहीनः[१]" अर्थात् साहित्य-संगीत-कलाभिः शून्यो

१. नीतिशतक, चौखम्बा संस्करण, पद्य १२ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जनः पशुरस्ति। एतत्तात्पर्यमस्ति यत् साहित्यम्, संगीतम्, कला चैव जीवनं परिष्कुर्वन्ति। इमानि त्रीण्यपि संस्कृतेरभिन्नाङ्गानि सन्ति। एतेषां त्रयाणां विकासेन संस्कृतेः प्रतिष्ठा भवति।

यत्ने कृते मनुष्यस्य दुष्करमसम्भवमपि कार्यं सम्पन्नं भवति। यः पुरुषार्थी वर्त्तते, तस्मै संसारे किमपि वस्तु दुर्लभं नास्ति।[1] मनुष्यः तावदहङ्करोति, यावदसौ यथार्थतां न वेत्ति, ज्ञानी जनो वास्तविकतया सुपरिचितो भवति, अतोऽहङ्कारस्तदन्तिके नायाति।[2] नीचो जनः कुक्कुरवच्चाटुकारितां विधाय स्वस्वार्थसिद्धिं करोति। परमुत्तमप्रकृतिजनः स्वस्वाभिमानं सुरक्षितं विधाय स्वस्वार्थं साधयति।[3]

अर्थपुरुषार्थस्य महत्त्वं प्रतिपादयन्नुक्तवान् यद् जाति-गुण-शीलशौर्यादिगुणेषु सत्स्वपि अर्थाभावे व्यक्तेः व्यक्तित्वस्य किमपि मूल्यं नास्ति। यो जनः धनोपार्जनं विधाय स्वशक्तिं समृद्धां करोति, स एव सफलताधिकारी वर्त्तते।[4] धनेनैव कुलीनता, पाण्डित्यं गुणज्ञता चा सिद्ध्यन्ति।[5] निर्धनजनस्य मानवोचितगुणाः व्यर्थाः प्रतीयन्ते।

धनस्य सार्थकता केवलभोगे नास्ति, त्यागेऽस्ति। यो जनः धनमर्जयित्वा तस्य सदुपयोगं न करोति, न ददाति, स प्राप्तेऽपि धने सुखी न भवति।[6] कविः त्यागस्य दानस्य वा महत्त्वं प्रदर्शयन् समाजवादस्य संकेतं करोति। पुरुषार्थं विधाय धनार्जनमावश्यकमस्ति। परं तद्धनव्ययः सामाजिककल्याणकार्येषु विधेयोऽस्ति स्वभागादधिकस्य धनस्योपयोगोऽनीतिरस्ति।[7]

हस्ते प्रशंसनीयं दानम्, शिरसि गुरुचरणयोः कृतः प्रणामः, मुखे सत्यवचनम्, करयोः विजयकारकमतुलितबलम्, हृदये निर्मलो भावः, कर्णयोः शास्त्रज्ञानं स्वभावजा अलङ्काराः सन्ति। शरीराच्छादका अलङ्काराः निरर्थकाः सन्ति। ईदृशैरलङ्कारैरात्मालङ्कृतो न भवति। आत्मनोऽलङ्करणं दानं, नम्रता, विनयः, सत्यवचनं, शक्तिः, निर्मलस्वभावः शास्त्रज्ञानादयश्च सन्ति।[8]

---

१. नीतिशतक, पद्य–५।
२. वही, पद्य ८।
३. वही, पद्य ३१।
४. वही, पद्य ३९–४०।
५. वही, पद्य ४१।
६. वही ४२–४३।
७. वही पद्य ४४।
८. करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणमिता,
मुखे सत्या वाणी विजयि भुजयोर्वीर्यमतुलम्।
हृदि स्वच्छा वृत्तिः श्रुतिमधिगतं च श्रवणयोः-
विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम्।—नीतिशतक, ६५ पद्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पारिवारिकस्थितेश्चित्रणं कुर्वता कथितं यत् पुत्रस्य कार्यं स्वाचरणैः कार्यैश्च पितृसंतोषोऽस्ति। भार्या सैवास्ति, या निरन्तरं पतिमङ्गलकामनायां संलग्ना भवेत्। मित्रस्य मित्रताऽस्मिन्नेव कार्येऽस्ति यत्स विपत्काले स्वमित्रस्य साहाय्यं कुर्यात्। यः सम्पत्तौ सुखे च समीपे निवसति, परं विपत्काले सङ्गं परित्यज्य पृथक् जायतेः तस्माद् वैरी समीचीनोऽस्ति। परिवार-सुसंघटनाय पुत्र-स्त्री-भ्रातृ-स्वसृ-मित्रादेः स्वकर्त्तव्ये संलग्नत्वमावश्यकमस्ति[1]।

यो जनः विपत्तौ धैर्यस्य, अभ्युदये क्षमायाः, सभायां वाक्चातुर्यस्य, युद्धे पराक्रमस्य, श्रुतावध्ययनासक्तेः, यशसश्चार्जने निरन्तरं प्रयत्नशीलो भवति, स स्वजीवनं विकासयति[2] तथा सांस्कृतिकजीवनं यापयन् समाजसमक्षमेकमादर्शं प्रतिष्ठापयति।

एवमेव नीतिशतके पारिवारिकवैयक्तिकजीवनोत्थानायोदात्तगुणानां विवेचनं कृतमस्ति। राजनीतेः चित्रणमपि कविर्न विस्मृतवान्। सः राज्ञः कर्त्तव्यगुणानां विवेचनेन सहास्थिरराजनीतेरपि निरूपणं कृतवानस्ति। कविः भर्तृहरिः राज्ञः कर्त्तव्येषु प्रजापालनं प्रजाभ्युदयं देशराष्ट्रोन्नतिमपि परिगणितवान्। राजनीतेः विचित्रतां वर्णयन् कविः कथयति—

सत्याऽनृता च परुषा प्रियवादिनी च,
हिंस्रा दयालुरपि चार्थपरा वदान्या।
नित्यव्यया प्रचुरनित्यधनागमा च,
वाराङ्गनेव नृपनीतिरमनेकरूपा। नीतिशतक, पद्य ४७।

राजनीतौ असत्यस्य, सत्यस्य, कठोरतायाः, कोमलतायाः, मधुरवचनस्य, परुषवचनस्य, हिंसायाः, दयायाः, स्वार्थान्धतायाः, परोपकारितायाः, निर्दयतादेश्च समन्वयः प्राप्यते।

आज्ञादानं, यशःप्राप्तिः, ब्राह्मण-कलाकाराणां पालनं, दानमैश्वर्योपयोगः, मित्राणां रक्षा—इमे षड्गुणाः यस्मिन् राज्ञि प्राप्यन्ते, स एव वास्तविकनृपतिरस्ति। राज्ञः कर्त्तव्याकर्त्तव्यविवेकोऽपेक्षितोऽस्ति। योऽविवेकपूर्वकं कार्यं करोति, स राजा शीघ्रमेव नश्यति[3]।

---

१. वही पद्य ६८। २. वही ६३।

३. आज्ञा कीर्तिः पालनं ब्राह्मणानां दानं भोगो मित्रसंरक्षणञ्च।
येषामेते षड्गुणा न प्रवृत्ताः कोऽर्थस्तेषां पार्थिवोऽपाश्रयेण॥ नीतिशतक, ४८ पद्य।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रृङ्गारशतकस्य सांस्कृतिकसामग्री निम्नांकितप्रकारेण विभज्यते—

१. स्त्रीप्रशंसा ।
२. सम्भोगवर्णनम् ।
३. कामिनीनिन्दा ।
४. सुविरक्त-दुर्विरक्त-पद्धतिः ।
५. ऋतुवर्णनम् ।

भर्तृहरिसमये नारीस्थानं पर्याप्तमासीदुन्नतम् । सा केवलं भोगविलाससामग्री न मन्यतेस्म । या कामिनी नारी भोगमेव सर्वस्वं मनुते, कविस्तां निन्दितवान् । जीवनस्य स्वास्थ्यं संतुलन एव वर्त्तते । परिवारव्यवस्थायाः सुदाढर्यकर्त्र्याः नार्याः आवश्यकतामुद्दिश्य लिखितवान्—

सति प्रदीपे सत्यग्नौ सत्सु ताराखीन्दुषु,
विना मे मृगशावाक्ष्याः तमोभूतमिदं जगत् ।

श्रृंगारशतक, चौखंवासंस्करण, पद्य १४ ।

सत्स्वपि दीपके, अग्नौ, तारकेषु सूर्य-चन्द्रयोः इतरेषु वस्तुषु सुन्दरीं पत्नीं विना समस्तं जगत् शून्यं प्रतीयते । स्पष्टमस्ति यत् नारीस्थानं परिवारेऽत्यन्तमहत्त्वपूर्णमस्ति, तदैव कविः नार्या आवश्यकतोपरि एतावद्बलं दत्तवान् । एतदेव कारणमस्ति यत् कविः वेश्यानामेतावतीं भर्त्सनां कृतवान्[1] ।

श्रृंगारशतके ऋतुचित्रणप्रसंगे दधिपयोघृतादिभोग्यपदार्थानां तथा कामवर्द्धकवेशभूषायाः आडम्बराणाञ्च वर्णनं प्राप्यते ।

वैराग्यशतकस्य वर्ण्यविषयाः निम्नलिखितवर्गेषु विभज्यन्ते—

१. तृष्णायाः दोषाः ।
२. विषयपरित्यागस्यावश्यकता ।
३. याञ्चायाः दीनतायाश्च दोषाः ।
४. भोगानामनित्यता ।
५. कालमहिमा ।
६. संन्यासिनः राज्ञश्च संवादः ।

---

१. वेश्यासौ मदनज्वाला रूपेन्धनविवर्जिता,
कामिभिर्यत्र हूयन्ते यौवनानि धनानि च । श्रृंगार शतक, ५९ पद्य.
कश्चुम्बति कुलपुरुषो वेश्याधरपल्लवं मनोज्ञमपि,
चारभटचोरचेटकविटनिष्ठीवनं शरावम् । वही ६० पद्य ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

७. मन्त्राणां नियन्त्रीकरणम् ।
८. नित्यानित्यवस्तुनोः विचारः ।
९. आराध्यस्य पूजा ईश्वरोपासना च ।
१०. अवधूतपुरुषाणामाचरणञ्च ।

मनुष्यः सुखस्य निरन्तरमन्वेषणं करोति तथासौ सुख-शान्ति-प्राप्त्यर्थं संसारस्य विभिन्नवस्तूनां संग्रहं करोति तथा तेषामुपयोगं कृत्वा सुखी भवितुमिच्छति । कविः संसारस्य वस्तूनि भयदानि कथयति । यथा—

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयम्,
माने दैन्यभयं बले रिपुभयं रूपे जरायाः भयम् ।
शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद्भयम्,
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ।

वैराग्यशतकम्, चौखम्वा-संस्करणम्, ३१ प.

कविः संसारस्य अस्थिरतायाः अनित्यायाश्च सजीवं चित्रणं कृतवान् । सः कथयति यत् वृद्धावस्था व्याघ्रीवत् आतङ्कितं कुर्वन्ती स्थिता विद्यते । रोगाः शत्रुसदृशाः शरीरोपरि प्रहारं कुर्वन्ति । सच्छिद्रात् घटात् जलवत्, आयुः क्षीयते, तथापि व्यक्तिः स्वाहितापकारकरणे संलग्ना वर्त्तते । एष महदाश्चर्यविषयोऽस्ति—

व्याघ्रीव तिष्ठति जरा परितर्ज़यन्ती,
रोगाश्च शत्रव इव प्रहरन्ति देहम् ।
आयुः परिस्रवति भिन्नघटादिवाम्भो
लोकस्तथाप्यहितमाचरतीति चित्रम् । वैराग्यशतक, ३८ पद्य

परिवारसमाजव्यवस्थासम्वन्धेऽनेकतथ्यान्युपलब्धानि भवन्ति । परिवार-सुख-शान्ति-कृते दाम्पत्यजीवनस्य, स्नेहस्य, सौहार्दस्य सहानुभूतेश्च स्थितिः परमावश्यकी वर्त्तते । धन-सहयोग-व्यवसायाः समाजोत्थानकृते परमावश्यकाः सन्ति । प्रजासु सुखसन्तुष्टास्वेव राजा प्रसिद्धो भवति । विद्याविहीनयोः पित्रोः सेवायाः भोगरहित-व्यक्तिजीवनस्य च व्यर्थता कथिता । शतकेऽस्मिन् कविना ब्रह्मज्ञानं जीवनस्य सर्वोच्चमूल्यमंगीकृतम् । आत्मानुसन्धानप्रयासः वैराग्यप्राप्तेरेकमात्रोपायोऽस्ति ।

सूक्तिमुक्तावल्याः संस्कृतिः

जीवनमूल्यानां व्याख्यादृष्ट्या सोमप्रभाचार्यस्य सूक्तिमुक्तावली-गीतिकाव्यमपि विवेच्यमस्ति । काव्येऽस्मिन् (९९) नवनवतिगीतयः सन्तिः । कविसोमप्रभः भर्तृहरेः शतकत्रयसदृशमेव काव्यमिदं प्रणीतवान् । अस्मिन् निम्नलिखितविषयाः चर्चिताः सन्ति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१. धर्मविवेचनम् ।
२. पूजायाः आराधनाया वा महत्त्वम् ।
३. गुरुमहत्त्वम् ।
४. जैनमतविवेचनम् ।
५. संघमहत्त्वम् ।
६. अहिंसावर्णनम् ।
७. सत्यविवेचनम् ।
८. अस्तेयवर्णनम् ।
९. शीलमाहात्म्यम् ।
१०. परिग्रहनिरूपणम् ।
११. क्रोधमानमायालोभकषाय-निरूपणम् ।
१२. सुजनमहत्त्वप्रतिपादनम् ।
१३. गुणिसङ्गमचित्रणम् ।
१४. इन्द्रियविषयप्रतिपादनम् ।
१५. लक्ष्मीस्वभावविश्लेषणम् ।
१६. दानतपोभावनानिरूपणम् ।
१७. वैराग्यविवेचनम् ।

सोमप्रभः धर्मार्थकामान् संस्कृतेः मूलं मत्वापि कार्यस्य विशेषमहत्त्वं प्रदर्शितवान् । भारतीयजीवनस्य परिष्कारः त्रिवर्गसाधनं विनाऽसम्भवोऽस्ति । कविः लिखितवान्—

त्रिवर्गसंसाधनमन्तरेण पशोरिवायुर्विफलं नरस्य ।
तत्रापि धर्मं प्रवरं वदन्ति न तं विना यद्भवतोऽर्थकामौ ।

—सूक्तिमुक्तावली, ३ पद्य

कवेः विश्वासोऽस्ति यदर्थकामौ पुरुषार्थौ तदैव जीवनं सुखिनं कुरुतः, यदा तौ धर्मेण नियन्त्रितौ नियमितौ भवतः । एतदाशय एष एवास्ति यत् संसारे सम्पत्तेः भोगोपभोगसामग्र्याश्चाल्पता वर्त्तते । तथा भोक्तॄणां संख्याधिका वर्त्तते तथा-तृष्णाकाङ्क्षाः ततोऽप्यधिकाः सन्ति । अतएव समाजे प्रचलितमत्स्यन्यायस्य परिष्कारः धर्मपरिनिष्ठिताचारविचारैरेव सम्भवोऽस्ति । परस्परं विद्यमानयोरीर्ष्या-द्वेषयोः मात्रायाः नियन्त्रणमपि धर्म-निष्ठयैव सम्भाव्यते । समाजस्य प्रत्येकसदस्यः स्वेच्छासु, वासनासु कषायेषु च नियन्त्रणं विधायैव शान्तिस्थापने सहायको भवितुमर्हति । अतएव धर्मः यथा वैयक्तिकजीवनायात्मशोधनकारणमस्ति, तथैव समाज-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्यवस्थाकृतेऽप्युपयोगी वर्त्तते । संग्रहवृत्तौ नियन्त्रणमपि धर्माचरणेनैव सम्भाव्यते । अहिंसायाः भावना विचारश्च जीवनपद्धतौ क्रान्तिमुत्पादयतः । निःस्वार्थप्रेम-स्थापनाहिंसयैव भवति । सत्यं जनं समाजं प्रति विश्वस्तं कल्पयति । अस्तेयश्च छलप्रपञ्चेभ्यः पृथक् करोति, शीलेन जीवनसीमाः निर्धार्यन्ते । अतः सोमप्रभः आध्यात्मिकायाः आचारमूलिकायाश्च संस्कृतेः प्रतिपादनं कृतवान् ।

अमरुकशतकस्य सांस्कृतिकतत्त्वम्

अयं नागरसंस्कृतेः ग्रन्थोऽस्ति । अस्मिन् दरवार-संस्कृतेः चित्रणस्थाने जनसामान्यानुभूतानां शृङ्गारिकभावानां शृङ्गारिकपरिस्थितीनाञ्च चित्रणं कृतमस्ति । यत्र शतकत्रयस्य, सूक्तिमुक्तावल्यादेश्च नैतिकाचारविचारमूलकसंस्कृत्यपक्षेया महत्त्वमस्ति, तत्रामरुकशतके विधिपूर्वकपरिणीतायाः पत्न्याः पुरुषस्य च प्रेमजीवनस्य निरूपणं कृतं विद्यते। प्राचीनपरम्परानुसारं पुरुषस्यैकाधिकाः पत्न्योऽभवन् । परं पत्न्यै पतिरेव सर्वस्वमस्ति। प्रेमिणः प्रेमिकायाश्च मध्ये कलहोऽप्यभवत् ।

अस्य गीतिकाव्यस्य विषयः सरसदाम्पत्यजीवनपर्यन्तसीमितत्वात् जीवनस्य विविधता न प्राप्यते । अमरुकशतके यस्याः संस्कृतेः निरूपणमस्ति, सा अष्टम्याः नवम्याः शत्याः वर्तते तथा समस्तकश्मीरनिवासिभिः कविभिः प्रेम्णस्तादृशमेव वर्णनं विहितम् ।

गीतीनां वर्ण्यविषयः प्रेमजीवनमस्त्यत एव स्त्रीणां वेशभूषाभूषणप्रसाधनकेशविन्याससदृशविषयाणामुपरि यत्र तत्र सामग्री प्राप्यते । समाजस्य निर्धनवर्गस्य जीवनस्य चित्रणमप्यायातमस्ति । एकत्र वर्षर्तौ जीर्णशीर्णगृहे निवासिन्याः एकस्याः दरिद्रगृहिण्याः उल्लेखोऽस्ति[१] । अन्यत्र वर्षर्तौ वायुवेगेन ध्वस्तकुटीरछिद्रैः जलप्रवेशस्य कथनमायातमस्ति[२] ।

घृतं मधु च जीवनस्य महत्त्वपूर्णोऽङ्गो[३] आस्ताम् । मद्यपानं सामान्यतः प्रचलितमासीत्[४] । मद्यं चषके पीयते स्म[५] । स्त्रियोऽपि सुरां पिवन्ति स्म[६] । यद्यपि तत्कालीनान्यसाहित्यस्याध्ययेनेनैतज्जायते यत् सभ्यसमाजः मद्यं तिरस्करोति स्म ।

चीनांशुकं प्राचीनकालादेवात्यन्तं प्रियमासीत्[७] । अस्योल्लेखः कौटिलीयार्थशास्त्रेऽपि वर्त्तते[८] । स्त्रियो वस्त्रद्वयं दधति स्म—अधोवस्त्रम्, उत्तरीयञ्च ।

---

१. रुद्रम श्लोक ११८, अमरुकशतक । २. अमरुकशतक, रुद्रम पद्य १२६ ।
३. अमरुकशतक वेमभूपाल, श्लोक १०९ । ४. अमरुकशतक, रुद्रम पद्य १२० ।
५. अमरुक, पद्य ५५ । ६. वही, पद्य ५५ ।
७. वही, पद्य ७७ । ८. कौटिलीय अर्थशास्त्र २।११।११४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अधोवस्त्रं शाटिकासदृशं धौतवस्त्रसदृशं वा धार्यते स्म। उत्तरीयं धौतवस्त्रसदृशं स्कन्धयोः धार्यते स्म[१]। अधोवस्त्रं कट्युपरिग्रन्थि दत्वा वध्यते स्म। एष नीवीवन्धः कथ्यते स्म[२]।

मिलितानि वस्त्राण्यपि धार्यन्ते स्म[३]। कञ्चुकस्योल्लेखः काव्येऽस्मिन्नस्ति[४]। स्तनविस्तारकारणात् अस्य बन्धनानि त्रुटितानि अभवन्[५]। कञ्चुकी ग्रन्थि दत्वापि धार्यते स्म[६]। अर्जुनवर्मदेवानुसारमियं दक्षिणचोलिकासीत्[७]। यतस्तस्या एव बन्धने वीटिकायाः व्यवहारोऽभवत्।

आभूषणानामपि चर्चा काव्येऽस्मिन् विद्यमानास्ति। कर्णयोः कुण्डले धार्येते स्म[८]। कतिपयपद्यैरेवं प्रतीयते यत् एकस्मिन्नेव कर्णे कुण्डलधारणस्य प्रथासीत्[९]। वाह्वोः केयूरे[१०] वक्षःस्थले मुक्ताहारः[११] करयोः वलयौ[१२], कट्यां मेखला[१३] काञ्ची च[१४] तथा पदयोः नूपुरे[१५] च धार्यन्ते स्म। मेखला[१६] कटयलंकरणातिरिक्तं धौतवस्त्रबन्धनकार्यमप्यकरोत्। काञ्च्यां मणयोऽपि वध्यन्ते स्म, येन कलकलध्वनिरभूत्।

एकस्मिन् पद्ये 'विशिखा'-शव्द आयातोऽस्ति, यस्यार्थः स्वर्णकाराणां वीथिकास्ति। संदंशकस्यापि निर्देशो लभ्यते। एतद्यन्त्रं स्वर्णकाराः स्वव्यवसाये प्रयुञ्जते स्म। चन्द्रकान्तस्य[१७] वज्रस्य च धारणस्योल्लेखो लभ्यते।

---

१. अमरुक ७८ पद्य तथा वेमभूपाल ११३ पद्य।

२. अमरुक १०१ तथा वेमभूपाल पाठ पद्य ११२।

३. वही. अमरुक २७। ४. वही, पद्य ११।

५. वही पद्य ११। ६. वही पद्य २७।

७. कञ्चुलिका चेयं दाक्षिणात्यचोलिकारूपैव तस्य एव ग्रन्थनपदार्थे वीटिका-व्यपदेशः। ८. अमरुक पद्य ३।

९. अमरुक वेमभूपाल पाठ, कुण्डलस्तबक, पद्य १०८।

१०. अमरुक, पद्य ६०। ११. रविचन्द्रपाठ पद्य १३९, तारहार-श्लोक ३१।

१२. अमरुक, पद्य ३५। १३. वही पद्य १०१।

१४. अमरुक २१, ११ तथा वेमभूपाल, पद्य १०९।

१५. अमरुक पद्य ८९, वेमभूपाल पाठ, पद्य ११६, रुद्रम पाठ १२८-१२९।

१६. वेमभूपाल पाठ, श्लोक १११। १७. अमरुक, पद्य ५९।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पुष्पाणां पल्लवानाञ्चोपयोगोऽपि आभूषणरूपेणाभवत्[१]। अमरुकशतके पुष्पमालया मञ्जर्या च सह पल्लवकर्णपूराणां निर्देशो लभ्यते ।[२] केशविन्यासस्य विभिन्नासु पद्धतिषु [३]धम्मिल्लस्यालकावल्याश्च[४] चर्चा मिलति । केशानां वेण्यां पुष्पोपयोगः धम्मिल्लः[५] कथ्यतेस्म । अयं शिरस उपरिभागे वध्यते स्म । अस्योल्लेखः समस्तसंस्कृतसाहित्ये प्राप्यते । अमरुको धम्मिल्ले मल्लिकापुष्पसज्जाया अप्युल्लेखः कृतः ।[६]

केशसज्जायाः द्वितीयः प्रकारः कवरी वेणीवन्धनं वा वर्त्तते । कवर्यपि पुष्पैः सज्जिता[७]ऽभवत् । विरहे केशाः सज्जिताः नाऽभवन् । अलकाः विकीर्णा एवातिष्ठन् । रूक्षकेशाश्च मुखे प्रसृता अभवन् ।[८] अमरुकशतकस्य गीतिभिः स्पष्टमस्ति यत् तदानीं नार्यः स्वसाजसज्जायामधिकं मनोयोगं ददति स्म[९]। शरीरे विविधप्रकारस्य सुगन्धितपदार्थानां लेपोऽभवत् चन्दन-कुङ्कुमाङ्गरागाणां लेपस्य चर्चा आयातास्ति[१०]। अधरयोररुणिमोत्पाद्यते स्म। अक्ष्णोरञ्जनं क्रियतेस्म। गण्डस्थलयोः विविधप्रकाराः पुष्पपल्लवाः अङ्किताः क्रियेरन्[११]। आलक्तस्याप्युपयोगोऽभवत्[१२]। धारायन्त्रेण स्नानस्यापि निर्देश आयाति ।[१३]

मनोरञ्जनसाधनेषु शुकसारिकाणां पालन-शिक्षणे,[१४] तामरस[१५]लीलादयश्चोल्लिखिताः सन्ति । गृहोपयोगवस्तुषु तल्पासनप्रच्छदपट[१६]-प्रदीप-कलशकुम्भानां[१७] नामोल्लेख आगच्छति । कमलोपयोगोऽनेकरूपेष्वभवन्[१८] । अत उत्पल-तामरस-नलिन-शतदलपङ्कजादेः नामान्यायातानि सन्ति[१९]।

चौरपञ्चाशिकायां वर्णिता संस्कृतिः

चौरपञ्चाशिकायां वर्णिता संस्कृतिः सीमिता वर्त्तते । जीवनस्य कामपुरुषार्थ-

---

१. अमरुक पद्य ९०
२. अमरुक पद्य १ ।
३. वही पद्य ९९ । रुद्रम पाठ १२१ ।
४. रुद्रम पाठ पद्य १२३ ।
५. धम्मिल्लः संयताः कचाः-अमरकोषः ।
६. रुद्रम पाठ १२१ पद्य ।
७. रुद्रमपाठ १२४ ।
८. अमरुक, पद्य ८८ ।
९. वही १८, ९०, १०७ पद्य ।
१०. अमरुक, १८, ६० १०७ ।
११. अमरुक रुद्रम पाठ १०५।१२४ ।
१२. वही १०७, ११६ रुद्रमपाठ १२८ ।
१३. रुद्रमपाठ १२४ पद्य ।
१४. अमरुक ७, १६ पद्य ।
१५. अमरुक ६० ।
१६. वही पद्य १०७ ।
१७. वही १८-११ ।
१८. वही श्लोक १०७ ।
१९. वही ७६, ९० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्यैव वर्णनं प्राप्यते। प्रारम्भिकपद्ये एव कविः बिल्हणः "कनकचम्पकदामगौरीम्" कथयित्वा गौरवर्णां रमणीं प्रशंसितवान्। पद्येऽस्मिन्नेव 'फुल्लारविन्दवदनाम्' उक्त्वा विकसितकमलसदृशमुखस्य प्रशंसां विहितवान्। वस्तुतः स्वस्था, प्रसन्ना गौरवर्णा च रमणी जीवने सर्वोत्तमाङ्गीकृता। उत्तरपद्येषु नारीसौन्दर्यस्य तस्या अङ्गप्रत्यङ्गानाञ्च विवेचनमस्ति। अधिकांशपद्येषु रूपसौन्दर्यस्य लावण्यस्य प्रतिपादनं विद्यते।

शरीरे सौन्दर्यसम्पादनाय चन्दन[1]कस्तूरिकादि[2]सुगन्धितद्रव्याणां व्यवहारोऽभवत्। आभूषणेषु कनककुण्डलस्य[3] प्रचार आसीत्। नूपुरमेखलयोरपि उपयोगो दृश्यते।

नार्यो नेत्रयोः कज्जलं[4] केशेषु पुष्पाणि, सीमन्ते सिन्दूरं करयोः स्वर्णवलयं धारयन्तिस्म। केशपाशेषु पुष्पमालानां[5] व्यवहारस्य प्रथा प्रचलितासीत्। एकस्मिन् पद्ये कविः "नानाविचित्रकृतमण्डनमावहन्ती" पदेनानेकप्रकाराभूषणानां संकेतं विहितवान्।[6] हार-यष्टिका-मुक्तादाम-मेखला-काञ्ची-रशनादिभिः सह पुष्पपल्लवानामाभूषणानि ध्रियन्तेस्म।

चौरपञ्चाशिकायाः पूर्वपीठिकायां वर्णाश्रमधर्मस्य निर्देशो वर्त्तते। लिखितञ्च "चत्वार एव निजधर्मरताः[7]" चत्वारो वर्णाः स्वस्वकर्मसु संलग्ना आसन्। पुरोधाः राजकार्येषु पूर्णतया साहाय्यं करोतिस्म तथा राज्ञः समक्षं राजकार्याणि समुपस्थापयतिस्म। राजा कवीनां सम्मानमकरोत्। तथा तेभ्यः स्वसभायां प्रमुखं स्थानं ददातिस्म।[8]

वस्त्रेषु सौत्रं कौशेयञ्च द्विविधमपि वस्त्रं गृह्यतेस्म[9]। नार्योऽधोवस्त्ररूपेण परिधानं दधतिस्म[10]। कञ्चुकीधारणप्रथापि वर्तमानासीत्[11]। उत्तरीयरूपेण लघूत्तरीयवस्त्रं धार्यतेस्म। शरीरसौन्दर्याय कुङ्कुम-पुष्प-कर्पूर-चन्दनागरुप्रभृतिसुगन्धितपदार्थानामुपयोगः क्रियतेस्म।[12]

१-२. चौरपञ्चाशिका, पद्य ८ तथा ९।

३. तत्कनककुण्डलघृष्टगण्डमास्यम्, वही १२ पद्य।

४. अद्यापि तां विधृतकज्जललोलनेत्रां पृथ्वीं प्रभूतकुसुमाकुलकेशपाशान्।
सिन्दूरसंतुलितमौक्तिकदन्तकान्तिमाबद्धहेमकटकां रहसि स्मरामि ॥चौर,पद्य १६।

५. गलितबन्धकेशपाशां स्रस्तस्रजं, वही, पद्य १७।

६. चौरपञ्चाशिका, १९ पद्य। ७. पूर्वपीठिका, पद्य ३।

८. चौरपञ्चाशिका पूर्वपीठिक, पद्य ४।

९. वही, पूर्वपीठिका दाक्षिणात्यपाठ, पद्य १७।

१०. चौरपञ्चाशिका, पूर्वपीठिका ६६। ११. वही पृ० ६६।

१२. कन्यागृहे प्रचुरकुङ्कुमपुष्पवासे कर्पूरगौरसरसागरुचन्दनाढ्ये–वही २२ पद्य।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कवीनां सम्मानकाले तेभ्यो दिव्यवस्त्राभूषणान्यपि दीयन्ते स्म ।[1] ये गद्य-पद्य-रचनायां प्रवीणा अभवन् त एव राजसभायां प्रतिष्ठां प्राप्नुवन्ति स्म ।[2] साधारण-जनतापि रसयुक्तश्रृंगारपूर्णनाटकानि वीक्ष्य प्रसन्नाऽभवत् तथा स्वमनोरञ्जनम-करोत् ।[3]

कर्पूर[4]-कस्तूरी-केशरादिसुगन्धितपदार्थैः युक्तताम्बूल[5]-सूपारि-सेवनस्य प्रथाया उल्लेखो मिलति । कविना 'दोलारतानुकरणेन'[6] दोलाक्रीडायाः महत्त्वं प्रतिपादितम् ।

स्वयंवरप्रथाया उल्लेखोऽप्युपलब्धोऽस्ति । स्वयंवरे विभिन्नदेशानां राजकुमाराः एकत्र भवन्ति स्म[7] । तथा राजकन्याः तेषां रूपसौन्दर्यमवलोक्य तद्ग्रीवासु वरमालां ददति स्म । वरवरणस्यास्याः प्रथायाः निर्देशः निम्नप्रकारो विद्यते—

नानाराजकुमारकान् पृथुतरान् संहूय यन्मन्दिरे,
वद्‌धे चारुतरे स्वयंवरगृहे चित्तानुवृत्त्या तव ।
त्वां दत्वा सुखवान् भवामि मनसा सञ्चिन्त्य सुस्थे मयि,
त्वं मद्वंशकलङ्कमङ्करयसे किं वा करोम्यात्मजे ॥[8]

सङ्गीतप्रचारः पूर्णतया विद्यमान आसीत्[9] । कन्याभ्यः संगीतविद्यावश्यकी मन्यते स्म[10] । कविः लिखितवान्—"संगीतनिपुणाऽभवत्" पदेन स्पष्टमस्ति यत् सङ्गीतपटुता शिक्षामानदण्डमासीत् । 'काहला'-भेरी-मृदङ्ग-वल्लकी-वीणादिवाद्यानां नामावल्यपि प्राप्यते[11] । नृत्यमपि मनोविनोदायावश्यकमासीत्[12] । एतन्नृत्यं नृत्यशालायाः कस्मिंश्चित् मायागृहे[13] सम्पद्यते स्म ।

१. स्नानानुलेपनमनोहरयोजनानि दिव्याम्वराणि बहुमानपुरःसराणि—चौ० पूर्व पी० पद्य १६ ।
२. गद्यप्रवन्धविधिना गुरुणा कवित्वं कृत्वा च पद्यरचनां मधुरां कवीन्द्रः, वही, पद्य ।
३. श्रृङ्गारनाटकरसोत्तमपानपात्रीं—चौरपञ्चाशिका, २४ पद्य ।
४. कर्पूरपूगपरिपूर्णमुखीं-चौर० प. ९ पद्य । ५. ताम्बूलमेव-पूर्व. पी० ७० ।
६. क्रीडां विहाय शुकसारिगतां सखीनां पूर्वपीठिका, पद्य १९ ।
७. पूर्वपीठिका ४१ पद्य । ८. दाक्षिणात्य पाठ ७८ पद्य ।
९. दाक्षिणात्य पाठ ५ पद्य ।
१०. दाक्षिणात्यपाठ ५७ पद्य ।
११. वही ४९ ।
१२. दाक्षिणात्य पाठ ७० पद्य ।
१३. वही ७ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विरहप्रेम्णो विस्तृतवर्णनं चौरपञ्चाशिकायां मिलति । मिलनसमये केवलमेका प्रेयसी तिष्ठति । परं विरहे त्रिलोकी प्रेयसीमयी जायते । विरहं विना मिलने नानन्द आयाति । विरहाग्नौ तप्ते सति मिलनोत्सुकः शरीरात्मा कञ्चननिर्मलो भवति । सम्भोगपुष्ट्यै, आत्मतुष्ट्यै च विरहः परमावश्यकोऽस्ति । कविः राजकन्यावियोगे तस्याः पूर्णतः स्मरणं करोति । राज्ञः कोपस्य भाजने जातेऽपि परलोकेऽपि स्वप्रेयस्या सह मिलनोत्कण्ठां व्यनक्ति। तया सह विहितां रमणक्रीडां स्मरति ।

तालबद्धगीतिकाव्यानां सांस्कृतिकमूल्यम्

तालवद्धगीतिकाव्येष्वपि प्रवन्धस्य स्वल्पा सूक्ष्मा च रेखोपलभ्यते । अतो जीवनस्य वहुमुख्यः प्रवृत्तयो न सन्ति । अस्यां विधायां प्राप्ताः प्रमुखरचनाः निम्नलिखिताः सन्ति—

१. गीतगोविन्दम् ।
२. रामगीतगोविन्दम् ।
३. गीतवीतरागम् ।
४. गीतगिरीशम् ।

गीतगोविन्दे प्रमुखरूपेण शृङ्गारस्य भक्तिरसधारायां परिवर्त्तने प्रयासो विहितः। यतः भारतीयसंस्कृतेः निवासः उच्चाध्यात्मिकतायामस्ति। आध्यात्मिकतायाः चिन्तनं धर्मस्य सर्वशिखरेषूच्चतां प्राप्तमस्ति। कला-साहित्ययोः तथा धार्मिकानुष्ठाने सामाजिकविचारेषु चाध्यात्मिकचिन्तनस्यास्तित्वं समाहितमस्ति । शृङ्गारविषयककवितानां गीतीनाञ्चापि चरमलक्ष्यमाध्यात्मिकतास्ति । अतः तालवद्धगीतिकाव्येषु प्रेमभावधुरमभितः भ्रमन्ति । परं तेषु आचारभक्तितत्त्वेभ्यो महत्त्वं दत्तमस्ति ।

गीतगोविन्दे पीतनीलवस्त्राणामुल्लेख आयातोऽस्ति । 'पीतवसनं[१]' कवयेऽधिकं रुचिरमस्ति । दुकूलव्यवहारः कतिपयस्थलेषु समायातोऽस्ति[२] ।

आभूषणेषु कुण्डल-हार-वलय-कङ्कण-नूपुर-रशना-काञ्ची-प्रभृतिनामोल्लेखाः सन्ति । कुण्डले द्विप्रकारे ध्रियेतेस्म—स्वर्णनिर्मिते मणिजटिते च । मकराकृतिकुण्डले सर्वश्रेष्ठे मन्येते[३] । तरलितहाराणां लोकप्रियतायाः कथनं सर्वत्रायातमस्ति[४] । रश-

---

१. गीतगोविन्द (१।४।१) ।
२. गीत २ अ० ६ गीत, २ पद्य ।
३. मणिकुण्डल—गीत १।४।१, मणिमयमकरमनोहरकुण्डल—गीतगोविन्द २।५।६ ।
४. तरलितहाराः (७।१४।२) ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नाया: [1]काञ्च्याश्चोभयोरपि[2]वर्णनं विद्यते। नार्यः किंकिणीयुक्ताः रशनाः धारयन्ति स्म, याः मेखलाः कथ्यन्ते। काञ्ची स्वर्णनिर्मिता रत्नजटिता चाभवत्। वलयाः बहुविधा अभवन्। मरकतवलयाः सर्वश्रेष्ठा[3] अभवन्। केयूरयोः[4] बाह्वोः धारण-प्रथासीत्।

अन्यानि अनेकप्रकाराण्याभूषणानि ध्रियन्तेस्म, येषां निर्देशः कविः 'आभरणानि' पदेन कृतवान्[5]। कविरेकस्मिन्नेव पद्ये विविधाभूषणानां प्रयोगं कुर्वन् लिखितवान्—

हारावलीतरलकाञ्चनकाञ्चिदाम-
केयूरकङ्कणमणिद्युतिदीपितस्य। गीत० ११।२०।४

नूपुरे[6] चरणसौन्दर्यस्य वृद्धिमजनयताम्। 'मणिभूषणम्' पदेन कविः मणीनां भूषणेषु संकेतमकरोत्। आभूषणरूपेण वन्धूक[7]-मधूक[8]-नीलोत्पल[9]-तिल[10] पुष्प-कुन्द[11] पुष्प-कुवलय[12]-मन्दार[13] कुसुम-अशोक[14]पल्लव-कमल[15]-पद्म-स्थल[16]जलज-केसर[17]कुसुमादीनां व्यवहारोऽभवत्।

सौन्दर्य-प्रसाधनकृते कस्तूरी[18]-कज्जलरक्तिम[19]-पुष्पमाला[20] सिन्दूरादेः[21] व्यवहारोऽक्रियत। केशप्रसाधनस्य विशेषप्रचार आसीत्। केशेषु पुष्पमालाधारण-मावश्यकमासीत्। चन्दनागरुतगराणामपि प्रयोगोऽभवत्। 'मलयजरजसः' व्यवहारः सर्वसाधारणेऽप्यभवत्।

शय्या-तल्पयोरुभयोरप्युल्लेखः आयातोऽस्ति। विलासिन उभयोरपि व्यवहारं कुर्वन्ति स्म। शय्या किशलयस्यापि निर्मीयते स्म।[22] तल्पो मृदुलसुन्दर-

---

१. गीतगोविन्द ७।१४।४, मणिमयरशना—गीतगोविन्द ७।१५।५, मणिरशना—११।२४।७।
२. गीत० १२।२३।४, काञ्चीदाम।
३. गीत० ७।१४।४।
४. गीत० ११।२०।४ पद्य।
५. मणिरशनावसनाभरणानि—गीत १२।२४।५
६. गीत १२।२४।१।
७. गीत० १०।१९।५ ८.–११. वही १०।१९।५
१२. गीत० १०।१९।४ १३. गीत ११।२२।३ १४. गीत ११।२१।२
१५. गीत १०।१९।६ १६. गीत ७।१६।४ १७. गीत ११।२१।६
१८. गीत १७।१५।३ १९. वही ८।१७।२ २०. वही ७।१३।६
२१. वही ४।९।५ २२. गीत ७।१६।१, ५।११।६, ६।१२।२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रच्छादनैरलङ्कृतोऽभवत् ।[1]

भोज्यपदार्थेषु अन्नफलयोरुभयोरपि व्यवहारोऽभवत् । शर्करा[2]- द्राक्षा[3]-क्षीराणां[4] व्यवहारोऽत्यन्तहितकारको मन्यते स्म । इमे पदार्थाः स्वादिष्ठाः भवन्ति स्म ।

मनोविनोदाय वनभ्रमण-नृत्य-गायन-वादन-चित्रकलानां व्यवहारमकुर्वन् । एवं गीतगोविन्दे सांस्कृतिकसामग्री विद्यमाना वर्त्तते ।

रामगीतगोविन्दस्य सांस्कृतिकमूल्यम्

संस्कृतिदृष्ट्या रामगीतगोविन्दस्य महत्त्वमपि गीतगोविन्दतुल्यमेवास्ति । एषु गीतिकाव्येषु जीवनस्य निरूपणमेकाङ्गिरूपे वर्त्तते । अतो विपुलपरिमाणेषु सांस्कृतिकतत्त्वं न प्राप्यते । रामकथायाः संक्षिप्तरूपमङ्कितमस्ति । अतः संस्कृतेः बहुमुखो विकासः न जातः । वर्णाश्रमधर्मस्य प्रतिष्ठापि कृता विद्यते । यवन[5]-निषाद[6]-किरात[7]-हूण[8]-खसैः[9] सह द्विजानाम[10]प्युल्लेख आयातोऽस्ति । राजसदसि पुरोधसः स्थानमुन्नतमासीत् । गीतिकारः जातिमान्यतायामुदारतायाः परिचयं दत्तवान् । निम्नश्रेण्यां परिगणनीयाभिः जातिभिः सहापि प्रेमभावस्य कथनं कृतं विद्यते । विविधप्रकाराणां वस्त्राभूषणानां प्रयोगानां कथनमायातमस्ति । कविभ्यः पीतपटः विशेषं रोचते । अतः स स्वाराध्यं पीतपटेन[11] सुशोभयति । वस्त्रेषु[12]दुकूल-हंसदुकूलयोः[13] प्रयोगः प्राप्यते ।[14]उपमारूपेण 'तडिद्धामवसनस्य' वर्णनमायातमस्ति, यस्यार्थः प्रकाशमानं पीतवस्त्रमस्ति । वस्तुतः नीलवर्ण-शरीरोपरि पीतवस्त्रसौन्दर्यमधिकं विकसति । अतएव रामकृष्णभक्ताः स्वा-राध्यस्य वेशभूषायाः पीतपटस्य व्यवहारं कुर्वन्ति ।

आभूषणेषु केयूर[15]-कुण्डल[16] -किरीट[17]-मौक्तिकदाम[18]-मणिमयमुकुट[19]-मकराकृतिकुण्डल[20]-मुक्ताधर[21]-मणिखचितकिरीट[22]-कंकण[23]-मुद्रिका[24]-मणिमय-हारादीनामुल्लेखः[25] प्राप्यते ।

---

१. वही ३।८।३ । २. गीत १२।२४।४ ।३. गीत १२।२४।५ ।
५. रामगीतगो० १।१४ । ६. वही १३।१३ ७—८. वही १५।७ ।
९. वही २३।४ । १०. वही ६।७ ११–१२. रामगीतगो० १०।३ ।
१३. वही २७।६ । १४. वही ९।७ । १५. रामगीतगोविन्द, प्रथमगीत ।
१६. वही २।७, १।१ । १७. वही १।१ । १८. वही १।१ ।
१९. वही २।७ । २०. वही ४।५० । २१. वही ५।२० ।
२२. वही ४।१२ । २३. वही १०।४ । २४. वही १०।४ ।
२५. वही १९।३ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मणिषु—इन्द्रनील[1]- कौस्तुभ[2]-वैडूर्य[3]- पद्मराग[4]-मरकत[5]-स्फटिक[6]-इन्द्रनील-मणि[7]-हीरका[8]-दीनां व्यवहारस्योल्लेखो लभ्यते ।

भवनानां सुन्दरं चित्रणमायातमस्ति । मणिमयसौध[9]-देवगृह[10]-निकेतन[11]-स्वर्णिम[12]-सौधाणां चित्रणमस्मिन् गीतिकाव्ये कृतं विद्यते । लङ्कायाः भवनानां परमसजीववर्णनं विद्यमानमस्ति । यथा—

रुचिर-निकेतनतोरणमालम् ।
भ्राजमानमणिविरचितजालम् ॥
शुभसोपानवापिकारम्यम् ।
सुरतरुभूषितविपिनमगम्यम् ॥
सन्ततमसुरनिकरसञ्चारम् ।
कीलितलोकपालसुदरारम् ॥
तुङ्गकनकमयसौध-विकाशम् ।
मयनिर्मितमगपतिसङ्काशम् ।
अतिशयरुचिरदेववरगेहम्,
देवविनिर्मितनिरुपमगेहम् ॥[13]

भवनानि तोरणयुक्तानि सुन्दराणि निर्मीयन्ते स्म । एतेषु प्रकाशागमनाय गवाक्षा अभवन् । सुन्दरसोपानान्यभवन् । भवनान्तःप्रदेशे क्रीडार्थं वापिकाः निर्मिता अभवन् । स्वर्णनिर्मितसौधानि नभः स्पृशन्ति स्म । भवनानां मध्ये देवालया अभवन् ।

पशुपक्षिषु[14]काकेभ[15]-गज-पञ्चानन[16]-चकोर[17]-कीर-[18]श्येन[19]-सारस[20]-मराल[21]-चक्रवाक[22]-जलकोयष्टि[23]-मयूर[24]-हारीत[25]-सारिका[26]-खञ्जन[27] -कोक-[28]

---

१. वही ३।२ ।
२. वही ३।२ । ३. वही ५।२० । ४. वही १२।१ ।
५. वही १२।१ । ६. १५।४ । ७. वही १५।४ ।
८. वही १५।४ । ९. वही ६।३ । १०. वही १२।७ ।
११. वही १८।४-६ । १२. वही २।२ । १३. रामगीत० १८।३-७ ।
१४. रामगीतगोविन्द १।३ । १५. वही ३।६ । १६. वही ३।६ ।
१७. वही ४।१,५।२० । १८. वही ४।४ । १९. वही ६।२ ।
२०. वही १२।४ । २१. वही १२।४ । २२. वही १२।४ ।
२३. वही १२।४ । २४. वही १५।३ । २५. वही १५।६ ।
२६. वही १५।६ । २७. वही १५।६ । २८. वही १५।६ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गवय[1]-शरभ[2]-हरिण[3]-कपि[4]-हंसो[5]लूक[6]मधु[7]पानामुल्लेखाः सन्ति।

वाहनेषु हय[8]-गज-गरुडयान[9]-तुरंग[10]-रथ[11]-शिविका[12]-करभ[13]यान[14]-[15]पुष्परथानां नामानि मिलन्ति।

अस्त्र-शस्त्रेषु दण्ड[16]-कोदण्ड[17] - कुठार[18]- करवाल[19]-असि[20] - गदा[21] - शारङ्ग[22]-वाण[23] - [24]धनुर्वायव्यास्त्र[25] - पावकास्त्र[26]-कार्मुक[27]-पिनाक[28]-निषङ्ग[29]-शायक[30]-तूणीर[31]-कृपाण[32]-शृङ्गवाणानां[33] निर्देशो विद्यते।

अरविंद[34]-पद्म[35]-कुन्दा[36]म्भो[37]जाम्वुज[38]-कैरव[39]-कञ्ज[40]- पाटल[41]-मन्दार[42]-मल्ली[43]-केदार[44]-चम्पक[45]-भूर्जक[46]-कदम्ब[47]-तमालानां[48] निर्देशो वर्त्तते। कमलपर्यायवाचिशब्दानां प्रयोगः प्रचुरतया जातोऽस्ति।

अन्योपयोगिवस्तुषु कनककलशस्य (रामगीतगोविन्द ६।५), दर्पणस्य (राम. गी० १२।१०) कनकासनस्य (१०।२) मणिमण्डपस्य (राम १०।२), पताकाया (रामगी० ६।३), वितानस्य (रामगी० ६।६) तल्पस्य (रामगीत २३।२) निर्देशाः वर्त्तन्ते। कलानां चित्रस्य, वाद्यस्य (रामगी० १२।९) तथा गीतानां व्यवहारो वर्त्तते। काव्ये कलायाः (राम गीत० ४।१) स्मृतेः (रामगीत १।१) वेदस्य (राम-

१. वही १५।६। २. वही १५।६। ३. वही १५।६।
४. वही १५।६। ५. वही २४।३। ६. वही २४।३।
७. वही ५।४। ८. वही १।१०। ९. वही २।२।
१०. वही ७।५। ११. वही १२।५। १२. वही ११।७।
१३. वही १२।५। १४. वही १२।५। १५. वही २३।३।
१६. वही २।७। १७. वही १५।६। १८. वही १५,६।६।
१९. वही १।१०। २०. वही २।७। २१. वही २।७।
२२. वही २।७। २३. वही ५।१८। २४. वही ५।४०।
२५. वही ६।३। २६ वही ६।४। २७. वही ६।६।
२८. वही ६।३। २९. वही ८।२। ३०. वही ८।२।
३१. वही १३।१४। ३२. वही १८।६। ३३. वही १८।२।
३४. वही २।१। ३५. वही २।१। ३६. वही २।४।
३७. वही १०।५। ३८. वही ३।२। ३९. वही ४।६।
४०. वही ६।१। ४१. वही ८।२। ४२. वही १०।७।
४३. वही १०।६। ४४. वही १०।६। ४५. वही १५।३।
४६. वही १५।३। ४७. वही १५।३। ४८. वही १५।३।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१।१) पुराणस्य (रागगी० ५।६) वेदान्तस्य च (राम० ९।४) कथनमायात-मस्ति । सांख्यतत्त्वानां विवेचनं रामगीतगोविन्दस्य पञ्चमगीते लभ्यते । सरय्वाः (राम० १२।१), गोदावर्याः (राम० १६।३) जाह्नव्याः (रामगी० ६।६) 'चित्रणेन सह विदेहस्य (राम०६।२), अयोध्यायाः, मिथिलायाः, (राम० ६।५,६६) प्रयागस्य (राम० १४) चित्रकूटस्य (१५ गीत) एवं दण्डकवनस्य (.६ गीत) वर्णनं प्राप्यते ।

गीतवीतरागस्य सांस्कृतिकमूल्यम्

गीतवीतरागे आदितीर्थंकर ऋषभदेवस्य 'दशजन्मनां कथाङ्किता विद्यते । कथा-वस्तुन आधारः जिनसेनस्यादिपुराणमस्ति । कविना सूक्ष्मकथावस्तुनास्मिन् गीति-काव्येऽनेकसांस्कृतिकतत्त्वानां समावेशः कृतः । भौगोलिकदृष्ट्या भरत-विदेह-क्षेत्रयोः वर्णनं कृतं विद्यते । पुण्डरीकिण्याः (गीत ४।२।१८) नगर्या निर्देशोऽस्ति । इयं नगरी विदेहक्षेत्रस्यैका प्रमुखनगरी विद्यते । जैनसाहित्येऽस्या वर्णनं विस्तार-पूर्वकं मिलति । अस्याः स्थितिः कुरुजनपदे सम्भाव्यते । सुसीमापि (गी० १०। २।२१) पौरिणिकी नगरी विद्यते । उत्पलखेटकम् (गी० ४।२,१८) विदेहक्षेत्रस्य पुष्कलावतीदेशस्यैकनगरं विद्यते। एतन्नगरं धान्यक्षेत्रैः कोटपरिखादीनां शोभया च पुष्कलावतीदेशं .भूषयति स्म । अस्याः नगर्याः राजा वज्रबाहुरासीत् । तस्याः महिष्याः नाम 'वसुन्धरा' आसीत् । वज्रजङ्घोऽनयोः दम्पत्योः पुत्र आसीत् । आधुनिकभूगोलानुसारमस्य नगरस्य पूर्वभारतेऽवस्थितिः सम्भाव्यते ।

अयोध्यायाः नगर्याः स्थितिः द्वयोः द्वीपयोः आगतास्ति । धातकीखण्डे-जम्बू-द्वीपे च । धातकीखण्डस्य पूर्वभागस्थपश्चिमविदेहस्य गन्धिलदेशस्य नगरी अयोध्या कथिता । जम्बूद्वीपो भरतक्षेत्रे तीर्थंकरैः सह भरतचक्रवर्तिनोऽपि जन्मभूमिरस्ति । अयोध्यायाः गणना प्राचीनतीर्थेषु क्रियते । रामलक्ष्मणसम्बन्धश्च अनयैव नगर्या सह विद्यते । पुण्यास्रवकथाकोषे कथितमस्ति यत् क्षत्रियसुप्रभस्य राज्ञ्याः प्रह्लादिन्याश्च सूर्योदय-चन्द्रोदयौ पुत्रौ बभूवतुः, यौ ऋषभदेवेन सह दीक्षितौ भूत्वा मारीचिना सह पुष्टौ जातौ । अयोध्या जम्बूद्वीपे मतास्ति ।

सामाजिकतत्त्वम्

गीतिकाव्यक्षेत्रस्य सीमितत्वात् सामाजिकपारिवारिकजीवनस्य व्यवस्थित-चित्रणं न जातम् । गीतिकाव्येऽस्मिन् प्रतिपादितः समाजः पारिवारिकजीवनात् प्रारभ्यते । भोगभूमेर्जीवनं पारिवारिकमेवास्ति । अत्र युगलोत्पत्तिर्भवति । अन्त-कालं यावत् युगलदम्पत्योर्निवासो जायते । यदा भोगभूमिः कर्मभूमिरूपे परिणता

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जायते, तदा जीवनसमस्याः वर्द्धन्ते येषां समाधानमेकयुगलेन न भवति। अनेक-युगलैः सम्पद्यते तथानेकयुगलानां समूहः समाजो जायते। सामाजिकजीवनस्य सर्वावश्यकं तत्त्वं रक्षाविधिः वर्तते। अस्तित्वरक्षायै समाजं संघटनं क्रियते। रक्षा-नन्तरमेव व्यवहार-व्यवसाययोः प्रवृत्तिरुत्पद्यते। गीतिकाव्येऽस्मिन् "पुरजनपरि-जनसेवनम्"[1] तथा "समररिपुविहितरोषणम्[2]" सदृशानि विशेषणपदानि राजम्यः प्रयुक्तानि जातानि। एतेषां विशेषणानामध्ययनेनावगम्यते यत् समाजव्यवस्थासुदृढ़-तायै रक्षणं तथा शत्रून् पराजित्य तेषामन्यायानां यथोचितं प्रतीकरणं समाज-संघटनस्य प्रमुखः सिद्धातो वर्तते।

'सुनयविहित'पद्येन व्यक्तेः सामाजिकतायाः नीतिपूर्णसामाजिकव्यवहारस्य च संकेतः प्राप्यते। सहयोगस्य, सहकारिताश्च सामाजिकविकासाय परमावश्यकता विद्यते। न्यायनीतौ जीवनस्यैतादृशं मूल्यमस्ति, येन सामाजिकसंघटनं भवति।

पारिवारिकतत्त्वम्

समाजस्य शक्तिसम्पन्नयै पारिवारिकसंघटनस्य परमावश्यकता विद्यते। गीतवीतरागे परिवारस्यार्थाः—दम्पती, गुरुजनः, सन्ततयश्च सन्ति। परिवारः कामस्य स्वाभाविकवृत्तिं लक्ष्यं विधाय यौनसम्बन्धं सन्तानोत्पत्तिक्रियाश्च नियन्त्रिताः करोति। एतद् भावनात्मकघनिष्ठसम्बन्धस्य वातावरणं निर्माय बालका-नां समुचितपोषणाय सामाजिकविकासायावश्यकपृष्ठभूमेः निर्माणं करोति। एवं-प्रकारेण व्यक्तेः समाजीकरणस्य संस्कृतीकरणस्य च प्रक्रियायां परिवारस्य महत्त्व-पूर्णयोगदानं करोति। गीतवीतरागे "पुत्रस्य मोहात्"[3] पदेन वंशवर्णनहेतवे सन्तानस्योत्पत्तेः संरक्षणस्य पालनस्य च सङ्केतः प्राप्यते। पत्युः पत्न्याश्च मध्ये अपूर्वः प्रेमभावः प्रतिपादितो विद्यते। पण्डितायाः धात्र्याः मातृसदृशं सम्मानं परिवारस्य सुदृढतायाः परिचायकमस्ति। गर्भिण्याः नार्याः परिवारे विशेषं ध्यानं रक्ष्यते स्म। कविना—'स्वबन्धुवर्गेण सदेज्यमाना वभौ मरालप्रमदामयाना[4]" पदेन नारी-महत्त्वं सूच्यते। कन्यायाः स्थितिः परमादरणीयासीत्।

---

१. गीतवीतरागम्, २।३ जैनसिद्धान्तभवन, हस्तलिखित प्रति पत्र १८ पूर्वार्ध।
२. वही २।७ पत्र १८ पूर्वार्द्ध, वही ५।१, पत्र १९ पूर्वार्द्ध।
३. गीतवीतराग, हस्त-जैनसि० ११।४, पत्र २३ उत्तरार्द्ध।
४. वही, १८।२, पत्र २७ उत्तरार्द्ध।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गुरुमहत्त्वम्

गुरुमहत्त्वं लौकिकशिक्षाप्राप्तिदृष्ट्याऽऽत्मोत्थानदृष्ट्या चाधिकमासीत् । गुरोः गुणगानं कुर्वता लिखितम्—

गुरुर्विधाता गुरुरेव दाता गुरुः स्वबन्धुर्गुणरत्नसिन्धुः,
गुरुर्विनेता गुरुरेव तातो गुरुर्विमोक्षो हतकर्मपक्षः ॥[1]

सम्यग्दृष्टिजीवः गुरुप्रतिपादितमार्गमनुसृत्यात्मोत्थानं करोति ।

भोजनम्, पानञ्च

मनसः, आचारस्य रुचीनाञ्च परिष्करणं संस्कृतिषु समाविष्टं वर्त्तते । सांस्कृतिकजीवनयापनायाहारपानयोः, निवासस्य, रीतीनाञ्च परिष्करणमावश्यकं विद्यते। शुद्धभोजनपानैरात्मा संस्क्रियते । जीवनस्तरस्यानुमानमपि भोजपानैरेवानुमीयते । गीतिकाव्येऽस्मिन् अन्नभोजनपक्वान्नभोजनफलभोजनानां समुचितविवेचनं नास्ति । परं प्रसंगगीतिषु या सामग्री समाहितास्ति, तया ज्ञायते यत् घृत-दुग्ध-फलान्नाहाराणां विशेषः प्रचार आसीत् । कविना दधि[2]-घृत[3]-क्षीर[4]-कदली[5]-नारङ्गादीनां व्यवहारो वर्णितः ।

वस्त्रमाभूषणानि च

संस्कृतिषु वस्त्राभूषणानामपि स्थानमस्ति । धौतवस्त्र[6]मधिकतरं श्रेयस्करं मन्यते । परं कविना सुवस्त्राणामुपयोगे बलं दत्तम् । सुवस्त्रेण[7] तात्पर्यं तादृशेन वस्त्रेण वर्त्तते, यत् शरीराय सुखप्रदं स्यात् तथा वर्षाशीतातपेभ्यः शरीरं रक्षेत् । गृहस्थाः सुन्दराणि मूल्यवन्ति च वस्त्राणि धारयन्ति स्म । संन्यासिनः 'कौपीनं'[8] धारयन्ति स्म। साधारणतः गीतवीतरचनाकाले उत्तरीयाधोवस्त्रेण सह स्यूतवस्त्राणां व्यवहार आसीत् ।

वस्त्रवत् समृद्धसुखिजीवनार्थमाभूषणानामपि व्यवहारः परमोपादेय आसीत् । गीतवीतरागे कुण्डलस्य (२।१, पत्र १७ उत्तरार्द्ध), मणियुतमुकुटस्य (४।२, पत्र १९ पूर्वार्द्ध) मणिकुण्डलस्य (४।२ पत्र १९ पूर्वार्द्ध), हारस्य (४।४, पत्र १९ पूर्वार्द्ध), मालायाः (४।८, पत्र १९ पूर्वार्द्ध), नूपुरस्य (६।८, पत्र २०) केयूरस्य (८।१, पत्र २१), कटकस्य (८।६, पत्र २१) मणिहारस्य (११।२,

---

१. वही, ८।५ पत्र २२ उत्तरार्द्ध । २. वही, १०।४ पत्र २३ पूर्वार्द्ध ।
३-४. वही १०।४ पत्र ९३ पूर्वार्द्ध । ५. वही १२।७ पत्र २४, पूर्वार्द्ध ।
६. वही, ४।१ पत्र १९ पूर्वार्द्ध। ७. वही १।४ पत्र १७, पूर्वार्द्ध ।
८. वही, ११।५ पत्र २३ उत्तरार्द्ध ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पत्र २३) आभूषणैः सह च मरकत-हीरक-(१।४, पत्र १७ पूर्वार्द्ध), रागमणि (१।५, १७ पत्र) प्रभृतिमणीनां निर्देशोऽस्ति ।

शरीर-प्रसाधनाय चन्दन–(५।१, पत्र १७ पूर्वार्द्ध) सुन्दरतिलक (४।२, पत्र १९ पूर्वार्द्ध) सरसिज-(१।६, पत्र १७ पूर्वार्द्ध), कमल-(१।५, पत्र १७ पूर्वार्द्ध)-किंशुक-(३।३, पत्र १८ पूर्वार्द्ध) रसालकुसुम- (६।५, पत्र १८ पूर्वार्द्ध) कदम्व (३।७, १८ उत्तरार्द्ध), निकुरम्व (३।७, पत्र १८ उत्तरार्द्ध)-कुवलय (५।४, पत्र १९)-अशोकपल्लव-सुमल्लिका-कुमुद (३।२, पद्य २०(उत्तराद्‌र्ध) कनककमल (८।३, पद्य २१ पूर्वाद्‌र्ध)-चम्पक-अशोकानां (२४·३ पद्य ३२-पूर्वाद्‌र्ध) व्यवहारो विधेयो मतः ।

वाहनम्

मानवः स्वसीमितशक्तिकारणात् देशकृतां दूरतां पद्भ्यां तोलितुं न शक्नोति । अतएव स तीव्रगामिनं वाहनमपेक्षते । वाहनान्यनेकरूपाणि व्यवह्रियन्ते । प्रस्तुत-गीतिकाव्ये गजस्य (२।४ पत्र १८ पृ०) रथस्य (११।७, पत्र २३ उत्तरार्द्ध) अश्वस्य (२८।३, पत्र ३० पूर्वाद्‌र्ध) शिविकायाः (२४।३ पृ० ३५ उ०) उल्लेखो विद्यते ।

कला

गीतवीतरागे वास्तु-संगीत-नृत्य-चित्रकाव्यकलानां निर्देशः समाविष्टोऽस्ति । वास्तुकलादृष्ट्या समवशरणमहत्त्वं सर्वाधिकमस्ति । वर्णनेऽस्मिन् वास्तुकलायाः सर्वाण्यङ्गानि उपाङ्गानि च निहितानि सन्ति । समवशरणस्य (गीत० २२ प्रवन्ध, २३ प्रवन्ध, पत्र ३०:३१ पूर्वाद्‌र्धं) वाह्यभागे 'धूलिसालकोटं' तिष्ठति, अस्या कृतिः वलयाकारा भवति । कर्वुरपाषाणैः निर्मितत्वादस्यामेन्द्रधनुःसदृशी प्रतीयते । धूलिसालस्य निर्माणमनेकप्रकाररत्नानां धूल्या भवति । धूलिसाल-स्य वहिर्भागे चतुर्दिक्षु सुवर्णस्तंभानामग्रभागेषु स्थितानि चतुर्द्वाराणि शोभन्ते । एषु तोरणवद्द्वारेषु मत्स्याकृतयो मालाः लम्बन्ते । धूलिसालमध्ये वीथीनां मध्ये स्वर्णनिर्मिता अत्युन्नताः मानस्तम्भाः सुशोभिताः भवन्ति । यस्यां जगत्यां मान-स्तम्भाः भवन्ति, सा जगती चतुर्गोपुरैः त्रिभिः कोटैः वेष्टिता भवति । मध्ये च एका पीठिका निर्मीयते । पीठिकोपरि आरोहाय षोडशसोपानानि भवन्ति । सन्दर्भेऽस्मिन् परिखा, लतावनानि, वनानि, नाट्यशालाश्च भवन्ति ।

सदनस्य (१।६ पृ० १७ पूर्वाद्‌र्ध) आवासस्य (४।४, १९ पू०) जिनाल-यस्य (४।२, पत्र १९५०) सौधस्य (५।२, १९ उत्तराद्‌र्ध) केलिसरोवरस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(५।४, १९ पत्र उत्तरार्द्ध), मण्डपस्यो (६।५, पत्र १९ उत्तरार्द्ध), ल्लेख आयातोऽस्ति । शय्यार्थं तल्पस्य (७।३, पत्र २० उत्तरार्द्धं) शयनीयस्य (७।३, पत्र ३० उत्तरार्द्ध) एवं मृदुतरतल्पस्य (१२।१, पत्र २३ उत्तरार्द्ध) कथनं प्राप्यते । वाद्येषु शंखस्य (१८।३ पत्र २७ उत्तरार्द्ध), भेर्याः (१८।३, पत्र २३ उत्तरार्द्ध) घण्टायाः (१८।३) मृदंगस्य (२।४।६, ३२ पृ०,) दुन्दुभेः (२४।६, पत्र ३२ पृ०) निर्देशः मिलति ।

षोडशस्वप्नानां (१७ प्रबन्ध) शरीरविज्ञानस्य (२१।१, पत्र २९ उत्तरार्द्ध) तथा नक्षत्राणां कथनं क्रियते । आचारदृष्टया महाव्रत-समिति-गुप्ति-षोडशभावनानां (१३।५, २४ पत्र उत्तरार्द्ध) समाधेश्च विवेचनं प्राप्यते ।

एवं प्रकारेण संस्कृतिमूल्यदृष्टया संस्कृतिगीतिकाव्यं महत्त्वपूर्णमस्ति ।

5334

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुक्रमणिका

अनुचिन्तने समागताः ग्रन्थाः ग्रन्थकाराश्च

अग्निपुराणम् १०,२६
अथर्ववेदः १७९
अनर्घराघवम् ८०
अपने कलेजे का तूफान १७२
अभिनव पण्डिताचार्यः चारुकीर्तिः १२६, १२७, १३५, १३६, १३९, १४०
अभिज्ञान शाकुन्तलम् ६८, ६९, ७०
अभिनव गुप्तः ६७
अभिनव भारती ६७
अमरुकः ६, १७, २९, ५६, ५७, ५८, १५८, १७२
अमरुकशतकम् ६, ५६, ५७, ५८, १०४, १०५, १०६, १०७, १०८, १०९, ११०, १११, ११२, १५४, १५५, १५६, १५७, २०८, २१६
अमृतलहरी ६४
अमोघवर्षः ९६
अयोध्यासिंह उपध्यायः 'हरिऔध' १७०
अरस्तुः १
अर्नेष्ट राइसः २
अलङ्कारसर्वस्वम् ३९, ८१
अलवन्दारस्तोत्रम् ८३
अविमारकम् ६८
आँसू १७२, १७४
आत्मबोधः ८३
आनन्दलहरी ८३
आनन्दवर्द्धनः १७, २६, ५९, १०४, १४२
आप्तमीमांसा ८४
आर्यासप्तशती ६१, १६२, १६३, १६४, १६५, १६६,
इन्ट्रोडक्शन टू दी स्टडी ऑव लिटरेचर ३ पादटिप्पणः
इतिहासः २०५
आलोचना (पत्रिका) ३१ पादटिप्पणः
इन्साइक्लोपीडिया ऑव ब्रिटेनिका २
उत्तररामचरितम् ७९, ८०
उत्तराध्ययनम् १५९, १६२,
उद्धवशतकम् १७०
उद्धवसन्देशः ६४, ६५
ऋग्वेदः ८, ९, २३, २६, २८, ३०, ३१, ९६, १४२, १७७, १९०
ऋतुसंहारम् २५, ४१, ४५, ४६, १९०, १९३, १९६
ए० एन० उपाध्ये १२६
एकीभावस्तोत्रम् ८४
एन इन्ट्रोडक्शन टू कम्परेटिव फिलोलॉजी १४१

अनुचिन्तने समागताः ग्रन्थाःग्रन्थकाराश्च : २२९

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एस. एन. दास गुप्तः ९, ८३
औफ्रेक्टः ३९
करुणालहरी ६४
कर्णसुन्दरी ८१
कर्पूरमञ्जरी ८०
कलहहरणम् १७२
कल्याणमन्दिरम् ८४
कल्याणालोचना १५९
कविकण्ठाभरणम् ९
कबीरः १६९
कवीन्द्रवचनसमुच्चयः ५४, ५५
कादम्बिनी १७२
कालिदासः २०, २६, २८, २९, ४१, ४६, ४८, ५२, ६८, ७३, ८७, ९६, १५१, १५२, १५३, १५४ १६९, १७२, १९०
काव्यमें उदात्ततत्त्व २८, पादटिप्पणः
काव्यानुशासनम् ८१
काव्यप्रकाशः ५७, ८१
काव्यलङ्कारः ३९, ८१
क्लासिकल लिटरेचर ५९
कीथः ४६, ५३
कुन्तकः १०
कुन्दमालाः ८१, ८३
कुमुदचन्द्रः ८४
कुलशेखरः ८३
कृष्णकर्णामृतम् ८३
कृष्णविहारीमिश्रः १४३
क्षेमेन्द्रः ९, १३५, १६६, १६७, १६९
गङ्गालहरी ६४
गाथासप्तशती ६१, १४८, १४९, १५० १५२, १५३, १५४, १५५, १५६, १५७, १६०, १६२, १६३, १६४, १६५
गीतिकाव्य का विकास ४७ पादटिप्पण
गीतिगिरीशम् १२६, २२७
गीत गोविन्दम् ५, ६, १२, २२, २९, ६२, ६३, ६४, ११२, ११३ ११४, ११५, ११६, ११७, ११८ १२६, १४०, १६६, १६७, १६८ १६९, २२७
गीतवीतरागम् १२, २९, १२६, १२७ १२८, १२९, १३०, १३१, १३२, १३३, १३४, १३५, १३६, १३७ १३८, १३९, १४०, १६९, २०९
गुणविनयः १५९
गुञ्जनम् १७२
गोपाल शरणसिंहः १७२
गोवर्द्धनाचार्यः ६१, १४२, १६३, १७२
गोविन्दत्रिगुणायतः ४ पादटिप्पणः
घटकर्परः २५, २९, ४६, ४७
चण्डीशतकम् ८३
चन्द्रशेखर पाण्डेयः ४
चन्द्रालोकः २१८
चरित्रसुन्दरगणिः ४८
चाँद (पत्रम्) १७१
चित्ररेखा १७२
चेतोदूतम् १७२
चौरपञ्चाशिका २८, २९, ५९, ६०, २१५, २०८
जगन्नाथदासरत्नाकरः १७०
जनार्दनप्रसाद 'द्विजः' १७१
जयदेवः ६, ६२, ६३, ८१, १३५, १४०, १५०, १६७, १६९, १७२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जयदेवः प्रथमः ११३
जयदेवः द्वितीयः ११८
जयदेवस्तृतीयः ११८
जयधवलाटीका ९७
जयवल्लभसूरिः १५१
जयशंकरप्रसादः १७२, १७३, १७४
जयसिंहसूरिः ८१
जयस्तोत्रम् ८४
जयानन्दकविः ८४
जानकी वल्लभ शास्त्री १७२
जायसीकविः १७०
जिनचतुर्विंशतिकास्तोत्रम् ८४
जिनशतकम् ८४
जिनसेनः ९६, ९७, ९९, १००, १०१
१०२
जैकोवी ४६
जॉन बईल १२
ज्योतिप्रसादः ९७
झंकारः १७२
झरना १७२
टूटाहिमहारः १७१
तुलसीदासः १७०
त्रिपुरदाहः ८१
दशरूपकम् ८१
दशवैकालिकः १५९, १६२
दशावतारचरितम् १६६
दाक्षीपुत्रः ३९
दिनकरः १७२
दीपशिखा १७२
धनञ्जयः ६४, ८४
धनिकः ५४
धम्मरसायणः १५९
धीरनागः ८१
धोयीकविः ४८
ध्वन्यालोकः ११ पादटिप्पण, १७, ८१
नगेन्द्रः २३
नन्दकिशोरचन्द्रः गोस्वामी ६५
नमिसाधुः ३९
नरहरिः ६४
नलविलासः ८१
नलोपाख्यानम् ३७
नाट्यशास्त्रम् १४, १५, ६६
नाथूराम प्रेमी ९७
नागानन्दम् ७६, ७८
निरालाकविः १७१, १७२, १९३
निशानिमन्त्रणम् १७२
निशाशतकम् ५१, ५२, १६०, १६१
२१५
नीरजा १७२, १७३
नेमिदूतम् ४८,४९, ५०, १७२, १९३,
१९६
पण्डितराज जगन्नाथः ६४
पतञ्जलिः ३९,४०,४१
पत्रावली १७१
पदाङ्कदूतम् ६५
पन्तः १७२,१७३
परिमलगीतिका ९,१७२,१७३
पल्लवः १७२
पवनदूतम् २८,४८,१७२,१९१
पाणिनिः २९,३०,३८,३९,४०,४१,
१४१
पाणिनीयशिक्षा १४१ पादटिप्पणः
पातालविजयः ३९
पार्वती परिणयः ८१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पार्श्वाभ्युदयः ९६,९७,१००, १०१,१०२,१०३,१९३
पिंगलच्छन्दःसूत्रम् ४०
पिशलः ३९,६२
पी० डी० गुणे १४१
पुराणम् २१३,२३२
पूज्यपाद देवनन्दी ८४
प्रणयी कविः ९
प्रतिभानाटकम् ६८
प्रबुद्धरौहिणेयम् ८१
प्रबोधबेचरदासः १४२
प्रवचनसारः १५९
प्रश्नोत्तरमाला ९७
प्रसन्नराघवः ८१, ११२
प्राकृतपैङ्गलम् १६८
प्रियदर्शिका ७६
प्रियप्रवासः १७०
बच्चनकविः १७२
बप्पभट्टिः ८४
बलदेव उपाध्यायः ३१
बाणभट्टः ५६, ८३
बालभारतम् ८१
बालरामायणम् ८१
बाल्मीकिः २८,४१
बाल्मीकि रामायणम् ८१,९६
विद्धशालभञ्जिका ८१
बृहत्स्वयम्भूस्तोत्रम् ८४
भगीरथमिश्रः ३
भण्डारकरः १५१
भक्तामरस्तोत्रम् ८४
भरतमुनिः १०,१५,६६
भर्तृहरिः २९,५१,५३,५४,१४८,१५९, १६०, १६१, १६२,२१५, २१९, २१०,१११
भल्लाटशतकम् ५९
भवभूतिः १०,७९,१५०,१७२
भ्रमरदूतम् १७०
भावविलासः ६४
भासः ६७,६८
भानुभट्टः २७
भिक्षाटनकाव्यम् २५,६५
भूपालकविः ८४
भोजः ९
भोलाशंकरव्यासः ४५
भ्रमरगीतम् १७०
मम्मटः ५४,५५,५७,१४२
मयूरभट्टः ५६,८३
मल्लिकामकरन्दः ८१
महादेवीवर्मा ४,१७२,१७३
महाभारतम् २६,३७,३८,३९,८१ १४२
महाभाष्यम् ३९,४०
महावीरचरितम् ७९
मातङ्गः १५
मानतुङ्गः ८४
मारुसा ५५
मालतीमाधवम् ७९
मालविकाग्निमित्रम् २०,६८,७०
मीराबाई २७,१६९,१७१
मुकुलभट्टः ५४
मुद्राराक्षसम् ७३,७४
मुरारिकविः ८०
मूलाचारः १५९
मृच्छकटिकम् ७४,७५,७६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मेघदूतम् २६,२८,४१,४२,४३
४४,४५,४६,५०,८४,८६,८७,८९
९०, ९१,९२, ९३,९४, ९५,९६
१५०, १५१, १५२, १५३, १६९
१७०,१७१,१७२,१९०,१९१,१९३
मेघनादवध की भूमिका ३८ पादटिप्पण:
मैकडॉनल ३१,५८
मैत्रायणी संहिता ३५
मैथिलीकल्याणम् ८१
मैथिलीशरण गुप्त: १७१,१७२
मोरिका ५५
मोहमुद्गर: ८३
यजुर्वेद: १७९
यजु: संहिता ३५ पादटिप्पण:
यतिपञ्चकम् ८३
यमुनाचार्य: ८३
यामा २७ पादटिप्पण:
रघुवंशम् २८
रत्नावली नाटिका ७६,७७
रविन्द्रनाथ ठक्कुर: ४,३८
रसमञ्जरी २७
रसवन्ती १७२
राक्षसकाव्यम् २५,२१५
राजवल्लभ: ६२
राजशेखर: ३९,८०
रामकुमार वर्मा १७२
रामकृष्ण विलोम काव्यम् ६४
रामजीत गोविन्दम् ११८,११९
१२०, १२१, १२२,१२३, १२४,
१२५,१२६,१६९,२१९
रामचन्द्र: ८१
रामनाथ पाठक: १७२
रामनाथ सुमन: १७२
रामायणम् २६,३५,३७,३८,३९,१४३
राष्ट्रवाणी ९
रुक्मिणी परिणय: ८१
रुद्रट् १४२
रुद्रकवि: ६४
रूपगोस्वामी ६४,६५
लक्ष्मी लहरी ६४
लक्ष्मणसेन: ६२
लक्ष्मीसहस्रम् ६५
लहर: १७२,१७४
लीलाधर त्रिपाठी ४७ पादटिप्पण:
लीलाशुक: ८३
लौंगीनुस २३
वक्रोक्तिजीवितम् ८१
वज्जालग्गम् १४८,१५०,१५९,१६१
वत्सराज: ८१
वाग्भट्ट: १४२
वात्स्यायन: ५१
वादिराज: ८४
वामन: ५६,८१,१०५,१४२
वाररूचंकाव्यम् ४१
वासुदेवशरण अग्रवाल: २०३
विण्टरनित्ज ३०, १४६
विक्रमोर्वशीयम ६८,७१,७२
विक्रान्त कौरवम् ८१
विक्रमाङ्कदेवचरिम् ५९,६०
विक्रमादित्य: ४६
विजयाङ्का ५४
विज्जका ५५
विद्यापति: १६९
विनयसेन: ९६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विल्हणः २८,५९,८१
विशाखदत्तः ५२,७३
विश्वनाथः ९,१४२
विश्वभारती ४ पादटिप्पणः
विषापहारस्तोत्रम् ८४
विहारीकविः ५८
वीतरागस्तोत्रम् ८४
वीरसेनाचार्यः ९६,९७
वेंकटाध्वरिः ६५
वेणीसंहारम् ७८
वेदान्तः २३२
वैराग्यशतकम् ५३,१४८,२११
वैराग्यशतकम् (प्राकृत) १५९,१६०
व्यासः २८
शंकराचार्यः ८३
शब्दकल्पद्रुमः २५
शम्भुनाथ सिंहः ३८ पादटिप्पणः
शास्त्रीय समीक्षा के सिद्धांत ४ पादटि०
शीलदूतम् ४८,१९६
शील भट्टारिका ५५
शुकदूतम् ६५
शूद्रकः ५२
श्रृंगार तिलकम् ५५,५६
श्रृंगार शतकम् ५१,६४,१५९,
१६०,२११
श्यामसुन्दरदासः ३
श्रीकृष्णदेवसार्वभौमः ६५
श्रीमद्भागवतम् १७०
संगीतरत्नाकरः ७
संस्कृत कवि दर्शनम् ४५
संस्कृत साहित्य की रूपरेखा ५
संस्कृत साहित्य का इतिहास ६०
सत्यनारायण कविरत्नम् १७०
सत्यहरिश्चन्द्रनाटकम् ८१
सन्देशरासकम् १६९,१७०
समन्तभद्रः ८४
समयसारः १५९
सरस्वतीस्तोत्रम् ८४
साथी १७२
सान्ध्यगीतम् १७२
सामवेदः २८,३५,१७९
साहित्यदर्पणम् ९,८१
साहित्य परीक्षणम् ४
सिद्धगुणस्तोत्रम् ८४
सिद्धप्रियस्तोत्रम् ८४
सिद्धेश्वरवर्मा ३७
सियारामशरणगुप्तः १७२
सुधालहरी ६४
सुभद्राकुमारी चौहान ५५, १७२
सुभद्रनाटिका ८१
सुवृत्ततिलकम् ९, ३९
सुभाषितरत्नभाण्डागारम् ५५
सुभाषित रत्नावली ५५
सूक्तिमुक्तावली ३९, ५५, २०८,
२१२, २१४
सूरदासः १७०
सूर्यकविः ६४
सूर्यशतकम् ८३
सोमप्रभाचार्यः २२०, १२१
स्तुतिविद्या ८४
स्मृतिः २३१
स्वप्नवासवदत्तम् ६७, ६८
हंसदूतम् ६४, १७२
हडसनः ३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हम्मीरमर्दनम्	८१	हिन्दीगीतगोविन्दम्	९
हरदेववाहरी	१४२	हिन्दी महाकाव्य का स्वरूपविकास	३८
हरिभक्तिरसामृत सिन्धुः	६५	हिन्दीसाहित्यकोशः	१, १६
हरिश्चन्द्रः	३९	हिस्ट्री ऑव इण्डियन लिटरेचर	३०
हर्षः	५६	हिस्ट्री ऑव संस्कृत लिटरेचर	३१, ५८
हस्तिमल्लः	८१	हेमचन्द्रः	८४

अनुचिन्तने समागताः ग्रन्थाः ग्रन्थकाराश्च : २३५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुचिन्तने समाहिताः काव्यकलात्मक परिभाषिकशब्दाः

अक्षसूक्तम् १७७
अतिशयोक्तिः ९२, १२३, १३२
अनन्तविस्तारः २३
अनुप्रासः १२३
अनुभूतिः ११२
अनुभूतेः प्रतिबद्धता १०२
अनुमानम् १०९, १३२
अन्तःप्रेरणा १७
अन्तरितावेष्टनम् ९९
अपह्नुतिः १०९
अर्धपादवेष्टनम् ९९
अन्तर्वृत्तेः प्रधानता ११८
अर्थान्तरन्यासः ९२, १३२
अलङ्कारवादः १०
अलौकिकैश्चर्यम् २३
अल्पत्वम् १५
अवरोहीवर्णः १३६
अवान्तरभावना १६
अष्टतालः १३६
अष्टतालितालः १२५
असंगतिः १०९
असत्समुच्चयः १०९
असाधारणशक्तिः २३
असंलक्ष्यक्रमव्यंग्यम् १
अहेतुः १०९
आक्षेपः १०९
आत्मनिष्ठता ५, ५०, ११२
आत्माभिव्यक्तिः २२, ८१
आत्माभिव्यञ्जनम् ३
आन्तरिकसुन्दरता ११२
आध्यात्मिकी ३१
आरण्यकगानम् १७९
आरोहीवर्णः १३६
आलम्बनम् २१
आलापः ८
आसावरीरागः १२५, १३५
उत्प्रेक्षा १२३, १३२
उदात्तम् ९१
उद्दीपनम् २१
उद्गीतिच्छन्दः ८
उद्गीथः १७९
उपगीतिच्छन्दः ८
उपजातिः ३९
उपन्यासः १५
उपद्रवम् १७९
उपमा ९१, १०९, १२३, १२४, १३२
ऊहगानम् १७९
ऋषभः स्वरः १३६
एककलतालः ६७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एकतालः १३६
एकभावान्वितदीर्घबन्धम् २७
एकान्तसङ्गीतम् १७२
एकान्तरितम् ९९
औडुवत्वम् १५
कथाकाव्यम् ११
कथावस्तु ९७
कन्नडरागः १३५, १३८
करुणगीतिः ३६
करुणभावः १०
कर्त्तदीपकम् १०९
कलहान्तरिता ६३
कलासौन्दर्यम् २४
कल्पनात्मकता ११२
कल्पनाचमत्कारः २२
कल्पनावैचित्र्यम् १०२
काव्यप्रक्रिया १७
काव्यविम्बम् ९
काव्यमूल्यम् ८७
काव्यलिङ्गम् ९२, १३२
कुण्ठा १३
कैवल्यमहोत्सवः १२८
क्रियाङ्गम् १३६
खण्डिता ५६, ६३
गान्धाररागः १३६
गीतिकाव्यम् १
गीतिच्छन्दः ८
गीतिकेन्द्रविन्दुः ११
गीतिमुक्तकम् २६
गीतियतिः ६६
गुण्डक्रियारागः १३६
गुम्फनवैशिष्ट्यम् २५
गुर्जररागः १२५, १२६, १३५, १३७
गेयता ३, ८, ८२, १०२, ११२
गौडीरीतिः ६२, १३५
ग्रहांशः १५
ग्रामगानम् १७९
चतुष्कलतालः ६७
चमत्कृतिः २५
चर्वणम् १२
चर्वणाप्रक्रिया २४
चाक्षुषः विम्बम् ९४
चित्रकाव्यम् ३५
चित्रात्मकता ५, १३, २४; ११८
चित्रावृत्तिः ६६
छन्दःप्रावेक्षणम् १९
छन्दोबद्धम् १२
छान्दसभाषा ३०
जातिः १५, १०९
जीवनदर्शनपद्धत्तिः १४४
जीवनमूल्यम् १३०
टेक-ध्रुवम् ११, १२
तरलता ११२
तारः १५
तारषडजः १२५
तालः १६,१३९
तालचिउडः १३६
तालपथः १३९
तालप्राणः १३९
तालबद्धम् २७,११२
ताललयः ६६
तुल्ययोगिता ९१
थेर-थेरीगाथा १४४,१४५,१४६,१४७
देशरागः १२५,१२६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

देशवराडीरागः १२५
देशवरालिरागः १३६
देशीगानम् १४३
देशीरागः १३५,१३७
द्व्यन्तरितम् ९९
द्वन्द्ववृत्तिः १३
द्विकलतालः ६७
धैवतः १३६
ध्वनिकाव्यम् ५५
ध्वनिगतविशेषता २५
नदीसूक्तम् ३२
नरकाव्यम् ३०
नवोढा ५६
नाटचालङ्कारः १०९
नाटचशास्त्रम् १०
नादः १४
नादमाधुर्यम् १६,८८
नादसौन्दर्यम् ८
नादानुकृतिः ११०
नियन्त्रणशक्तिः १२
निरपेक्षता ५
निष्क्रियबुद्धिवादिता १३
नीवीबन्धनम् ९०
न्यासः १५
पदकदम्बकम् ९
पदलालित्यम् ११८
पञ्चमरागः १३६
परजरागः १२५
परस्परनिरपेक्षता २५
परिकरः १०९
परिवृत्तिः १०९
परोक्षकृता ३१
परोक्षानुभूतिपरकम् २७
पर्यायोक्तम् ९१
पादवेष्टनम् ९८
पिहितम् १०९
पुनरुक्तवदाभासः ९०
पुरुषार्थः १७६
पुरूरवउर्वशीसंवादः १७८
पूर्वापरसम्बन्धविहीनता ५
प्रकृतिचित्रणम् १०२
प्रतिभा ९
प्रतिमण्ठतालः १२५
प्रतिमनृतालः १३६
प्रतिहारः १७९
प्रत्यक्षकृता ३१
प्रवन्धकाव्यम् १,११,२४
प्रवन्धगीतिः ६८
प्रवन्धसङ्गावेऽप्यात्मनिष्ठता २
प्रभावक्षमता २३
प्रमिताक्षरा ४०
प्रवत्स्यत्पतिका ५६
प्रवाहः ३
प्रवासी ५७
प्रश्नोत्तरकाव्यम् १०९
प्रस्तावः १७९
प्रहर्षिणी ४०
प्राक्तनगीतिः ६७
प्राकृतभाषा १४२
प्रेम २२
प्रौढानायिका ५६
वहुत्वम् १५
बुद्धितत्त्वम् १२
बोधवृत्तिः १३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भावगूढता ८८
भावबन्धता ५०
भावबोधः ८
भावमयता ३
भावसघनता ८,१०२
भावसान्द्रता ५,८१,११२
भावसौन्दर्यम् २१,२४
भावसंगीतम् ८
भावातिरेकः ४,५,११
भावात्मकता २
भावानां समवायः ५०
भावानुकूलवातावरसृष्टिः २१,२४
भावानुगामिनी २१
भावाभिनिवेशः ११
भावान्वितिः ११,८२
भाषाप्रौढता ५८
भाषाङ्गम् १३६
भैरवरागः १२५,१३७
भ्रान्तिमानलङ्कारः १०९
मधुरता ११८
मध्यमः स्वरः १३६
मध्यमकाव्यम् १
मनोरागाणामभिव्यक्तिः १०२
मनोविज्ञानम् १०
मन्द्रः स्वरः १५
मन्दाक्रान्ता ५०,६५,९३,९६
माणवगौडीरागः १३५
मात्रिकच्छन्दः १४
माधुर्यम् ३,५०
मानवती नायिका ६४
मानसशक्तिः १३
मानवीकरणम् ४६
मानौत्सुक्यम् ५७
मार्गगानम् १४३
मार्मिकता ५,११८
मालती ४०
मालवरागः १२५
मौलितम् १०९
मुग्धा नायिका ५६
मुक्तकम् १
मुक्तकपद्यम् १२,२५
मुक्तकं गीतिकाव्यम् २४
मूर्च्छना १३७
मौडवजातीयम् १३८
यतितालः १२५,१३६
यतियतितालः १३६
यमकः ९०,१२३
यम-यमी संवादः १७८
युक्तिकाव्यम् १०९
रञ्जकता ५
रयणीयता २६
रसचर्वणा २६,१११
रसप्रवणता १०४
रसमुक्तकम् २६
रसवत्-अलंकारः १०९
रसवादः १०
रसात्मकता १०,२४
रसानुभूतिः १०
रसेतरमुक्तकम् २६
रहस्यानुभूतिः २२
रागः १३६
रागाङ्गम् १३६
रागविशेषयुक्तात्मनिष्ठता ११८
रागात्मकता ११२,११८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रागात्मकवृत्तिः ११
रागात्मिकानामनुभूतीनां सान्द्रता ५
रामकरी १२५
रासविलासः ६५
रीतिवादः १०
रूपकम् ९१,१०९,१२३,१३२
रूपकतालः १२५
लघुमात्रा १३९
लयः १६
लयात्मकता १०२
लयविस्तारः ८
ललितपदशय्या १२३
लाटानुप्रासः ९०
लेशः १०९
लोकतत्त्वम् १४८
वस्तुवर्णनम् ११
वक्रोक्तिवादः १०
वज्जा १५१
वसन्ततिलका ४०,११०
वसन्तरागः १२५,१३५
वाक्योत्तरम् १०९
वाग्वैदग्ध्यम् १०
वाच्यमुक्तकम् २६
वार्णिकच्छन्दः १४
विधागतवैशिष्ट्यम् २४
विप्रलम्भशृङ्गारः ३४
विराट्तत्त्वम् २२,२३
विरोधः १०९
विलम्बितलयः ६७
विशुद्धभावात्मकता ५०
विशेषः १०९
विषमालंकारः १०९
विषयवैविध्यम् २४
विस्मयः २२
वृत्तिः ६६
वीररसः १२४
वैदर्भीरीतिः ५४,६१,११०,१३५
वैदग्ध्यमंगीमणितिः २६
वैयक्तिकता १०२,११२
वैयक्तिकानुभूतिः ३,११८
व्यञ्जनावृत्तिः १०
व्याजोक्तिः १०९
शब्दचयनमथवाशब्दसाधना ३
शब्दलययोः सामञ्जस्यम् २
शब्दसाधना ६४
शार्दूलविक्रीडितम् ११०
शिखरिणी ८३, ११०
शिवतत्त्वम् २०
शिष्टकाव्यम् ३४
शृङ्गाररसः १२४
शृङ्गारभावना ११२
शृङ्गारिकगीतिकाव्यम् ५०
श्रावकध्वनिः १४
षडजः १३६
षाडवत्वम् १५
सङ्गीतरत्नाकरः ९
सङ्गीतसौन्दर्यम् ५८
सङ्गीतात्मकता ३,५,७,१३
सङ्गीतधर्मः १६
सञ्चारीवर्णः १३६
सन्देशकाव्यम् २४,२८
सब्लाइम २३
समर्पण प्रवृत्तिः ८२
समस्यापूर्त्यात्मिकम् ९६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समासोक्तिः ९१
समाहितप्रभावः ५,११८
समाहारशक्तिः १७
सरमापणिसंवादः ९६,१७८
सरलाभिव्यक्तिः ८२
सहजतरलता १०२
सहजान्तःप्रेरणा ५,८२
सहोक्तिः १०९
सात्त्विकम् २२
सुकोमलभावना ३,५०
सूक्ष्मम् १०९
सोरठरागः १२६
सौन्दर्यम् २२
सौराष्ट्ररागः १३६
संक्षिप्तता ५,१६,११२
संयोगशृङ्गारः ३४
संवेद्यता १२
संवेदनशीलता ११८
संवेदना १८
संस्कृतभाषा १७५
संस्कृतगीतिकाव्यम् ६७
स्तुतिपरकम् २७
स्थायीवर्णः १३६
स्पष्टता ३
स्फोटः १७
स्मरणालङ्कारः ९१
स्रग्धरा ८३
स्वच्छन्दगीतिकाव्यम् २७
स्वच्छन्दतावादः २२,२४
स्वपरता १०२
स्वरतानालापः १२
स्वरसाधना ४
स्वाधीनभर्त्तृका ६३
स्वानुभूतिपरकम् २७
स्वेदसात्त्विकभावः १११
हृदयद्रावकता १०२
हृदयमुक्तता २६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुचिन्तने समाहिताः व्यक्तयः देवताश्च

अगस्त्यः	१८१	गरुडः	७८
अग्निदेवः	३०	गोम्मटस्वामी	१२६
अपालभा	१८१	घोषा	१८१
अरविन्दः	९७	चन्द्रोदयपुत्रः	२२४
अर्जुनः	३७	जनकः	१२०,१२१
अश्वत्थामा	७८	जयवर्मा	१२७
इन्द्रः	१९०	जीमूतवाहनः	७८
उदयनः	६७,७७	जुह्वः	१८१
उर्वशी	७२	ज्येष्ठकलशः	५९
उषादेवी	३०,३४	ताटिका	१२०
ऋषभदेवः	१२७,१२९,१३१,२२४	तारा	३७
ऋष्यशृङ्गः	३७,३८	तीर्थंकर नेमिनाथः	४९
कक्षीवान्	१८१	दशरथः	१२०,१२१
कमठः	९७,१०४	दुर्योधनः	३७
कण्वः	६९	दुष्यन्तः	६९
कल्क्यावतारः	११९	द्रुपदः	३७
कामदेवः	११५	द्रौपदी	७५,७८
कार्त्तिकेयः	७३	धर्मराजः	३८
कुन्ती	७५	धरणेन्द्रः	९८
कुवलयवती	४८	नरहरिः	११९
कूर्मावतारः	११९	नलः	३७
कृष्णः	६,३७,६१,११४,११५,११६,११७	नागराजः	९८
		नाभिरायः	१२९
कृष्णदेवः	११५	नीलाञ्जना	१२९,१३१
कृष्णावतारः	११९	पण्डिताधात्री	१२८,२२५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पद्मावती ९८
परशुरामावतारः ११९
परशुरामः १२१
पार्श्वनाथ तीर्थंकरः ९७,९८
पुरुखाः ७२
प्रह्लादिनी (राज्ञी) २२४
बुद्धावतारः ११९
ब्राह्मी देवी ९७
भरतचक्रवर्ती २२४
भीमसेनः ७८,७९
भोजदेवः ६२
मरुदेवी १२७
मरुभूतिः ९७,१०४
महाकालः ८५
महादेवः ३७
महावल १२७,१२८
महामतिः १२८
माधवः ७९
मालती ७९
मीनावतारः ११९
मुक्तिकलशः ५९
यक्षः २०५
यक्षपत्नी २०५
युधिष्ठिरः ३८,७८
रन्तिदेवः ८५
राजकलशः ५९
राजमती ४९
राजुलः १९६
राधा ६,६४,११४,११५,११६,११७
रामः ३२,७५,१२०,१२४,२३२
रामावतारः ११९
रावणः ७५,१२४
रोमशा १८१
लक्ष्मणः २३२
लक्ष्मणसेनराजा ४८
ललिताङ्गः १२७,१२८,१३०,१३१
लोपामुद्रा १८१
लोमपादः ३७
वज्रजङ्घः १२७,१२८,२२४
वज्रबाहुः १२८,२२४
वज्रनाभिः १२७,१२८
वराहावतारः ११९
वरुणदेवः ३०,३२
वलराम ४२
वसन्तकः ६७
वसिष्ठः ३२,१२१,१८९
वसुन्धरा ९७,१२८, २२४
वामनावतारः ११९
वायुदेवः ३०
वासवदत्ता ६७,७७
विश्ववारा १८१
विश्वसेनः ९७
विश्वामित्रः ३२,१२०,१९०
शकुन्तला ६९
शङ्करः ११५
शङ्खचूडः ७८
शतमतिः १२८
शम्बरः ९७,९८
श्रीकृष्णः ४९
श्रीधरः १२७,१२८
श्रीमतिः १२७,१२८,१३०,१३१
सम्भिन्नमतिः १२८
सागरिका ७७
सीता ३६,१२२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुग्रीवः	३७	सूर्या	१८१
सुदासः	३२,१८९	सूर्योदय पुत्रः	२३४
सुप्रभः	२२४	स्वयम्बुद्धः	१२८
सुविधिः	१२७	स्वयम्प्रभा	१२८
सुविधिपुत्रः	१२७	हनुमान्	७५,१२२
सूर्य देवः	३०	हर्षवर्द्धनः	७६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुचिन्तने समागतानां देशनगरग्रामवनपर्वत-नदीनां नामानि

अंगदेश:	१८०	कुरुक्षेत्रम्	८५,१८०,२०७
अंजसी	१८०	कुरुजनपद:	२३२
अंशुमती	१८०	कुलिशी	१८०
अनितमा	१८०	कैलासपर्वत:	४३,८६,२०७
अयोध्या	२२४	कैलासपुरी	३७
अलका	४३,२१६	क्रौञ्चरन्ध्रम्	२१५
अवन्ती	६७,२०७	क्षीरसागर:	१२४
अश्मन्वती	१८०	गङ्गा	४३,४९,१८०
असिक्नी	१८०	गन्धमादनपर्वत:	७३
आपया	१८०	गन्धवती	२०७
आम्रकूट:	८५,२०७	गन्धिलदेश:	२२४
आर्जीकीया	१८०	गम्भीरानदी	२०७
उज्जयिनी	६७,८५,२०७	गान्धारदेश:	१८०
उत्पलखेटकम्	२२४	गोदावरी	३७,२२४
ऋष्यमूकपर्वत:	१२२	गोममती	१८०
कनखल:	८५,२०७	चर्मण्वती	२०७
कल्याणनगरम्	५९	चित्रकूटपर्वत:	२२४
कान्यकुब्ज:	५९	चेदिदेश:	१८०
काशी	५९	जम्बूद्वीप:	२२४
काश्मीर:	५९	जाह्नवी	४३,१८०,२०७,२२४
कीकट:	१८०	तुष्टामा	१८०
कुमानदी	१८०	दण्डकवनम्	२२४
कुमुनदी	१८०	दशपुरम्	२०७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दशार्णदेशः	२०७	वितस्ता	१८०
दृषद्वती	१८०	विदिशा	२०७
देवगिरिः	२०७	विदेहः	२२४
धातकीखण्डम्	२३२	विन्ध्यः	२०७
नर्मदा	९८	विन्ध्यवनम्	९८
निर्विन्ध्या	२०७	विन्ध्याद्रिः	८५
नीचैःगिरिः	२०७	विपाशनदी	१८०
परुष्णीनदी	१८०	विवासीनदी	१८०
पुण्डरीकिणी	२२४	वीरपलीनदी	१८०
पुष्कलावती	२२४	वेत्रवती नदी	८५,२०७
पोदनपुरम्	९७	शिप्रा	८५,१८०
प्रयागः	२९,२२४	शुतुद्री	१८०
वह्लिकः	१८०	श्वेत्यानदी	१८०
भरतक्षेत्रम्	२२४	श्रवणबेल्गोलः	१२६
मथुरा	५९	सरयूनदी	१८०,२२४
मरुद्वधानदी	१८०	सरस्वती	८५,१८०,२०७
मलयपर्वतः	४८	साकेत नगरी	१२९
महावृषदेशः	१८०	सिन्धुनदी	९७,१८०,२०७
मालवा	८५	सुषीमा	१८०
मिथिला	२२४	सुसीमा नगरी	२२४
यमुना	४९,६१,१८०	सुसुर्त्तुः	१८०
यव्यावतीनदी	१८०	हरियूपीयानदी	१८०
रसानदी	१८०	हिमालय पर्वतः	८५,२०७
रेवानदी	८५,१०३,२०७	हेमकूटपर्वतः	६९
वाराणसी	९७		

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुचिन्तने समाहिताः सांस्कृतिक शब्दाः

अंशुकः	२००
अङ्कोटः	१९२
अगरूः	२२८
अङ्गदः	२११
अङ्गरागः	१९२
अजः	१८३,१८६
अञ्जनम्	१९५,२०४
अट्टालिका	१९७
अतिथित्वः	१८७
अधोवस्त्रम्	१८५,२१४,२१५
अन्धत्वम्	१८८
अन्नम्	२२६
अपूपः	१८६
अरालकेशाः	१९९
अलकबन्धनम्	२०४
अलकसंयमनम्	२०४
अवतंसः	२०२
अशोकः	२१४
अशोकपुष्पम्	२०१
अश्वः	१८२,१८७,२२७
अश्वावती (ओषधिविशेषः)	१८८
अष्टकर्ण्यः	१८३
अष्टप्रतिहार्यम्	१२७
असिः	२२३
असुरः	१८९
अस्मचक्रम् (चरखी)	१८३
आखेटः	१८३
आघातिः (झाँझ)	१८८
आजिः (धावनक्षेत्रम्-खेलका मैदान)	१८८
आध्यात्मिक सौन्दर्यम्	१८
आपणः	२०६
आभूषणम्	१८२
आम्रः	१९१,१९२
आलक्तकम्	२०१,२०६
आवासः	२२७
इक्षुः	१८७,१९१
इन्द्रियजनितसौन्दर्यम्	१८
इन्द्रनीलमणिः	२०१,२२२
उत्तरच्छदः	१८५
उत्तरीयम्	२१४,२१५
उत्पलम्	२१६
उपदेशकः	१८९
उद्वेग प्रलापः	१९४
उद्यानक्रीडा	२०४
उपवनम्	१९१
उपाङ्गम्	१३६
उपास्तिः	१९०
उरोजः (ओषधिविशेषः)	१८८
उलूकः	२३१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उष्ट्रः १८३,१८५
ऊर्जयन्ती (ओषधिविशेषः) १८८
ऊर्दरणः (ओषधिः) १८३
ऊर्ध्ववस्त्रम् (अधिवासः) १८५
ऋणपरिशोधनम् १८६
एकान्तवादः १२८
ओतुः (ऊन) १८४
ओपशः (वर्तुलाकारकेशरचना) १८८
कङ्कणम् २०९,२२७,२२९
कञ्चुकी २१५,२१७
कज्जलम् २२०
कटकम् २२६
कदम्बः १९१,१९२,२००
कदली २२६
कनककमलम् १९८
कनककुण्डलम् २१७
कनकवलयः २०३
कनकसिकतानिक्षेपः २०४
कनकासनम् २२३
कन्दुकक्रीडा २०४
कपर्दः १८७
कपिः २२३
कपित्थः १९१,१९२
कम्बलम् १८५
करवालः २२३
कर्कया: (सारंगी) १८८
कर्णपूरः २०१
कर्णिकारः २०१
कर्पूरः २१८
कर्मकाण्डविधानम् ३३
कर्मारः १८४
कर्मभूमिः २२४
कलशम् १८२,२१६
कवरी २२४
कस्तूरिका २०१,२१७,२१८,२२०
काकः १९२,२२२
काञ्ची २०३,२१७,२१९,२२०
कादम्बरी १९७
कामपुरुषार्थः २१६
कार्पासिकः २००
कार्मुकम् २२३
कालीयकम् २०१
काष्ठा (खेल या दौड़ का मैदान) १८८,१८९
काहला २१८
कीरः २२२
कुक्कुरः २०९
कुङ्कुमः २०१
कुटिलकेशाः १९९
कुटीरम् १८७,२१४
कुठारः २२३
कुण्डलम् २१५,२१९,२२१,२२६
कुम्भः २१६
कुरवकः १९१,२०३
कुलम् १८८
कुष्ठः १८८
कुलालः १८४
कुल्या १८३
कूर्पासकम् २०९
कृपाणः २३१
कृषिः १८३
कृषिकर्म १९१
कृष्णागुरुः २००,२०१
केतकः १९१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

केतकी २००
केयूरम् २०३,२१५,२२१,२२६
केशबन्धनम् २०४
केशर पुष्पम् २००,२१८
केशरलेपनम् २०१
कोकः २२२
कोदण्डम् २२३
कौपीनम् २२६
कौशेयवस्त्रम् १९२,२००
कौस्तुम्भः २२६
कौञ्चः १९२
क्षत्रियः १८९
क्षीरम् २२६
क्षेत्रम् १८२
क्षौमवस्त्रम् २०१
खञ्जनः २२२
खरः ५२,१८३
खलाधानम् (खलिहान) १८३
खसः २२९
गजः १८३,२२२,२२३ २२७
गणः १८९
गदा २२३
गन्धर्वः १८९
गरुडयानम् २२३
गर्दभः १८५
गर्भरक्षणम् १८८
गर्भसंचारणम् १८८
गवयः २२३
गवाक्षः २०७,२२२
गायनकला १९६
गिरनगरपर्वतः ४९
गुडः १९१
गुप्तिः २२८
गुरुः १८९
गृहम् १८२,१८८
गृहदीर्घिका २१२
गृहवलिः १९१
गोचरभूमिः १८३
गोमयसारः १८३
गोमांसम् १८६
गोष्ठः १८३
गौः १८३
ग्रामः १८८,१८९,२०६
ग्रामचैत्यः १९१
ग्राम्यजीवनम् १९०
ग्रामणीः १८९,१९०
ग्रामपरिसरः १९२
ग्रामविथिका १९२
ग्रामवृद्धः २१३
ग्रीवाभूषणम् १८५
घण्टा २२८
घृतम् १८६,२१४,२२६
चकोरः २२२
चक्रवाकः २२२
चन्दनम् २०१,२१७,२२१
चम्पकः १९१
चन्द्रकान्तमणिः २०१,२१५
चन्द्रादित्यः ५४
चर्मकारः १८४
चषकः २१४
चित्रकला १९२
चित्रनिर्माणम् १९३
चित्रपटम् १२८
चीनांशुकम् २००

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चैत्यवृक्षः	१२८	दण्डः	२२३
छुरिका	१८४	दधि	१८६,१८७,२२६
जटावलयः	१८७	दर्पणः	२२३
जनः (जनता)	१८८	दशावतारः	१२७
जन्माभिषेकोत्सवः	१२९	दासः	१८२
जम्बूः	१९१,१९२	दुकूलम्	२००,२२०
जलक्रीडा	२१४	दुग्धम्	१८७,२२६
जलकोयष्टिः	२२२	दुन्दुभिः	१८८,२२८
जलजकेसरः	२२०	दूर्शः (वस्त्रम्)	१८५
जातिवृक्षः	१९१	देवः	१८९
जालपाशः	१८३	देवगृहम्	२२२
जालमार्गः	२१७	देवालयः	२२२
जीर्णशीर्णगृहम्	२१४	दोलाक्रीडा	२१८
तक्षकः	१८४	द्यूतकारः	१८६
तगरः	२२१	द्रम्यः	१८९
तण्डुलः	१८३	द्विजः	२२०
तन्तुवायः	१८४	द्विदलम्	१९६
तन्त्रम् (करघा)	१८५	द्विपट्टः	१८५
तल्पः	२२३,२२८	धनुः	१८३
तरलितहारः	२१९	धम्मिलः	२१८
तसरः (ढुरकी)	१८४,१८५	धारागृहम्	२०७
ताम्बूलम्	१९६,१९७,२१८	धूलिसालिकोटम्	२२७
तामरसः	२१६	धौतवस्त्रम्	२२६
तारहारः	२०२	नलिनः	२१८
तालः	२०६	नवकदम्बकः	२०३
ताप्यम् (रेशम)	१८५	नवकेसरः	२०३
तिलः	२२०	नागरिकजीवनम्	१९१
तिलकम्	२०४	नाडी (वंशी)	१८८
तुरङ्गम्	२२३	नाणकम्	१८६
तूणीरः	२२३	नापितः	१८४
तोरणः	२२२	नारङ्गम्	२२६
तैलम्	१९५	नारीशिक्षा	१९६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नाविकः १८४
निम्बः १९२
निर्विकल्पसमाधिः १०
निर्वाणपदम् १२९
निषङ्गम् २३१
निषादः १८४,१८९,२२९
निष्कम् १८५,१८७
निकेतनम् २२२
नीडः १९१
नीलांशुकम् २००
नीलोत्पलम् २२०
नूपुरम् १८७,२०३,२१५,२१७,२१९,२२०
नृत्यशाला २१८
पञ्चाननम् २२२
पञ्जरम् १९३
पण्यम् १८५
पताका २२३
पत्रच्छेदः २०२
पदमरागः २०१,२२२
परशुः १८४
परुष्णी (ऊनी वस्त्र) १८५
पर्षः (गट्ठर) १८३
पल्लवः २२०
पवस्तम् (चादर) १८५
पशुः १८२
पात्रम् १८४
पद्मस्थलम् २२०
परमौदारिकदेहः १२७
परिखशाः २२७
परुषाके १९५
पलाशः १९२
पारावतः १९२
पावकास्त्रम् २२३
पाषाणः १८९
पिता १८९
पिनाकम् २२३
पिप्पलः १९१
पीतवसनम् २१९
पुंगीफलम् १९६,२१८
पुत्तलिकाक्रीडा २०४
पुरोधा १८९,२१७,२२१
पुष्पकुन्दः २२०
पुष्पत्रोटनम् २०५
पुष्परथः २२३
पुष्पवलयः २२०
पुष्पाभरणम् २०१
पेशस् (सूतीवस्त्र) १८५
प्रच्छदपटः २१६
प्रदीपम् २१६
प्रायोपगमनसंन्यासः १२९
प्रवालमणिः २०१
प्रसाधनकला १९६
प्रियङ्गुलता १९८
फलम् २२६
बन्धूकः २२०
वध्र्यः (वृषभाः) १८६
व्राजपतिः (अधिनायकः) १८९
बाणः १८३,२२३
ब्राह्मणः १८९
भक्ष्यम् १९६
भ्रूविलासः १९५
भेरी २१८,२२८
भोगभूमिः १२७,२२४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भोज्यम् १९६
मकराकृतिकुण्डलम् २१९,२२१
मणिः १८७
मणिखचितकिरीटम् २२१
मणिमण्डपः २२३
मणिमयमुकुटः २२१
मणिमयसौधः २२२
मणिमयहारः २२१
मणिहारः २२६
मणिहर्म्यः २०६
मदिरापानम् १९२
मद्यम् २१४
मद्यासवः १९७
मधु १८६,१८७,२२२
मधूकः १९२, २२०
मधुपः २२३
मधुवारुणी १९७
मन्दारः २२०
मन्दारमाला १२८
मन्त्रिपरिषद् १८९
मयूरः २२२
मयूरपक्षम् १९८
मरकतम् २०१,२२२,२२७
मरालः २२२
महाव्रतम् २२८
महानीलमणिः २०१
महिषः १८६
महिषी १८४
मानस्तम्भम् २२७
मायागृहम् २२८
मार्गदर्शकः १८९
माला १८७
मालतीमाला १९१,२०३
मालाकारः १८४
मुक्ताजालः २०३
मुक्तादामः २१७
मुक्ताभूषणम् २०१
मुक्तामाला २००
मुक्ताहारः २०१,२१५
मुद्रिका २२१
मूर्च्छना २०६
मृगः १८४
मृदङ्गः २१८,२२८
मेखला २०३,२१५,२१७
मेघप्रतिच्छन्दः २०६
मेषः १८३,१८६
मोदकः १९६
मौक्तिकदाम: २२१
मौलश्रीः १९१
यन्त्रधारागृहम् २०७
यवः १८३
यवनः २२१
यवाङ्कुरः २०४
यानम् १८२
रज्जुः १८४
रक्तांशुकम् २००
रत्नजटितमाभूषणम् २०१
रथः १८३,१८४,२२३,२२७
रथकारः १८४
रशना २००,२०१,२०३,२१७,२१९,२२०
राक्षसः १८९
राजपथः २०६,२०७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

राजयक्ष्मा १८८
राशिः १९०
राष्ट्रम् १८८,१८९
रोटिका १८६,१९६
लम्बहारः २०३
लयः २०६
लोकनृत्यम् २०४
वकुलः १९१
वकुलमाला २०४
वज्रम् २१५
वदनम् १९१
वन्यगजः १८४
वयित्री १८५
वराहः १८४
वलयः २१९,२२०
वल्लकी २१८
वादनकला १९६
वायिका २२२
वायव्यास्त्रम् २२३
वासोवायः १८५
वितानम् २२१
विमानप्रतिच्छन्दः २०६
विलेयनम् १९७
विल्वः १९१
विश (वर्गः संघोवा) १८८,१८९
विशिखा (स्वर्णकारवीथी) २१५
वीणा १९२,१९३, १९४,१९५,२१८
वृषभः ५२,१८२
वेणीवन्धनम् १८७,२०४
वेणुः १८९
वेमः १८४
वैडूर्यः २२२
वैडूर्यमणिः २०१
वैद्यः १८४
वैश्यः १८९
व्याधः १८४
व्युतम् (बुनाकपड़ा) १८५
व्रतम् १८९
शंखः २२८
शतदलपङ्कजः २१६
शतारित्रा (नौका विशेष) १८६
शरभः २२३
शर्धः १८९
शाटिका २१५
शायकः २२३
शारङ्गम् २२३
शिखरवलयः २०३
शिञ्जावलयः २०३
शिप्रः (उष्णीषः) १८५
शिरिषपुष्पम् १९१,२१४
शिविका २२३,२२७
शुक–सारिका २०५
शूद्र १८९
शून्यवादः १२८
शूर्पः १८३
श्वानः १८३,१८६
श्येनः २२२
श्रङ्गबाणः २२३
षोडशभावना २२८
संगीतम् २०४
सक्तुकः १८६,१८७
सप्तसिन्धुः १९०
समवशरण भूमिः १२७
समवशरणवेदी १२७

अनुचिन्तने समाहिताः सांस्कृतिकशब्दाः : २५३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समवशरणसभा (तीर्थंकरकी धर्मसभा) १२९
समितिः (प्रमाद का त्याग) २२८
सर्वार्थसिद्धिविमानम् १२७
सारसः २२२
सारिका १९३,२२२
सिकतापर्वतक्रीडा २०४
सितमणिः २०१
सितांशुकम २००
सिन्दूरम् २१७,२२०
सिंहः १८४
सीरणः १९१
सुगन्धित द्रव्यम् १९२
सुरा (उत्तम शराब) १८७
सुवर्णम् १८२
सुवर्ण कुण्डलम् १८७
सुवर्णमुद्रा १८२,१८५
सूर्यकान्तमणिः २०१
सृणिः (हंसुआ) १८३
सोपानम् २२२
सोमरसः १८७
सोमावती (ओषधिविशेषः) १८८
सेनानीः १९०
सौधः २०६
स्फटिकमणिः २२२
स्यूतम् (सिला कपड़ा) १८५,२२६
स्वरः २०६
स्वर्णजटितकुण्डलम् २००
स्वर्णाभूषणम् २०१
स्वर्णमुद्रा १८२
स्रजः १९७
हंसः २२३
हंसदुकूलम् २२१
हयः २२३
हरिणः २२३
हर्म्यः २०६
हलः १८२,१९१
हारः १८७, २०३,२१९
हारयष्टिः २०३
हारयष्टिका २१७
हारशेखरः २०२
हारीतः २२२
हिरण्यकारः १८४
हिरण्यमयी १८४
हीरकः २२२
हूणः २२१
ह्रदः १८३

5334

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi